ताण्ड्यमहाब्राह्मणम् ।

सायणाचार्य्यविरचितवेदार्थप्रकाशनामधेय-

भाष्यसहितम् ।

श्रीआनन्दचन्द्रवेदान्तवागीशेन

परिशोधितं ॥

त्रयोदशाध्यायावधि समाप्तिपर्य्यन्त-

उत्तरोभागः ।

कलिकाता राजधान्यां

नूतनसंस्कृतयन्त्रे गणेशयन्त्रे रामायणयन्त्रे च

मुद्रितः ।

संवत् १९३० । सन् १८७४ ।

विज्ञापनम् ।

अस्य पूर्व्वस्मिन् भागे द्वादशाध्यायपर्य्यन्तो ग्रन्थोगतस्तस्य विज्ञापनप्रकरणे ग्रन्थसमुदायस्य प्रतिपाद्यादिविषयउक्तोऽतोऽत्र तस्य पुनरुक्तेः प्रयोजनाभावः । अस्मिन्नुत्तरभागे तु त्रयोदशाध्यायमारभ्य पञ्चविंशाध्यायपर्य्यन्तो ग्रन्थशेषो वर्त्तते अतः केवलमत्रस्थानामध्यायानाम्मध्ये कस्मिन् किं विषयो वर्त्तते तदत्राभिधीयते । तत्र प्रथमतस्त्रयोदशाध्याये तावत् स्तोमक्लृप्त्यादिविधानं, चतुर्दशे तु छन्दोमस्तोमक्लृप्तिः, पञ्चदशे अष्टाचत्वारिंशस्तोमक्लृप्तिः, षोड़शे अग्निष्टोमविकृतयः, सप्तदशे व्रात्ययज्ञाद्यग्निहोत्रसमाप्तिः, अष्टादशे उपहव्य ऋतपेय शुनाशीर्य्य वैश्यस्तोम तीव्रसुत वाजपेय राजसूयविधिः, ऊनविंशे क्रतुद्वन्द्वविधानं, विंशे अहीनादि कल्पनं, एकविंशे गर्गत्रिरात्रशेष चतूरात्र पञ्चरात्र सत्र वर्णनं, द्वाविंशे षड्रात्राद्येकादशरात्रपर्य्यन्त सत्र वर्णनं, त्रयोविंशे द्वादशरात्रादि द्वात्रिंशद्रात्र क्रतु वर्णनं, चतुर्व्विंशे त्रयस्त्रिंशद्रात्रमारभ्य संवत्सर पर्य्यन्तानि सत्राणि, पञ्चविंशाध्याये तु आदित्यप्रष्ठायनादि सहस्र संवत्सरसत्रान्तोनिरूपित इति ।

माघ १७९५ शक ।

श्रीगणेशाय नमः ।

ताण्ड्यमहाब्राह्मणं।

त्रयोदशोऽध्यायः ।

—०()०—

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥

इत्थं व्यूढद्वादशाहमध्यवर्त्तिनो दशरात्रस्यादितश्चतुर्णा-मह्नां स्तोमक्लृप्तिः प्रदर्शिता अथ पञ्चमस्याह्नः स्तोमक्लृप्तिं विधातुकामः तावद्बहिष्पवमानस्याद्यं स्तोत्रीयं तृचं दर्शयति ।

गोवित् पवस्व वसुविद्धिरण्यविदिति पञ्चम-स्याह्नः प्रतिपद्भवति ॥ १ ॥

प्रतिपद्यते प्रारभ्यते अनयेति प्रतिपत् यद्यप्यत्र प्रतिपदिति एकैव ऋक् प्रतीयते तथापि तृचसूक्तानामादिग्रहणेन विधि-रनादेश इति परिभाषितत्वात् एतदादिकस्तृच एव ग्राह्यः अयं तृचः पञ्चमस्याह्नः शाक्करपृष्ठस्य त्रिणवस्तोमस्य यदाद्यं बहिष्पवमानस्तोत्रं तस्य प्रारम्भे कार्य्य इत्यर्थः ॥ १ ॥

अस्मिन्नहनि अस्य तृचस्य सङ्गतिमाह।

गोविद्वा एतद्वसुविद्धिरण्यविद्यच्छक्वर्य्यः ॥२॥

स्तोमः अस्मिन्नहनि होतुः पृष्ठस्तोत्रशक्कर्य्यः स्तोत्रीया अत एतत् पञ्चममहः शाक्करं शक्कर्य्य इति यत् एतद्गोविद्गवाम् लम्भकं तथा हिरण्यवित् द्विविधं हिरण्यं रजतं सुवर्णञ्च तस्य लम्भकं तथा वसुवित् अनेकेषामपि वस्तूनां मणिमुक्तादीनां धनानां लम्भकं तस्मादेतैः पदैः शक्कर्य्य एव पशुशब्दसामान्या-दुच्यन्ते तास्तु पञ्चमेऽहनि सङ्गता इति तद्वा गोवित् इत्यादि-लिङ्गवतस्तृचस्य तेनाङ्गा सङ्गतिः ॥ २ ॥

ननु शक्करीणाङ्कथं हिरण्यादिलम्भकत्वमिति तत्राह।

पशवः शक्कर्य्यः सर्व्वं पशुभिर्विन्दते ॥ ३ ॥

शक्कर्य्यः पशवः पशुरूपाः पशुत्वञ्चोपपादयिष्यामः पशुभि-श्चापेक्षितं सर्व्वं धनं विन्दते पुरुषो लभत इति प्रसिद्धं तस्मात् शक्करीणां गवादिलम्भकत्वमुपपन्नं ॥ ३ ॥

अथास्मिन् तृचे लिङ्गान्तरं प्रदर्श्यानुगुण्यमाह।

त्वꣳ सुवीरो असि सोम विश्वविदित्येष वाव सुवीरो यस्य पशवस्तदेव तदभिवदति ॥ ४ ॥

त्वं सुवीर इति अस्मिन् तृचे सुवीरशब्दो दृश्यते यजमानस्य पशवः वसुभूता एष एव सुवीरः शोभनवीर्य्यवान् पशुमत्त्वाज्ञो-

ऽनुष्ठातुश्च पशवो भवन्ति शक्वरीणां पश्वात्मकत्वात् यदेतदृक्- सम्बन्धि पशुमत्त्वं तदेव तत् सुवीरशब्दोपेतं मन्त्रवाक्यमभिवदति अभिलक्ष्य प्रतिपादयति ॥ ४ ॥

अथ लिङ्गान्तरं प्रदर्श्य सङ्गतिमाह।

तास्ते क्षरन्तु मधुमद्घृतम्पय इति मधुमद्घृतं पयः पशवः क्षरन्ति तदेव तदभिवदति ॥ ५ ॥

तथा तस्मिन् तृचे तास्ते क्षरन्त्विति पादः श्रूयते पशवश्च मधुमत् माधुर्य्यवत् घृतं क्षरणशीलं पयः क्षरन्ति स्रावयन्ति पशवश्च शक्वर्य्य इत्युक्तं ताश्च पञ्चमेऽहनि सङ्गता इति तन्मन्त्र- वाक्यं तदेव तदभिवदति ॥ ५ ॥

अथानुरूपाख्यं द्वितीयं तृचं विधत्ते।

पवमानस्य विश्ववित्त्यनुरूपो भवति ॥ ६ ॥

अयमनुरूपाख्यो बहिष्पवमानस्य द्वितीयस्तृच इत्यर्थः ॥६॥

विश्वविदित्यस्य पदस्य तात्पर्य्यं दर्शयन्नङ्गा सङ्गतिमाह।

विश्वमेव तद्वित्तमभिवदति विश्वं हि पशुभि- र्विन्दते ॥ ७ ॥

तद्विश्वविदिति पदं विश्वं सर्वमेव वित्तं भोगसाधनमभि- वदति विश्वञ्च तद्वित्तं वेदनीयं लम्भनीयमिति व्युत्पत्त्या शक्वर्य्या-

त्वकैः पशुभिश्च विश्वं सर्व्वं वित्तं विन्दते लभते हि हेतौ हि यस्मादेवं तस्मादेव तत्कालेऽहनि अयं तृचः सङ्गत इत्यर्थः ॥ ७ ॥

अथ पादान्तरमनूद्यानुगुण्यं दर्शयति ।

प्रते सर्गा असृक्षतेति सृष्टानीव ह्येतर्ह्यहानि ॥८

असृक्षतेति भूतकालसम्बन्ध्ययं लेट् सृष्टेर्भूतकालः सम्बद्धः प्रतीयते एतर्हि एतस्मिन् काले अहानि च सृष्टानीव हि अनुष्ठानेनोत्पादितान्येव खलु अतः पूर्वेषां चतुर्णामह्नां निष्पन्नत्वात् तस्मादस्मिन्नहनि भूतकालसम्बन्धिसृष्टिलिङ्गकतृचो योग्य इत्यर्थः ॥ ८ ॥

पूर्वेष्वहःस्विव अनुरूपद्वितीयतृचस्य संज्ञां ब्रुवन् तद्वेदनफलञ्च प्रतिपादयन् प्रथमद्वितीयौ तृचौ संयुज्य विशिष्टफलहेतुतामाह ।

पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्वं रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूप एनं पुत्रो जायते य एवं वेद स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै ॥ ९ ॥

एतत् पूर्वमेव व्याख्यातं ॥ ९ ॥

अथ तस्यापि वक्ष्यमाणस्य स्तोत्रीयानुरूपतृचद्वयादूर्द्ध्वं सामद्वयं विधत्ते ।

सप्तर्चौ भवतश्छन्दसां धृत्यै ॥ १० ॥

एकं सप्तर्चं प्रथमं सूक्तं प्रसोमासो अधन्विषुरिति द्वितीयं सप्तर्चं सूक्तं प्रकविरिति एतौ सप्तर्चौ कार्य्यौ तत् छन्दसां गायत्र्यादीनां सप्तसंख्यानां धृत्यै धारणाय भवति ॥ १०

अथ सप्तर्चद्वयादूर्द्ध्वं चतुर्ऋचं विधत्ते ।

चतुर्ऋचो भवति प्रतिष्ठायै ॥ ११ ॥

चतस्र ऋचो यस्मिन् असौ चतुर्ऋचः पदं वयं न इत्यादीनां चतसृणामृचां सङ्घो भवतीत्यर्थः तच्च चतुर्ऋचस्य करणं प्रतिष्ठायै ॥ ११ ॥

अथ चतुर्ऋचादूर्द्ध्वं यास्ते धानामधुश्चुत इति तृचसूक्तं विधत्ते ।

तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति त्रिणव एव स्तोमो भवति प्रतिष्ठायै पुष्ट्यै त्रिवृद्वा एष पुष्टः ॥ १२ ॥

त्रीण्यृचान्नवकानि यस्मिन् स त्रिणवः स एव स्तोमोऽस्य बहिष्पवमानस्य स्तोत्रस्य भवति प्रतिष्ठायै प्रतिष्ठार्थं त्रयाणां नवकानां पादत्रयसाम्यात् पादत्रययुक्तस्य फलकादेर्लोके प्रतिष्ठानदर्शनात् त्रिणवस्य प्रतिष्ठाहेतुत्वं तथा पुष्ट्यै पुष्टिरभिवृद्धिः तत्प्राप्तिस्त्वयं त्रिणवस्तोमकृत एतत् त्रिवृद्धि सनवकात्मक-

त्रिवृत्स्तोम एव खलु पुष्टः त्रिरभ्यासेनाभिवृद्धः एष त्रिणव-स्तोमाख्यो भवति अतः त्रिणवस्य पुष्ट्यात्मकत्वात् पुष्टिहेतुत्व-मिति ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथ प्रथमस्याज्यस्तोत्रस्य स्तोत्रीयं तृचं दर्शयति ।

तव श्रियो वर्ष्यस्येव विद्युत इत्याग्नेयमाज्यं भव-ति ॥ १ ॥

तव श्रिय इति तृचः आग्नेयमग्निदैवत्यमाज्यं आज्यस्तोत्रं भवति ॥ १ ॥

तस्य तृचस्य पञ्चमेनाह्ना सङ्गतिमाह ।

श्रीर्वै पशवः श्रीः शक्वर्य्यस्तदेव तदभिवदति ॥२॥

श्रीर्वै सम्पद्रूपा एव पशवः लोके हि पशुमान् श्रीमानिति व्यपदिश्यते अतः शक्वर्य्योऽपि श्रीः श्रीरूपाः तास्च पञ्चमेनाह्ना सम्बद्धा अतः श्रिय इति श्रीशब्देन युक्तं मन्त्रवाक्यस्य पञ्चमे-नाह्ना सम्बद्धं शक्वर्य्य इति तत् यदेवाभिवदति ॥ २ ॥

अथ लिङ्गान्तरमनूद्यानुगुण्यमाह ।

अग्नेश्चिकित्त उषसामिवेतय इतीतानीव छन्दांस्यहानीत्याते यतन्ते रथ्यो यथा पृथगित्येव छन्दांस्यहानि यतन्ते ॥ ३ ॥

आतेयतन्त इति अस्मिन् पदे दृश्यते यतीप्रयत्न इति धातुः एतस्मिंस्तस्मिन् काले अहानि प्रथमद्वितीयादीन्यनुष्ठितान्यहानि एव आ इव आयतनं इति फलमभिलक्ष्य प्रयतन्त इव प्रयतमानानीव भवन्ति यस्मादुपसृष्टयतिधातुयुक्तस्तृचोऽस्मिन्नहनि विनियोगानुगुण इत्यर्थः ॥ ३ ॥

अथ द्वितीयस्याज्यस्य स्तोत्रीयं तृचं दर्शयति ।

पुरूरुणाचिद्ध्यस्त्यवो नूनं वां वरुणेति मैत्रावरुणं यद्वै यज्ञस्य दुरिष्टं तद्वरुणो गृह्णाति तदेव तदवयजति ॥ ४ ॥

पुरूरुणेति तृचः मैत्रावरुणं मित्रावरुणदेवताकं द्वितीयमाज्यस्तोत्रं भवति एवं वरुणस्य देवस्य प्रकाशनद्वारा तदेव यत् यज्ञसम्बन्धि दुरिष्टन्तदवयजति निरस्यति ॥ ४ ॥

अथ तृतीयमाज्यस्तोत्रं दर्शयति ।

उत्तिष्ठन्नोजसा सहेत्यैन्द्रं ॥ ५ ॥

उत्तिष्ठन्निति तृचस्यैन्द्रं इन्द्रदेवत्यं तृतीयमाज्यस्तोत्रं भवति ॥ ५ ॥

अथैतस्य उत्तिष्ठन्नित्यादिपदत्रयस्य तात्पर्य्यं दर्शयन् सङ्गतिमाह ।

पञ्च वा ऋतव उत्थानस्य रूपमोजसा सहेत्योजसैव वीर्य्येण सहोत्तिष्ठन्ति ॥ ६ ॥

अस्मिन् पादे उत्तिष्ठन्निति पदेन उत्थानं उद्गत्यावस्थानं प्रतीयते तस्य चोत्थानस्य च सन्ध्याद्याः पञ्चर्त्तवः रूपं ऋतुविशेषे हि सर्व्वमोषधिवनस्पत्यादिकं उद्गच्छत्युत्तिष्ठति अत उत्थानं वसन्ताद्यृतुपञ्चकं तस्मादस्याह्नःपञ्चमत्वेन पञ्चसंख्यायोगात् तत्प्रतिपादकेनोत्तिष्ठन्निति पदेन युक्तस्तृचोऽस्मिन्नहनि सङ्गतः अपि च ओजसा सहेत्यपि स च दृश्यते ततश्च ओजसैव बलात्मनैव वीर्य्येण सहोत्तिष्ठन्ति उत्थिताः सर्वेभ्योऽधिकाभवन्ति ॥ ६ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति ।

इन्द्राग्नी युवामिम इति राथन्तरमैन्द्राग्नं ॥ ७ ॥

इन्द्राग्नीयुवामिम इति तृचोराथन्तरं रथन्तरसाम्नः सम्बन्धि ऐन्द्राग्नं इन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं भवति कथमस्य रथन्तरसम्बन्ध उच्यते इन्द्राग्नी आगतं सुतमिति राथन्तरेऽहनि चतुर्थमाज्यं तत्र चेन्द्राग्नी इति सम्बोधनेनाभिमुखीकृत्य आगमनं सोमपानञ्च तयोः प्रार्थ्यते अस्मिन् तृचेऽपि तादृश एवार्थः इति अर्थसामान्यात् अस्यापि राथन्तरत्वं ॥ ७ ॥

नन्वेतत् शाक्वरपृष्ठ्यं पञ्चममहः न रथन्तरपृष्ठ्यं कुतोऽस्मिन्नहनि राथन्तरस्यैन्द्राग्नस्य सङ्गतिरिति तत्राह ।

रथन्तरमेतत्परोक्षं यच्छक्कर्य्यो राथन्तरमेव तद्रूपन्निर्द्योतयति स्तोमः ॥ ८ ॥

यच्छक्कर्य्यः शाक्करं साम एतत्परोक्षं परोक्षेण रूपान्तरेण वर्त्तमानं रथन्तरं रथन्तरादुत्पन्नत्वात् तदुत्पत्तिश्चैतरेयके समाम्नाता इदञ्च वा इदमग्रे रथन्तरमिति प्रक्रम्य वैराजवैरूपयोः सृष्टिमुक्त्वा ते द्वे भूत्वा इदञ्च वैराजञ्च रथन्तरञ्च वैरूपञ्चान्यमन्येतां तद्रथन्तरं गर्भमधत्त तच्छाक्करमसृजतेति तस्माद्रथन्तरमेव रथन्तरसम्बन्ध्येव तद्रूपं निर्द्योतयति प्रकाशयति स्तोमस्य तेषु चतुर्ष्वाज्येषु पूर्व्वोक्त एव त्रिणवः कार्य्यः बहिष्पवमानादीनां पञ्चानां प्रातःसवनिकानामेषां स्तोत्राणां इत्थं त्र्यस्तोत्रीया एव विहिता प्राकृतमेव गायत्रसामसु गातव्यं अन्यस्यानुपदेशादिति बोद्धव्यम् ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथ माध्यन्दिनस्य पवमानस्य त्रयः स्तोत्रीयास्तृचाः तत्र प्रथमं दर्शयति ।

अग्नीषोमद्युमत्तम इति विष्णुमत्यो गायत्र्यो भवन्ति ॥ १ ॥

सोमा अर्षन्तु विष्णव इति दर्शनाच्छत्रिन्यायेन अर्षा सोमेत्याद्यास्तिस्रोऽपि विष्णुमत्यं गायतश्चोभयं स्तोत्र्यो गायत्रीछन्दस्का एता माध्यन्दिनस्य पवमानस्याद्या भवन्ति ॥ १ ॥

विष्णुमत्यं गायतश्चोभयं स्तौति ।

ब्रह्म वै गायत्री यज्ञो विष्णुर्ब्रह्मण्येव तद्यज्ञं प्रतिष्ठापयति ॥ २ ॥

ब्रह्म ब्राह्मणजातिरेव गायत्री प्रजापतेर्मुखात्सहोत्पत्तेः यज्ञश्च विष्णुर्व्यापनशीलत्वाद्विष्णुशब्दाभिधेयस्तत्तथा सति गायत्रीस्तोत्रीयाः कुर्व्वन् ब्रह्मणि ब्राह्मणजातावेव यज्ञं प्रतिष्ठापयति ॥ २ ॥

अथ तृचान्तरं तस्य पवमानस्य दर्शयति ।

सोम उष्वाणस्सोतृभिरिति सिमानां रूपꣳ स्वेनैवैतास्तद्रूपेण समर्द्धयति ॥ ३ ॥

सोम उष्वाण इति तृचः स्तोत्रीयः माध्यन्दिनपवमानस्य तस्मिंश्च आनूपे गोमान् गोभिरच्छा इति गावः प्रतीयन्ते तच्च सिमानां शक्करीणामस्मिन्नहनि षष्ठभूतानां रूपं तासां पशु-

त्मकत्वात् पशवः शक्वर्य्य इति ह्याम्नातं तत्तस्मात्त्वेन स्वकीयेनैव रूपेण एताः सिमाः शक्वरीः समर्द्धयति समृद्धाः करोति ॥ ३ ॥

अथ तृचान्तरं विधत्ते ।

यत्सोमचित्रमुक्थ्यामिति गायत्र्यः सत्यस्त्रिष्टुभो-रूपेण तस्मात् त्रिष्टुभां लोके क्रियन्ते ॥ ४ ॥

यत्सोमचित्रमिति माध्यन्दिनपवमानस्यान्त्यस्तृचो भवति तत्रत्या ऋचो गायत्र्यक्षरसंख्यया गायत्रीछन्दस्काः सत्यो भवन्त्यस्त्रैष्टुभेनैव रूपेण वृषणशब्दयोगात् त्रिष्टुभो भवन्ति यस्मादेवं तस्मात्त्रैष्टुभां लोके स्थाने क्रियन्ते स्तोत्रीयात्वेन विधीयन्ते प्रकृतौ हि माध्यन्दिनपवमानस्यान्त्यस्य त्रिष्टुप्स्थानत्वं ॥ ४ ॥

अथ अर्षा सोम द्युमत्तम इति विहिते प्रथमे तृचे पूर्ववद्गायत्रं साम विधाय तद्वितिकर्त्तव्यताप्रतिपादकं ब्राह्मणञ्चातिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ५ ॥

गतमेतत् ॥ ५ ॥

अथास्मिन् तृचे सामान्तरं विधत्ते ।

यशत्रं भवति पशवो वै यशवं पशूनामवरुध्यै ॥६॥

यशवाख्यं साम गायत्र्यामन्तरं अस्मिन्नेव तृचे गातव्यं तत्र

यस्तं पशवो वै पशव एतत्साधनत्वात् तस्माद्यजमानं पशुना-मवरुध्या अवरोधनाय प्राप्त्यै भवति ॥ ६ ॥

अथास्य साम्नो गाने सान्तत्यं विधत्ते ।

सन्ततं गायति यज्ञस्य सन्तत्यै ॥ ७ ॥

सन्ततमविच्छिन्नं गायति यज्ञस्य सन्तानार्थं सामान्तरेषु हि प्रत्यृचं प्रस्तावादिभक्तिपञ्चकस्य सम्पूर्णस्य साम्नो गानात् विच्छेदो भवति अत तु प्रथमायामेव प्रस्तावभक्तिं कृत्वा उत्तरयोः प्रस्तावभक्तिमकृत्वा गानात् साम्नः सान्तत्यं भवति उत्तरयोः प्रस्तावभक्तिलोपार्थमत योनिभूते साम्नि तृचे यस्तस्य गानं इतरथा सामान्तरवदेकस्यामेकगानं स्यात् एतच्च सूत्रकृता सन्तनिचोद्यमानमेकैकस्यां सर्वमित्यादिना प्रपञ्चितं सन्ततं गायतीति च भक्तिलोपदर्शनादिति च वदता सूत्रकृता यस्त-सन्तनिनोरुत्तरयोः प्रस्तावभक्तिलोप एवाभिप्रेत इति अयमेवार्थो गम्यते ॥ ७ ॥

अथास्य साम्नः सम्बन्धिनीडाविभक्तिमनूद्यास्या सङ्गतिमाह ।

अध्यर्द्धेडं तथाह्येतस्याह्नो रूपं ॥ ८ ॥

इट् इडेत्येवं रूपा अध्यर्द्धइडा यस्मिन् तदध्यर्द्धेडं एतत् यस्तं तथा हि तादृशमेव खल्वेतस्य पञ्चमस्याह्नो रूपं अध्यर्द्धेडं पञ्चमस्येति द्वो इडाविभक्तिरनुक्रान्ता ॥ ८ ॥

अथास्मिन्नेव तृचे पुनरावृत्ते सामान्तरं विधत्ते।

शाकलं भवति ॥ ९ ॥

शाकलाख्यं अर्षा सोमेत्यस्मिन्नेवावृत्ते तृचे गेयं ॥ ९ ॥

तदेतत्प्रतिष्ठाहेतुरिति स्तौति।

एतेन वै शकलः पञ्चमेऽहनि प्रत्यतिष्ठत्प्रतितिष्ठति शाकलेन तुष्टुवानः ॥ १० ॥

एतेन खलु एतेन साम्ना पुरा शकलऋषिः द्वादशरात्रिके पञ्चमेऽहनि प्रत्यतिष्ठत् अनेन साम्ना स्तुत्वा पुत्रपश्वादिभिः प्रतिष्ठितोऽभवत् तस्मादिदानीन्तनोऽपि शाकलेन स्तुवन् प्रतिष्ठां लभते ॥ १० ॥

अथास्मिंस्तृचे पुनरावृत्ते पुनः सामान्तरं विधत्ते।

वार्शं भवति ॥ ११ ॥

वृशेन दृष्टं साम वार्शं अर्षा सोमेत्यस्मिन्नेव तृचे स्तोतव्यं ॥ ११

अथोक्तमृषिसम्बन्धं तदाख्यायिकया प्रदर्शयन् सर्व्वकामप्राप्तिसाधनतयैतत् स्तौति।

वृशो वैजानस्त्र्यरुणस्य त्रैधात्वस्यैक्ष्वाकस्य पुरोहित आसीत्स ऐक्ष्वाकोऽधावयत् ब्राह्मणकुमारं

रथेन व्यच्छिनत्स पुरोहितमब्रवीत्तव मा पुरोधायामिदमीदृगुपागादिति तमेतेन साम्ना समैरयत्तद्वाव स तर्ह्यकामयत काममनि साम वार्शं काममेवैतेनावरुन्धे ॥ १२ ॥

विजानस्य पुत्रो वृशो नाम कश्चिदृषिः स ऐक्ष्वाकस्य इक्ष्वाकुकुलजस्य त्रैधात्वस्य त्रिधातुः पुत्रस्य त्र्यरुणस्य एतन्नाम्नो राज्ञः पुरोहितः पुरोधा आसीत् स च ऐक्ष्वाको राजा रथवाहनाख्यानधावयत् शीघ्रं गमयत् पथो मध्ये व्यवस्थितं कञ्चिद्ब्राह्मणकुमारं ब्राह्मणपुत्रं रथेन रथावयवेन चक्रेण व्यच्छिनत् विच्छिन्नावयवमकरोत् स कुमारः पुरोहितं वृशमब्रवीत् तव पुरोधायां पौरोहित्ये वर्त्तमाने मां इदानीं ईदृक् एवं रूपं हिंसनं उपागात् प्राप्नोदिति एवमुक्तवन्तं एतेन वार्शेन साम्ना समैरयत् सङ्गतावयवमकरोत् तद्वाव तत् खलु तर्हि तस्मिन् काले स ऋषिरकामयत यस्मादेवं तस्माद्वार्शं साम काममनि कामप्रदं अतोऽनेन स्तुवन् एतेन साम्ना अभिलषितं सर्वमेव काममेति कामयितव्यं फलं अवरुन्धे लभते ॥ १२ ॥

अस्मिन् साम्नि अध्वर्युरुपाख्याने इडानादेशे इति सूत्रकारेण अध्वर्युरिडा आदिश्यत इत्युक्तं तस्मात् सिद्धवत् अस्मिन्नहनि अनुरूपं दर्शयति।

अध्वर्युरिडं तथाह्यतस्याह्नो रूपं ॥ १३ ॥

उपास्थाने आदिष्ट इट् इडेति एवं ब्रूयात् अध्वर्य्युः इडा यस्य तत्तथोक्तं तथा खल्वेतस्य पञ्चमस्याह्नो रूपं प्रागुक्तं ॥१३॥

अथान्यस्मिन् तृचे सामान्तरं विधत्ते ।

मानवं भवति ॥ १४ ॥

मनुना दृष्टं साम मानवन्तत् सोम उष्वाणः सोतृभिरिति विवक्षिते तृचे गातव्यं ॥ १४ ॥

अथैतत् स्तौति ।

एतेन वै मनुः प्रजातिं भूमानमगच्छत्प्रजायते बहुर्भवति मानवेन तुष्टुवानः ॥ १५ ॥

एतेन खलु साम्ना पुरा मनुः प्रजातिं प्रजोत्पत्तिभूमानं अतिशयेन बहुत्वञ्चागच्छत् तस्मादद्यतनोऽपि मानवेनानेन साम्ना स्तुवन् प्रजायते पुत्रपौत्रैणोत्पद्यते ततो बहुपुत्रादिभिरनेकविधश्च भवति ॥ १५ ॥

अथास्मिन्नेव तृचे पुनरावृत्ते सामान्तरं विधत्ते ।

आनूपं भवति ॥ १६ ॥

आनूपेन दृष्टं सामानूपं तत्सोम उष्वाण इति तृचे गेयं भवति ॥ १६ ॥

अथैतत्पशुबाहुल्यमिति स्तौति ।

एतेन वै बभ्रश्व आनूपः पशूनां भूमानमाश्नुत पशूनां भूमानमश्नुत आनूपेन तुष्टुवानः ॥ १७ ॥

आनूपो अनूपस्य पुत्रः बभ्रश्वाख्य ऋषिरेतेन साम्ना पुरा पशूनां भूमानं बहुलत्वं आश्नुत प्राप्नोत् अतोऽद्यतनोऽप्यानूपेन स्तुवन् पशूनां बहुलत्वं प्राप्नोति ॥ १७ ॥

अथास्मिंस्तृचे सामान्तरं विधत्ते।

वाम्रं भवति ॥ १८ ॥

वम्रेण दृष्टं साम वाम्रं तत् सोम उष्वाणा इत्यस्मिंस्तृचे आहत्ते गेयं ॥ १८ ॥

अथ संज्ञयैवैतत्साम प्रशस्तं तेन चाह्न एव प्रशंसा कृता भवतीत्याह।

सामार्षेयेण प्रशस्तं यं वै गां यमश्वं यं पुरुषं प्रशंसन्ति वाम इति तं प्रशंसन्त्यह्नरेवैतेन प्रशंसन्ति ॥ १९ ॥

एतत्साम आर्षेयेण ऋषिसम्बन्धेन प्रशस्तं श्रेष्ठं लोके यं गां यमश्वं यं पुरुषं प्रशंसन्ति स्तुवन्ति लौकिकाः तं वाम इति ऐश्वर्यवाचकेन वामशब्देन प्रशंसन्ति तस्मादिदं साम रेफविकृत-वामशब्दाभिधेयत्वात् प्रशस्तं अनेन साम्ना अह्नरेव द्वाशरात्रिकं पञ्चममिदमह्नरेव प्रशंसन्ति ॥ १९ ॥

आम्नाने स्वर्क्षोपाख्याने पूर्ववदादिष्टामध्यर्द्धिडां सिद्धवदनूद्य अह्ना सारूप्यं दर्शयति।

अध्यर्द्धेडं तथा ह्येतस्याह्नो रूपं॥ २०॥

गतमेतत्॥ २०॥

अथास्मिन्नेव तृचे गेयं सामान्तरं दर्शयति।

त्रिणिधनमाग्नेयं भवति प्रतिष्ठायै॥ २१॥

त्रीणि निधनानि यस्य तत्त्रिणिधनमाग्नेयं अग्निसम्बन्धि एतत् संज्ञं साम सोम उष्वाण इति तृचे गेयं तच्च निधनत्रयवत्त्वेन त्रित्वसंख्यायोगात् प्रतिष्ठायै प्रतिष्ठानाय साम्येनावस्थानाय भवति लोकेऽपि त्रिपदाः फलकादयः प्रतिष्ठिता दृश्यन्ते तानि त्रीणि निधनानि यस्य साम्नो योन्यां प्रसोम देव वीतय इत्यस्यां प्रदर्शयति आ २ १ उवा २ ३ णा २ ३ ४ सा नह्मा ३ १ उवा २ ३ स्प्र २ ३ ४ ताम्॥ २१॥

अथोक्तमग्निसम्बन्धं प्रदर्शयन् तेजोब्रह्मवर्चसप्रापकत्वेनैतत्साम प्रशंसति।

अग्निः सृष्टो नोददीप्यत तं प्रजापतिरेतेन साम्नोपाधमत् स उददीप्यत दीप्तिश्च वा एतत्साम ब्रह्मवर्चसञ्च दीप्तिञ्चैवैतेन ब्रह्मवर्चसञ्चावरुन्धे॥ २२॥

अग्निः प्रजापतेर्म्मुखात् सृष्ट उत्पन्नः नोददीप्यत ऊर्द्ध्वं नाज्वलत् तमग्निं प्रजापतिः स्रष्टा एतेन साम्ना साधनेन उपाधमत् वायुना प्राज्वलत् ध्मा शब्दाग्निसंयोगयोरिति धातुः सोऽग्निरुददीप्यत ऊर्द्ध्वदीप्तोऽभूत् तस्मादेतत्साम दीप्तिसाधनत्वाद्दीप्त्यात्मकं तथा ब्रह्मवर्च्चसञ्च अतएतेन दीप्तिब्रह्मवर्च्चसोभयरूपेण साम्ना यजमानः दीप्तिं शरीरतेजश्चैव ब्रह्मवर्च्चसं श्रुताध्ययनादिजन्यब्राह्मतेजश्चावरुन्धे प्राप्नोति ॥ २२ ॥

अथ यत् सोमचित्तमिति विहिते तृचे गातव्यं साम दर्शयति।

शैशवं भवति ॥ २३ ॥

शिशुना दृष्टं साम शैशवं तद्यत् सोम चित्तमिति तृचे गातव्यं ॥ २३ ॥

अथैतत्साम यज्ञहेतुरिति विवक्षुस्तदर्थमाख्यायिकामाह।

शिशुर्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत् स पितॄन् पुत्रका इत्यामन्त्रयत तं पितरोऽब्रुवन्नधर्म्मं करोषि यो नः पितॄन् सतः पुत्रका इत्यामन्त्रयस इति सोऽब्रवीदहं वाव पितास्मि यो मन्त्रकृदस्मीति ते देवेष्वपृच्छन्त ते देवा अब्रुवन्नेष वाव पिता यो

मन्त्रकृदिति तद्वै स उदजयदुज्जयति शैशवेन तुष्टु-वानः ॥ २४ ॥

शिशुर्नामाङ्गिरसः अङ्गिरोगोत्र ऋषिः मन्त्रकृतां मन्त्रस्य कर्तॄणां तथा महात्मनान्तर्हितानाम्मन्त्राणां द्रष्टॄणाम्मध्ये मन्त्रकृत् मन्त्रस्य कर्त्ता अतिशयेन मन्त्रस्य द्रष्टासीत् स च विद्यातिशयेन हृष्टः सन् पितॄन् स्वकीयान् इत्यामन्त्रयत पुत्रा एव पुत्रका इत आगच्छतेति आमन्त्रणमाह्वानं कृतवान् एवमामन्त्रणानन्तरं शिशुं पितरोऽब्रुवन् कथमिति हे शिशो त्वमधर्म्ममत्यर्थं करोषि यत् त्वं पितॄन् तव पितृभूतान् सतो भवतः नोऽस्मान् पुत्रका इति वैपरीत्येनामन्त्रयस इति एवं तैरुक्तः सन् स पुनरब्रवीत् अहं वाव अहमेव युष्माकं पितास्मि भवामि योऽहं मन्त्रकृन्मन्त्रकर्त्ता द्रष्टास्मीति अतः सोऽहमेव पितास्मीति एवं परस्परं विवदमानाः ते देवेष्वपृच्छन्त विवादनिर्णेतृषु देवेषु सत्सु प्रश्नं कृतवन्तः अस्माकम्मध्ये कोवा पिता के पुत्रा इत्येवं पृच्छ्यमानास्ते देवाः युष्माकम्मध्ये यो मन्त्रकृत् एष एव पिता अन्ये पुत्रा इति तत्ततोऽनन्तरं स आङ्गिरसः शिशुरुदजयत् उत्कर्षेण जितवान् तस्मादद्यतनोऽपि शैशवेन साम्ना स्तुवन् उज्जयति उत्कृष्टञ्जयति ॥ २४ ॥

अथाधारभूतानामृचां छन्दःसंख्याद्वारेण प्रशंसति ।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ २५ ॥

गायत्रीषु त्रिपदासु यत् सोमचित्रमित्याद्यासु येशवेन स्तुवन्ति तत्प्रतिष्ठायै प्रतिष्ठानाय ब्रह्मवर्च्चसाय च भवति गायत्र्यास्त्रिपात्त्वेन प्रतिष्ठितत्वात् तेजोरूपतया ब्रह्मवर्चसहेतुत्वाच्च अस्य पवमानस्तोत्रस्य आद्यस्तृचो गायत्रत्वात् प्राणसंस्तुतः त्रिवृद्वै प्राणा इति हि ब्राह्मणं तथा येनैव प्राणेन प्रयन्ति पवमानस्तोत्रं प्रारभन्ते तमेव प्राणमभिलक्ष्य उद्यन्ति तत् स्तोत्रं परिसमापयन्ति ॥ २५ ॥

अथैतावाद्यन्तौ तृचौ गायत्र्यौ कथं माध्यन्दिनसवने सङ्गच्छेते त्रैष्टुभं माध्यन्दिनं सवनमित्याशङ्कायामाह।

वृषण्वत्योगायत्र्यो भवन्ति तदु त्रैष्टुभाद्रूपान्नयन्ति स्तोमः॥ २६ ॥

एता ऋचः द्विगता गायत्र्यो वृषण्वत्यो विष्णुशब्दयुक्ता भवन्ति विष्णुश्चेन्द्रस्यानुजः त्रिष्टुभा सह जातत्वादिन्द्रस्त्रैष्टुभः अतस्त्रिष्टुप्सम्बन्धिनो रूपान्नयन्ति नापगच्छन्ति त्रैष्टुभेन रूपेण योगात् त्रिष्टुभ एवेमा भवन्तीत्यर्थः एवन्नवसु सामसूक्तप्रकारेण प्रत्येकं तृचे क्रियमाणेषु यस्त्रिणवः स्तोमो निष्पद्यते स एव माध्यन्दिनपवमानस्य स्तोमः कार्य्यः ॥ २६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य
तृतीयः खण्डः।

अथ चतुर्थः खण्डः ।

अथ होतुः पृष्ठस्तोत्रनिर्वर्त्तकं शाक्वरसाम विधित्सुस्तस्य संज्ञाचतुष्टयं प्रदर्श्य निर्व्वक्ति ।

इन्द्रः प्रजापतिमुपाधावद्वृत्रꣳ हनानीति तस्मा-एतच्छन्दोभ्य इन्द्रियं वीर्य्यं निर्माय प्रायच्छदेतेन शक्नुहीति तच्छक्वरीणाꣳ शक्वरीत्वꣳ सीमानमभि-नत्तत्सिमामहाामकरोत्तन्महा महान्दोष आसीत् तन्महानाम्नः ॥ १ ॥

वृत्रमावरकमसुरं हनानि हन्यामीति वदन् इन्द्रः पुरा प्रजापतिमुपाधावत् उपागमत् तस्मा इन्द्राय प्रजापतिः एत-च्छक्त्यात्मकमिन्द्रियं बलं वीर्य्यं वृत्रहननक्षमं सामर्थ्यं छन्दोभ्यः गायत्र्यादिभ्यः सकाशात् निर्माय सारत्वेनादाय प्रायच्छत् दत्त-वान् एतेन वीर्य्येण वृत्र हन्तुं शक्नुहि शक्तो भवेति वदन् यस्मा-च्छक्नुहीति प्रजापतिरवोचत् तस्माच्छक्वरीणां शक्वरीत्वं शक्त्यु-त्पादकत्वात् शक्वर्य्य इति नाम सम्पन्नं आधाराधेययोरभेद-विवक्षया शक्वरीशब्देन बहुवचनान्तेन शक्वरीषु गातव्यं सामै-वोच्यते आधारबहुत्वाद्बहुवचनं एवं प्रजापतिना दत्ते वीर्य्ये सति तेन सीमानं वृत्रासुरस्य शिरसो मध्यदेशमभिनत् इन्द्रो विदारितवान् तत्तस्मात्सीम्नोभेदकत्वात् सिमा इति शक्वर्य्य

उच्यन्ते ततः सीम्नो भेदनानन्तरं मङ्क्षेत्यनुकरणशब्दोऽयं एवं रूपं शब्दमकरोत् तत्तस्मादेतासां मङ्क्षा इति नाम सम्पन्नं ततो महान् घोषः शब्दआसीत् तन्महानाम्न्य इति संज्ञा आसां जाता एतच्च संज्ञाचतुष्टयं आर्षेयेण प्रदर्शितं ऐन्द्रो महानाम्न्यः प्रजापतेर्वा विष्णोर्वा विश्वामित्रस्य वासिमा वा मङ्क्षा वा शक्वर्य्योवेति एवम्भूतं शाक्वरं साम होतुः पृष्ठतया कार्य्यमिति विधिरुन्नेतव्यः॥ १॥

अथैतस्याधारभूताः शक्वरीः पादसंख्यया स्तौति।

दिशः पञ्चपदा दाधारर्त्तून् षट्पदा छन्दाᳫंसि सप्तपदा पुरुषं द्विपदा॥ २॥

इदमत्रावगन्तव्यं महानाम्नीनामृचां तिसृणां शक्वरीणामृचां प्रत्येकं त्रयोदशपदा अभिधीयन्ते अतः प्रत्यृचमादितो द्वौ द्वौ पादौ मिलित्वा एकैकाद्विपदा शक्वर्य्या बहिर्भूता ततस्त्रयः पादाः शिक्षा शचीनामित्याद्याः सप्ताक्षराः शाक्वराः ततः स्वर्णांशुरिति व्यूहेन पञ्चाक्षरः पादः धातुसंज्ञकः ततः प्रचेतन प्रचेतयेति पादो वत्ससंज्ञकः एतावपि पादौ शक्वर्य्या बहिर्भूतौ स्तोमवत् प्रयोज्यौ अथेन्द्रद्युम्नायन इति ऊधःसंज्ञकः पादः शाक्वरः तत एवाहिशक्र इति पञ्चाक्षरः पादः पुरुषसंज्ञको ऽशाक्वरः रायेवाजाय वज्रिव इत्याद्यास्त्रयः पादाः शक्वराः अथायाहि पिब मत्स्वेत्यध्यास्यनामिकः पादः एवं प्रथमायाम-

धीतास्त्रयोदशपादाः तत्र शक्वर्य्या अवयवभूताः सप्त अन्ये त्व-शाक्वराः स्तोमवच्छक्वरीशेषतया प्रयोज्या इति प्रथमा शक्वरी सप्तपदा जाता एवमुत्तरयोरपि शाक्वराशाक्वरविभागो ज्ञातव्यः तदुक्तं सूत्रकारेण महानाम्नीः प्रकृत्य तासां प्रथमद्वितीये पादे द्विपदास्त्रीणि शक्वराणि धातुर्वत्स ऊधस्तच्छाक्वरं पुरुष-स्त्रीणि शाक्वराण्यह्नास्येति पदान्युत्तमानुद्दध्यऽसेति तिसृणां शक्वरीणामादित एकैका द्विपदा ततस्त्रयः शाक्वराः पादा-स्ततो धातुर्वत्स औधस्येत्येतत् संज्ञकास्त्रयःपादास्त्रय औधः संज्ञः पादः शाक्वरस्ततः पुरुषसंज्ञक एकः पादोऽशाक्वरस्तत-स्त्रयः पादाः शाक्वराः ततोऽभ्यास्याश्चैकपदा उत्तमायान्तु शूरो यो गोषु गच्छति सखासु शेवो अद्वयुरिति द्वावभ्यासाविति सूत्रार्थः अत्र निदानकारः अथैतासु महानाम्नीषु विप्रति-पादयन्तीदं शाक्वरमिदमशाक्वरमित्यशाक्वरी प्रथमा द्विपदा शक्वराणि त्रीणि पदानि धातुरशाक्वरः पञ्चाक्षरः स एष कुतः कृतो भवति वत्सोऽशाक्वरोऽष्टाक्षरः ऊधः शाक्वरम-ष्टाक्षरं पुरुषोऽशाक्वरः पञ्चाक्षरः शाक्वराण्येव त्रीणि पराणि पदानि अभ्यास अशाक्वरोऽष्टाक्षर इति नन्वेवमेतास्तिस्रोऽपि शक्वर्य्यः सप्तपदा जाताः कथं पञ्चपदा षट्पदेति व्यवहारः उच्यते प्रातिलोम्येनेयं स्तुतिः द्वितीयासम्बन्धो मनः स्वर्दृ-तिविष इत्यभ्यासात् पूर्व्वमाम्नातोऽन्त्यः पादः उत्तमायां शक्वर्य्यां द्विपदाया ऊर्द्ध्वं द्विरभ्यस्यते अतस्तत्पादद्वयं पुनःपुनराम्नातं भवेदिति कृत्वा अवशिष्टशाक्वरपादपञ्चकाभिप्रायेण सा तृतीया

शक्करी पञ्चपदा भवति तथा प्रथमायाः शक्कर्याः अभ्यासात् पूर्वभावी मंहिष्ठ वज्रिन् ऋञ्जस इति योऽयमन्त्यः पादः स एव द्वितीयाया शक्कर्या द्विपदाया ऊर्द्धं पुनराम्नायत इति तद्‌-तिरिक्तपदषट्काभिप्रायेण द्वितीया शक्करी षट्पदा भवति तदुक्तं निदाने प्रतिलोमं वदन्ति पदतश्छिद्रोक्ष्णो भविष्यतीति सप्त-पदा प्रथमा शक्करी षट् पदा द्वितीया यद्धि प्रथमायामुत्तमं पदं तत् द्वितीयायाः प्रथमं प्रगायसाधुदृष्टमिति पञ्चपदोत्तमा यत् द्वितीयाया उत्तमं तृतीयायाः प्रथमञ्च द्वितीयञ्चेति अत्र-रार्थस्तु येयं पञ्चपदा तृतीया शक्करी सा प्राच्याद्याः मध्यान्ताः पञ्चदिशोदाधार धारयति या षट्पदा शक्करी द्वितीया सा वसन्तादीन् षड़ृतून् धारयति सप्तपदा प्रथमा शक्करी गायत्र्या-दीनि सप्त छन्दांसि धारयति तिसृष्वपि शक्करीषु या प्रथमा द्विपदा सा पादद्वययुक्तं पुरुषं धारयतीति ॥ २ ॥

अथैताः शक्करीः प्रकारान्तरेण स्तौति।

द्योपशाः संस्तुता भवन्ति तस्माद् द्योपशाः प-शवः ॥ ३ ॥

अस्य स्तोत्रस्य त्रिणवस्तोमकत्वात् सप्तविंशतिः स्तोत्रीयाः एवाह्येवेत्यादीनि पुरीषपदानि पञ्च एवं द्वात्रिंशत्सम्पद्यन्ते तदिदमुच्यते द्योपशाः संस्तुता भवन्तीति, संस्तुताः सहस्तुताः विराट्सम्पत्तेरूर्द्ध्वं द्वे उपशे अतिरिक्ते यासां ता द्व्योपशाः

भवन्ति यस्माद्गोरूपाणां शक्करीणामेवं रूपता तस्मात् पशवो गवाद्या अप्युपशा विशृङ्गा आसन् ॥ ३ ॥

अथ प्रकारान्तरेण स्तौति।

इडे अभितोऽथकारं तस्माच्छृङ्गे तीक्ष्णीयसी स्तूपात् ॥ ४ ॥

प्रथमायां स्तोत्रीयायामिन्द्रद्युम्नायन इष इति पादं त्रिरावर्त्त्य प्रथमोत्तमयोरुपरि इडा शब्दोऽभिहितो गीयते मध्यमेऽथकारः एवमुत्तरयोरपि इन्द्रोविदेतमुस्तुहि पूर्त्तीः शविष्ट शस्यत इति पदयोस्तदेतत् स्तूयते अथकारमथा इति शब्दमभितः पार्श्वयोरिडे इडाशब्दौ भवतः तत्र चाथशब्दोह्रस्वान्तः इडाशब्दो दीर्घान्तो यस्मादेवं तस्मात् स्तूपात् स्तूपः शृङ्गयो मध्यः संहितो देशः तस्मात् सकाशात् शृङ्गे तीक्ष्णीयसी अतिशयेन तीक्ष्णा द्राघीयसी सूक्ष्माग्रे भवतः ॥ ४ ॥

द्विपदाद्योऽशाक्वराः प्रागनुक्रान्ताः तासां गानं विधत्ते।

उपक्षुद्रा गायति तस्मादुपक्षुद्राः पशवः ॥ ५ ॥

उप शक्करीणां समीपे वर्त्तमाना क्षुद्राः शक्वरा अल्पपरिमाणास्तदङ्गभूता ऋच उपक्षुद्रास्ता गायति गायेत् यस्मादेवं रूपाणां शक्करीणामेवं रूपता तस्मात्पशवो गवाद्या अप्युपक्षुद्राः समीपवर्त्तिलघुदेहवत्सादियुताः ॥ ५ ॥

अथैतद्गाने गुणं विधत्ते।

असंश्लिष्टा गायति तस्मादसंश्लिष्टाः पशवः ॥ ६ ॥

शक्करीरशक्करीश्च असंश्लिष्टा विच्छिन्ना गायति गायेत् यस्मात् गवादिरूपाः वक्कर्योऽशक्कर्यश्चासंश्लिष्टाः तस्मात् पशवोऽप्यसंश्लिष्टाः स्वभावतः स्वेच्छाचारिणः ॥ ६ ॥

अथ शाक्कराशाक्करपादव्यतिषङ्गेण यच्छक्करीणान्नानात्वन्तत् स्तौति।

नानारूपा गायति तस्मान्नानारूपाः पशवः ॥७॥

स्पष्टोऽर्थः ॥ ७ ॥

अथ शक्करीणाङ्गानसमये उदघोषञ्जनयद्भिर्गातव्यमिति विधातुमभिप्रेत्याह।

आपो वै चीररसा आसंस्ते देवाः पापवसीयसाद्बिभयुर्यदप उपनिधाय स्तुवते पापवसीयसो विधृत्यै ॥ ८ ॥

आपश्च खलु पुरा चीररसाः चीरस्य पयसो रस इव रसो माधुर्य्यं यासां तथाविधा आसन् तथा सति स्वभाववैपरीत्यदर्शनात् पूर्व्वोक्ता देवाः पापवसीयसात् पापं निकृष्टं वसीयः श्रेष्ठमुभयोः सांकर्य्याद्बिभयुः भीता अभवन् एवञ्च अवकाभिः

सहिता अप उपनिधाय समीपे स्थापयित्वा शक्वरीभिः स्तुवत इति यत्तत्पापवसीयसः पापस्य निकृष्टस्य वसीयस उत्कृष्टस्य च विधृत्यै विधारणाय असाङ्कर्येण स्थापनाय भवति उक्तं सूत्रकृता अपः सावका उपनिधाय महानाम्नीभिः स्तुवीरन्योयः सामाङ्गं ब्रूयात् स उद्घोषमुन्नयेदिति ॥ ८ ॥

एतद्वेदनं प्रशंसति ।

विधृतिः पापवसीयसो भवति यएवं वेद ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

अथास्य साम्नः काम्यानि निधनानि प्रदर्श्य स्तौति ।

गायत्रमयनं भवति ब्रह्मवर्चसकामस्य स्वर्णिधनम्मधुनामुष्मिंल्लोक उपतिष्ठते त्रैष्टुभमयनं भवत्योजस्कामस्याथकारणिधनमाज्येनामुष्मिँल्लोक उपतिष्ठते जागतमयनं भवति पशुकामस्येडानिधनं पयसामुष्मिँल्लोक उपतिष्ठते ॥ १० ॥

गायत्रं गायत्र्याः सम्बन्धि अयनं गमनं अनुष्ठानं भवति कस्य ब्रह्मवर्चसं कामयमानस्य यजमानस्य किं तद्गायत्र्याः सम्बन्ध्ययनं स्वरिति निधनस्य करणं एवं कुर्वन् स्वर्गलोके मधुना माक्षिकेन उपतिष्ठते तिष्ठतेः सङ्गतिकरण आत्मने पदं.

सङ्गच्छत इत्यर्थः तथा ओजस्कामस्य बलकामस्य यजमानस्य त्रिष्टुभं त्रिष्टुप्सम्बन्ध्ययनं भवति किं तदृथकारणिधनं अथेति निधनस्य करणं त्रैष्टुभमयनमेव उक्तवान् अमुष्मिन् लोके आज्येनोपतिष्ठते गच्छते तथा पशुकामस्य यजमानस्य जागतं जगत्याः सम्बन्ध्ययनं भवति किं तज्जागतमयनमिडानिधनमिडेति शब्दस्य निधनत्वेन करणं इडायाः पशुरूपत्वादमुष्मिन् लोके पयसा उपतिष्ठते इडानिधनं पयसा यजमानः क्षीरेण सङ्गच्छते ॥ १० ॥

अथैतासां प्रस्तावोद्गानयोः क्षिप्रत्वं विधातुमाह।

अञ्जसार्य्योमाल्यः शक्करीः प्रारौत्सीदिति होवाचालम्मम्पारिजानतꣳ रजनः कौणेयो यद्येताः प्रतिष्ठापꣳ शक्ष्यतीत्येतद्वा एतासामञ्ज एतत्प्रतिष्ठिता य आभिः क्षिप्रं प्रस्तुत्य क्षिप्रमुद्गायति ॥ ११ ॥

माल्य इति गोत्रनिर्द्देशः एवम्भूतो आर्य्यो नाम ऋषि अञ्जसा आजीवेन शीघ्रं शक्करीः प्रारौत्सीत् प्रकर्षेणाहृतवान् इति निर्द्देशात् खलु कौणेयः कुणेः पुत्रो रजनः पारिजानतं परिजानतोऽपत्यं अलम्म एतत्संज्ञमृषिं प्रत्युवाच उक्तवान् तस्याभिप्राय उच्यते एताः शक्करीः प्रतिष्ठापं प्रतिष्ठापयितुं यदि शक्ष्यति शक्तो भविष्यति तर्ह्येव कर्त्तव्यमिति प्ररोढुरभिप्रायः एतत् एषः एतासां शक्करीणां कर्म्मणि षष्ठी एताः वक्करीरञ्जयति

गमयति स्पष्टीकरोति वा अस्त्वव्यक्तिरपगतिश्च तथा प्रतिष्ठिता अनपायास्त्र करोति एष इत्युक्तं कोऽसावेष इति तदुच्यते य आभिः शक्करीभिः चिप्रं शीघ्रं प्रस्तुत्य प्रस्तावभागं उच्चार्य्य चिप्रं शीघ्रमुद्गायति उद्गानं करोति प्रस्तुत्येति पूर्व्वकालतामात्रे क्त्वाप्रत्ययः ॥ ११ ॥

एवाह्येवेत्यादीनि पञ्चपुरीषपदानि तेषां गानं विधत्ते ।

शक्करीभिः स्तुत्वा पुरीषेण स्तुवते ॥ १२ ॥

शक्करीभिः शाक्करेण साम्ना स्तुत्वाऽनन्तरं पुरीषेण सामान्याभिप्रायमेकवचनं पुरीषैः पुरीषपदैः स्तुवते स्तुवीरन् ॥ १२ ॥

तदेतत्प्रशंसति ।

पशवो वै शक्कर्य्यो गोष्ठः पुरीषं गोष्ठमेव तत् पशुभ्यः पर्य्यस्यन्ति तमेवैनान् प्रवर्त्तयन्त्यविस्रꣳसाय ॥ १३ ॥

या एताः शक्कर्य्यस्ताः पशवो वै गोरूपा एव तद्वाचकैरिति शब्दैर्बह्वभिः उपेतत्वात्तद्वा वत्ससंज्ञकेन ऊधःसंज्ञकेन च पादद्वयेन योगात् शक्कर्य्यः पशवः ऊधसा वत्सेन च युक्ताः खलु पशवो लोक उपलभ्यन्ते यदेतत्पुरीषं पुरीषपदं एतद्गोष्ठः गवामवस्थानप्रदेशः तत्तथा सति गोष्ठमेव तत्पशुभ्यः पर्य्यस्यन्ति

परितः क्षिपन्ति निर्मिमते तमेव गोष्ठदेशं प्रत्येनान् पशून् प्रव-र्त्तयन्ति अविस्रंसाय विस्रंसनाभावाय अविनाशायेत्यर्थः ॥१३॥

मैत्रावरुणपृष्ठं प्राकृतमेवेत्यभिप्रेत्य ब्रह्मणः पृष्ठस्य स्तो-त्रीयं तृचं दर्शयति।

इन्द्रो मदाय वावृध इत्यवर्द्धन्त ह्येतर्हि ॥ १४ ॥

इन्द्रो मदाय वावृध इति तृतीयस्य पृष्ठस्तोत्रीयो भवति तत्र वावृध इति भूतकालवाचिलिङ्गो वृधिधातुः श्रूयते एत-र्ह्येतस्मिन् काले पञ्चमस्याङ्गोऽनुष्ठानसमये अवर्द्धन्त हि यज-मानाः समृद्धा अभवन् अतो भूतकालविषयवृद्धिप्रतिपादक-शब्दोपेतस्तृचः सङ्गत इत्यर्थः ॥ १४ ॥

अथ तस्मिन् तृचे गेयं साम विधत्ते।

तासु बार्हद्गिरं ॥ १५ ॥

बृहद्गिरेरिदं बार्हद्गिरं एतदाख्यं साम तासु इन्द्रो मदा-येत्याद्यासु भवति ॥ १५ ॥

अथ विकल्पितं स्तोत्रीयसामान्तरं विशिष्टं विदधाति।

स्वादोरित्था विषूवत इति विषुवान् वै पञ्चम-महस्तासु रायोवाजीयं ॥ १६ ॥

स्वादोरित्थेत्येतौ तृचौ ब्रह्मसामस्तोत्रियः कार्य्यः

यद्देतद्द्वादशरात्रस्य पञ्चममहः एष विषुवान् यथा गवामयनस्य पक्षभूतयोः षण्मासयोर्मध्ये वर्त्तमानमहः पक्षद्वयस्पर्शनात् विषुवानित्युच्यते तथेदं पञ्चममहरपि द्वादशाहस्य क्रतोः पूर्व्व-भागस्य षट्कस्यावसाने वर्त्तमानत्वेन मध्यवर्त्तित्वात् विषुवा-नित्याख्यायते तस्माद्विषुवच्छन्दयुक्तास्तृच: सम्बन्धार्हं इत्यर्थः तासु विषुवच्छन्दयुक्तासु स्वादोरित्थेत्यादिषु रायोवाजीयं रायोवाजो नाम कश्चित्तत्सम्बन्धिसाम गातव्यं ॥ १६ ॥

अथ कामनाभेदे ब्रह्मसामतया विधित्सुराह।

इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तेषां त्रय उदशिष्यन्त पृथुरश्मिर्बृहद्गिरी रायोवाजस्तेऽब्रुवन् को न इमान् पुत्रान् भरिष्यतीत्यहमितीन्द्रोऽब्रवी-त्तानधिनिधाय परिचार्य्यं चरन् वर्द्धयं स्तान् वर्द्ध-यित्वाब्रवीत् कुमारका वरान् वृणीध्वमिति, क्षत्र-म्मह्यमित्यब्रवीत् पृथुरश्मिस्तस्मा एतेन पार्थरश्मेन क्षत्रं प्रायच्छत् क्षत्रकाम एतेन स्तुवीत क्षत्रस्यैवास्य प्रकाशो भवति, ब्रह्मवर्चसम्मह्यमित्यब्रवीद् बृहद्गि-रिस्तस्मा एतेन बार्हद्गिरेण ब्रह्मवर्चसं प्रायच्छद् ब्रह्मवर्चसकाम एतेन स्तुवीत ब्रह्मवर्चसी भवति, पशून् मह्यमित्यब्रवीद्रायोवाजस्तस्मा एतेन रायो-

वाजीयेन पशून् प्रायच्छत् पशुकाम एतेन स्तुवीत पशुमान् भवति ॥ १७ ॥

पुरा खल्विन्द्रो यतीन् एतत्संज्ञकान् यज्ञविरोधिजनान् सालावृकेयेभ्यः सालावृक्याः पुत्रेभ्यः क्रोष्टुभ्यः प्रायच्छत् भक्षणार्थं दत्तवान् तेषां यतीनाम्मध्ये त्रय उदशिष्यन्त अवशिष्यन्त अवशिष्टाः सालावृकैरभक्षिता आसन् के तु ते पृथुरश्मिर्बृहद्गिरी रायोवाज इति अवशिष्टा एवमब्रुवन् कः नोऽस्मानिमान् पुत्रात्मना स्वीकृतान् कृत्वा भरिष्यति पोषयिष्यतीति एवमुक्ते अहं वः युष्माकं पोषकोऽस्मीतीन्द्रोऽब्रवीत् अथ तान् पृथुरश्म्यादीनधिनिधाय रथे आरोप्य वर्द्धयन् पोषयन् पर्य्यचरन् परिचर्य्यां कृतवान् एवं वर्द्धयित्वा पुनरब्रवीत् हे कुमारकाः मम पुत्रभूताः वरान् वृणीध्वं याचध्वमिति तत्र पृथुरश्मिः मह्यं क्षत्रं बलमस्त्वित्यब्रवीत् अवृणीत ततस्तस्मै पृथुरश्मये एतेन पार्थुरश्मेन साम्ना क्षत्रं बलं प्रायच्छदिन्द्रो दत्तवान् तस्माद्द्यतनोऽपि क्षत्रकाम एतेन पार्थुरश्मेन ब्रह्मसाम्ना स्तुवीत अथ तद्वेदनफलं अस्य वेदितुः क्षत्रस्य क्षत्रजातेरिव प्रकाशः कीर्त्तिर्भवति प्रतिष्ठितश्च भवति य एवं ब्राह्मणार्थं जानाति, अथ बृहद्गिरिः ब्रह्मवर्चसं ब्राह्मं तेजो मह्यमस्त्विति अब्रवीत् अयाचत ततस्तस्मै बृहद्गिरये एतेन बार्हद्गिरेण साम्ना ब्रह्मवर्चसं प्रायच्छदिन्द्रः प्रादात् तस्माद् ब्रह्मवर्चसकामः ब्रह्मवर्चसं कामयमानो यजमान एतेन बार्हद्गिरेण स्तुवीत स ब्रह्मवर्चसी

भवति, अथ रायोराजः मह्यं पशून् देहीत्यब्रवीत् ततस्तस्मै रायोवाजीय एतेन रायोवाजीयेन साम्ना पशून् प्रायच्छत् दत्तवान् तस्मात् पशुकामो यजमान एतेन रायोवाजीयेन स्तुवीत स पशुमान् बहुपशुको भवति ॥ १७ ॥

अथैतत्साम कर्त्तृविशेषे व्यवस्थापयति ।

पार्थुरश्मꣳ राजन्याय ब्रह्मसाम कुर्य्यात् बार्हद्गिरं ब्राह्मणाय रायोवाजीयं वैश्याय स्वेनैवैनाꣳस्तद्रूपेण समर्द्धयति स्तोमः ॥ १८ ॥

राजन्याय क्षत्रियाय पार्थुरश्मं ब्रह्मसाम कुर्य्यात् एवमुत्तरत्रापि योजना क्षत्रियस्य हि स्वकीयं रूपं क्षत्रं ब्राह्मणस्य ब्रह्मवर्चसं वैश्यस्य पशवः पाशुपाल्यं एतानि त्रीणि सामानि एतत्त्रितयसाधनानीत्युक्तं तत्तथा च स्वेन स्वकीयेन नियतेनैव रूपेण एतान् समर्द्धयति समृद्धान् करोति अच्छावाकपृष्ठस्तोत्रमपि प्राकृतमेवेत्यवगन्तव्यं एतेषु च त्रिष्वपि पृष्ठस्तोत्रेषु पूर्व्वोक्तस्त्रिणव एव स्तोमः कार्य्यः ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथार्भवपवमानस्याद्यं तृचं दर्शयति ।

असाव्यंशुर्मदायेति गायत्री भवति मदवद्वै रसवत्तृतीयसवनम्मदमेव तद्रसं दधाति ॥ १ ॥

असाव्यंशुरिति गायत्री गायत्रपवमानस्याद्यस्तृचो भवति शिष्टं सिद्धं ॥ १ ॥

अथ तृचान्तरं विधत्ते ।

अभिद्युम्नं बृहद्यश इत्यभीति रथन्तरस्य रूपं बृहदिति बृहत उभयोः सह रूपमुपैत्युभौ हि वर्णा-वेतदहः ॥ २ ॥

अभिद्युम्नमिति द्वितीयस्तृचः कार्य्यः अभित्वा शूरनोनुम इति रथन्तरयोनावभिशब्ददर्शनात् अभीतिशब्दो रथन्तरस्य साम्नो रूपं बृहदिति शब्दो बृहत्साम्नोवाचकत्वात्तस्य बृहतो रूपं तथा चोभयोर्बृहद्रथन्तरयोरूपमभिद्युम्नं बृहदिति सहो-पैति सहितमुपगच्छति एतत्पञ्चममहः उभौ हि वर्णावुभय-वर्णात्मकमेव वार्हताच्चतुर्थादह्न आनन्तर्य्यात् शाक्करस्य रथन्तर-प्रभवतया रथन्तरसम्बन्धाच्च ॥ २ ॥

अथान्यं तृचं विधत्ते ।

प्राणाशिशुर्महीनामिति सिमानाꣳ रूपम्मह्यो हि सिमाः स्वेनैवैनास्तद्रूपेण समर्द्धयति ॥ ३ ॥

प्राणाशिशुरिति तृतीयस्तृचस्तत्र सिमानां शक्करीणां रूपं कुतः मह्यो महत्यो हि सिमाः शक्कर्य्यस्तत्तथा च प्राणाशिशुर्महीनामिति शक्कर्य्यभिधायकेन महीशब्देन योगात् स्वेन स्वकीयेनैव रूपेण एताः सिमाः समर्द्धयति समृद्धाः करोति ॥ ३ ॥

अथ तृचान्तरं विधत्ते ।

पवस्व वाजसातय इति वैष्णव्योऽनुष्टुभो भवन्ति ॥४

वैष्णव्या विष्णुशब्दयुक्ता अनुष्टुप्छन्दस्काः पवस्वेत्याद्यास्तिस्रः स्तोत्रीया भवन्ति इन्द्राय सोम विष्णव इति विष्णुशब्दयोगादिमा वैष्णव्यः ॥ ४ ॥

तदेतत्प्रशंसति ।

यज्ञो वै विष्णुर्यदत्र नापि क्रियते तद्विष्णुना यज्ञेनापिकरोति ॥ ५ ॥

अत्र विष्णुशब्देन व्यापको यज्ञ एवाभिप्रेतः तथा चात्राम्नायते यज्ञो वै विष्णुरिति यदत्राहनि यन्नापि क्रियते अपिगतं प्राप्तं न क्रियते नानुष्ठीयते तद्यज्ञेन यज्ञात्मना विष्णुना अपिकरोति संपूर्णं करोति ॥ ५ ॥

अथ तृचान्तरं विधत्ते ।

इन्दुर्वाजी पवते गोन्याघा इति सिमानाꣳ रूपꣳ स्वेनैवैनाꣳ स्वरूपेण समर्द्धयति ॥ ६ ॥

गतमेतत् ॥ ६ ॥

ननु प्रकृतावार्भवस्यान्त्यस्तृचोऽभिप्रियाणीत्याद्योजागतः तत्कथं तत्स्थाने त्रैष्टुभस्तृचः सङ्गच्छत इति तत्राह ।

त्रिष्टुभः सत्योजगत्योरूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ ७ ॥

त्रिष्टुभः सत्योऽप्येता जागतरूपेण गोशब्देन योगात् जगत्यो भवन्ति तस्मादेव जगतीनां स्थाने क्रियन्ते गोन्याघा इति गोशब्दो दृश्यते तस्य जागतरूपत्वं प्रागाम्नातं ॥ ७ ॥

अथासाव्यंशुरिति प्रथमविहिते तृचे पूर्ववद्गायत्रं साम विधाय तत्स्तावकमिमे वै लोका गायत्रमित्यादिकं तत् ब्राह्मणाञ्जातिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

अथास्मिन्नेवाद्यत्ते तृचे सामान्तरं विधत्ते ।

सन्तनि भवति पञ्चमस्याह्नः सन्तत्यै ॥ ९ ॥

असाव्यंशुरिति सन्तनिसंज्ञकं साम कार्यं तच्च पञ्चम-

स्याह्नः सन्तत्यै अहरन्तरेण सन्तानाय सम्बन्धायाविच्छेदाय भवति कथमस्य सन्तानहेतुतेति चेत् उच्यते सर्व्वाणि हि सामानि योनिग्रन्थे एकैकस्यामेवर्चि उत्पन्नानि दृष्टानि तत्राप्येषस्य धारयेति त्वचे गीयते तद्वदेतासाव्यंशुरिति त्वचे गातव्यमिति विधीयते तत्र किं तिसृषु ऋक्षु योनिभूताम् दृश्यमानं साम असाव्यंशुरिति अस्मिन् त्वचे किमेकैकस्यां गातव्यं किं वा अत्रापि त्वचे कृत्वा उत्तरार्थं त्वच इव अन्यत्र आहर्त्तव्यं तथा च एकैकस्मिंस्तृचे एकस्य साम्नः समापनात् तत्सन्तृचाश्रितः स्तोत्रीया भवन्तीति न विरोधः सामान्तरवत् योनिग्रन्थे कस्यामेव गीतं साम पुनरुत्तरयोः प्रस्तावभक्तिलोपेन तद्देव गीयते असाव्यंशुरिति त्वचे तद्वदेव प्रथमायां गीत्वा उत्तरयोरपि प्रस्तावविभक्तिलोपेन तदेवोद्गातव्यमिति संशये सन्तनिचोद्यमानमेकैकस्यां सर्व्वमित्यादिकं पक्षद्वयं पूर्व्वपक्षयित्वा अन्तिमं पक्षं सिद्धान्तितवान् तिसृष्वाचार्य्यः स्मृतेर्यथान्यानि सामानीति तथाचैकस्यां साममसमाप्तावपि प्रथमकृतं प्रस्तावमेवोत्तरार्थमभ्यपेत्य उत्तरयोः पृथक् प्रस्तावाभावात् ओङ्कारेण पृथगुद्गीथादानाच्च तस्य साम्नः सन्तनीत्यन्वर्थसंज्ञेयं अत एवास्याह्नः सन्तानहेतुत्वं तदप्युक्तं सन्तानाच्च सन्तनीति ॥९॥

अथ प्रकारान्तरेण सन्तानहेतुतया स्तौति ।

वाग्वा एषा प्रतता यद्द्वादशाहस्तस्या एष विषुवान्यत् पञ्चममहस्तामेवैतेन सन्तनोति ॥ १० ॥

यत् यो द्वादशाहः द्वादशानामह्नां समूहः क्रतुः एषा प्रतता प्रकर्षेण विस्तारिता वाग्वै वागेव अतस्तस्या वाच एष विषुवान् एतद्विषुवसंज्ञकमहर्य्यत् पञ्चममहः अहःषट्कद्वयात्मिकान्तामेव वाचं एतेन सन्तनिसाम्ना सन्तनोति ॥ १० ॥

अथाभिद्युम्नमिति विहिते तृचे गेयं साम दर्शयति ।

च्यावनं भवति ॥ ११ ॥

च्यावनाख्यं साम अस्मिंस्तृचे गातव्यमित्यर्थः ॥ ११ ॥

तदेतत् स्तौति ।

प्रजातिर्वै च्यावनं प्रजायते बहुर्भवति च्यावनेन तुष्टुवानः ॥ १२ ॥

प्रजातिः प्रजननहेतुः खलु च्यावनं साम तस्माच्च्यावनेन तुष्टुवानः स्तुतवान् प्रजायते पुत्रपौत्रादिरूपेणोत्पद्यते अस्य पौत्रादय उत्पद्यन्त इत्यर्थः ततो बहुरनेकरूपश्च भवति ॥१२॥

अथास्य च्यावनसंज्ञां निर्ब्रुवन् वृष्टिफलहेतुतामाह ।

एभ्यो वै लोकेभ्यो वृष्टिरपाक्रामत्तां प्रजापतिश्च्यावनेनाच्यावयद्यदच्यावयत्तच्च्यावनस्य च्यावनत्वञ्च्यावयति वृष्टिञ्च्यावनेन तुष्टुवानः ॥ १३ ॥

एभ्यस्त्रिभ्यो लोकेभ्यः पुरा वृष्टिरपाक्रामत् तामपक्रान्तां

वृष्टिं प्रजापतिश्च्यावनेन साम्ना अच्यावयत् अचारयत् सर्व्वतः प्रावर्षत् यद्यस्मादनेन साम्ना साधनेनाच्यावयत् तत्तस्माच्च्याव-नस्य साम्नश्च्यावनत्वमिति नाम सम्पन्नं यस्मादेवं तस्मादद्यत-नोऽपि च्यावनेन तुष्टुवानः स्तुवन् पुरुषः वृष्टिं च्यावयति चार-यति ॥ १३ ॥

अथ प्राणाशिशुरिति तृचे गेयं साम दर्शयति।

क्रोशं भवति ॥ १४ ॥

क्रोशाख्यं साम तस्मिंस्तृचे गेयमित्यर्थः ॥ १४ ॥

अस्य च संज्ञां अर्थान्निर्ब्रुवन् पशुप्राप्तिसाधनतामाह।

एतेन वा इन्द्र इन्द्रक्रोशे विश्वामित्रजमदग्नी इमागाव इत्यक्रोशत् पशूनामवरुध्यै क्रोशं क्रियते ॥१५॥

एतेन खलु साम्ना साधनेन पुरा इन्द्र इन्द्रक्रोशे एतत् संज्ञे स्थाने हे विश्वामित्रजमदग्नी इमा गावो वर्त्तन्त इत्य-क्रोशत् उच्चैर्घोषं कृतवान् तस्मादस्य साम्नः क्रोशनसाधन-त्वात् क्रोशमिति नाम सम्पन्नमिति भावः तस्मादिदानीमपि पशूनां गवादीनामवरुध्यै अवरोधनाय प्राप्तये क्रोशं साम क्रियते प्रयुज्यते ॥ १५ ॥

अथ पवस्व वाजसातय इति तृचे विहिते गेयं साम दर्श-यन् तद्ब्राह्मणमपि अतिदिशति।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥१६॥

गतमेतत् ॥ १६ ॥

अथास्मिन्नेव तृचे पुनरावृत्ते सामान्तरं विधत्ते ।

ऋषभः शाक्वरो भवति ॥ १७ ॥

ऋषभः शाक्वर इति साम्नः संज्ञा एतत् संज्ञं साम अस्मिन्नेव तृचे गातव्य ॥ १७ ॥

तदेतत् स्तौति ।

पशवो वै शक्वर्यः पशुष्वेव तन्मिथुनमध्यूर्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥१८॥

अस्मिन् पञ्चमेऽहनि विनियुक्ताः शक्वर्यस्तावत्यः पशवो वै गोरूपा एव ऋषभश्चात्र विधीयते तत्तथा च एकस्मिन्नहनि शाक्वरीणामृषभः संयोजनात् पशुष्वेव मिथुनं स्त्रीपुंसरूपं युगलमध्यूर्जति अवस्थापयति प्रजात्यै प्रजननाय ऊर्ज गतिस्थानोपार्जनेष्विति धातुः न खलु अनृषभ ऋषभेण वियुक्ताः पशवः प्रजायन्ते वत्साञ्जनयन्ति तस्मात् पशुसंस्तुतानां शाक्वरीणां समीपे ऋषभो विनियोगयोग्य इत्यर्थः ॥ १८ ॥

तदस्मिन्नेव तृचे आवृत्ते सामान्तरं विधत्ते ।

पार्थम्भवति ॥ १९ ॥

पृथिना दृष्टं साम पार्थं तदस्मिन्नेव तृचे गातव्यं ॥ १९ ॥

अथैतत् ग्राम्यारण्यपशुसङ्घप्राप्तिसाधनमिति स्तौति ।

एतेन वै पृथो वैन्य उभयेषां पशूनामाधिपत्यमाश्नुतोभयेषां पशूनामाधिपत्यमश्नुते पार्थेन तुष्टुवानः ॥ २० ॥

एतेन पार्थेन साम्ना खलु पुरा वैन्यो वेनस्य पुत्रः पृथीनाम राजर्षिः उभयेषां ग्राम्यारण्यानां पशूनामाधिपत्यमधिपतित्वं स्वामित्वमाश्नुत प्राप्नोत् अतो अद्यतनोऽपि पार्थेन तुष्टुवानः स्तुतवान् उभयेषाम्पशूनां स्वामित्वं प्राप्नोति ॥ २० ॥

अथास्मिन्नेव तृचे आहत्ते सामान्तरं विधत्ते ।

अष्टेडः पदस्तोभो भवति ॥ २१ ॥

अष्टाविडा यस्मिन् ऋचि पादे स्तोभोयस्मिन् स तथोक्तः एतन्नाष्टेड पदस्तोभः साम्नः संज्ञा धर्त्ता दिव इत्यस्यां योनौ चत्वारि सामानि गीयन्ते तत्र प्रथममष्टेडापदस्तोभसंज्ञं तत्पवस्व वाज इत्यस्मिन् तृचे ऊहितव्यं ॥ २१ ॥

अथास्य साम्नो गाने किञ्चिद्गुणं विधित्सुराह ।

इन्द्रो वृत्राय वज्रमुदयच्छत्तं षोडशभिर्भोगैः पर्य्य-

भुजत्स एतं पदस्तोभमपश्यत्तेनापावेष्टयदपवेष्टयन्निव गायेत् पाप्मनोऽपहत्यै ॥ २२ ॥

इन्द्रो वृत्रमसुरं हन्तुं वज्रं कुलिशं उद्यच्छदुदग्रहीत् तं वृत्रासुरः षोडशभिः षोडशसंख्याकैर्भोगैः सर्व्वशरीरैः पर्य्यभुजत् पर्य्यग्रसत् आवेष्टितवान् स तथाविध इन्द्रः एतं पदस्तोभं एतत्संज्ञं सामापश्यत् तेन पदस्तोभेन स्वदृष्टेनापावेष्टयत् अपगतवेष्टनमकरोत् आवेष्टकान् सर्व्वभोगानपसारितवानित्यर्थः तस्मादिदानीन्तनोऽपि स्तोता अपवेष्टयन्निवापगतं वेष्टनस्यापगमनं कुर्व्वन्निव गायेत् किमर्थं पाप्मनः पापस्यापहत्यै अपहननाय विनाशार्थं ॥ २२ ॥

एतदेव विव्रियते ।

पाप्मा वाव स तमगृह्णात्तं पदस्तोभेनापाहतापपाप्मानꣳ हते पदस्तोभेन तुष्टुवानः ॥ २३ ॥

तमिन्द्रं स वृत्रः पाप्मा वाव पापमेव भूत्वा अगृह्णात्तं पाप्मानं पदस्तोभेनापाहत व्यनीनशदनाशयत एवमतः कारणात्पदस्तोभेन तुष्टुवानः स्तुतवान् पाप्मानं पापमपहते विनाशयति ॥२३॥

अथास्य पदस्तोभसंज्ञां निर्व्वक्ति ।

पदोऽकृत्तममपश्यत्तत्पदस्तोभस्य पदस्तोभत्वं ॥२४

पदः पदात् ऋचः प्रतिपादं उत्तमं अतिशयेनाचरितारं

स्तोभमपश्यत् अदर्शयत् तत्तस्मात्पदस्तोभस्य साम्नः पदस्तोभत्वं पदस्तोभ इति नाम सम्पन्नं ॥ २४ ॥

अथास्य प्रतिष्ठाहेतुतामाह ।

द्वादशनिधनो भवति प्रतिष्ठायै ॥ २५ ॥

स च पदस्तोभो द्वादशनिधनः द्वादशानि निधनानीति यस्य तादृशो भवति प्रतिष्ठायै प्रतिष्ठानाय द्वादशमासात्मकः संवत्सरो हि प्रतिष्ठाहेतुः तत्सामान्यात् द्वादशनिधनोऽपि पदस्तोभः प्रतिष्ठाहेतुरित्यर्थः तानि च द्वादशनिधनानि सूत्रकृतैवोक्तानि निधनानि पदानि पदस्तोभेषु तथेडा इति अयमर्थः पदस्तोभा नाम भर्त्ता दिव इत्यस्यां गीयमानानि चत्वारि सामानि अष्टेडपञ्चिडचतुरिडद्विरिडानीति अत्र चाष्टेडः पदस्तोभो विहितः तस्य यानि चत्वारि पदानि यास्वष्टाविडा तानि मिलित्वा द्वादशनिधनानि भवन्ति ॥ २५ ॥

अथान्तिमे तृचे गेयं साम विधत्ते ।

दाशस्पत्यं भवति ॥ २६ ॥

दाशस्पत्याख्यं साम इन्द्रवीजो पवत इति तृचे गेयं ॥२६॥

वाभ्रवदहःप्रशंसा कामः तत्साम संज्ञाद्वारेण स्तौति ।

गां वै गां प्रशꣳसन्ति दाशस्पत्येति तां प्रशꣳसन्त्य-हरेवैतेन प्रशꣳसन्ति ॥ २७ ॥

लोके हि यां गां प्रशंसन्ति स्तुवन्ति तां दाशस्पत्येति प्रशंसन्ति दाशृदान इति धातुः दाशो दानस्य पतिः दाशस्पतिः भावपरो निर्द्देशः दाशस्पतौ साधुर्द्दाशस्पत्यो बहुलस्य क्षीरस्य प्रदातुमीश्वरः गां स्तुवन्ति अतो दाशस्पत्यसंज्ञा प्रशंसाहेतुः एतेन दाशस्पत्यसंज्ञेन साम्ना अह्नरेवेदमनुष्ठीयमानं प्रशंसन्ति ॥ २७ ॥

अथैतत्पवमानस्तोत्रमुपसंहरति ।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः॥२८

सर्व्वत्र तावच्चत्वार एव सामान्ताः स्वरो निधनमिडावागिति ऋचामन्त्यमक्षरं स्वरयित्वा समापितं हाइकारश्च इयमपि स्वर इति रूढ्या व्यपदिश्यते स्वरवागिडाभ्योऽन्ये सामान्तरं रूढ्यैव निधनमित्युच्यते अस्मिंस्तु दाशस्पत्ये स्वरवागिडाभ्योविलक्षणमेव पदावसानं दृश्यते तथा पर्व्वयोरपि पवमानयोस्तस्मादेते त्रयः पवमानाः निधनान्ताः निधनसंज्ञः सामान्तो येषां तथाविधा भवन्ति तच्च निधनान्तत्वमस्यानुष्ठीयमानस्य पञ्चमस्याह्नो धृत्यै धारणाय कल्पते एवम्भवसु सामसु तृचेषु क्रियमाणेषु सप्तविंशतिस्तोत्रीयात्मकस्त्रिणवस्तोमो निष्पद्यते स एव स्तोमो;स्याभ्वस्य भवति ॥ २८ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

पञ्चम खण्ड ।

अथ षष्ठः खण्डः ।

अथोक्थानां प्रथमस्य स्तोत्रीयं तृचं दर्शयति ।

आ ते अग्न इधीमहीति ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

तदेतत् स्तौति ।

**अपच्छिदिव वा एतद्यज्ञकाण्डं यदुक्थानि यदे-
ति सन्तोमत्वायैव ॥ २ ॥**

गतमेतत् ॥ २ ॥

द्वितीयस्योक्थस्य स्तोत्रीयं तृचं विधाय स्तौति ।

**इन्द्राय साम गायतेति पूर्णाः ककुभस्तेनानग्न-
नायुको भवति ॥ ३ ॥**

इन्द्राय साम गायतेति पूर्णाः अक्षरसंख्यया सम्पूर्णाः अन्यूनाः ककुभः ककुप्छन्दस्कास्तिस्रः स्तोत्रीया ब्रह्मसाम्नो भवन्ति तेन पूर्णस्य ककुभस्य तृचस्य करणेन यजमानोऽपि पूर्णस्तृप्तः सन् अनग्ननायुकः अग्नमाया अग्ननेका वस्तपीडा तद्रहितो भवति ॥ ३ ॥

प्रकारान्तरेण स्तौति ।

पुरुषो वै ककुप् पुरुषमेव तन्मध्यतः प्रीणाति ॥४

यदिदं ककुप्छन्दस्तत्पुरुषो वै पुरुषात्मक एव तत्तथा सति मध्यतः उक्थानाम्मध्ये पुरुषमेव यजमानस्यात्मानमेव देहमध्येऽवस्थितं प्रीणाति तर्पयति ॥ ४ ॥

अथ तृतीयस्योक्थस्तोत्रीयं दर्शयति।

असावि सोम इन्द्र त इति शिमानाᳬ रूपᳬ स्वेनैवैनाᳬस्तद्रूपेण समर्द्धयति ॥ ५ ॥

असावि सोम इन्द्र त इत्यच्छावाकस्योक्थस्य स्तोत्रीयर्चो भवति सोमः असावि अभिषुतः रसावस्थामापन्नोऽभूदित्यर्थः प्रतीयते शक्वर्य्यः शिमा इत्युच्यन्ते पशवो वै शक्वर्य्य इति श्रुतेः तासाङ्गोरूपत्वात् गवाञ्च क्षीरादिसम्बन्धः सिद्ध एवेति असावि सोम इति रसप्रतिपादकशब्दः शिमानां शक्वरीणां रूपं गतमन्यत् ॥ ५ ॥

अथ प्रथमतृचे गेयं साम दर्शयति।

सञ्जयम्भवति ॥ ६ ॥

सञ्जयाख्यं साम आते अग्नइधीमहीत्यस्मिंस्तृचे गातव्यं ॥६

अथास्य संज्ञां आख्यायिकया निर्ब्रुवन् पशुसाधनतामाह॥

देवाश्च वा असुराश्च समदधत यतरे नः सञ्जयाᳬ

स्तेषान्नः पशवोऽसानिति ते देवा असुरान् सञ्जयेन समजयन् यत्समजयᳪस्तस्मात्सञ्जयम्पशूनामवरुध्यै सञ्जयं क्रियते ॥ ७ ॥

पुरा खलु देवाश्चासुराश्च पशुविषयं स्पर्द्धमानाः समदधत सन्धानं समयमकुर्व्वन् नोऽस्माकम्मध्ये यतरे सञ्जयात् सम्यग् जयेयुः नोऽस्माकम्मध्ये तेषामेव पशवो गवाद्या आसन् सन्तु भवन्त्विति एवं सन्धानं कृत्वा ते युध्यमाना देवाः सञ्जयेनानेन साम्ना असुरान् समजयन् अभ्यभवन् यद्यस्मादनेन साम्ना समजयन् तस्मात् सञ्जयमिति तस्य साम्नो नाम सम्पन्नं अतोऽद्यतनोऽपि यजमानस्य पशूनामवरुध्यै अवरोधनार्थं सञ्जयं साम क्रियते ॥७॥

अथ द्वितीयोक्थस्य साम विधत्ते ।

सौमित्रं भवति ॥ ८ ॥

सुमित्रेण दृष्टं साम सौमित्रं तदिन्द्राय साम गायतेति तृचे गेयं ॥ ८ ॥

अथैतत् सर्वप्राप्तिसाधनमिति विवक्षुराह ।

दीर्घजिह्वी वा इदᳪ रक्षो यज्ञहा यज्ञानवलिह्य-त्यचरत्तामिन्द्रः कयाचन मायया हन्तन्नाशᳪस्ताथ ह सुमित्रः कुत्सः कल्याण आस तमब्रवीदिमामच्छा-

ब्रूह्येति तामच्छा ब्रूत सैनमब्रवीन्नाहैवतन्नु शुश्रुव प्रियमिव तु मे हृदयस्येति तामन्नपयत्ताᳪं सᳪंस्कृतेऽहतां तद्दाव तौ तत्र्यौकामयेतां काममनि साम सौभित्रं काममेवैतेनावरुन्धे ॥ ८ ॥

दीर्घजिह्वी दीर्घा जिह्वा यस्याः सा दीर्घजिह्वी दीर्घजिह्वी च छन्दसीति निपातनादीकारः इदमीदृशी रक्षः राक्षसी यज्ञहा यज्ञस्य हन्त्री यज्ञान् यज्ञियान् यज्ञार्थांश्चरुपुरोडाशसोमादीन् अवलिहती दीर्घया जिह्वया अवलेहनं कुर्वती आस्वादयन्ती भक्षयन्ती अचरत् अवर्त्तयत् तां दीर्घजीह्वीं राक्षसीं इन्द्रः कयापि मायया हन्तुं हिंसितुं नाशंसत नाशक्नोत् अथैतस्मिन् समये सुमित्रः शोभनेन मैत्रीभावेन युक्तः कल्याणः प्रशस्तः कुत्साख्यऋषिरास आविरभूत् स इन्द्रस्तमृषिमब्रवीत् इमां राक्षसीं अच्छा मदभिमुखं यथा भवति तथा ब्रूहीति अतस्तां राक्षसीं अच्छा ब्रूह्येति स ऋषिः यथा सा अभिमुखी भवति तथाब्रवीत् एतन्नाम गीयते सा राक्षसी अभिमुखी सती एनमृषिमब्रवीत् अहेति हर्षे मम हृदयस्य प्रियमिव तु प्रियमेवाभूदिति एवमभोक्तां तां राक्षसीं अन्नपयत् इन्द्राय न्यवेदयत् ततस्तां राक्षसीं संस्कृते प्रोक्षणादिसंस्कारेणाविशुद्धे यज्ञवाटे अहतां कुत्सइन्द्रश्चोभौ मिलित्वा अहिंसिष्टां तदेव राक्षस्याहननं तद्धि तस्मिन् काले तावाकामयेतां कामयित्वा च हतवन्तौ तस्मात् सौमित्रं सुमित्रेण दृष्टं साम कामसनि काम-

प्रदं सर्व्वकामप्राप्तिसाधनं तस्मात्तेन सर्वमेव कामं यजमानोऽवरुन्धे ॥ ९ ॥

अथ प्रकारान्तरेणैतत् स्तौति।

सुमित्रः सन् क्रूरमकरित्येनं वागभ्यवदत्सऽशुगार्थत्सतपोऽतप्यत स एतत्सौमित्रमपश्यत्तेन शुचमपाहतापशुचऽ हते सौमित्रेण तुष्टुवानः ॥ १० ॥

अस्य रक्षोवधानन्तरं हे कुत्स सुमित्रः सर्वेषां भूतानां शोभनमित्रः सन् क्रूरं कर्म अकः अकार्षीरिति एनमृषिं अशरीरी वागभ्यवदत् अभितोऽब्रवीत् स ऋषिस्तपोऽतप्यत तेन च तपसा एतत्सौमित्रं सामापश्यत् तेन च पुष्टेन सौमित्रेण शुचं शोकं अशरीरवागजन्यमपाहत व्यनाशयत् तस्मादद्यतनोऽपि सौमित्रेण तुष्टुवानः स्तुतवान् शुचं शोकं अपाहत अपहन्ति नाशयति ॥ १० ॥

अथ तृतीयोक्थस्य साम विधत्ते।

महावैश्वामित्रं भवति ॥ ११ ॥

एतत्संज्ञं साम असावि सोम इन्द्र त इति तृचे गेयं ॥११॥

अथैतत्संज्ञानिर्वचनेन स्तौति।

पाप्मानऽ् हत्वा यदमहीयन्त तत् महावैश्वामित्रस्य महावैश्वामित्रत्वं ॥ १२ ॥

देवाः पुरा अनेन साम्ना पाप्मानं पापं हत्वाऽमह्णीयन्त यस्मात्कारणादमह्णीयन्त पूज्या आसन् तत्तस्मान्महावैश्वामित्रस्यास्य साम्नो महावैश्वामित्रत्वं महावैश्वामित्रमिति नाम सम्पन्नं ॥ १२ ॥

अथास्य साम्नः स्तोभमुपादाय स्तौति ।

हायादुहयाउहाउहेति पशूनेवैतेन न्यौहन्त ॥ १३ ॥

अस्मिन् स्तोभे उहा उहेति दृश्यते एतेन स्तोभेन पशूनेव न्यौहन्त नितरां प्राप्नुवन् यद्वा समहृीतवन्तः अस्य साम्नोऽवसाने होइडेति त्रिःप्रयुज्यते ॥ १३ ॥

तदनूद्य स्तौति ।

त्रीडं भवति त्रिरात्रस्य धृत्यै ॥ १४ ॥

तिस्र इडा यस्य तत्त्रीडमेतत् साम भवति तच्च द्वितीयस्य त्रिरात्रस्य धृत्यै धारणाय भवति ॥ १४ ॥

अथ पूर्व्वस्मादिडाद्वयात् उत्तमाया इडाया गुणविशेषं विदधानः सन्तानहेतुतामाह ।

द्रवन्तीमिडामुत्तमामुपयन्ति षष्ठस्याह्नः सन्तत्यै॥१५॥

हो इडेति द्रवन्तीं द्राघीयसीमुत्तमामन्त्यां तृतीयामिडा-

मुपयन्ति उपगच्छन्ति सा च दीर्घीभूता षष्ठस्याह्नः करिष्यमाणस्य सन्तत्यै सन्तानाय सम्बन्धाय भवति ॥ १५ ॥

अथैतेष्वृक्षु पूर्ववत् स्तोमक्लृप्तिं दर्शयित्वा स्तौति ।

त्रिणव एव स्तोमो भवति प्रतिष्ठायै पुष्ट्यै त्रिवृद्वा एष पुष्टः ॥ १६ ॥

व्याख्यातमेतत् ॥ १६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

एवं द्वादशरात्रिकस्य पञ्चमस्याह्नः स्तोमक्लृप्तिमुक्त्वा अथ षष्ठेऽहनि बहिष्पवमानस्य प्रथमं स्तोत्रीयाख्यं तृचं दर्शयति ।

ज्योतिर्यज्ञस्य पवते मधुप्रियमिति षष्ठस्याह्नः प्रतिपद्भवति ॥ १ ॥

त्रयस्त्रिंशत्स्तोमकं द्वादशरात्रिकं षष्ठमहरतः परमध्यायपरिसमाप्तेः प्रतिपाद्यते तस्य षष्ठस्याह्नो ज्योतिर्यज्ञस्येति प्रतिपद्यते अनयैवेति प्रतिपदिति प्रथमा ऋगुच्यते तृचस्त्राना-

शादिग्रहणेन विधिरनादेश इति परिभाषया एतदादिकस्तृच एव ग्राह्यः सोऽयं बहिष्पवमानस्याद्यस्तृचो भवति ॥ १ ॥

अत्र ज्योतिःशब्देन सूचितमर्थं प्रदर्श्य स्तौति ।

ज्योतिर्वै गायत्री छन्दसां ज्योती रेवती साम्नां ज्योतिस्त्रयस्त्रिंशः स्तोमानां ज्योतिरेव तत्सम्यक् सन्दधात्यपि ह पुत्रस्य पुत्रो ज्योतिष्मान् भवति ॥२॥

छन्दसाम्मध्ये गायत्री ज्योतिर्वै तेजोरूपत्वाग्निना सह प्रकाशयति प्रजापतिमुखादुत्पत्तेः तथा साम्नाम्मध्ये रेवती रैवतं साम ज्योतिस्तेजोरूपं रयिर्धनं तद्वदस्य प्रकाशोऽस्तीति प्रसिद्धं अतो रयिमच्छब्दपर्य्यायेण रैवच्छब्देनाभिधेयं साम प्रकाशात्मकं स्तोमानां त्रिवृदादीनां मध्ये त्रयस्त्रिंशस्तोमो ज्योतीरूपः तस्य त्रयस्त्रिंशद्देवतात्मकत्वात् तथा सति ज्योतिर्यज्ञस्येति ज्योतिःशब्दप्रयोगादस्मिन्नहनि ज्योतिरेव उक्तं त्रितयात्मकं सम्यक् सङ्गतं यथा भवति तथा सन्दधाति संयुनक्ति अस्य यजमानस्य यःपुत्रस्तस्य पुत्रो ज्योतिष्मान् तेजस्वी भवति किमु वक्तव्यमस्य यजमानस्य ज्योतिष्मत्त्वं भवतीति ॥ २ ॥

अथातान्त्यं पदान्तरमनूद्य स्तौति ।

मधुप्रियमिति पशवो वै रेवत्यो मधुप्रियं तदेव तदभिवदति ॥ ३ ॥

रेवत्यो रेवत्यात्मकं साम पशवो वै पश्वात्मकमेव तदेव मधु-प्रियं रसातिशयनेच्छाविषयं मधु मधुरस्य चीरादिरसस्य प्रदा-नेनैव पशूनाम्मधुरत्वं तत्प्रतिपदं पशुद्वारा रेवत्यात्मकं तदेव मधु अभिवदति अभिब्रवीति शब्दसामान्येनेयं स्तुतिः ॥ ३ ॥

अथ पदान्तरमनूद्य स्तौति ।

मदिन्तमो मत्सर इन्द्रियोरस इतीन्द्रियं वै वीर्य्यꣳ रसः पशवस्तदेव तदभिवदति ॥ ४ ॥

इन्द्रियात्मकं वीर्य्यं रसः पशवः वीर्य्यरसात्मकाः पशवः इत्यर्थः हतं हतवत इन्द्रस्य वीर्य्यं भूमौ परापतत् तच्चौषधिरूपेण परिणीतमभूत् ओषधीनाञ्च पशुभिरात्मनि धारणात् रसात्म-कस्य चीरादेः प्रदानाच्च पशूनां वीर्य्यरसात्मकत्वं गतम-न्यत् ॥ ४ ॥

अथानुरूपाख्यं बहिष्पवमानस्य द्वितीयं तृचं विधत्ते ।

असृक्षत प्रवाजिन इत्यनुरूपो भवति ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

ततासृक्षतेति पदसूचितेनार्थेनाङ्गा सङ्गतिमाह ।

सृष्टानीव ह्येतर्ह्यहानि ॥ ६ ॥

एतर्हि एतस्मिन् काले अहान्येतदन्तानि सृष्टानीव उत्पा-

हितान्येव तस्मादूभूतकालविहिततद्भिरस्मामसृजतेति सृजि-
धातुः सृष्टेर्हि सङ्गत इत्यर्थः ॥ ६ ॥

अथ पूर्वत्रदस्य तृचस्य अनुरूपसंज्ञां निर्ब्रुवन् तद्वेदनफलं दर्शयन् स्तोत्रीयानुरूपौ तृचौ संहत्य स्तौति।

पूर्व्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्व्वꣳ रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूपएनं पुत्रो जायते य एवं वेद स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै ॥ ७ ॥

सिद्धमेतत् ॥ ७ ॥

अथ दशर्च्चद्वयं विधत्ते।

दशर्चौ भवतो दशाक्षरा विराड् वैराजमन्नमन्नाद्यस्यावरुध्यै ॥ ८ ॥

पवस्व देव वीरतिसना च सोम जेषि च एतौ दशर्चौ स्तोत्रीयानुरूपतृचद्वयानन्तरं कार्य्यौ विराट्छन्दो दशाक्षरमेतच्च दशविधेन्द्रियतर्पकत्वेन दशसंख्यायोगाद्विराज त्रिराट्सम्बन्धि तस्माद्दशसंख्याद्वारा एतौ दशर्चौ अन्नाद्यस्य अन्नयोग्यस्यान्नस्यावरुध्यै अवरोधनाय भवतः ॥ ८ ॥

अथानयोरुत्तरस्य दशर्च्चस्य किञ्चिद्गुणं विधत्ते।

उत्तरो दशर्चो भवति सोदर्क इन्द्रियस्य वीर्य्यस्य रसस्यानतिक्षाराय ॥ ९ ॥

सना च सोमेत्युत्तरो द्वितीयो दशर्चः सोदर्कः अथानोवस्य सत्स्वधीति प्रत्यृचं समान अवसानो भवति किमर्थमिन्द्रियस्य वीर्य्यस्य इन्द्रियात्मकस्य सामर्थ्यस्य रसस्य क्षीरादेश्च अनतिक्षाराय अतिक्षारः अतिशयेन क्षरणमपगमनं तत्र संश्लित्याय एकस्य पादस्य प्रत्यृचमावेष्टनात् तेन सन्तिष्ठन्नन्यत् पादद्वयं दृढं भवतीत्यर्थः ॥ ९ ॥

तस्यैव पादस्य कुतः पुनरावृत्तिरित्यतआह ।

यत्र वै देवा इन्द्रियं वीर्य्यꣳ रसमपश्यꣳस्तदनुन्यतुदन् ॥ १० ॥

यत्र वै यस्मात् खलु मन्त्रभागे देवाः पुरा इन्द्रियात्मकं वीर्य्यं रसञ्चापश्यन् तत्तदनुन्यतुदन् प्रत्यृचमभ्यस्यन् यद्वा यत्र खलु स्थाने देवाः पुराऽनुष्ठानसमये इन्द्रियं वीर्य्यं रसमजानन् तद्वीर्य्यं तत्रानुन्यतुदन् आनुपूर्व्येण स्थापयन् तस्माद्विधितो रसः कामयते मन्त्रात् अवणविधानस्थानीयेन च सर्व्वासामुपर्य्येव तथा ऋचां तत्समानेन पादेन पिहितत्वात् अनतिक्षारो भवतीत्यर्थः ॥ १० ॥

अथ चतस्रः स्तोत्रीया विधत्ते ।

चतुर्ऋचो भवति प्रतिष्ठायै ॥ ११ ॥

चतुर्ऋचः चतस्र ऋचो यस्मिन् समुदाये सोऽयन्तरत्नमन्त्रीत्यादिकश्चतुर्ऋचो भवति स च प्रतिष्ठायै यज्ञस्य यजमानस्य प्रतिष्ठानाय भवति चतुष्पादा हि गवादयो लोके प्रतिष्ठिता दृश्यन्ते ॥ ११ ॥

अथैतत् स्तौति ।

ध्वस्ने वै पुरुषन्तो तरन्तपुरुमीढाभ्यां वैददश्विभ्याꣳ सहस्राण्यदित्सतां तावैच्छेतां कथन्नाविदमात्तमप्रतिगृहीतꣳ स्यादिति तौ प्रत्यैतां ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे तरत्समन्दीधावतीति ततो वै तत्तयोरात्तमप्रतिगृहीतमभवत् ॥ १२ ॥

ध्वस्ने शत्रूणां ध्वंसयित्र्यौ पुरुषन्तो एतत्संज्ञे लिङ्गव्यत्ययः एतत्संज्ञौ राजानौ वैददश्विभ्यां विददश्वगोत्राभ्यां तरन्तपुरुमीढाभ्यां ऋषिभ्यां सहस्राणि सहस्रसंख्यकानि अदित्सतां दातुमैच्छतां ततस्तादृषी ऐच्छेताञ्च ईक्षणं पर्य्यालोचनमकुरुतां नावावयोरिदं धनमात्तं स्वीकृतं कथं केन प्रकारेण अप्रतिगृहीतं स्यात् प्रतिग्रहदोषवियुक्तं भवेदिति ततस्तौ प्रत्यैतां अजानीतां ध्वस्रयोः पुरुषन्त्योरेति मन्त्रमपश्यतामित्यर्थः ततोऽनन्तरं मन्त्रप्रभावात्तं स्वीकृतं तयोस्तद्धनं अप्रतिगृहीतं प्रतिग्रहदोषविमुक्तमभवत् ॥ १२ ॥

अथैतद्वेदनं प्रशंसति ।

आत्तमस्याप्रतिगृहीतं भवति य एवं वेद ॥ १३ ॥

स्पष्टोऽर्थः ॥ १३ ॥

अथ प्रकारान्तरेण मन्त्रचतुष्टयं स्तौति ।

विनाराशंसो भवत्युभयस्यान्नाद्यस्यावरुध्यै मानुषस्य च दैवस्य च ॥ १४ ॥

ध्वस्रयोः पुरुषन्त्योरेति नरयोः शस्यमानत्वात् अयं चतुर्ऋचो विनाराशंसो नाराशंसविशिष्टो भवति अत उभयस्य द्विविधस्य मानुषस्य मनुष्यसम्बन्धिनश्च देवसम्बन्धिनश्च अन्नाद्यस्यावरुध्यै अवरोधनाय भवति ॥ १४ ॥

अथ बहिष्पवमानस्यान्त्यं तृचं विधत्ते ।

तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ १५ ॥

गतार्थमेतत् ॥ १५ ॥

एवं स्तोत्रीयासु विहितासु स्तौति ।

त्रयस्त्रिंश एव स्तोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः ॥ १६ ॥

अस्य बहिष्पवमानस्य त्रयस्त्रिंश एव स्तोमो भवति स च यजमानस्य प्रतिष्ठायै प्रतिष्ठानाय भवति कुतः त्रयस्त्रिंशत्-संख्यासु देवतासु खल्वेक एव त्रयस्त्रिंशत्प्रतिष्ठितः स्वयं प्रतिष्ठितत्वात् प्रतिष्ठाहेतुरित्यर्थः ॥ १६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

सप्तमः खण्डः।

अथ अष्टमः खण्डः।

अथास्मिन् षष्ठेऽहनि प्रथममाज्यस्तोत्रं दर्शयति।

इमꣳ स्तोममर्हते जातवेदस इत्याग्नेयमाज्यं भवति सोदर्कमिन्द्रियस्य वीर्यस्य रसस्यानतिचाराय यत्र वै देवा इन्द्रियं वीर्यꣳ रसमपश्यꣳस्तदनुन्यतुदन् ॥ १ ॥

इमं स्तोममिति तृच आग्नेयमग्निदेवत्यं प्रथममाज्यस्तोत्रं भवति तत्र सोदर्कं समानोदर्कं अग्ने: सख्ये मा रिषामा वयन्तव इत्यनेन पादेन प्रत्यृचं समाप्यमानं भवति शिष्टं सिद्धं ॥ १ ॥

अथ द्वितीयमाज्यस्तोत्रं दर्शयति।

प्रतिवाꣳ सूर उदित इति सूरवन् मैत्रावरुणं ॥ २ ॥

प्रतिवां सूर इति तृचः सूरवत् सूरशब्दयुक्तं मैत्रावरुणं मित्रावरुणदेवताकं द्वितीयमाज्यस्तोत्रं भवति ॥ २ ॥

तद्देतत् स्तौति ।

अन्तो वै सूरोऽन्त एतत् षष्ठमह्नामन्त एव तदन्तेन स्तुवते प्रतिष्ठायै ॥ ३ ॥

सूरः सूर्य्योऽन्तो वै अवसानभूतः एतत् षष्ठमहस्त्र अह्नामन्तः अन्तेन पृष्ठस्य समापनात् तत्तथा सति अन्तेन अन्तभूतसूर्य्यस्य वाचकपदयुक्तेन तृचेनान्त एव स्तुवते स्तुवन्त्युद्गातारः प्रतिष्ठायै प्रतिष्ठानार्थमुभयोः सारूप्यादतः प्रतिष्ठाहेतुरित्यर्थः ॥ ३ ॥

अथ तृतीयमाज्यस्तोत्रं दर्शयति ।

भिन्धि विश्वा अपद्विष इत्यैन्द्रꣳ सोदर्कमिन्द्रियस्य वीर्य्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियं वीर्य्यꣳ रसमपश्यꣳस्तदन्वतुदन् ॥ ४ ॥

भिन्धि विश्वा इति तृचमैन्द्रं इन्द्रदेवत्य तृतीयमाज्यस्तोत्रं तच्च सोदर्कं समानोदर्कं समानावसानं वसुष्वर्कं तदाभरेति गतमन्यत् ॥ ४ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति ।

यज्ञस्य हि स्थ ऋत्विजेत्यैन्द्राग्नꣳ सोदर्कमिन्द्रियस्य वीर्य्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियं वीर्य्यꣳ रसमपश्यꣳस्तदन्वतुदन् स्तोमः ॥५॥

यज्ञस्य हिस्थ इति तृचः ऐन्द्राग्नं इन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं तत्र इन्द्राग्नी तस्य बोधतमिति पादेन सोदर्कं समानोदर्कं गतमन्यत् पूर्व्वोक्त एव त्रयस्त्रिंशस्तोमः चतुर्ष्वाज्यस्तोत्रेषु कार्य्यः॥ ५॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

अष्टमः खण्डः।

अथ नवमः खण्डः।

अथास्मिन्नहनि माध्यन्दिनस्य पवमानस्य प्रथमतृचं विधत्ते।

इन्द्रायेन्दो मरुत्वत इति मरुत्वत्यो गायत्र्यो भवन्ति॥ १॥

मरुत्वत्यो मरुच्छब्दयुक्ता इन्द्रायेन्दो मरुत्वत इत्याद्यास्तिस्रः गायत्रच्छन्दस्काः स्तोत्रीया माध्यन्दिनपवमानस्य भवन्ति॥ १॥

अथासाम्माध्यन्दिनसवने सङ्गतिमाह।

मरुत्वद्धि माध्यन्दिनꣳ सवनं॥ २॥

मरुत्वत् मरुद्भिर्युक्तं हि माध्यन्दिनं सवनं मरुत्वतीयग्रहाणां मरुत्वतीयस्य च शस्त्रस्य सद्भावात् इतो मरुत्वत्यस्तत्र सङ्गता इत्यर्थः॥ २॥

अथान्यं तृचं विधत्ते।

मृज्यमानः सुहस्त्येति सिमानां रूपं ॥ ३ ॥

मृज्यमानःसुहस्त्येति तृचस्तत्र सिमानां शक्करीणां रूपं तत्र हि गोभिरञ्जानो अर्षसीति श्रुतं गावश्च शक्वर्य्य इति गोशब्दयुक्तस्तृचः शक्करीणां रूपमित्युच्यते ॥ ३ ॥

ननु शक्करीसम्बद्धस्तृचो रैवतपृष्ठके षष्ठेऽहनि कथं सङ्गच्छत इति तत्राह ।

समानं वै सिमानाञ्च रूपं रेवतीनाञ्च सिमाभ्यो ह्यधिरेवत्यः प्रजायन्ते ॥ ४ ॥

सिमानां शक्करीणां शाक्करसाम्न उत्पत्तेरनन्तरमेव रेवत्यः प्रजायन्ते सृष्टिसमये रैवतं सामोत्पद्यते तथा च प्रागाम्नातं स शक्करीरसृजत तद्रूपां घोषोऽन्वसृज्यत रेवतीरसृजत तद्रूपां घोषोन्वसृज्यतेति अत्र सर्व्वत्र शक्वर्य्य इति चेत् साधारणऋच-वाचिना आधेयं सामोच्यते उभयोरत्र व्यवहिततेति द्रष्टव्यं तस्मान्नैरन्तर्य्येण जातत्वात् शाक्कररैवतयोः समानरूपत्वमेवेति कृत्वा शाक्करसम्बद्धोऽपि तृचोऽस्मिन् षष्ठेऽहनि सङ्गत इत्यर्थः ॥४॥

अथ तृचान्तरं विधत्ते ।

एतमुत्यन्दशक्षिप इत्यादित्या आदित्या वा इमाः प्रजास्तासामेव मध्यतः प्रतितिष्ठति ॥ ५ ॥

एतमुत्यन्दृशद्विप इत्याद्यास्तिस्र अदित्याः सम्बन्धिन्यः स्तोत्रीया भवन्ति समादित्येऽभिरख्यतेति तत्राम्नातं इमाः दृश्यमानाः सर्व्वाः प्रजाः देवमनुष्याद्याः आदित्या वै अदितेः पुत्रा इति तासां प्रजानामेव मध्यतो मध्ये आदित्यवतीभिः स्तोत्रीयाभिः प्रतितिष्ठति यजमानः प्रतिष्ठितो भवति ॥ ५ ॥

ननु प्रकृतौ माध्यन्दिनपवमानात्तृचस्त्रैष्टुभः प्रतुद्रवेति कथं तत्स्थाने गायत्रस्य तृचस्य सङ्गतिरिति तत्राह।

गायत्र्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते ॥ ६ ॥

त्रिष्टुप्सम्बन्धेन्द्रशब्दयोगेनात्रैष्टुभत्वात् त्रिष्टुभां स्थाने क्रियन्ते ॥ ६ ॥

अथेन्द्रायेन्दो मरुत्वत इति प्रथमे तृचे गायत्रं साम विधाय पूर्ववत् स्तावकं ब्राह्मणञ्चातिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ७ ॥

सिद्धमेतत् ॥ ७ ॥

अथास्मिन्नेव तृच आद्यन्ते सामान्तरं विधत्ते।

इषोट्धीयं भवति ॥ ८ ॥

इषोट्धीयन्नाम सामाद्यन्तास्मिन्नेव तृचे गेयं भवति इषो

इष इत्यस्य साम्नोऽवसाने दर्शनात् इषोदधीयत्वमस्येति द्र-
ष्टव्यं ॥ ८ ॥

तदेतत् स्तौति ।

पशवोवा इषोदधोयं पशूनामवरुध्या इषे वै पञ्चममहर्वृषे पष्ठमवर्द्धन्त ह्येतर्हि यजमानमेवैतेन वर्द्धयन्ति ॥ ६ ॥

इषोदधोयाख्यं साम पशवो वै पशवएव इषा इध इत्यनेन अन्नेन वर्द्धयितृत्वात् पशवश्च क्षीरादिना वर्द्धयन्तीति तच्छब्दः तस्मात् पशूनां इधे वर्द्धनायैवैतत् क्रियते अपि च इषे वै अन्नार्थमेव पञ्चमं शाक्करमहरनुष्ठितं इधे वर्द्धनाय षष्ठमहरनुष्ठीयते एतर्हि एतस्मिन् काले षष्ठस्याह्नोऽनुष्ठानकाले हि यस्माद्देवा अवर्द्धयन्त समृद्धा अभवन् यस्माद्वर्द्धनाय षष्ठस्याह्नोऽनुष्ठानं अतस्तत्सूचकेनेषोदधीयेनैतेन साम्ना यजमानमेव वर्द्धयति ॥ ६ ॥

अथास्मिन्नेव तृचे पुनरावृत्ते सामान्तरं विधत्ते ।

क्रौञ्चम्भवति ॥ १० ॥

क्रुञ्चा नामाङ्गिरस ऋषिः तेन दृष्टं साम क्रौञ्चं तदिन्द्रायेन्दो मरुत्वत इति तृचे गातव्यं ॥ १० ॥

तदेतत् स्तौति ।

क्रुञ्च्यमहरविन्ददेष्यमिव वै षष्ठमहरहरेवै-तेन विन्दन्ति ॥ ११ ॥

क्रुञ्चाख्यऋषिः एष्यं एषणीयमहः अनेन साम्ना अविन्दत् लभत इदं षष्ठमहश्च एष्यमिव वै एषणीयमिव खलु तस्मादेतेन क्रौञ्चेन इदं षष्ठमहरेव विन्दन्ति लभन्ते ॥ ११ ॥

अथास्मिन्नेव तृचे सामान्तरं विधत्ते।

वाजदावर्य्यो भवन्ति ॥ १२ ॥

रेवतीर्न इत्यस्यां योनौ वेदसामाख्ये ग्रन्थे गीयमानं साम वत्सो वाजदावर्य्यो रेवत्यः रेवतीरिति योनौ दृष्टं बहुवचनं साम्यृचार्य्यं इति रेवत्य इति निर्द्देशः तद्रैवतं साम इन्द्रायेन्दो इत्यस्मिंस्तृचे गेयं तच्च प्रतिष्ठित्यै प्रतिष्ठानाय यजमानस्य भवति रेवतीशब्दस्य रयिमत् वाचकत्वात् रयिमतश्च पुरुषस्य प्रतिष्ठा-दर्शनात् रेवतीनां प्रतिष्ठाहेतुत्वं ॥ १२ ॥

अथैतत् स्तौति।

अन्नं वै वाजोऽन्नाद्यस्यावरुध्यै यदाह्वि वा अन्न-मथ गौरथाश्वोऽथ पुरुषो वाजी ॥ १३ ॥

वाजस्य दाती वाजदावरीति संज्ञाया उत्पत्तिः वाजश्चान्नं वै अन्नमेव तस्माद्वाजदावर्य्याख्यं साम अन्नाद्यस्य प्राप्त्यै भवति अपिच यदा खलु यजमानस्य बहुलमन्नं भवति अथानन्तरं

गौः गावश्च भवन्ति अथानन्तरं रथाश्च भवन्ति अथानन्तरमश्वाश्च भवन्ति अथानन्तरं पुरुषो वाजी वेजनवान् वेगवांश्च भवति अन्नहेतुका एते यजमानस्य भवन्तीति ॥ १३ ॥

अथास्मिंस्तृचे सामान्तरं विधत्ते ।

रेवत्यो भवन्ति प्रतिष्ठायै ॥ १४ ॥

रेवतीर्न इत्यस्यां योन्यां छन्दःसामाख्ये ग्रन्थे गीयमानसामबाधपुरःसरं पवमानस्तोत्र एतद्गातव्यमिति ॥ १४ ॥

अथास्य निधनसंख्यामनूद्य स्तौति ।

षण्णिधना षड्रात्रस्य धृत्यै ॥ १५ ॥

तीर्नो इष्टा सधमादा २ स्था ३ ऊ वा २३ ई ३४ डा इत्यादीनि षण्णिधनानि यासां रेवतीनां षण्णिधनाः तथाविधा भवेयुः किमर्थं षड्रात्रस्य एतद्देतस्यानुष्ठितस्य पृष्ठस्य षडहस्य धृत्यै धारणाय भवति ॥ १५ ॥

ननु रैवतं साम वैरूपवैराजादिवत् पृष्ठस्तोत्र एव गातव्यं एतद्धि षष्ठमहः रैवतपृष्ठकं किमिति पवमाने विधीयमान इत्याशङ्क्य विपक्षे वाजदावर्य्य इति तद्बहुवचनं वाजदावर्य्याख्यं सामेन्द्रायेन्दवित्यस्मिंस्तृचे गातव्यमित्युपपादयति ।

आपो वै रैवत्यस्ता यत् पृष्ठं कुर्युरपशुर्यजमानः स्यात् पशूनस्य निर्हन्युर्यन्न वा आपो वीव वर्त्तन्ते

तदोषधयो जायन्तेऽथ यत्रावतिष्ठन्ते निर्म्मृतुकास्तत्र भवन्ति तस्मात् पवमाने कुर्व्वन्ति पराचा हि पवमानेन स्तुवते ॥ १६ ॥

या इमा रेवत्यस्ता आपो वै अप्रूपा एव रयिभिर्द्धनैर्म्मणिमुक्तादिभिस्तासां युक्तत्वात्ता रेवत्यः तद्रैवतं साम यदि पृष्ठं पृष्ठस्तोत्रं कुर्य्युरुद्गातारस्तर्हि यजमानः अपसुः पशुरहितः स्यात् यदि तान् प्रयुज्येरन् अपामभावात् अस्य यजमानस्य पशून्निर्दहेयुः नाशयेयुः नन्वेवं रेवतीनां प्रयोगे दोषदर्शनात् कथं तत्रानुष्ठानमिति तद्दर्शयति यत्र वा आप इति यत्र खलु देशे आपो वीव वर्त्तन्त इव विरलमेव वर्त्तमाना भवन्ति तत्रौषधयो जायन्ते अथ यत्र तु देशेऽवतिष्ठन्ते नित्यं वर्त्तन्ते तत्रौषधयो निर्ऋतुकानिर्गमनशीला भवन्ति तत्र नोत्पद्यत इत्यर्थः एवं सति अप्संस्तुतारेवत्यः पृष्ठस्तोत्रे यदि क्रियेरन् तदा त्रयस्त्रिंशस्तोमसम्पत्तये अत्रक्षमभ्यसेरन् तथा चापां भूयिष्ठत्वादोषध्यनुत्पत्तौ यजमानस्यापशुत्वं स्यात् तस्मात्पवमाने माध्यन्दिने रेवतीः कुर्व्वन्ति तत्र चोक्तापां हृद्धिर्न भवतीत्याह पराचा होति हि यस्मात् पराचा अनावृत्तेन पवमानस्तोत्रेण स्तुवते तस्मात् रेवतीनामभ्यासाभावात् अप्संस्तुतानां तासामभावाद् बाहुल्याभावाच्च उक्तदोषद्वयाभावः ॥ १६ ॥

अथ विहितं सामचतुष्कं संहृत्य स्तौति ।

मेथी वा इषोवृधीयꣳ रज्जुः क्रौञ्चं वत्सोवाज-दावर्य्यौ रैवत्यो मातरो यदेतान्येवꣳ सामानि क्रि-यन्त एवमेव प्रत्तां दुग्धे ॥ १७ ॥

इषोवृधीयाख्यं साम मेथी वै गवां बन्धनाय निखातस्थाणुः मेथी तत्स्थानीयं क्रौञ्चं क्रौञ्चाख्यं साम रज्जुः गौर्बध्यते यया रज्ज्वा तत्स्थानीयं वत्सोवत्सस्थानीयो वाजदावर्य्यः वाजदाव-र्य्याख्यं साम रैवत्यो रैवतं साम मातरः मातृस्थानीयं एतानि सामान्येवं ईदृग्रूपाणि भवन्तीति तेन एवमेव प्रत्तां प्रकर्षेण दत्तां गां दुग्धे यजमानः कामान् दोग्धि ॥ १७ ॥

अथ सामान्तरं विधत्ते ।

औच्चैःश्रवसे भवतः ॥ १८ ॥

उच्चैःश्रवसा दृष्टे सामनी औच्चैःश्रवसे एते सृज्यमानः सुष्व-स्वेति तृचमाहृत्य तस्मिन् पर्य्यायेण गेय इत्यर्थः ॥ १८ ॥

अथैतदृषिसम्बन्धप्रदर्शनपुरःसरं स्वर्गसाधनत्वेन स्तौति ।

उच्चैःश्रवा वा एताभ्याङ्काव्योऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गात् लोकान्न च्यवते तुष्टुवानः ॥ १९ ॥

काव्यः कविर्भृगुस्तद्गोत्रज उच्चैःश्रवा नामऋषिः एताभ्यां

सामभ्यां साधनेन अञ्जसा अनायासेन स्वर्गं लोकमपश्यत् अत एते सामनी स्वर्गस्य लोकस्यानुख्यात्यै अनुख्यानाय सन्दर्शनाय भवतः किञ्च आभ्यां तुष्टुवानः स्तुतवान् स्वर्गलोकान्न च्युतो भवति चिरं तत्रैवावतिष्ठते ॥ १९ ॥

अथास्मिन्नेव तृचे आवृत्ते सामान्तरं विधत्ते।

वाजजिद्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वं वा एते वाजं जयन्ति ये षष्ठमहरागच्छन्ति ॥ २० ॥

वाजमन्नं जयत्यनेनेति वाजजित्तत्साम सृज्यमान इति तृचे गेयं तच्च सर्वस्य निरवशेषस्य वाजस्य अन्नस्य प्राप्त्यै भवति तथा सर्वस्य जेतव्यस्य च जित्यै जयाय च भवति ये यजमानादशरात्रस्य षष्ठमहरागच्छन्ति प्राप्नुवन्ति एते सर्वमेव वाजञ्जयन्ति ॥ २० ॥

एतदेव विवृणोति।

अन्नं वै वाजोऽन्नाद्यस्यावरुध्यै ॥ २१ ॥

स्पष्टोऽर्थः ॥ २१ ॥

अथास्मिन्नेव तृचे सामान्तरं विधत्ते।

वरुणसाम भवति ॥ २२ ॥

वरुणस्य साम एतदाख्यं साम सृज्यमानः सुहस्त्येत्येतस्मिन्नेव तृचे गातव्यं ॥ २२ ॥

अथैतत्प्रशंसति ।

एतेन वै वरुणो राज्यमाधिपत्यमगच्छद्राज्य-माधिपत्यं गच्छति वरुणसाम्ना तुष्टुवानः ॥ २३ ॥

एतेन साम्ना साधनेन पुरा वरुणो देवः राज्यं राजत्वं आधिपत्यं अधिपतित्वं स्वामित्वञ्चागच्छत् प्राप्नोत् तस्मादद्य-तनोऽपि वरुणसाम्ना तुष्टुवानः स्तुतवान् राज्यमाधिपत्यं गच्छ-ति प्राप्नोति ॥ २३ ॥

अथ सामान्तरं विधत्ते ।

अङ्गिरसां गोष्ठो भवति ॥ २४ ॥

अङ्गिरसां गोष्ठाख्यं साम सृज्यमानः सुहस्त्येत्यादृत्तेऽस्मिन् एव तृचे गेयं ॥ २४ ॥

अथैतत्प्रशंसति ।

पशवो वै रेवत्यो गोष्ठमेव तत्पशुभ्यः पर्य्यस्यन्ति तमेवैनान् प्रवर्त्तयन्त्यविस्रꣳसाय ॥ २५ ॥

याः पूर्व्वप्रयुक्तारेवत्यः ताः पशवो वै पशव एव अतस्तासां गोष्ठाख्यं स्थानमपेक्षते तथा चाङ्गिरसां गोष्ठो भवतीति यत् तत्तेन पशुभ्यः पशूनामर्थं गोष्ठं गावो यत्र तिष्ठन्ति तादृशं स्थानमेव पर्य्यस्यन्ति परितः समीपे हि यन्ति स्थापयन्ति यद्गो-ष्ठमेव एतान् पशून् प्रवर्त्तयन्ति अविस्रंसाय अविनाशाय ॥२५॥

अथ एतमुत्यन्दशश्चिप इति तृचे गातव्यं साम दर्शयति।

इह्वद्वामदेव्यं भवति॥ २६॥

इह्वत् इहशब्दयुक्तं वामदेव्यं वामदेवेन ऋषिणा दृष्टमेतदाख्यं साम एतमुत्यन्दशश्चिप इत्यस्मिन्मे तृचे गेयं॥ २६॥

अथैतदन्नप्राप्तिसाधनत्वेन स्तौति।

एतेन वै वामदेवोऽन्नस्य पुरोधामगच्छदन्नं वै ब्रह्मणः पुरोधान्नाद्यस्यावरुध्यै॥ २७॥

एतेन वै वामदेवोऽन्नस्य पुरोधामगच्छदन्नं वै प्राप्तये भवति॥ २७॥

अथैतच्छन्दोद्वारा स्तौति।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति॥ २८॥

सिद्धमेतत्॥ २८॥

ननु त्रैष्टुभं माध्यन्दिनं सवनं सर्व्वप्रकृतौ ज्योतिष्टोमे कथं तत्र गायत्रः सङ्गच्छत इति तत्राह।

इन्द्रवत्यो गायत्र्यो भवन्ति तदु त्रैष्टुभाद्रूपान्नयन्ति स्तोमः॥ २६॥

इन्द्रायेन्दो मरुत्वत इत्याद्या गायत्र्यः यस्मात्तस्मादिन्द्रदेवत्य इन्द्रशब्दयुक्ता भवन्ति तद्योगस्य प्रकृतौ माध्यन्दिनसवने दर्शनात् त्रैष्टुभं रूपं तदु तस्मादेव मरुच्छब्दयोगात् एता गायत्र्यः त्रैष्टुभात् त्रिष्टुभः सम्बन्धिनो रूपान्न यन्ति नोपगच्छन्ति एवं गायत्र्यादिषु इहवद्वामदेव्यान्तेषु एकादशसु सामसु त्रिचेषु क्रियमाणेषु निष्पद्यमानस्त्रयस्त्रिंशस्तोमोऽस्य पवमानस्तोत्रस्य कार्य्य इत्यर्थः ॥ २६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ पृष्ठस्तोत्रेषु स्तोत्रीयाणामृचां छन्दोविशेषं विधित्सुराह ।

यातयामान्यन्यानि छन्दाᳫस्ययातयामा गायत्री तस्माद्गायत्रीषु स्तुवन्ति ॥ १ ॥

अन्यानि त्रिष्टुबादीनि छन्दांसि यातयामानि द्वितीयादिष्वहःसु विनियुक्तत्वात् गतसाराणि यद्यपि गायत्री प्रथमेऽहनि विनियुक्ता तथाप्ययातयामा यातयामत्वदोषरहिता प्रजापतिमुखात् अग्निना सहोत्पन्नत्वेन तस्या उत्कर्षादिति तस्मात्

षष्ठेऽहन्यस्मिन् गायत्रीषु पृष्ठ्यैः सामभिः स्तुवन्ति रेवतीर्नः सधमाद इत्याद्यासु गायत्रीषु पृष्ठस्तोत्राणि कार्य्याणीत्यर्थः ॥ १ ॥

अथ ब्रह्मपृष्ठस्य स्तोत्रीया ऋचो विदधानः किञ्चिद्विशेषं विधत्ते।

सुरूपकृत्नुमूतय इत्यभ्यारम्भेण षट्पदाः षष्ठस्याह्नोरूपं तेन षष्ठमहरारभन्ते सन्तत्यै ॥ २ ॥

सुरूपकृत्नुमूतय इत्याद्यास्तिस्रो गायत्र्यः ब्रह्मसाम्नः स्तोत्रीयाः तास्वाभ्यारम्भेण प्रत्यृचं षट्पदाः अयमर्थः गानसमये आसां प्रथमपादस्त्रिरभ्यस्यते तृतीयपादस्यान्त्यश्चतुरक्षरस्त्रिरभ्यस्यते एवमभित आद्यन्तयोरारम्भे पुनःपुनरादाने सति प्रत्येकमेताः षट्पदा भवन्ति प्रथमपादस्य त्रिरावृत्तत्वात् त्रयः पादा द्वितीयश्चैकः उत्तमश्चैकः पुनस्तदेतस्य चतुरक्षरस्य द्वयोरभ्यासयोरेकः पाद इति पादषट्कसम्पत्तिः अतः षट्संख्यायोगात् एताः षष्ठस्याह्नोरूपं तेन कारणेन षट्पदाभिः षष्ठमहरारभन्ते स्वीकुर्व्वन्ति किमर्थं सन्तत्यै पूर्व्वोत्तराभ्यामहर्भ्यां सन्तानार्थं ॥ २ ॥

अथाच्छावाकपृष्ठस्तोत्रीया ऋचो दर्शयति।

उभे यदिन्द्ररोदसी इति षट्पदाः षष्ठस्याह्नोरूपं तेन षष्ठमहरारभन्ते सन्तत्यै ॥ ३ ॥

उभे यदिन्द्र रोदसी इत्याद्याः षट् पदा यासां तथाविधा ऋच अच्छावाकसाम्नः स्तोत्रीया भवन्ति शिष्टं पूर्ववद्व्याख्येयं । ३ ॥

अथाद्यं पृष्ठस्तोत्रीयं साम विधत्ते ।

रेवतीषु वारवन्तीयं पृष्ठं भवति ॥ ४ ॥

पृष्ठस्तोत्रत्वेन कार्य्यमित्यर्थः पशवो वै रेवत्य इति हि प्रागाम्नातं ॥ ४ ॥

पशवस्त्वाप्विकारा इत्यभिप्रायेणाह ।

अपां वा एष रसोयद्रेवत्यो रेवतीनाᳩ रसोयद्वारवन्तीयᳩ सरसा एव तद्रेवतीः प्रयुङ्क्ते यद्वारवन्तीयेन पृष्ठेन स्तुवते ॥ ५ ॥

रेवत्यः रेवच्छब्दयुक्ताः स्तोत्रीया इति यदेष अपामेव रसः सारः तथा वारवन्तीयाख्यं सामेति यत् एष रेवतीनां रसः एवं सति तासु रेवतीषु वारवन्तीयस्य करणात् ता रेवतीः सरसाः रससहिता एव प्रयुङ्क्ते करोति यद्यस्माद्वारवन्तीयेन साम्ना निर्वर्त्त्ये तेन पृष्ठेन पृष्ठस्तोत्रेण स्तुवते स्तुवन्त्युद्गातारः तत्तस्मादित्यर्थः ॥ ५ ॥

अथैतद्गुनप्रा प्तिहेतुत्वेन स्तौति ।

रैवद्वा एतद्रैवत्यं यद्वारवन्तीयमास्य रेवान् रैवत्यो जायते ॥ ६ ॥

रेवत् ऋद्धिमत् रयेर्मतौ बहुलमिति सम्प्रसारणं पूर्व्वत्वं रयिमत् धनयुक्तमेवैतद्रैवतीनां सम्बन्धि साम यद्वारवन्तीयाख्यं साम एतद्रैवतीषु कुर्व्वतो यजमानस्य रेवान् रयिवान् धनवान् रैवत्यः रेवत्यः पशवस्तेषां स्वामी एवं गुणविशिष्टः पुत्रः आजायते आभिमुख्येनोत्पद्यते ॥ ६ ॥

अथैतद्वेदनमपि धनप्राप्तिहेतुरित्याह ।

रेवान् भवति य एवं वेद ॥ ७ ॥

गतमेतत् ॥ ७ ॥

अथैतस्य वारवन्तीयस्य गानसमये किञ्चिद्विधित्सुस्तदर्थमाख्यायिकामाह ।

केशिने वा एतद्दाल्भ्याय सामाविरभवत्तदेनमब्रवोदगातारो मा गायन्ति मा मयोद्गासिषुरिति कथं त आगा भगव इत्यब्रवोदागेयमेवास्मागायन्नित्र गायेत्प्रतिष्ठायै तदलम्भ्यम्पारिजानतं पश्चादुच्छयानमेतामागां गायन्तमजानात्तमब्रवीत् पुरस्तादधा इति तमब्रुवन् को न्वयं कस्मा अलमित्यलन्नु वै मह्यमिति तदलम्भस्यालम्भत्वं ॥ ८ ॥

दार्भ्याय दल्भपुत्राय केशिने एतत्संज्ञाय ऋषये पुरा खल्वेतत् वारवन्तीयं साम आविरभवत् बुद्धौ प्रकाशमानमासीत् तच्चाविर्भूतं साम केशिनमृषिमब्रवीत् अवोचत् कथमिति तदुच्यते हे ऋषे मा मां अगातारोगानमकुशलाः गायन्ति प्रयुञ्जते ते गानशक्तिरहिताः पुरुषाः मया साम्ना साधनेन मोद्गासिषुः उद्गानं न कुर्य्युरिति एवं साम्नोक्ते सति ऋषिरब्रवीदुक्तवान् हे भगवन् ऐश्वर्य्यादियुक्त मन्त्रात्मन् ते त्वदीया आगा प्राध्यानं कथं केन प्रकारेण कर्त्तव्यमिति पुनः सामाब्रवीत् प्रश्नमागेयं आङीपदर्थईषत् अप्रयत्नेन गातव्यमेवास्मि भवामि वाक्यावसानद्योतक इति शब्दोऽत्राप्यनुषञ्जनीयः यस्मादेवं साम्नोक्तं तस्मात् आगायन् आगानं कुर्व्वन्निव यथा लोकेऽलोकेव प्रयत्नेन निष्पन्नेन स्निग्धेन स्वरेण लौकिका गानं कुर्व्वन्ति एवमेव गायेदुद्गाता एवं गाने सति तत्साम प्रतिष्ठायै यजमानस्य प्रतिष्ठानाय सम्पद्यते कुत एतदित्यतआह तदलम्मम्पारिजानतमिति परिजानतः पुत्रं अलम्मं एतत्संज्ञं पश्चाद्धं रथाक्षस्य पश्चात् प्रत्यग्भागे शयानं निषण्णं एतामागां एतं पूर्व्वोक्तमागानं गायन्तं उच्चारयन्तं तत्सामाजानात् अज्ञासीत् ज्ञात्वा च तमलम्मङ्गायन्तमब्रवीत् पुरस्ताद्रथाक्षस्य पुरोभागे अधः शयानं धारयेति एवं साम्नोक्तेन पार्श्वस्था ऋषयोऽब्रुवन् लोकेषु कोऽन्वयं पुरुषः कस्मै वा प्रयोजनाय अलं समर्थ इति एवं पार्श्वस्थैरधिक्षिप्ते सामैवाब्रवीत् अलम्नु समर्थएव खल्वेष मह्यमिति मां सम्यक्गातुं कुशल इत्यर्थः यस्मादेवं साम्नोक्तमलं

मह्यमिति तत्तस्मात् अस्य ऋषेः अलम्मत्वं अलम्म इति नाम सम्पन्नं यस्मादयमृषिरस्य साम्न आगानेन स्वैच्छेन पुरतो धारितोऽभूत् तस्मादेतदीयमागानं प्रतिष्ठाहेतुरित्यर्थः ॥ ८ ॥

अथ स्तोभविशेषमनूद्य प्रतिष्ठाहेतुतामाह।

इहेहेति गायेत्प्रतिष्ठायै ॥ ९ ॥

इहाहायि इति स्तोभं पुनःपुनः प्रक्षिप्य गायेत् इहशब्देन इह लोकस्य प्रत्यभिज्ञानात् अस्मिन् लोके प्रतिष्ठायै प्रतिष्ठानाय यजमानस्यैतद्गानं भवति ॥ ९ ॥

अथ मैत्रावरुणपृष्ठस्तोत्रं प्राकृतमेवेत्यभिप्रेत्य तदनन्तरस्य ब्रह्मपृष्ठस्य विहिते सुरूपकृत्नुमूतय इति तृचे गातव्यं साम दर्शयति।

ऋषभो रैवतो भवति ॥ १० ॥

रैवत इति रेवतीनां सम्बन्धी ऋषभः एतस्य पदद्वयाभिधेयं साम सुरूपकृत्नुमूतय इत्यस्यारम्भेण षट्पदासु स्तोत्रीयासु गातव्यं ॥ १० ॥

अथैतत्प्रजातिहेतुत्वेन स्तौति।

पशवो वै रैवत्यः पशुष्वेव तन्मिथुनमप्यर्ज्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥ ११ ॥

रैवत्यो रैवतं सामेति यत्तत् पशवो वै पशुरूपा एव

अवशिष्टं ऋषभः शक्करो भवतीत्यस्य वाक्यशेषवद्व्याख्येयं ॥ ११ ॥

अथाच्छावाकस्तोत्रं साम दर्शयति।

श्येनो भवति ॥ १२ ॥

श्येनवत् क्षिप्रकारित्वात् सामापि श्येनः एतत्संज्ञं साम उभे यदिन्द्रेति तृचे गातव्यं ॥ १२ ॥

अथैतस्य दृष्टान्तपुरःसरं क्षिप्रकारितामाह।

श्येनो ह वै पूर्वप्रेतानि वया᳘ᳲस्याप्नोति पूर्व्वप्रेतानिव वै पर्वाण्यहानि तेषामाप्त्यै श्येनः क्रियते ॥ १३ ॥

श्येनाख्यः खलु पक्षी पूर्व्वप्रेतानि पूर्व्वमेवोत्पतितानि वयांसि पक्षजातानि स्वयं पश्चादुत्पतनविशेषं प्राप्नोति लुप्तोपममेतत् यथैवं लौकिकः श्येनः एवमेव तेषामह्नां प्राप्तै क्षिप्रप्राप्तये श्येनः श्येनाख्यं साम क्रियते कानि पुनस्तानि प्राप्यानि पूर्व्वाणि अस्मात् षष्ठादह्नः पूर्व्वानुष्ठितान्यहानि पञ्चसंख्यानि पूर्व्वप्रेतानीव वै पूर्व्वोत्पतितपक्षजातसदृशानि खलु तेषामह्नामित्यर्थः ॥ १३ ॥

एवं पूर्व्वानुष्ठितानां पञ्चानामह्नां प्राप्त्यर्थमेतदिति स्तुत्वानुष्ठीयमानस्य षष्ठस्याह्नोऽपि पारप्राप्तिः अनेनैव भवतीत्याह।

श्येनो वा एतदहः सम्पारयितुमर्हति स हि वयसामाशिष्ठस्तस्यानपहननाय सम्पारणायैतत् क्रियतेऽन्तो हि षष्ठमहः सप्तमञ्च ॥ १४ ॥

श्येनो वै श्येन एव एतत् षष्ठमहः सम्पारयितुं पारयितुं पारमवसानं पारयितुमर्हति शक्नोति स खलु वयसां पक्षिणां मध्ये आशिष्ठः व्याप्ततमः तस्य षष्ठस्याह्नः अनपहननाय सम्पारणाय सम्यक् पारप्रापणाय च एतत्साम क्रियते षष्ठञ्च सप्तमञ्च यदिह सन्तनुये एतत्‌द्वयं अन्तोहि अवसानभूतं हि षष्ठेनाह्ना षडहस्य समाप्तत्वात् उभयोरह्नोरन्तत्वं तस्मात् षष्ठस्याह्नः पारप्राप्तिरपेक्षितेति भावः॥ १४॥

अथैतेषु पृष्ठस्तोत्रेषु ब्रह्मवादिनां चोद्यमुद्भावयति।

ब्रह्मवादिनो वदन्ति यद् बृहदायतनानि पृष्ठान्यथैते द्वे गायत्र्यौ द्वे जगत्यौ क्व तर्हि बृहत्यो भवन्तीति॥ १५॥

ब्रह्मवादिनस्तावद्वेदार्थाभिज्ञा ऋषयः पुरा वदन्ति एषु पृष्ठस्तोत्रेषु चोदयन्ति किमिति यत् यस्मात् पृष्ठानि पृष्ठस्तोत्राणि बृहदायतनानि बृहतीछन्द आयतनं स्थानं येषां तानि तथोक्तानि सर्व्वप्रकृतौ हि ज्योतिष्टोमे बृहतीष्वेव स्तोत्रीयासु पृष्ठस्तोत्राणि क्रियन्ते तस्मात्तत् बृहतौ षष्ठेऽहनि तथैव भवितव्यं अथ चात्र एते द्वे गायत्र्यौ द्वे जगत्यौ अत्र हि प्रथमयोः रेवतीर्नः कयानश्चित्र इति द्वे गायत्र्यौ तृचौ ततस्तृतीये पृष्ठस्तोत्रे सुरूपकृत्नुमूतय इत्याद्यभ्यारम्भेण षट्पदाः तिस्रः स्तोत्रीयाः चतुर्थस्य पृष्ठस्तोत्रस्य च तएव षट्पदाः उभे यदिन्द्रे-

त्याद्यास्तिस्रः अत एतयोः पृष्ठस्तोत्रयोर्य्याः स्तोत्रीयास्ता अष्टाक्षरैः षड्भिः पादैरुपेतत्वात् अक्षरसंख्यया अष्टाचत्वारिंशदक्षरा जगत्यो भवन्ति तस्मादादित आरभ्य द्वयोः पृष्ठस्तोत्रयोः प्रथमे द्वे गायत्र्यौ उत्तरयोः प्रथमे द्वे जगत्यौ क्व तर्हि कस्मिन् खलु पृष्ठस्तोत्रे बृहत्यः स्तोत्रीया भवन्ति ॥ १५ ॥

अस्य ब्रह्मवादिभिः कृतस्य चोद्यस्योत्तरं दर्शयति ।

ये द्वे जगत्योः पदे ते गायत्र्या उपसम्पद्येते तत् सर्व्वा बृहत्यो भवन्त्यायतने पृष्ठानि यातयत्यायतनवान् भवति ॥ १६ ॥

उपरितनपृष्ठद्वयवर्त्तिन्योर्ज्जगत्योर्य्ये द्वे पदे यौ द्वौ पादौ बृहत्या अतिरिच्येते अष्टाचत्वारिंशदक्षरा हि जगती भवति अपराप्यपरेण इत्थं चतुर्षु पृष्ठेषु आद्यानामृचां बृहतीत्वसम्पादनमुक्तं एवमुत्तमानामपि बृहतीत्वसम्पत्तिर्द्रष्टव्या तदेतदाह तत्सर्व्वा बृहत्यो भवन्तीति तत्तथाच बक्रत्वात्स च शिष्टैर्ज्जागतैः पादैः गायत्रीणां योजनात् सर्व्वतोऽपि पृष्ठचतुष्टयगता स्तोत्रीया बृहत्यो भवन्ति तथाच आयतने स्वकीय एव प्राकृते स्थाने पृष्ठानि पृष्ठस्तोत्राणि यातयति विस्तारयति आयतनवान् स्थानवान् यजमानो भवति ॥ १६ ॥

यद्येवं, सम्पन्नास्वेव बृहतीषु गानं स्यादित्यत आह ।

षट्पदासु स्तुवन्ति षड्ृतवस्य इत्यै ॥ १७ ॥

षट्पदास्वेवर्क्षु स्तुवन्ति न सम्पादितासु बृहतीषु किमर्थं षड्रात्रस्य धृत्यै धारणाय ॥ १७ ॥

अथ प्रसङ्गादस्मिन्नहनि याज्याद्वयोः पादयोः संख्यां विधाय स्तौति ।

सप्तपद्या यजति सप्तमस्याह्नः सन्तत्यै स्तोमः ॥१८॥

सप्तपद्या सप्तभिः पादैरुपेतया ऋचा षष्ठेऽहनि होतादयो यजन्ति ताश्च सप्तपदाः आश्वलायनेन सूत्रकृता षष्ठस्य प्रातःसवन इति षड्वै वृषन्निन्द्रवृषपाणास इन्दवः सुषुमायतमद्रिभिरित्यादिना दर्शिताः अत्र सप्तपद्योरित्येकवचनं जात्यभिप्रायात् तत्पद्या यजनं सप्तमस्यागामिनोऽह्नः सन्तत्यै सन्तानाय अनेन षष्ठेनाह्ना संश्लेषाय भवति सप्तसंख्यया तस्य बुद्धौ विपरिवर्त्तनत्वात् एषु च पृष्ठस्तोत्रेषु पूर्व्वोक्तस्त्रयस्त्रिंशपरः स्तोमः कार्य्यः ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथार्भवपवमानस्य आद्यास्तिस्रः स्तोत्रीया दर्शयति ।

परिस्वानो गिरिष्ठा इति तस्त्रियो गायत्र्यो भवन्ति सर्व्वस्य पर्य्याप्त्यै ॥ १ ॥

परिशब्दयोगादेताः सर्व्वस्य कृत्स्नस्य पर्य्याप्त्यै सम्पूर्णतायै भवति परीत्यनेनोपसर्गेण पर्य्याप्तेः सूचितत्वात् शिष्टं स्पष्टं ॥१॥

अथान्यं तृचं दर्शयति ।

समुन्वेयो वसूनामिति पशवो वै वसु पशूनामवरुध्यै ॥ २ ॥

वसुशब्देन धनसामान्यवाचिना धनविशेषस्योपस्थानात् पशवएव वसुशब्दाभिधेयाः तथा चायं तृचः पशुप्राप्त्यै भवति ॥२

अथान्यं तृचं विधत्ते ।

तं वस्सुखायो मदायेति बालखिल्याः ॥ ३ ॥

बालखिल्यानामृषीणां सम्बन्धिन्यो बालखिल्याः तं वस्सखाय इत्याद्याः स्तोतीया भवन्ति ॥ ३ ॥

अथ सप्तमेऽहनि विधास्यमानं सखाय आनिषीदतेति तृचमिमञ्च चतुर्थं संयुज्यानुवदति ।

बालखिल्यावेतौ तृचौ षष्ठे चाहनि सप्तमे च ॥४॥

षष्ठसप्तमयोरह्नोस्तं वः सखाय आनिषीदतेति यावेतौ तृचौ बालखिल्यौ बालखिल्यसम्बन्धिनौ ॥ ४ ॥

किमतस्तदाह ।

यदेतौ बालखिल्यौ तृचौ भवतोऽह्नोरेव व्यतिष-ङ्गायाव्यवस्रंसाय सन्तत्यै ॥ ५ ॥

एतौ बालखिल्यौ तृचौ क्रमेण षष्ठसप्तमयोरह्नोर्भवतः प्रयुज्येते इति चेत् तदह्नोः षष्ठसप्तमयोर्व्यतिषङ्गाय व्यतिषञ्जनं संसर्ज्जनं तदर्थं भवति एतदेव विशदयति अव्यवस्रंसायेति व्यवस्रंसो विश्लिष्य संभवनं विच्छेदः तदभावाय फलितमर्थ-माह सन्तत्या इति ॥ ५ ॥

अथापरं तृचं दर्शयति।

सोमाः पवन्त इन्दव इत्यनुष्टुभो निमसदो भव-न्ति प्रतिष्ठायै ॥ ६ ॥

सोमाः पवन्त इत्याद्यास्तिस्रोऽनुष्टुभः स्तोत्रीयाः तासामनु-ष्टुभानां पादचतुष्टयोपेतत्वात् प्रतिष्ठायै यजमानस्य प्रतिष्ठा-नाय भवन्ति ॥ ६ ॥

अथान्यं तृचन्दर्शयति।

अयापवापवस्वैना वसूनीति त्रिष्टुभस्सत्यो जगत्यो रूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ ७ ॥

अयापवापवस्वेत्याद्यास्तिस्रः स्तोत्रीयाः तास्त्रिष्टुभस्त्रिष्टुप् छन्दस्काः सत्योऽपि जागतो रूपेण योगाज्जगत्यो भवन्ति किं तद्रूपमिति चोच्यते वसूनीत्यनेन पदेन धनमुच्यते तच्च वैश्य-

सम्बन्धिजगत्या सहोत्पन्नेऽपि पारम्पर्य्येण वस्तूनीत्येतज्जागतं रूपं यस्मादेवं जगत्यस्तस्माज्जगतीनां स्थाने क्रियन्ते प्रकृतावाभवस्यान्त्यस्तृचोऽभिप्रियाणीति आगतस्तस्मादाभवान्त्यस्य जगतीस्थानत्वं ॥ ७ ॥

अथ प्रथमे तृचे पूर्ववद्गायत्रं साम विधाय तदितिकर्त्तव्यताप्रतिपादकं इमे वै लोका गायत्रमित्यादिकं प्रागाम्नातं ब्राह्मणमत्रातिदिशति ।

गायत्रम्भवति यदेव गायत्रस्य ब्राह्मणं ॥ ८ ॥

परिस्वानो गिरिष्ठा इति विहिते तृचे गायत्रं साम प्रथमतो गातव्यं भवति सिद्धमन्यत् ॥ ८ ॥

अथैतमेव तृचं त्रिरावृत्य तत्र त्रीणि सामानि गातव्यानीति विधत्ते ।

वैदन्वतानि भवन्ति ॥ ९ ॥

चत्वारि हि वैदन्वतानि सामानि परिस्वान इत्यस्यां योन्यां गीयन्ते तत्र तृतीयवर्ज्जितानि त्रीण्यस्मिन्नेव तृचानि गेयानि ॥ ९ ॥

अथैतेषां वैदन्वतसम्बन्धं दर्शयन् विशिष्टफलसाधनतामाह ।

विदन्वान्वै भार्गव इन्द्रस्य प्रत्यहꣳस्तꣳसुगाधैत्

सतपोऽतप्यत स एतानि वैदन्वतान्यपश्यत्तैः शुचम-पाहतापशुचꣳहते वैदन्वतैस्तुष्टुवानः ॥ १० ॥

भार्गवे भृगुगोत्रे विदन्वान्नामऋषिः इन्द्रस्य सकाशोत्पन्नान् प्रत्यक्ष्न् प्रतिकूलान् शत्रून् हतवान् अनन्तरन्तमृषिं शुक् शोकः आर्छत् प्राप्नोत्तस्च शोकार्त्तः ऋषिः तपस्तप्तवान् स च तपोबलात् एतानि वैदन्वतानि त्रीणि सामानि अपश्यत् दृष्टवान् दृष्ट्वा च तैः सामभिः शुचं शोकमपाहत अपागमयत् यस्मादेवं तस्माद्वैदन्वतैरेव सामभिस्तुष्टुवानः स्तुतवान् शुचं शोकमपहत अपगमयति विनाशयतीत्यर्थः ॥ १० ॥

अथ समुन्वेयो वसूनामिति विहिते तृचे गेयं साम दर्शयति ।

भरद्वाजस्य लोम भवति पशवो वै लोम पशूनामवरुध्यै ॥ ११ ॥

भरद्वाजस्य लोमाख्यं सामैव दीर्घं दीर्घशब्दाख्यमिति च आहुरन्ये ब्रह्मवादिनः कथयन्ति ॥ ११ ॥

तदु दीर्घमित्याहुरायुर्वै दीर्घमायुषोऽवरुध्यै ॥१२

तथाच दैर्घ्यं दीर्घविशिष्टं तत्सामान्याद्दीर्घाख्यं साम आयुषः शतवर्षलक्षणस्य प्राप्त्यै भवति पशुधनाख्यस्य प्राप्त्यै भवति ॥ १२ ॥

अथान्यस्मिन्विहिते तृचे सामान्तरं विधत्ते ।

कार्णश्रवसं भवति श्रृण्वन्ति तुष्टुवानं ॥ १३ ॥

कर्णश्रवसा दृष्टं कार्णश्रवसं एतदाख्यं साम तं वः सखाय इति तृचे गातव्यं अनेन च तुष्टुवानं स्तुवन्तं श्रृण्वन्ति लौकिका बहु मन्यन्ते यशस्वान् भवतीत्यर्थः ॥ १३ ॥

अथैतदृषिसम्बन्धं दर्शयन् पशुसाधनत्वेन स्तौति ।

कर्णश्रवा वा एतदाङ्गिरसः पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत्साम भवति पशूनां पुष्ट्यै ॥ १४ ॥

स्पष्टोऽर्थः ॥ १४ ॥

अथ सोमाः पवन्तइन्दव इति तृचे अन्यत्साम विधाय तदीयं ब्राह्मणञ्चातिदिशति ।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥ १५ ॥

सिद्धमेतत् ॥ १५ ॥

अथास्मिन्नेव तृचे आवृत्ते सामान्तरं विधत्ते ।

मधुश्चुन्निधनं भवति ॥ १६ ॥

मधुश्चुत इति निधनं यस्य तत्तथोक्तं एतदाख्यं साम सोमाः पवन्त इत्यस्मिंस्तृचे गातव्यं ॥ १६ ॥

अथैतत् स्तौति ।

परमस्यान्नाद्यस्यावरुध्यै परमं वा एतदन्नाद्यं यन्मधु ॥ १७ ॥

यन्मधु माक्षिकं एतत्परममुत्कृष्टं अन्नाद्यं अदनीयमन्नं तस्मादेतन्मधुश्चुन्निधनं परमस्यान्नाद्यस्य प्राप्त्यै भवति श्चुतिरक्षरणे मधुच्योतयतिच्यावयति क्षारयतीति मधुश्चुदिति तत्संज्ञानिर्व्वचनात्तस्य मधुप्राप्तिहेतुता ॥ १७ ॥

इदं मह्यञ्चौजसेति योनौ यत् घृतश्चुन्निधनाख्यं साम तत् गीयते स्तुत्यर्थं तच्चेदञ्च संयुज्य प्रशंसति ।

प्रजापतेर्वा एतौ स्तनौ यद्घृतश्चुन्निधनञ्च मधुश्चुन्निधनञ्च यज्ञो वै प्रजापतिस्तमेताभ्यां दुग्धे यङ्कामङ्कामयते तन्दुग्धे ॥ १८ ॥

प्रजापतेः सर्व्वकारणभूतस्य विधातुरेतौ स्तनौ यद्घृतश्चुन्निधनाख्यम्मधुश्चुन्निधनाख्यञ्च सामनी स च प्रजापतिः यज्ञो वै यज्ञ एव तं यज्ञात्मकं प्रजापतिमेवैताभ्यां स्तनाभ्यां घृतश्चुत् मधुश्चुत् रूपाभ्यां दुग्धे एतदेव विव्रियते यङ्काममिति यजमानो यं यङ्कामयते आशंसते तं तं सर्व्वमेताभ्यां दुग्धे दोग्धि ॥१८॥

अथास्मिंस्तृचे सामद्वयं विधत्ते ।

क्रौञ्चे भवतः ॥ १९ ॥

क्रुञ्चाख्येण ऋषिणा दृष्टे सामनी क्रौञ्चे एते सोमाः पवन्त इन्दव इत्यस्मिन्नेव तृचे द्विराहत्ते क्रमेण गायेत् ॥ १९ ॥

अथैते स्तौति ।

क्रुञ्चेष्यमहरविन्दद्वेष्यमिव वै षष्ठमहरहरेवैताभ्यां विन्दन्ति ॥ २० ॥

इन्द्रायेन्दो मरुत्वत इति खण्डे व्याख्यातमेतत् ॥ २० ॥

अथापवापवस्वेत्यन्तिमे तृचेऽन्यत्साम विधत्ते ।

औष्टं भवति ॥ २१ ॥

उष्टाख्येन ऋषिणा दृष्टं साम औष्टं तत्सम्बद्धं ॥ २१ ॥

अथैतस्य स्तुतिः ।

उष्टिर्वा एतेनाङ्गिरसोऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गात् लोकान्न च्यवते तुष्टुवानः ॥ २२ ॥

एतदपि सिद्धं ॥ २२ ॥

अथास्य निधनं विधत्ते ।

अग्नेर्वा एतद्वैश्वानरस्य साम दीदिहीति निधनमुपयन्ति दीदायेव ह्यग्निर्वैश्वानरः ॥ २३ ॥

वैश्वानरस्य विश्वानरहितस्याग्नेः खलु तन्नाम तदस्मा- द्धोदिद्धीत्येतत्पदं निधनमुपयन्त्युपगच्छन्ति उद्गातारः दीदा- येव दीप्तवद्वैश्वानरोऽग्निः ॥ २३ ॥

अथैतत्पवमानस्तोत्रमुपसंहरति ।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः॥२४

पवमानाः पवमानस्तोत्राणि बहिष्पवमानादीनि निधना- न्तानि निधनावसानानि भवन्ति किमर्थं अह्नो धृत्यै धारणाय स्थैर्यार्थं एवं गायत्र्यादिस्रौष्टान्तेष्वेकादशसु सामसु प्रत्येकं तृचे गीयमानेषु त्रयस्त्रिंशः स्तोमो निष्पद्यते स एवार्भवस्य पवमानस्य स्तोम इत्यर्थः ॥ २४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य
एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथ प्राकृतमेवाग्निष्टोमसामेत्यभिप्रेत्य ततः परेषूक्थ- स्तोत्रेषु द्विपदाः स्तोत्रीयाः कार्य्या इति विधित्सुस्तदर्थं किञ्चि- द्ब्रह्मवादिनां विचारमुपक्षिपति ।

ब्रह्मवादिनो वदन्ति प्रायणतो द्विपदाः कार्य्या ३ उदयनता ३ इति ॥ १ ॥

ब्रह्मवादिनो वेदार्थचिन्तका वदन्ति मीमांसन्ते किं यज्ञस्य प्रायणतः प्रारम्भसमये द्विपदा ऋचः स्तोतीया किं वा उदयनतः समाप्तिवेलायामिति उभयत विचार्य्यमाणानामिति श्रुतिर्द्रष्टव्या ॥ १ ॥

एवं विचार्य्य निर्णीतं पक्षमाह ।

उदयनतएव कार्य्याः पुरुषो वै द्विपदाः प्रतिष्ठायै ॥ २ ॥

उदयनतएव कार्य्याः कुत एतत् येयं द्विपदा सा पुरुषो वै द्विपदाः तस्मात्स्यात् पुरुषात्मकाएव पुरुषसंस्तुतानान्तस्मिन् द्विपदानामन्ततः करणं पादद्वयवतो यजमानस्य प्रतिष्ठानाय कल्पते ॥ २ ॥

अथ प्रकारान्तरेण स्तौति ।

वाचा वै सर्वं यज्ञन्तन्वते तस्मात्सर्वां वाचं पुरुषो वदति सर्वा ह्यस्मिन् सꣳस्तुता प्रतितिष्ठति॥ ३ ॥

वाचा श्रुतशास्त्रात्मिकया खलु सर्व्वं यज्ञं अग्निष्टोमादि विश्वसृजामयनान्तं सकलयज्ञजातं तञ्च ते यजमानाः विस्तारयन्ति यस्माद्यज्ञे सर्व्वा वाक् साधनभूता तस्मात्सर्व्वां लौकिकीञ्च वैदिकीञ्च वाचं पुरुषो वदति प्रयुङ्क्ते हि यस्मादस्मिन् पुरुषे सर्व्वा वाक् संस्तुता सह स्तुता प्रतितिष्ठति प्रतिष्ठिता भवति

तस्मात् सर्व्वा पुरुषो वदति तादृशः पुरुषो द्विपदाभिः पञ्चा-वसानगताभिः प्रतिष्ठितो भवतीति द्विपदास्तुतिर्द्रष्टव्या ॥ ३ ॥

अथ मैत्रावरुणोक्थस्य साम दर्शयति ।

गूर्द्दो भवति ॥ ४ ॥

अग्ने त्वन्नो अन्तम इत्यत्र द्विपदात्टचे गूर्द्दं साम गातव्यं भवति ॥ ४ ॥

अथास्य साम्न आख्यायिकाप्रदर्शनपुरःसरं सर्व्वकामसाधनतामाह ।

गौपायनानां वै सत्रमासीनानां किरातकुल्या-वसुरमाये अन्तःपरिध्यसून् प्राकिरतान्तेऽग्नेत्वन्नो अन्तमइत्यग्निमुपासीदꣳस्तेनास्नस्पृणवꣳस्तद्वा-व ते तर्ह्यकामयन्त कामसनि साम गूर्द्दः काममेवैते-नावरुन्धे ॥ ५ ॥

गौपायनानां गौपगोत्राणां सत्रमासीनानां सत्रासनं कुर्व्वतामेषामसून् प्राणान् किरातकुल्यौ किराता म्लेच्छाः तत्तुल्यरूपे असुरमाये असुरसम्बन्धिन्यौ माये अन्तःपरिधि आहवनीयस्य परिधीनाम्मध्यदेशे प्राकिरतां प्रकर्षेण विचिपतां क्षविक्षेप इति धातुः ततस्ते गौपायनाः अग्ने त्वन्नो अन्तम इति तृचेनाग्निमुपासीदन्नुपागच्छन् अस्तुवन्नित्यर्थः

तेनोपसदनेन अग्नेः प्रसादात् पुनरात्मीयान् असून् स्पृशन् बलयन् मायापरिच्छिन्नान् पुनरादाय प्रबलान् कुर्व्वन्नित्यर्थः ते गौपायनाः तस्मिन् समये एतदेवेतत्त्वांकामयन्त तस्माद्देः कामसनि कामप्रदं गतमन्यत् ॥ ५ ॥

अथ ब्रह्मण उक्थस्तोत्रस्य साम दर्शयति ।

गोतमस्य भद्रं भवति ॥ ६ ॥

गोतमस्य भद्राख्यं साम इमानुकं भुवनासीषधे सेत्यस्मिन् द्विपदे तृचे गातव्यं ॥ ६ ॥

भद्रशब्दवाच्यत्वादाशीःप्रापकमेतत्सामेति स्तौति ।

आशिषमेवास्मा एतेनाशास्ते साम हि सत्याशीः ॥ ७ ॥

अस्मै यजमानाय सिद्धं शिष्टं ॥ ७ ॥

अथैतत् महत्त्वप्रापकमिति स्तौति ।

एतेन वै गोतमो जेमानं महिमानमगच्छत् तस्माद्धे च पराञ्चो गोतमाद्ये चार्वाञ्चस्त उभये गोतम ऋषयो ब्रुवते ॥ ८ ॥

एतेन खलु भद्रेण साम्ना पुरा गोतमः ऋषिः जेमानमतिशयेन जेतृत्वं महिमानं महत्त्वञ्चागच्छत् तस्मादेव कारणात्

गोतमादेव ऋषेः ये पराञ्चः पूर्वकालीना ज्येष्ठाः ये च अर्वाञ्चः अर्वाचीनाः पश्चाज्जाताः कनिष्ठाः उभये उभयविधास्ते गोतम ऋषयः गोतमाख्या ऋषय इति ब्रूवते उच्यन्ते गोतमशब्देनैव उच्यन्ते व्यवह्रियन्त इत्यर्थः तस्मादनेन साम्ना स्तुवन् जेमानं महिमानं गच्छतीति ॥ ८ ॥

अथाक्षावाकोकथ्यस्य साम दर्शयति ।

उद्वंशपुत्रो भवति ॥ ९ ॥

उद्वंशपुत्राख्यं साम प्रव इन्द्राय वृत्रहन्तमायेति तृचे गातव्यं ॥ ९ ॥

गायन्ति त्वा गायत्रिण इत्यस्यां योन्यां गीयमानं सामो द्वंशीयन्तद्धर्म्मप्राप्त्यर्थं तादृप्यं तदुद्वंशपुत्रस्यातिदिशति ।

यद्वा उद्व(ं)शीयन्तदुद्व(ं)शपुत्रः ॥ १० ॥

योनिदृष्टेनोद्वंपशब्देन सम्बन्धादुद्वंशीयं यदेवोद्वंशीयाख्यं साम तदेवोद्वंशपुत्रः तद्धर्म्मभाग्भवतीत्यर्थः ॥ १० ॥

कोऽसौतद्धर्म्म इत्यत आह ।

अर्द्धेडामतिस्वरति ॥ ११ ॥

उवित्यर्द्धेडा अतिसारश्च उद्वंशीये दृश्यते तावत्रापि भवतः तथैव ह्वाधीमहि उमपा २ तो२५ हाइ इति उवित्यर्द्धे-

डापि तत्स्थाने इडास्थानादेश इति परिभाषासूत्रेण इट् इति प्रयोगकाले प्रयोक्तव्यं अड्डोपाध्ययनन्तु ब्रह्मयज्ञाद्यर्थं अय-मर्थः अड्डां कृत्वा तत ऊर्द्ध्वं अतिस्वारमतिमन्द्रं करोति ॥११॥

तदेतत् स्तौति ।

तस्मादूधर्द्धारा अति क्षरन्तीडायामन्ततः पशुषु प्रतितिष्ठति ॥ १२ ॥

यस्मादड्डामतीत्य स्वरति तस्माद्गवां दुग्धप्रदेशमतीत्य पयसो धाराः क्षरन्ति स्रवन्ति अन्ततः षडहावसाने इडायां प्रतितिष्ठन् पशुष्वेव प्रतितिष्ठति तदात्मकत्वादिडायाः ॥ १२ ॥

यदेतदतिस्वरणं तत् सप्तमस्याह्नः संसारहेतुरिति स्तौति ।

क्लृप्त उपरिष्टादृक् साम च विमुच्येते अभ्युस्वरेण सप्तममहः स्वरति सन्तत्यै ॥ १३ ॥

क्लृप्ते कल्पिते ऋक्सामभ्यां त्रिवृदादिस्तोमैश्च सम्यगनुष्ठिते षडहे सति उपरिष्टात्तदूर्द्ध्वं ऋक् साम च विमुच्येते यथा ग्रामप्राप्तेरूर्द्ध्वं शकटवाहिनौ बलीवर्द्दौ विमुच्येते तद्वत् ऋक्सामयोः श्रमापनोदार्थं विमोकः कार्य्यः तथा च षडहस्य क्लृप्तिसमाप्तत्वात् सप्तमस्य चाह्नोऽनारम्भात् दशरात्रो विच्छिन्नः स्यात् तसरशेतत् क्रियमाणेनातिस्वारेण द्राघीयसा सप्तम-महरभिस्वरति अभिलक्ष्य स्वारं करोति सन्तत्यै उक्तविच्छेद-परिहारेण षष्ठसप्तमयोरह्नोः सन्तानार्थं ॥ १३ ॥

षडहसमाप्तेरूर्ध्वं लौकिकं वैदिकञ्च बहुभाषणन्न किञ्चित्कार्य्यमिति विधत्ते ।

ऊर्ध्वेव वा एतर्हि वाग्यदा षडहः सन्तिष्ठते न बहु वदेन्नान्यं पृच्छेन्नान्यस्मै प्रब्रूयात्॥ १४ ॥

एतर्हि एतस्मिन् काले वाग्देवता ऊर्ध्वेव वै ऊढवतीव खलु यथा सति दूरं भारवहनं कृत्वा पुरुषः श्रान्तो भवति एवमेव षडहे बह्वी ऋचो बहूनि सामानि प्रयुञ्जानानां वागपि श्रान्ता भवति यदासौ षडहमह्नां षण्णां समाहारः षडहः सन्तिष्ठते यस्मिन् काले समाप्यते तस्मान्न बहु वदेत् वाग्देवतायाः श्रमपनोदसिद्ध्यर्थं बहुभाषणन्न कुर्य्यात् अन्यञ्च पुरुषन्न पृच्छेत् अन्यस्मै पुरुषान्तराय च न ब्रूयात् प्रवचनं न कुर्य्यात् ॥ १४ ॥

अथैतस्मिन् समये ऋत्विजां बहुभोजनं विधत्ते ।

मधु वाशयेद्घृतं वा यथोर्ध्वो वहं प्रत्यनक्ति तथा तत्॥ १५ ॥

षडहसमाप्तेरनन्तरं ऋत्विजो मधु वा प्राशयेत् घृतं वा अन्ययोरन्यतरेणोपसिक्तमन्नमृत्विजो भोजयेदित्यर्थः तथा च सूत्रं षष्ठेऽहनि संस्थिते बहुवादिनः स्युर्न चाधीयोरन्नोत्तरस्याह्नः उपाकरणात् सर्पिर्मधुभ्यामृत्विजोभोजयेदहीनेष्वन्यतरेण वेति ऊर्ध्वो ऊढवतो बलीवर्द्दादेः वहं वहप्रदेशं स्कन्धभाग

प्रत्यनक्ति तैलादिभिः स्नेहयति तथा तत् मध्वदनं वा ऋत्वि-
जां भवति यथा वहस्य प्रत्यञ्जनेन बलीवर्द्दादिः पुनर्वहनसमर्थो
भवति एवं श्रान्तवाचो ऋत्विजो मधुघृतप्राशनेन स्फुरद्वाचः
क्रियन्त इत्यर्थः ॥ १५ ॥

अथैतेषु त्रिषूक्थस्तोत्रेषु स्तोमं विधत्ते ।

**त्रयस्त्रिꣳश एव स्तोमो भवति प्रतिष्ठायै देव-
तासु वा एष प्रतिष्ठितः ॥ १६ ॥**

यथा वहस्य प्रत्यञ्जनेन बलीवर्द्दादिः पुनर्वहनसमर्थो भवति
तथा परिश्रान्तो वाचो ऋत्विजः सिद्धमेतत् ॥ १६ ॥

वेदार्थस्य प्रकाशेन तमोहार्द्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-
बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माध-
वीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य
द्वादशः खण्डः ।

त्रयोदशाध्यायः समाप्तिमगलत् ।

चतुर्द्दशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥

इत्थं द्वितीयपञ्चिकायास्त्रिभिरध्यायैर्द्दशरात्रादिभूतस्य पृष्ठ्यषडहस्य स्तोमक्लृप्तिरुक्ता अथ छन्दोमानां प्रथमद्वितीययोः स्तोमक्लृप्तिश्चतुर्थेऽध्याये विधीयते । तत्र प्रथमस्य छन्दोमस्य बहिष्पवमानस्तोत्रे स्तोमक्लृप्तिं विधातुमाह ।

आप्यन्ते वा एतत् स्तोमाश्छन्दाꣳसि यत् षडह आप्यते ॥ १ ॥

यद्यदा षडहः षसामह्नां समाहारः राजाहःसखिभ्यष्टच् समासान्तः न संख्यादेः समाहार इत्यह्नादेशप्रतिषेधः यस्मिन् पृष्ठ्यः षडहः समाप्यते एतत् एतस्मिन् काले त्रिवृत्पञ्चदशाद्याः स्तोमा गायत्र्यादीनि च छन्दांसि आप्यन्ते वै परिसमाप्यन्ते खलु त्रिवृदादिस्तोमानां गायत्र्यादिछन्दसाञ्च क्रमेण षट्स्वहःसु विनियुक्तत्वात् ॥ १ ॥

नन्वेवं केन च स्तोमेन केन च छन्दसा छन्दोमाः कल्पयितव्या इत्यत आह ।

आप्ते षडहे छन्दांꣳसि स्तोमान् कृत्वा प्रयन्ति ॥२

षडहे आप्ते परिसमाप्ते स्तोमछन्दसोरपि परिसमाप्तत्वात् पुनरन्यानि छन्दांसि चतुर्विंशादीन् स्तोमांश्च कृत्वा निर्म्माय प्रयन्ति छन्दोमान् प्रारभन्ते ॥ २ ॥

अथ तत्र प्रथमे छन्दोमे बहिष्पवमानस्य स्तोत्रीयाख्यं प्रथमं तृचं विधत्ते ।

प्रकाव्यमुशनेव ब्रुवाण इति गायत्र्या रूपेण प्रयन्ति ॥ ३ ॥

प्रकाव्यमुशनेव इति तृचो बहिष्पवमानस्य स्तोत्रीयाख्यः तृच एति प्रेत्याशुमदित्यनुक्रान्तत्वात् प्रशब्दो गायत्र्यारूपं सा हि छन्दसां प्रथमा प्रशब्दः प्राथम्यशंसीति युक्तं तस्य गायत्रीरूपत्वं तथा गायत्र्याः सम्बन्धिना रूपेण प्रकाव्यमिति प्रशब्देन प्रयन्ति सप्तममहः प्रारभन्ते ॥ ३ ॥

ननु छन्दोऽन्तरस्य रूपं परित्यज्य गायत्रीरूपस्वीकारे किं कारणमित्यत आह ।

इयं वै गायत्र्यस्यामेव प्रतिष्ठाय प्रयन्ति ॥ ४ ॥

इयं सर्व्वप्राणिनां पुरोवर्त्तिनां पृथिव्येव गायत्रीस्वरूपा उभयोः प्राथम्यसादृश्यात्तच्छन्दाश्च एवं गायत्रं रूपं प्रयुञ्जानाः

अस्यामेव पृथिव्यां प्रतिष्ठाय प्रथमतः प्रतिष्ठा भूत्वा प्रयन्ति अहः प्रारभन्ते ॥ ४ ॥

नन्वेवं मुख्येव गायत्री कस्मान्न प्रयुज्यत इत्यत आह ।

त्रिष्टुप् प्रतिपद्भवति ॥ ५ ॥

त्रिष्टुप् छन्दस्कैवास्य सप्तमस्याह्नः प्रतिपद्भवति सर्वप्राणिनां पुरोवर्त्तिनां पृथिव्येव गायत्रीस्वरूपा प्रतिपद्यते प्रारभ्यत इत्यपि प्रतिपत् सा च पूर्व्वोक्ता प्रकाव्यमुशने वब्रुवाण इत्येषा यद्यपि प्रतिपदिति एकवचनेन एका स्तोत्रीया विधित्सितेति प्रतीयते तथापि तृचसूक्तानामादिग्रहणेन विधिरनादेश इति परिभाषायास्तदादिकस्तृचएवात्र ग्राह्याः ननु गायत्रं प्रातः सवनं त्रैष्टुभम्माध्यन्दिनं सवनं जागतं तृतीयसवनमिति प्रकृतौ ज्योतिष्टोमे दृश्यते तत्कथं प्रातःसवने त्रिष्टुब्विधानन्नैष दोषः द्वादशाहो हि द्विविधः समूढो व्यूढश्चेति तत्र समूढे यथा प्रकृतौ तथैव सवनानि भवन्ति व्यूढे तु छन्दसां व्यूहनस्योक्तत्वात् तृतीयस्य त्रिरात्रस्य प्रातःसवनानि सर्व्वाणि त्रैष्टुभानि जागतानि माध्यन्दिनसवनानि गायत्राणि तृतीयसवनानीति व्युच्छेदनत्वात् त्रिष्टुभः प्रातःसवने सङ्गतिरधिगन्तव्या ॥ ५ ॥

तदेतत्प्रशंसति ।

ओजोवीर्य्यं त्रिष्टुबोजस्येव वीर्य्ये पराक्रम्य प्रयन्ति ॥ ६ ॥

ओजोबलं तदात्मकं वीर्य्यञ्च त्रिष्टुप् प्रजापतेरङ्गाद्बलवतो बाहुलक्षणाच्च वीर्य्यवतेन्द्रेण सहोत्पत्तेः तथाप्योजोरूप एव वीर्य्ये स्थित्वा पराक्रम्य जेतव्यं जित्वा प्रयन्ति प्रगच्छन्ति ॥ ६ ॥

अथ प्रकारान्तरेणेमं तृचं स्तौति ।

स्तोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै ॥७॥

प्रकाव्यमुशने वब्रुवाण इत्ययं त्रैष्टुभस्तृचः स्तोत्रीयाख्यः प्रथमस्तृचो भवति बहिष्पवमाने प्रथमस्य तृचस्य स्तोत्रीय इति संज्ञा गतमन्यत् ॥ ७ ॥

ननु त्रिष्टुप्छन्दसो द्वितीयेऽहनि प्रयोगेण गतसारत्वात् कथं छन्दोमेषु विनियोग इति तत्राह ।

हरिवत्यो भवन्ति छन्दोमानामयातयामतायै ॥८

हरिवत्यो हरिशब्दयुक्ताः स्तोत्रीया भवन्ति छन्दोमानां गायत्रीत्रिष्टुब्जगतीभिश्छन्दोभिर्मीयमानानां चतुर्विंशादीनां स्तोमानामयातयामतायै अगतसारत्वाय एषां संक्रमणे तिग्म-शृङ्गोदिवाहरिर्ददृशे नक्तमृज्जइत्यस्मिन् तृचे श्रवणात्प्राणभ-न्न्यायेनासां हरिशब्दवत्त्वं ॥ ८ ॥

अथ स्तुत्यर्थं विहितेनानेन तृचेन सहिताः अन्या एकविं-शतिः स्तोत्रीयाः विधत्ते ।

द्वादशर्चौ भवतः ॥ ९ ॥

द्वादशानामृचां समाहारो द्वादशर्चः ऋक्पूरब्धूः पथामानक्षे इति अकारः समासान्तः प्रस्वानासो रथा इवेति नवर्चः अस्मग्रमिन्द्वः पर्येति नवर्चः आतेदचमिति तृचः एवमेकविंशतिसंख्या ऋचः पूर्वं विहिताभिस्तिसृभिः सह द्वादशर्चौ बहिष्पवमानस्य भवतः ॥ ९ ॥

अथैतत् स्तौति ।

द्वादश मासाः संवत्सरः संवत्सरमेव तत्पूर्वस्मै षडहाय प्रत्युद्यच्छति सवीवधतायै ॥ १० ॥

द्वादशमासात्मकः संवत्सरः पृष्ठ्यषड्हस्य संवत्सरः षड्वा ऋतवः षट्पृष्ठानीति श्रुतेः तत्तथा सति द्वादशमासात्मकं संवत्सरमेव पूर्वस्मै षड्हाय प्रत्युद्यच्छति प्रतिनिधित्वेनोद्गमयति किमर्थं सवीवधतायै वीवधो भारः समानो वीवधः तस्य भावः सवीवधता तदर्थं ॥ १० ॥

एवं द्वादशर्चद्वयगतद्वादशसंख्योपजीवनेन स्तौति ।

चतुर्विंशतिर्भवन्ति चतुर्विंशतिरर्द्धमासाः संवत्सरः संवत्सरमेव तत्पूर्वस्मै षडहाय प्रत्युद्यच्छति सवीवधतायै ॥ ११ ॥

एवं द्वादशर्चयोः सतोश्चतुर्विंशतिः चतुर्विंशतिसंख्याकाः स्तोत्रीया ऋचो भवन्ति चतुर्विंशकार्द्धमासात्मकः संवत्सरस्तथा सति स्तोत्रीयाचतुर्विंशकेन चतुर्विंशत्यर्द्धमासात्मकं संवत्सर-मेव पूर्वस्मै प्रागनुष्ठिताय षड़हाय प्रतिरूपत्वेनोद्यच्छत्युद्गमयति आतोलनवेलायामुभयोर्गौरवसाम्यार्थः ॥ ११ ।

अथास्मिन्नहनि चतुर्विंशं स्तोमं विधातुमुक्तिप्रत्युक्तिभ्यां कञ्चिद्दृष्टान्तमाह ।

इत ऐन्द्रोत इति होवाचाभिप्रतारो काक्षसेनिर्ये महावृक्षस्याग्रं गच्छन्ति क्व ते ततो भवन्ति प्र राजन् पक्षिणः पतन्त्यथापक्षाः पद्यन्ते ॥ १२ ॥

ऐन्द्रोतः इन्द्रेण ऊतो रक्षितः इन्द्रोतः तद्गोत्रजः ऐन्द्रोतः स च इताख्यः पदद्वयमप्येतत् सम्बुद्ध्यन्तं संज्ञा पूर्वको विधिरनित्य इति एङ् ह्रस्वात् सम्बुद्धेरिति सम्बुद्धिलोपविधेरनित्यत्वात् सु-लोपाभावः हे ऐन्द्रोत इताख्य ऋषे इति सम्बोध्य काक्षसेनिः कक्षसेनस्य पुत्रः अभिप्रतारी नाम राजर्षिः इत्युवाच एवं खलु प्रोक्तवान् कथमिति तदुच्यते ये प्राणिनः महावृक्षस्य महतः शाखास्कन्धादिभिरुन्नतस्य वृक्षस्य अग्रमूर्द्धं गच्छन्ति प्राप्नुवन्ति ते ततोऽग्रादूर्द्धं क्व कुत्र स्थाने भवन्तीति एवमुक्तो इतं प्रत्यवोचत् हे राजन् पृथिवीपते त्वदुक्तात् महावृक्षाग्रात् पक्षिणः पक्षं मुक्त्वा एतत्प्रपतन्ति पक्षाभ्यामुत्पतन्ति अपक्षाः पक्षरहिताश्चेद्-

वपद्यन्त इति शब्दोत्रासञ्जनीयः अधःपततीति अयमर्थः षष्ठे-ऽहनि प्रयुक्तस्त्रयस्त्रिंशः स्तोमः महाहत्याग्रस्थानीयः त्रिवृदादि-स्तोमानां संख्याधिक्यविश्रान्तभूमित्वात् तं प्रयुक्तवन्तो यज-मानाः पक्षिणः ॥ १२ ॥

के पक्षरहिताः कौ च तेषां पक्षौ इति तत्सर्वमाह।

यो वै विद्वाᳪसस्ते पक्षिणो येऽविद्वाᳪसस्तेऽपक्षा-स्त्रिवृत्पञ्चदशावेव स्तोमौ पक्षौ कृत्वा स्वर्गं लोकं प्रयन्ति ॥ १३ ॥

ये खलु विद्वांसो वेदार्थाभिज्ञाः ते पक्षिणः पक्षवन्तः ये अविद्वांसोऽनभिज्ञाः ते अपक्षाः पक्षरहिताः तस्माद्विद्वांस-स्त्रिवृत्पञ्चदशौ स्तोमावेव पक्षौ कृत्वा स्वर्गं लोकं प्रयन्ति इति त्रिवृत्पञ्चदशाभ्यां संहताभ्यां स्तोमाभ्यां एतत्सप्तममहः परि-समाप्य तत्साध्यं फलं प्राप्नुवन्तीत्यर्थः ॥ १३ ॥

एवं पारोक्ष्येण चतुर्विंशं स्तोमं विधायाथ प्रत्यक्षं विधत्ते।

चतुर्विᳪश एव स्तोमो भवति प्रतिष्ठायै तेजसे ब्रह्मवर्चसाय ॥ १४ ॥

त्रिवृत्पञ्चदशौ स्तोमौ विदुषां पक्षभूतौ मिलित्वा चतुर्विं-शतिः स्तोत्रीया भवन्ति तस्मात्सप्तमेऽहनि चतुर्विंशः स्तोमो

भवति स चतुर्विंशत्यर्द्धमासात्मकसंवत्सरसंस्तुतत्वात्प्रतिष्ठादिहेतु-र्भवति संवत्सरो हि प्रतिष्ठाहेतुः ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथास्मिन् सप्तमेऽहनि प्रथममाज्यस्तोत्रं दर्शयति ।

मूर्द्धानन्दिवो अरतिं पृथिव्या इत्याग्नेयमाज्यं भवति ॥ १ ॥

अस्मिंस्तृचे गीयमानमग्निदेवत्यं प्रथममाज्यस्तोत्रं भवतीत्यर्थः ॥ १ ॥

अथास्य तृचस्यास्मिन्नहनि सङ्गतिमाह ।

मूर्द्धा वा एष दिवोयस्तृतीयस्त्रिरात्रः ॥ २ ॥

द्वौ त्रिरात्रौ गतौ तदपेक्षया यत् योऽयं तृतीयस्त्रिरात्रः एषहि द्युस्थानीयस्य दिवो दशरात्रस्य मूर्द्धा शिरः तस्मात् मूर्द्धानं दिव इति तृचस्तृतीये त्रिरात्रे सङ्गत इत्यर्थः ॥ २ ॥

अथ पादान्तरमनूद्य स्तौति ।

वैश्वानर ऋत आजातमग्निमिति वैश्वानर इति वा अग्नेः प्रियं धाम प्रियेणैवैनं तद्धाम्ना परोक्षमुपशिक्षति ॥ ३ ॥

वैश्वानर ऋत आजातमग्निमिति पादोऽस्मिंस्तृचे दृश्यते वैश्वानर इति विश्वनरहितं सर्वजनानामनुग्राहकं परं धाम शरीरन्तेजोमयं उच्यते तत्तेन वैश्वानरपदप्रतिपाद्येन प्रियेणैव धाम्ना तेजसा एतमग्निं परोक्षं परोक्षेण उपशिक्षति प्रीणयति शिक्षतिर्जननकर्म्मा तेन च तज्जन्यं प्रीणनं लक्ष्यते ॥ ३ ॥

अथ द्वितीयमाज्यस्तोत्रं विधत्ते ।

प्रवो मित्राय गायतेति द्यावापृथिवीयम्मैत्राव-रुणं द्यावापृथिवी वै मित्रावरुणयोः प्रियं धाम प्रियेणैवैनौ तद्धाम्ना परोक्षमुपशिक्षति ॥ ४ ॥

प्रवोमित्रायेति द्यावापृथिवीयं द्यावापृथिवीसम्बद्धं मैत्रावरुणं मित्रावरुणदेवताकं द्वितीयमाज्यस्तोत्रं भवति तानः शक्तं पार्थिवस्याहोरायोर्दिव्यस्येति द्यावापृथिवीसम्बन्धादस्य तृचस्य द्यावापृथिवीयत्वं ॥ ४ ॥

अथ तृतीयमाज्यमिन्द्रदेवताकं स्तौति ।

इन्द्रायाहि चित्रभानवित्यार्भवमैन्द्रमृभवो वा

इन्द्रस्य प्रियं धाम प्रियेणैवैनं तद्धाम्ना परोक्षमुपशिक्षति ॥ ५ ॥

ऋभु चित् राज इति त्रयः सुधन्वनः पुत्राः ऋभुशब्दवाच्याः त एवेन्द्रस्य प्रियं धाम स्थानं शरीरं तेजो वा ते ह्रीन्द्रस्य हरः निर्म्माय प्राहुः इन्द्रो हरोमुमुज्मे अश्विना रथमिति हि मन्त्रवर्णः यद्वा इन्द्रः सूर्य्यः ऋभवो रश्मयः तेषां सूर्य्यप्रियधामत्वं स्पष्टं शिष्टं पूर्व्ववद्योज्यं ॥ ५ ॥

अथ चतुर्थमाज्यस्तोत्रं विधत्ते ।

तमीडिष्वयो अर्चिषेत्यनिरुक्तमैन्द्राग्नं देवतानामनभिधर्षायोत्तमार्द्धे निराह देवतानामप्रणाशाय स्तोमः ॥ ६ ॥

तमीडिष्विति तृचः अनिरुक्तं निरुक्तं निष्कृत्य शृङ्गग्राहिकयोक्तं देवतापदं यस्मिन्नास्ति तादृशमैन्द्राग्नमिन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं भवति किमर्थमस्यानिरुक्तत्वमिति देवतानामनभिधर्षार्थं तत्तन्नाम्नाप्यवह्रियमाणा देवता अभिधृष्टा अभिपीडिताः स्युः यथा विद्यादिभिः श्रेष्ठाः पुरुषाः औपचारिकन्नाम परित्यज्य स्वस्वेन नाम्ना व्यवह्रियमाणाः कुप्यन्ति तद्वद्देवताश्रेष्ठाः तस्मात् अभिधर्षो माभूदित्येवमर्थं अस्य स्तोत्रस्यानिरुक्तत्वं यद्येवं देवताया अप्रतिपादितत्वात् अनिरुक्तप्रजापतिरिति श्रुतेः प्राजापत्यमेवैतत् स्तोत्रं स्यात् मैन्द्राग्नमित्यत आह उत्त-

मार्ष्टे इति गिराहेति ऐन्द्रमग्निश्च वोढव इति अग्ने गोर्मिर्न गिराह देवतां निष्कृत्य ब्रवीति देवतानामप्रज्ञाभाय प्रज्ञाभाभावाय देवताविशेषसङ्गावद्योतनार्थः एतेष्वपि चतुर्ष्वाज्यस्तोत्रेषु पूर्व्वोक्तचतुर्विंश एव स्तोमः कार्य्यः एतेषु प्रातःसवननिष्ठेषु पञ्चसु स्तोत्रेषु स्तोत्रीयामात्रस्यान्यत्र विधानात् साम प्राकृतमेवेति द्रष्टव्यं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्द्दशाध्यायस्य द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथास्मिन् सप्तमेऽहनि माध्यन्दिनपवमानस्य प्रथमं तृचं दर्शयति ।

वृषा पवस्व धारयेति गायत्री भवत्यह्नो धृत्यै ॥१॥

वृषा पवस्वेति गायत्री माध्यन्दिनपवमानस्य प्रतिपद्भवति प्रथमतृचो गायत्री भवतीत्यर्थः सोऽयं सप्तमस्याह्नो धृत्यै धारणाय भवति धारयेति धारणवाचि धृञ् धातुशब्दनिष्पन्नत्वात् ॥ १ ॥

अथास्मिन्नहनि तृचस्य सङ्गतिमाह ।

वृषण्वत्यस्त्रिष्टुभो रूपेण त्रैष्टुभᳪं ह्येतदहः ॥२॥

वृषण्वत्योवृषशब्दयुक्ता वृषापवस्वेत्याद्यास्तिस्रोगायत्र्यो रूपेण

दृषच्छब्दरूपेण त्रैष्टुभेन रूपेण योगात्त्रिष्टुभो भवन्ति एतत् सप्तममहरिति त्रैष्टुभं हि त्रिषु प्रायणत्वात् तस्मादस्मिन्नहनि दृषत्त्वयोगायत्नलक्षणाया त्रिष्टुप्त्वात् सङ्गता इत्यर्थः ॥ २ ॥

अथान्यं तृचं दर्शयति ।

पुनानः सोमधारयेति धृत्यै ॥ ३ ॥

पूर्ववदस्यापि तृचस्य धृतिहेतुता योज्या ॥ ३ ॥

तृचान्तरं विधत्ते ।

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतमिति प्रवत्यो भवन्ति प्रणिनीषेण्यमिव ह्येतदहः ॥ ४ ॥

प्रो अयासीदित्याद्या प्रवत्यः प्रशब्दयुक्तास्तिस्रः स्तोत्रीया भवन्ति यत् सप्तममहः प्रणिनीषेण्यं प्रणेतव्यत्वेनेष्टमिव हि षडहस्य समाप्तत्वात् सप्तममहः पुनः प्रारिप्सितमित्यर्थः तस्मात्प्रणयनार्थसूचकेन प्रशब्देन योगात् सप्तमे प्रणेतुमिष्टेऽह्नि विनियोज्या इत्यर्थः ॥ ४ ।

ननु माध्यन्दिनपवमानस्यान्त्यस्तृचस्त्रिष्टुभः प्रकृतौ तत्स्थाने कथमयं जागतस्तृचः संगच्छत इत्यत आह ।

जगत्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते ॥ ५ ॥

प्रो अयासीदित्याद्या एताः सर्वा जगत्यः सत्योऽपि त्रैष्टुभेन

रूपेण योगात् त्रैष्टुभः तच्च रूपमिन्द्रशब्दः त्रिष्टुभा सहेन्द्रोत्पत्तेः गतमन्यत् ॥ ५ ॥

अथ वृषा पवस्वेति विहिते प्रथमे तृचे गायत्रं साम विधाय पूर्ववत्तद्ब्राह्मणञ्चातिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ६ ॥

सिद्धमेतत् ॥ ६ ॥

अथास्मिन्नेव तृचे आवृत्ते सामान्तरं विधत्ते।

सन्तनि भवति सप्तमस्याह्नः सन्तत्यै ॥ ७ ॥

वेदसामाख्ये ग्रन्थे सर्वाण्यपि सामानि एकैकस्यां गीयन्ते इदन्तु साम तृचे व्यासज्य गीयते अथ तिसृषु स्तोत्रीयासस्य सन्तानदर्शनात् सन्तनीति संज्ञा एतद्वृषापवस्वेत्यस्मिन्नेव तृचे गातव्यं तत्रास्य सप्तमस्याह्नः षष्ठेनाह्ना सह सन्तत्यै सन्तानाय संश्लेषाय भवति ॥ ७ ॥

अथ विच्छित्तिपूर्वकत्वात् सान्तत्यस्य षष्ठसप्तमयोरह्नोस्तदुभयं सदृष्टान्तं दर्शयति।

यथा वै व्योकसौ विप्रद्रवत एवमेते षष्ठञ्चाहः सप्तमञ्च विप्रद्रवतस्तौ यथा समानीय संयुञ्ज्यादेवमेवैते एतेन साम्ना संयुनक्ति ॥ ८ ॥

यथा खलु व्योकसौ विभिन्ननिलयौ पक्षिणौ विप्रद्रवतः विश्लिष्टं पततः एवमेते षष्ठमहः सप्तममहश्च विप्रद्रवतौ विमुक्तौ भवतः षष्ठेन षडहस्य समाप्तत्वात् तौ व्योकसौ पक्षिणौ समानीय एकत्र आनीय संयुज्यात् संयुक्तौ कुर्य्यात् एवमेवैते षष्ठसप्तमे अहनी एतेन सन्तनिसाम्ना संयुनक्ति सन्तनोति ॥ ८ ॥

अथास्मिन्नेव तृचे सामान्तरं विधत्ते ।

सौपर्णं भवति स्वर्गस्य लोकस्य समष्ट्यै ॥ ९ ॥

सौपर्णाख्यं साम वृषा पवस्वेत्यस्मिन्नेव तृचे कार्य्यं सुपर्णो हि पक्षी उत्पतनेन स्वर्गं प्रापयितुं शक्तस्तत्सम्बद्धं सौपर्णं साम स्वर्गलोकस्य प्राप्त्यै समर्थं ॥ ९ ॥

अथ प्रकारान्तरेण प्रशंसति ।

यज्ञो वै देवेभ्योऽपाक्रामत्स सुपर्णरूपं कृत्वाचरत्तं देवा एतैः सामभिरारभन्त यज्ञइव वा एष यच्छन्दोमा यज्ञस्यैवैष आरम्भः ॥ १० ॥

यज्ञः खलु पुरा देवेभ्यः सकाशात् केनचिदपराधेनापाक्रामदपागच्छत् अपक्रम्य च सः यज्ञः सुपर्णरूपं सुष्ठुतमः श्येनस्तद्रूपात्मानं कृत्वा अचरत् अन्तरिक्षे अपवर्त्तत तं सुवर्णरूपयज्ञं देवाः एतैः सौपर्णैः सामभिरारभन्त अग्टह्णन् तस्मादेतत् साम यज्ञारम्भसाधनं यत् एते त्रयश्छन्दोमाः एष यज्ञः इव वै

यज्ञविलक्षणा एव अतो यज्ञस्यैव एष आरम्भो ग्रहणं भवति यत् सौपर्णं भवतीति एवं वा यज्ञभूतेषु छन्दोमेषु यज्ञग्रहणसाधनस्य सौपर्णस्य करणात् तेषां यज्ञत्वं सिद्ध्यतीत्यर्थः ॥१०॥

अथास्मिन्नेव तृच आद्ये सामान्तरं विधत्ते ।

रौहितकूलीयं भवत्याजिजित्यायै ॥ ११ ॥

रौहितकूलीयाख्यं सामापि तृषा पवस्वेत्यस्मिन्नेव तृचे गातव्यं तच्च आजिजित्यायै आजिः सङ्केतितप्राप्तव्यावधिः तस्य जयाय भवति ॥ ११ ॥

कुत एतदित्यत आह ।

एतेन वै विश्वामित्रो रोहिताभ्याꣳ रोहितकूल-आजिमजयत् ॥ १२ ॥

एतेन खलु साम्ना साधनेन पुरा विश्वामित्र ऋषिः रोहिताभ्यामश्वाभ्यां रोहितकूले एतत् संज्ञे स्थाने आजिमजयत् जितवान् तस्मादेतदाजिजयसाधनमित्यर्थः ॥ १२ ॥

एतदेव विव्रियते ।

विश्वामित्रो भरतानां मनस्वत्यायात्सौदन्तिभिर्नाम जनतयाꣳशं प्रास्यतेमाम्मां यूयं वशिकाञ्जयायेमानि मह्यं यूयं पूरयाय यदीमाविदꣳरोहितावश्व-

चितं कूलमुद्वहात इति स एते सामनी अपश्यत्ताभ्यां युक्ता प्रासेधत्स उदजयत्॥ १३ ॥

विश्वामित्रः पुरा भरतानां भरतवंशजातानां मनःसत्या मनसा युक्तया प्रजया आयात् भरतानां देशं शकटारूढोऽगच्छदित्यर्थः अत्र च भरतदेशे सौदन्तिभिः सुदन्तवंशजैः एतत्संज्ञैः जनतया जनसमूहेन अंशं विभजनाय धनं प्रास्यत प्राक्षिप्य आजिं सन्धाय तेन प्राप्तव्यमेतदिति स्थापितमभूत् योऽस्माकं मध्ये ज्येष्ठोऽसि तस्येदमस्त्विति तत्र विश्वामित्रो दैवसङ्गतएवमब्रवीत् हे सूदन्ताया यदि यूयं ज्येष्ठाय तर्हि अस्मिन् संख्यां वल्शिकां वल्शिसंज्ञां वसुसम्बन्धं धनसमूहं प्रति मां यूयं जयाय देहि यदि तु मदीयाविमौ रोहिताश्वौ अश्माचितं अश्मभिः पाषाणैराससन्ताच्चितं सन्तमग्रमिदं नद्याः कूलं उद्वहात ऊर्ध्वशकटं उत्तारयिता तर्हि मह्यं अतदर्थमेव इमानि धनानि पूर्याय पूरयायेति एवं कृतप्रतिज्ञः स विश्वामित्रः एते रोहितकूलीये सामनी अपश्यत्ताभ्यां सामभ्यां अश्वौ शकटे युक्ता प्रासेधत् प्रकर्षेण कूलोद्वहनं साधितवान् ततः स उदजयत् उत्कृष्टजयं प्राप्नोत् तस्मादेतद्रोहितकूलसम्बन्धात् रोहितकूलीयमित्याख्यायते । १३ ॥

अश्वेवमस्याजिजयहेतुता द्वादशाहे कथं सङ्गच्छत इत्यत आह ।

आजिर्वा एष प्रततो यद्द्वादशाहस्तस्यैते उ-
ज्जित्यै ॥ १४ ॥

प्रततः प्रकर्षेण विस्तारितः द्वादशाह इति यत् एष आजिर्वै आजिरेव अतस्तस्य द्वादशाहस्याजेरुज्जित्यै उज्जयाय भवति ॥ १४ ॥

अथ द्वितीयतृचे सामान्तरं विधत्ते।

कण्वरथन्तरं भवति ॥ १५ ॥

पुनानः सोमधारयेति विहितेऽस्मिन् तृचे कण्वरथन्तराख्यं साम गातव्यं ॥ १५ ॥

अथैतत् स्तौति।

तेजो वा एतद्रथन्तरस्य यत्कण्वरथन्तरꣳ सरस-
मेव तद्रथन्तरं प्रयुङ्क्ते यत्कण्वरथन्तरेण सप्तमे-
ऽहनि स्तुवते ॥ १६ ॥

यत् कण्वरथन्तराख्यं साम एतद्रथन्तरस्य अभि त्वा शूरेत्यस्यां गीयमानस्य तेजो वै तेज एव सारभूतमेतद्यावद्गणानस्य सप्तमेऽहनि उद्गातारः कण्वरथन्तरेण स्तुवत इति यत्तेन सरसं रससहितं सारवदेव रथन्तरं प्रयुङ्क्ते ॥ १६ ॥

अथैतत्प्रकारान्तरेण स्तौति।

जामि द्वादशाहः स्यादिति ह स्माहोग्रदेवो राज-निर्बार्हतꣳ षष्ठमहर्बार्हतꣳ सप्तमं यत्कण्वरथन्तरं भवति तेनाजामि ॥ १७ ॥

राजनिः रजनस्य पुत्रः उग्रदेवाख्यः ऋषिः षष्ठसप्तमयो-रुभयोरपि नैरन्तर्य्येण बार्हतत्वात् जामित्वदोषोऽस्तीत्याह पुरो-क्तवान् षष्ठमहर्बार्हतं बृहतः सम्बन्धि एव साम्नो बृहतः सकाशा-ज्जातत्वात् सप्तममहस्य बार्हतं बृहतः सम्बन्धि तथाच जामि-तादोषः तत्रायं परिहारः सप्तमेऽहनि कण्वरथन्तरं भवतीति यत् तेन कण्वरथन्तरेण अजामि जामितादोषो न भवति रथ-न्तरस्य कृतत्वात् ॥ १७ ॥

अथास्मिंस्तृचे सामान्तरं विधत्ते ।

गौङ्गवम्भवति ॥ १८ ॥

गौङ्गवाख्यं साम पुनानः सोम इत्यस्मिन्नेव आहत्ते तृचे गेयं ॥ १८ ॥

अथैतदस्मिन्नहनि प्राप्तिहेतुत्वेन स्तौति ।

अग्निरकामयतान्नादः स्यामिति स तपोऽतप्यत स एतद्गौङ्गवमपश्यत्तेनान्नादोऽभवद्यदन्नं वित्वा गङ्गु-द्यदगङ्गूयत्तद्गौङ्गवस्य गौङ्गवत्वमन्नाद्यस्यावरुध्यै गौ-ङ्गवं क्रियते ॥ १६ ॥

अन्नादो अन्नस्यात्ता भवेयमिति अग्निरकामयत कामितवान् कामयित्वा च स तपस्तप्तवान् स तपोमाहात्म्येन एतद्गौङ्गवाख्यं सामापश्यत् तेन च साम्ना अन्नस्यात्ताभवत् तदन्नं वित्त्वा लब्ध्वा यदगर्द्दत् शब्दमकरोत् गर्द्द शब्दे इति धातुः एतदेव व्याचष्टे यदगङ्गूयदिति गङ्ग अव्यक्ते शब्दे अगङ्गूयत् अव्यक्तं शब्दमकरोत् तत्तस्माद्गौङ्गवस्य साम्नो गौङ्गवत्वं गौङ्गवमिति नाम सम्पन्नं तस्मादद्यतनोऽपि अन्नाद्यस्यावरोधाय सप्तमेऽहनि गौङ्गवं क्रियते प्रयुज्यते॥ १६॥

अथ प्रकारान्तरेण तत् स्तौति।

यत्साम देवताः प्रशंसति तेन यजमानाः सत्याशिषः सत्याशिषोऽसामेति वै सत्रमासते सत्याशिष एव भवन्ति॥ २०॥

साम्नां मध्ये यत् साम देवताः प्रशंसति प्रशंसां करोति तेन साम्ना यजमानाः सत्याशिषः सत्यफला भवन्ति गौङ्गवाख्यं साम देवतायाः अग्नेः अन्नादत्वलक्षणां प्रशस्यं करोति यजमानस्य सत्याशिषः सत्यफलाः असामेत्यभिप्रायेण खलु सत्रमासते सत्रासनं कुर्व्वते ते देवताः प्रशंसकेनैतेन साम्ना सत्याशिष एव भवन्ति॥ २०॥

अथ सामान्तरं विधत्ते।

आयास्यम्भवति तिरश्चीननिधनं प्रतिष्ठायै ॥२१॥

आयास्यं अयास्येन दृष्टं साम पुनानः सोमेत्यस्मिन्नेव तृच आहृत्ते गातव्यं तच्च तिरश्चीननिधनं तैरश्चीनं तिर्य्यग्वर्त्तमानं निधनं यस्य तादृशं भवति यजमानस्य प्रतिष्ठानार्थं ॥ २१ ॥

अथैतद्विभ्रष्टशब्ददोषनिवर्हणहेतुतया स्तौति ।

अयास्यो वा आङ्गिरस आदित्यानां दीक्षिता-नामन्नमाश्नात् स व्यभ्रꣳशत स एतान्यायास्यान्य-पश्यत्तैरात्मानꣳ समश्रीणाद्विभ्रष्टमिव वै सप्तममह-र्य्यदेतत्साम भवत्यह्नरेव तेन सꣳश्रीणाति ॥ २२ ॥

आङ्गिरसो अङ्गिरोगोत्र अयास्य ऋषिः पुरा दीक्षितानां प्रारब्धयज्ञानां आदित्यानां अन्नमाश्नात् * तैः सामभिरा-त्मानं वीर्य्यैः समश्रीणात् समगमयत् एतत् सप्तममहश्च विभ्रष्ट-मिव वै भ्रष्टवीर्य्यमिव खलु षष्ठ्यपञ्चहस्य समाप्तत्वात् आगा-मिनोऽहरन्तरस्य चानिष्पत्तेरेकाकित्वात् एतदायास्यं साम सप्त-मेऽहनि भवतीति यत् एतेन साम्ना तदहरेव संश्रीणातीति वीर्य्येण संयोजयति ॥ २२ ॥

अथान्तिमे तृचे सामान्तरं विधत्ते ।

* अत्र पतितमनुमीयते ।

प्रवद्भार्गवं भवति ॥ २३ ॥

प्रवत् प्रशब्दयुक्तं भार्गवं भृगुदृष्टं तदाख्यं सामाप्तत्वात् आगामिनोऽहरन्तरस्य प्रो अयासीदिति विहितेऽस्मिंस्तृचे गातव्यं ॥२३

अथैतत् स्तौति।

प्रवता वै देवाः स्वर्गं लोकं प्रायन्नुद्वतोदायन् ॥२४

प्रवता प्रशब्दवता साम्ना खलु पुरा देवाः स्वर्गं लोकं प्रायन् प्रागच्छन् गन्तुं प्रक्रान्ता उद्वता उद्शब्दवता साम्ना उदायन् ऊर्द्धं गच्छन् तस्मादेतत् साम स्वर्गप्राप्तिसाधनमित्यर्थः ॥ २४ ॥

अथैतत्पवमानस्तोत्रमुपसंहरति।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः ॥२५

सर्व्वत्र हि पवमानाः पवमानस्तोत्राणि निधनान्तानि भवन्ति निधनमन्ते येषां ते निधनान्ताः अत्र च मा २ नोपथा ३ ऊवा २३४५ इति प्रवद्भार्गवस्यावसाने निधनमधीयते तस्मादह्नो धृत्यै धारणाय भवति एवं गायत्रादिप्रवद्भार्गवान्तेष्वष्टसु सामसु तृचेषु गीयमानेषु निष्पद्यमानश्चतुर्विंशस्तोमोऽस्य पवमानस्तोत्रस्य कार्य्य इत्यर्थः ॥ २५ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्द्दशाध्यायस्य

तृतीयः खण्डः।

अथ चतुर्थः खण्डः ।

अथ पृष्ठस्तोत्रेषु प्रथमद्वितीये प्रकृते एवेति मन्वानस्तृतीयस्य पृष्ठस्तोत्रस्य तृतीयं तृचं दर्शयति ।

वयं घत्वा सुतावन्त इति सतो बृहत्यो वर्षीयश्छन्द आक्रमतेऽनपभ्रंशाय ॥ १ ॥

वयंघत्वाद्यास्तिस्रः सतो बृहत्यो ब्रह्मसाम्नः स्तोत्रीया भवन्ति आसाञ्च सतो बृहतीत्वं पूर्वमुक्तं प्रकृतौ हि बार्हतः प्रगाथो ब्रह्मसाम्नः आधारः बृहती च षट्त्रिंशदक्षरा सतो बृहत्याख्यं छन्दः वर्षीयो वृद्धतरं चत्वारिंशदक्षरत्वात् अनुष्टुप्छन्द आक्रमते प्रारभते अनपभ्रंशाय अपभ्रंशाभावाय अधःपतनाभावाय ॥ १ ॥

अथ चतुर्थस्य पृष्ठस्तोत्रस्य स्तोत्रीयं तृचं दर्शयति ।

न किष्टङ्कर्म्मणानशदिति बृहत्यः सत्योऽभ्यारम्भेण जगत्यः ॥ २ ॥

न किष्टं कर्म्मणेत्याद्यास्तिस्रोऽच्छावाकसाम्नः स्तोत्रीया भवेयुः ताश्च स्वभावतो बृहत्यः सत्यो भवन्त्यभ्यारम्भेण गानसमये सकृद्गीयमानस्य मन्त्रभागस्य पुनरपि गानार्थमुपादानमभ्यारम्भः तेन जगत्यो भवन्ति अस्मिंस्तृचे वैखानससाम्नि गीयमाने

सदोदृधाम् तमभ्यसाम् शुभोजसा इति चतुरक्षरास्त्रयोऽभ्यासाद् पनरारभ्यन्ते एतानि द्वादशाक्षराणि सम्पद्यन्ते बृहती षट्त्रिंशदक्षरेति मिलित्वा अष्टाचत्वारिंशदक्षरा प्रथमा जगती भवति एवमुत्तरे अपि ॥ २ ॥

एवमभ्यारम्भेण जगतीसम्पादने कोलाभ इत्यत आह।

अपभ्रंश इव वा एष यज्ज्यायसः स्तोमात्कनीयांसं स्तोममुपयन्ति यदेता अभ्यारम्भेण जगत्यो भवन्त्यह्न एव प्रत्युत्तम्भाय ॥ ३ ॥

ज्यायसो बृद्धतरात् त्रयस्त्रिंशात् स्तोमात् कनीयांसं अल्पीयांसं न्यूनसंख्यं चतुर्विंशं स्तोममुपयन्ति यत् एषा अपभ्रंशइव वै अधःपतनमिव खलु तस्मात् सप्तमेऽहनि या देवताः पूर्व्वोक्ताः न किंष्ट कर्मयानशदित्याद्यास्ता अभ्यारम्भेण जगत्यो भवन्ति तदस्य सप्तमस्याह्न एव प्रत्युत्तम्भाय प्रत्युत्तम्भनाय अधःपततोधृत्यै धारणाय भवति अधिकाक्षरछन्दसः कारणात् स्तोमप्रयुक्तन्यूनता परिहृता भवतीत्यर्थः ॥ ३ ॥

अथास्मिन्नहनि ब्राह्मणः पृष्ठस्तोत्रनिवर्त्तकं साम दर्शयति।

अभिनिधनं कारवम्भवति ॥ ४ ॥

अभीति निधनं यस्य तादृशं काखदृष्टं साम वयं घत्वेति तृचे गातव्यं ॥ ४ ॥

तदेतद्भ्रातृव्यहननहेतुरिति स्तौति ।

अभिनिधनेन वा इन्द्रो वृत्राय वज्रं प्राहरत्तम-
स्तृणुत स्तृणुते भ्रातृव्यमभिनिधनेन तुष्टुवानः ॥ ५ ॥

अभिनिधनेनानेन साम्ना पुरा इन्द्रो वृत्रं हन्तुं वज्रं प्राहरत् प्राक्षिप्तवान् प्राहृत्य च तं वृत्रमस्तृणुत अवधीत् स्तृञ हिंसायामिति धातुः शिष्टं स्पष्टं ॥ ५ ॥

अथाच्छावाकपृष्ठ्यस्तोत्रनिवर्त्तकं साम दर्शयति ।

वैखानसं भवति ॥ ६ ॥

वैखानसाख्यं साम नकिष्टं कर्मणा नशदिति तृचे गातव्यं ॥ ६ ॥

अथैतत् सर्वकामप्राप्तिसाधनमिति विवक्षुराख्यायिकामाह ।

वैखानसा वा ऋषय इन्द्रस्य प्रिया आसꣳस्तान्-
रहस्युर्देवमलिम्लुङ्मुनिमरणेऽमारयत्ते देवा अब्रुवन्
क्वर्षयोऽभूवन्निति तान् प्रैषमैच्छत्तान्नाविन्दत्स इमा-
न् लोकानेकधारेणापुनात्तान्मुनिमरणेऽविन्दत्तानेतेन
साम्ना समैरयत्तद्वाव सतर्ह्यकामयत कामसनि साम
वैखानसं काममेवैतेनावरुन्धे स्तोमः ॥ ७ ॥

वैखानसा विखनसः पुत्राः ऋषयः इन्द्रस्य प्रिया आसन् इष्टतमा अभवन् तानृषीन् रहस्युर्नाम देवमलिम्लुङ् देवान् मालिन्यं मोचयति प्रापयतीति देषमतिग एवं विधोऽसुरः मुनिमरणे मुनयो म्रियन्तेऽस्मिन्निति मुनिमरणं स्थानविशेषः अधिकरणे लुट् तस्मिन् स्थाने अमारयत् अवधीत् एवं मृतेषु वैखानसेषु तमिन्द्रं देवा अब्रुवन् ते च प्रिया ऋषयः क्व कुत्राभूवन्निति स इन्द्रस्तानृषीन् प्रैषमैपकृत् अन्विष्टवानित्यर्थः सच गवेषयमाणस्तान् क्वचिदपि नाविन्दन्नालभत स इमान् पृथिव्यादीन् सर्व्वानेकधारेण एकोद्योगेनापुनाद्शोधयत् एवं सर्वान् लोकान् शोधयित्वा तानृषीन् मुनिमरणे स्थानेऽविन्दत् मृतानलभत अपश्यदित्यर्थः स इन्द्र एतेन साम्ना तान् समैरयत् पुनः प्राणैस्तान् समयोजयत् यस्मादेवं वैखानसानां सम्बन्धः तस्माद्वैखानसमिति साम्नः संज्ञा जाता तत् खलु समीरणं तस्मिन् काले सोऽकामयत यस्मादेवं कामितार्थमसाधयत् तस्माद्वैखानसं साम कामसनि कामप्रदं तस्मात्सर्व्वमेव काम्यमानं फलं तेन साम्ना लभते एतेष्वपि चतुर्षु पृष्ठस्तोत्रेषु पूर्व्वोक्तएव चतुर्व्विंशस्तोमः कार्य्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्द्दशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथार्भवपवमानस्य प्रथमं प्रतिपत्तृचं दर्शयति ।

यस्ते मदो वरेण्य इति गायत्री भवति मदवद्वै रसवत् तृतीयसवनं मदमेव तद्रसं दधाति ॥ १ ॥

यस्ते मदो वरेण्य इति गायत्री आर्भवपवमानस्य प्रतिपद्भवति गायत्रः प्रथमस्तृचो भवतीत्यर्थः शिष्टं पूर्व्ववद्व्याख्येयं ॥ १ ॥

अथ तृचान्तरं विधत्ते ।

एषस्यधारयासुत इति ककुभः सत्योऽभ्यारम्भेण त्रिष्टुभः ॥ २ ॥

एषस्यधारयेति तिस्रः स्तोत्रीयाः कार्य्याः ताः ककुभः अभ्यस्ताक्षरौ अष्टाक्षरौ द्वौ पादौ मध्ये द्वादशाक्षराः ताः ककुभ ईदृश्यः सत्यो भवन्तिः गीतिसमयेऽभ्यारम्भेण त्रिष्टुभो भवन्ति प्रथमपादस्य द्वितीयपादे अव्याबारेभिः पवते मदिन्तमः इत्यादेः अष्टाक्षरस्य तु पुनरारभ्यमाणत्वात् एवमभ्यस्यमानौ द्वावष्टाक्षरौ मिलित्वा षोडशाक्षराणि सम्पद्यन्ते अध्ययनतस्तु अष्टाविंशत्यक्षरेति मिलित्वा चतुश्चत्वारिंशदक्षरा एकैका त्रिष्टुब् भवति ॥२॥

एतत्त्रिष्टुप्सम्पादनं पूर्व्ववद्व्रुकत्वस्मनार्थमित्याह ।

अपभ्रंश इव वा एष यत् ज्यायसः स्तोमात्कनी-

यांस्तोममुपयन्ति यदेता अभ्यारम्भेण त्रिष्टुभो भवन्त्यह्न एव प्रत्युत्तम्भाय ॥ ३ ॥

व्याख्यातमेतत् पूर्वस्मिन् खण्डे ॥ ३ ॥

अथ तृचान्तरं विधत्ते ।

सखाय आनिषीदतेति वालखिल्या वालखिल्यावेतौ तृचौ षष्ठे चाहनि सप्तमे च यदेतौ वालखिल्यौ तृचौ भवतोऽह्नोरेव व्यतिषङ्गायाव्यवस्रंसाय सन्तत्यै ॥ ४ ॥

सखाय आनिषीदतेत्याद्यास्तिस्रो वालखिल्याः वालखिल्यसम्बन्धिन्यः ऋचो भवन्ति शिष्टं परिस्रानो गरिष्ठा इति परिवत्यो गायत्र्यो भवन्तीति खण्डे व्याख्यातं ॥ ४ ॥

अथान्यं तृचं विधत्ते ।

पुरोजिती वो अन्धस इति विराडन्नं विराडन्नाद्यस्यावरुध्यै ॥ ५ ॥

पुरोजिती वो अन्धस इत्याद्यास्तिस्रः स्तोत्रीया भवन्ति तासु प्रथमानुष्टुबुत्तरे गायत्र्यौ संहत्य गणनायां दशपादा भवन्ति सा एका विराट् दशाक्षरा विराडिति श्रुतेः तासामक्षरपरिगणनायामशीत्यक्षराणि सम्पद्यन्ते सा अन्या विराट् आम्नातं हि

पुरा यद्वया विराडयथ्योन्यास्मात् लोकात्पद्वया विराजान्नाद्यमवरुन्ध इत्येतदेवाभिप्रेत्य पुरोजितो वो अन्धस इति त्रिष्टुबदूव्यवहार: गतमन्यत् ॥ ५ ॥

अथ दृष्टान्तरं दर्शयति।

प्रवाज्यत्वारित्यक्षरपङ्क्तिः स्तोमानां प्रभूतिः ॥६॥

प्रवाज्यत्वारित्यादिकोऽक्षरपङ्क्तिछन्दस्कस्तृचो भवति अष्टाक्षरैर्हि पञ्चभिः पादैः पङ्क्तिः इयन्तु अक्षरसंख्यया चत्वारिंशदक्षरा पङ्क्तिः सा च स्तोमानां त्रिवृदादीनां प्रभूतिः प्रभवः उत्पत्तिस्थानमित्यर्थः त्रिवृदाद्यष्टाचत्वारिंशान्तेषु स्तोमेषु नवाद्यष्टाचत्वारिंशदन्ता या सङ्ख्या सा सर्व्वाक्षरपङ्क्तावन्तर्भूतेति प्रभूतित्वं ॥ ६ ॥

गायत्र्यादीनां छन्दसां षडहे विनियुक्तत्वात् तैः साध्यानां छन्दोमानां यद्गतसारत्वमाशङ्क्यते तदप्यनेनाक्षरपङ्क्तिछन्दसा समाधीयत इत्यत आह।

अथो एतद्धैवैतर्हि छन्दो यातयाम यदक्षरपङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ॥ ७ ॥

अथो अपि एतर्ह्येतस्मिन् सप्तमस्याह्नः प्रयोगकाले एतदेव खलु छन्दः अयातयाम अगतसारं यदक्षरपङ्क्त्याख्यं छन्दः

पूर्व्वेष्वहःसु अविनियुक्तत्वात् तेनायातयामाक्षरपङ्क्तिच्छन्दसा छन्दोमाः अयातयामानः यातयामत्वदोषरहिताः सारयुक्ताः क्रियन्ते ॥ ७ ॥

एतदेव प्रश्नप्रत्युक्तिभ्यां विवृणोति ।

ब्रह्मवादिनो वदन्ति यत् षड़हे स्तोमाश्छन्दाꣳसि आप्यन्ते किं छन्दसश्छन्दोमा इत्येतच्छन्दसो यदेता अक्षरपङ्क्तय इति ब्रूयात् ॥ ८ ॥

ब्रह्मवादिनो वेदार्थमीमांसका आहुः षडहे समाप्यमाने त्रिवृदादयः स्तोमाः गायत्र्यादीनि छन्दांसि समाप्यन्ते यद्येवं तावत् छन्दोमाश्छन्दोमाख्यानि त्रीण्यहानि किं छन्दसः केन छन्दसा निष्पाद्या इति एवं ब्रह्मवादिभिः पृष्टे तस्योत्तरं ब्रूयात् यदेता अक्षरपङ्क्तयः अक्षरपङ्क्तिच्छन्दस्काः प्रवाज्यच्चारित्याद्याः एतच्छन्दस एतदक्षरपङ्क्तिच्छन्दोयेषां तथाविधा छन्दोमा इति अक्षरपङ्क्तिरेव पूर्व्वेष्वहःसु विनियुक्तत्वात् छन्दोमानां सारत्वापादकमसाधारणं छन्द इत्यर्थः ॥ ८ ॥

अथ तृचस्यान्तरं विधत्ते ।

ये सोमासः परावतीति परावतमिव वा एतर्हि यज्ञोगतस्तमेवैतेनान्विच्छन्ति ॥ ९ ॥

ये सोमासः परावतीति स्तौति परावतमिव वै एतर्हि यज्ञो

गतः प्रायणीयातिरात्रमारभ्य एतदन्तानां सप्तानामह्नां गतत्वात् यथाध्वगस्य पुरुषस्यातीतदिवसे मध्ये मार्गेऽवस्थिता महीरुहाद्याद्दूरस्था भवन्ति एवमेव सप्तममहरनुतिष्ठतो यजमानस्यातीतानि पूर्व्वाण्यहानि विप्रकृष्टानि भवन्तीत्यर्थः तमेव दूरगतं यज्ञं एतेन दूरवाचिवच्छब्दयुक्तेन तृचेनान्विच्छन्ति गवेषयन्ति ॥ ९ ॥

ननु प्रकृतावार्भवस्यान्त्यस्तृचो जागतः कथं तत्र ये सोमास इत्याद्या गायत्र्यः सत्यः जागतं गच्छन्ति इत्याशङ्क्य लक्षणया जगतीत्वात् सङ्गतिरित्याह ।

गायत्र्यः सत्यो जगत्यो रूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ १० ॥

गतमेतत् ॥ १० ॥

अथ यस्ते मदो वरेण्य इति विहिते तृचे पूर्ववद्गायत्रं साम विधाय तद्वितिकर्त्तव्यताविधायकं ब्राह्मणस्यातिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ११ ॥

सिद्धमेतत् ॥ ११ ॥

अथास्मिन्नेव तृचे सामान्तरं विधत्ते ।

इडानिधनं भवति ॥ १२ ॥

ह्वायेति ह्वाशब्दो निधनं यस्य तद्ध्वणिधनं एतदपि साम यत्सोमद्दृन्येतस्मिंस्तृचे आहृते गातव्यं अथ सूत्रकारेण कल्पकारोक्तसामद्वयमुदाहृत्य सोमातिरेकपरिहाराय व्यवस्था दर्शिता सप्तमेऽग्नेरर्कोऽध्यर्द्धेडञ्च सोमसाम मौचस्य पूर्वयोर्मौचसोमसामनी गायत्रस्योत्तरयोरग्नेरर्कस्त्रिषु ह्विति वेति अयमर्थः यद्देतद्ध्वणिधनाख्यं तस्यैव मौचमिति नाम तत्र गायत्रतृचे गीत्वा अग्नेरर्काख्यं अध्यर्द्धेडञ्च सोमसाम मौचं वेति त्रीणि सामानि यत्सोमद इत्याद्यासु तिसृषु एकर्क्षानि क्रमेण गातव्यानि अथवा गायत्रमेकस्याङ्गीत्वा तदुत्तरयोर्मौचसोमसामनी गातव्ये अग्नेरर्काख्यं तिसृषु गातव्यमिति अत्र ब्राह्मणे अग्नेरर्कसोमसाम्नोरविधानात् विहितयोरेव गायत्रमौचयोस्तृचे गानादेव सोमसम्पत्तेः सूत्रकारवचनस्य शाखान्तरीयप्रतीतेर्विकल्पएवमुक्तः ननु उक्तप्रकारेणसमुच्चयः तथा निरालम्बकमता* भगवता पतञ्जलिनोक्तं सप्तमेऽह्न्यर्कः कृताकृतो भवत्यब्राह्मणविहितत्वादिति ॥ १२ ॥

अथैतद्ब्रह्मस्तेतुत्वेन स्तौति ।

प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टा अपक्रामन्नाद्याकृदयस्ताख्तेन साम्ना ह्वायेत्योजोवीर्य्यमदधाद्यदेतत् साम भवत्योज एव वीर्य्यमात्मन्धत्ते ॥ १३ ॥

* असमीचीनः पाठः ।

पुरा प्रजापतिः सर्व्वाः प्रजाः सृष्टवान् ताः सृष्टाः प्रजाः अस्मात्प्रजापतेः सकाशात् अबला बलरहिताः अवस्थातुमशक्ताः सत्यः अच्छदयन् देशान्तरमाद्रवन् अपागच्छन्नित्यर्थः अथ तासु प्रजासु मौक्षेण साम्ना इडायेति निधनेन बलवाचिना ओजोबलात्मकं वीर्य्यमदधादस्थापयत् तस्मादेतत्साम भवतीति यत् तेन ओजोरूपं वीर्य्यमेवात्मन् आत्मनि तस्मिन् धत्ते धारयति ॥ १३ ॥

अथ तृचान्तरे सामान्तरं विधत्ते।

शार्करं भवति ॥ १४ ॥

शर्करेण दृष्टं साम शार्करं तत् एपस्पृध रयामुत इति विहिते तृचे गातव्यं ॥ १४ ॥

अथैतदाख्यायिकया सर्वकामप्राप्तिहेतुरित्यत आह।

इन्द्रꣳ सर्व्वाणि भूतान्यस्तुवन् स शर्करꣳ शिशुमारर्षिमुपेत्याब्रवीत् स्तुहि मेति सोऽपःप्रस्कन्दन्नब्रवीदेतावतोऽहं त्वाꣳ स्तुयामिति तस्मादपां वेगमवेजयत सत्त्रेन इवामन्यत स एतत्सामापश्यत्तेनापोन समाप्नुत तद्वाव सतर्ह्यकामयत कामसनि साम शार्करं काममेवैतेनावरुन्धे ॥ १५ ॥

पुरा खल्विन्द्रं सर्व्वाणि भूतानि भूतजातानि देवर्षिमनुष्य-गन्धर्व्वादीन्यस्तुवन् विविधैः स्तोत्रैरप्रीणयन् स इन्द्रः शर्कराख्यं शिशुमारर्षिं शिशुमारो जलचरः तद्रूपिणमृषिमुपेत्योपगत्य स इन्द्रोऽब्रवीत् मां स्तुहीति स शार्करः अपोजलं प्रस्कन्दम् प्रतिपन्नमब्रवीत् उक्तवान् प्रस्कन्नास्वप्सु यावन्तो बिन्दवो निष्प-द्यन्ते एतावता एतावत्पर्य्यन्तं अहं त्वां स्तवानीति यस्मादेव-मुक्तवान् तस्मात्तमृषिं अपां वेगमवेजयत् स ऋषि अपां वेगं दृष्ट्वा ततोह्हीनैव मदीया स्तुतिरित्यमन्यत ततस्तत्साम्यार्थं प्रय-तमानः स ऋषिरेतत्सामापश्यत् तेन साम्ना स्तुवन्नपः अपां वेगन्न समाप्नुत प्राप्नोत् एतदीया स्तुतिः प्रकीर्य्यमाणा अपोऽप्य-त्यक्रमीदित्यर्थः गतमन्यत् ॥ १५ ॥

अथ तृचान्तरे सामान्तरं विधत्ते ।

प्लवो भवति ॥ १६ ॥

सखाय आनिषीदतेति बालखिल्यतृचे प्लवाख्यं साम कार्य्यं ॥ १६ ॥

अथैनं द्वादशाहं समुद्रात्मना रूपयन् तस्य पारप्राप्तिसाधन-मेतदिति स्तौति ।

समुद्रं वा एते प्रस्नान्तीत्याहुर्ये द्वादशाहमुप-यन्तीति यो वा अप्लवः समुद्रं प्रस्नाति न स तत उदेति यत् प्लवो भवति स्वर्गस्य लोकस्य समष्ट्यै ॥ १७ ॥

ये यजमानाः द्वादशाहमुपयन्ति उपगच्छन्ति एते समुद्रमुदधिं प्रस्नान्ति अवगाहन्ते इत्याहुः ब्रह्मवादिनः एवञ्च यः खलु अप्लवः प्लवरहितः अनौकः समुद्रं प्रस्नाति प्रविशति स ततः समुद्रात् नोदेति नोद्गच्छति तत्रैव निमज्जतीत्यर्थः तथा चास्मिन् द्वादशाहाख्ये समुद्रे अवगाहतामपि केनचित् प्लवेन भवितव्यं तस्मादस्मिन् सप्तमेऽहनि प्लवाख्यं साम भवतीति यत् तत् स्वर्गस्य लोकस्य समष्ट्यै प्राप्त्यै भवति द्वादशाहाख्यस्य समुद्रस्य तरणाय भवतीत्यर्थः ॥ १७ ॥

अथास्य निधनमनूद्य स्तौति।

अतिविश्वानि दुरिता तरेमेति यदेवैषां दुष्टुतं दुःशस्तं तदेतेन तरन्ति * ॥ १८ ॥

अनेन निधनेन दुरितातितरणं प्रतिपाद्यते तथा च एषामह्नां सम्बन्धि यदेव दुष्टुतं दुःशस्तं अयथास्तवनमयथाशंसनञ्च तदेतेन निधनेनातितरन्ति अतिक्रामन्ति ॥ १८ ॥

अथैतन्निधनसंख्याद्वारा स्तौति।

एकादशाक्षरणिधनो भवत्येकादशाक्षरा त्रिष्टुबोजोवीर्य्यं त्रिष्टुबोजस्येव वीर्य्ये प्रतितिष्ठति ॥ १९ ॥

अतिविश्वानीत्याद्यानि एकादशाक्षराणि निधनानि यस्य

* अयं मन्त्रो मूलपुस्तकत्रयेऽपि नास्ति।

तादृशः स्तवो भवति छन्दसाम्मध्ये त्रिष्टुप् छन्दः एकादशाक्षरा सा च त्रिष्टुबोजो वीर्य्यरूपा एवं परम्परया संख्याद्वारा ओजस्येव ओजो बलं तद्रूप एव वीर्य्ये यजमानः प्रतितिष्ठतो भवति ॥ १६ ॥

अथ तृचान्तरं सामान्तरं विधाय तद्ब्राह्मणञ्चातिदिशति ।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥२०

पुरोजिती वो अन्धस इति तृचे गौरीविताख्यं साम गातव्यं अस्य गौरीवितस्य यद्ब्राह्मणं प्रागाम्नातं गौरीवितिर्वा एतच्छाक्त्यो ब्रह्मणोऽतिरिक्तमपश्यदिति तदत्रापि द्रष्टव्यं ॥ २० ॥

अथास्मिन्नेव तृचे सामान्तरं विधत्ते ।

कार्त्तयशं भवति ॥ २१ ॥

कृतयशेन दृष्टं साम कार्त्तयशं एतदाख्यं साम पुरोजिती इत्यस्मिन् तृचे गातव्यं अस्मिन् साम्नि अर्द्धर्चावसानेषु उपाध्ययनार्थं क्रियते ॥ २१ ॥

तस्य स्थाने अन्यं निधनं विधत्ते ।

हीति निधनमुपयन्ति पाप्मनोऽपहत्यै ॥ २२ ॥

उपास्थाने ही इति निधनमुपयन्त्युपगच्छन्ति तत्र पाप्मनः पापस्यापहत्यै पापहननाय विनाशनाय भवति ही इत्यस्य हन्ति धातुनिष्पन्नत्वात् ॥ २२ ॥

अथ स्तोतुः फलमाह ।

अपपाप्मानꣳ हते कार्त्तयशेन तुष्टुवानः ॥ २३ ॥

स्पष्टोऽर्थः ॥ २३ ॥

अथान्यस्मिंस्तृचे सामान्तरं विधत्ते ।

सौहविषं भवति ॥ २४ ॥

सुहविषा दृष्टं साम सौहविषं तत् प्रवाम्यश्वानित्यस्मिन् तृचे गातव्यं ॥ २४ ॥

तदेतत् स्तौति ।

सुहविर्वा एतेनाङ्गिरसोऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ २५ ॥

सुहविर्नामाङ्गिरसः अङ्गिरोगोत्रऋषिः एतेन साम्ना साधनेनाञ्जसा अनायासेन स्वर्गं लोकमजानीत शिष्टं स्पष्टं ॥ २५ ॥

अथैतदाधारभूतानामृचां छन्दोद्वारेण तुष्टुपराह ।

ब्रह्मवादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाꣳसाप्यन्ते किं छन्दसश्छन्दोमा इति पुरुषश्छन्दस इति ब्रूयात्पुरुषो वै पाङ्क्तः पुरुषो द्विपदा छन्दोमानामयातयामतायै ॥ २६ ॥

ब्रह्मवादिनो वेदार्थचिन्तकाः वदन्ति चोदयन्ति यद्यस्मात् षड़हे पृष्ठाख्ये समाप्यमाने त्र्यचि त्रिवृदादयस्तोमा यस्तेमदं इति गायत्र्यादीनि छन्दांसि च समाप्यन्ते तस्माद्विनिर्मुक्तस्यान्यछन्दसोऽभावाद्विनिर्मुक्तानाञ्च गतसारत्वाच्च छन्दोमाः किं छन्दसः केन छन्दसा निष्पाद्या इति एवं ब्रह्मवादिभिश्चोदिते पुरुषश्छन्दसश्छन्दोमा इत्यभिज्ञ उत्तरं ब्रूयात् किं तत् पुरुषछन्दस इति तदुच्यते तत् मांसस्नाप्वस्थिमज्जारेत इति पञ्चभिर्धातुभिरुपेतत्वात् पुरुषः पाङ्क्तः पङ्क्तिसम्बद्धः साहि पञ्चभिः पादैरुपेतत्वात् पञ्चसंख्यावती तस्मात् पङ्क्तिस्तावदेकं पुरुषछन्दस्तथा द्विपदापि पुरुषात्मकः पादद्वयसामान्यात् एवं विधस्य पुरुषछन्दसः पूर्व्वमेव नियुक्तः पुरुषश्छन्द इति तदुच्यते तत् मांसस्नाप्वस्थिमज्जारेत इति पञ्चभिर्धातुभिरुपेतत्वात् तेन सारवत्त्वात् तच्छन्दस्के प्रवल्हिन्निति त्र्यचे गीयमानं साम छन्दोमानां त्रयाणामयातयामतायै अगतसारतायै भवति ॥ २६ ॥

अथ त्र्यचान्तरे अन्यत् साम विधत्ते ।

जराबोधीयं भवत्यन्नाद्यस्यावरुध्यै ॥ २७ ॥

जराबोधीयं जराशब्दयुक्तायां योन्यामुत्पन्नं साम जराबोधीयं तत् ये सोमासः परावतीत्यार्भवस्यान्तिमे त्र्यचे गातव्यं तदान्नाद्यस्यादनीयस्यान्नस्य अवरुध्यै अवरोधनाय लाभाय भवति ॥ २७ ॥

एतदेव व्याचष्टे ।

अन्नं वै जराबोधीयं मुखं गायत्री मुख एव तद-न्नन्धत्तेऽन्नमत्ति ॥ २८ ॥

यदेतज्जराबोधीयं साम तदन्नं वै जीर्य्यमाणावस्थायां अनेन हि बोधउत्पाद्यते येषां गायत्री ये सोमासः परावतीत्याद्या तत् मुखं प्रजापतेर्मुखाद्धि सा पूर्व्वं दृश्यते तथा च गायत्र्यां जराबोधीयस्य गानात् मुखे आस्य एव तत् अन्नन्धत्ते धारयति यस्मादेवं तस्मादेतेन साम्ना स्तुवन्नन्नमत्ति लब्धान्नः सन् भोक्तृत्वं लभत इत्यर्थः ॥ २८ ॥

एतद्वेदनफलमाह ।

अन्नादो भवति य एवं वेद ॥ २९ ॥

स्पष्टोऽर्थः ॥ २९ ॥

अथैतद्गायत्रीषु स्तवनमनूद्य प्रकारान्तरेण स्तौति ।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ३० ॥

सिद्धमेतत् ॥ ३० ॥

जराबोधीयस्यावसाने औ इडेत्याम्नायते तमनूद्य स्तुवन् स्तोत्रमुपसंहरति ।

इडान्ताः पावमाना भवन्ति पशवो वा इडाः पशु-

वश्छन्दोमाः पशुष्वेव तत्पशून्दधाति स्तोमः॥ ३१॥

पवमानार्भवावसाने जराबोधीयेन प्रयन्ति सिद्धमेतत् जराबोधीयगाने पवमानान्ताः पवमानाः स्तोत्राणि इडान्ताः इडावसानानि भवन्ति किं ततो भवति उच्यते पशवो वै इडारूपाः पशवः खलु छन्दोमाश्च पशवश्च तत्तथा सति पशुष्वेव पशून्दधाति अभिवृद्ध्यर्थं एवं गायत्रादिषु जराबोधीयान्तेष्वष्टसु सामसु तृचे गीयमानेषु चतुर्विंशतिः स्तोत्रीया भवन्ति तदात्मकश्चतुर्विंशः स्तोमोऽस्यार्भवपवमानस्य कार्य्य इत्यर्थः॥ ३१॥

इति ताण्ड्यमहाब्राह्मणे चतुर्द्दशाध्यायस्य

पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

अथ प्राकृतमेवाग्निष्टोममभिप्रेत्य उपरितनानामुक्थस्तोत्राणां प्रथमस्य स्तोत्रीयं तृचमाह।

आ ते वत्सो मनो यमदित्यपच्छिद्दिव वा एतद्यज्ञकाण्डं यदुक्थानि यदेति सन्तोमत्वायैव॥ १॥

उक्थानि स्तोत्राणीति यत् एतत् यज्ञकाण्डं यज्ञभागः अपच्छिद्दिव वै अपछिन्नमिव भग्नमिव भवति तत्र प्रथमे उक्थस्तोत्रे आ ते वत्स इति अयं स्तोत्रीयस्तृचो भवति इति आ इति

योऽयमुपसर्गः आभिमुख्यवाची आते वत्स इत्यादिकः सोऽयमुक्थानां सलोमत्वाय भवति पूर्वैः स्तोत्रैः सलोम्याय सन्तानाय भवतीत्यर्थः ॥ १ ॥

अथ द्वितीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति ।

त्वन्न इन्द्राभरेति पूर्णाः ककुभः ॥ २ ॥

त्वन्न इन्द्रेत्याद्याः पूर्णाः अक्षरैरन्यूनाः ककुभः ककुप्छन्दस्काः ब्रह्मणउक्थस्य स्तोत्रीया भवन्ति अभितोऽष्टाक्षरौ पादौ मध्ये द्वादशाक्षर इति ककुभो लक्षणं ॥ १ ॥

अथैतासां पूर्णत्वं कनीयसस्तोमस्य करणे अङ्गे यत् अपभ्रंशनं तत्परिहारार्थमिति स्तौति ।

अपभ्रᳫंश इव वा एष यज्ज्यायसः स्तोमात्कनीयांसᳫं स्तोममुपयन्ति यदेताः पूर्णाः ककुभो भवन्त्यनपभ्रᳫंशाय ॥ ३ ॥

सिद्धमेतत् ॥ २ ॥

अथ तृतीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति ।

यदिन्द्र चित्रं मइह नास्ति त्वादातमद्रिवो राधस्तन्नोविदद्वस उभया हस्त्याभरेति राद्धिमेवैतेनावरुन्धे ॥ ४ ॥

यदिन्द्र चित्रेति तृचः अच्छावाकोक्थस्य स्तोत्रीयः इह मा स्तोत्यादेरनुवादस्तुत्यर्थः तस्यायमर्थः हे इन्द्र चित्रं चायनीयं मे मम इहास्मिन्नेव स्थाने यद्धनन्नास्ति त्वादातन्त्वया दातव्यं हे अद्रिवो वज्रिन् हे विदद्वसो लब्धधनेन्द्र तद्राधोधनं उभाभ्यां हस्ताभ्यां मह्यमाहरेति एवं राधसः प्राप्तेः प्रतिपाद्यत्वात् एतेन स्तुवन् रयिं समृद्धिमेवावरुन्धे यजमानो लभते ॥ ४ ॥

अथ प्रथमोक्थस्य साम विधत्ते ।

वात्सम्भवति ॥ ५ ॥

वत्सेन दृष्टं साम वात्सं तदा तद्वात्सं इति तृचे गातव्यं ॥५॥

तथैतदाख्यायिकया सर्व्वकामप्राप्तिसाधनमिति स्तौति ।

वत्सश्च वै मेधातिथिश्च काण्वावास्तां तं वत्सं मेधातिथिराक्रोशदब्राह्मणोऽसि शूद्रापुत्र इति सोऽब्रवीदृतेनाग्निं व्ययाव यतरो नौ ब्रह्मीयानिति वात्सेन वत्सो व्यैन्मैधातिथेन मेधातिथिस्तस्य न लोम च नौषत्तद्वाव स तर्ह्यकामयत कामसनि साम वात्सं काममेवैतेनावरुन्धे ॥ ६ ॥

वत्सश्च मेधातिथिश्च इमावृषी काण्वौ कण्वगोत्रौ आस्तां पुरा किलाभवतान्तं वत्सं ऋषिं मेधातिथिराक्रोशत् अश्लीलया

वाचा पर्य्यवदत् हे वत्स त्वम् अब्राह्मणो ब्राह्मणत्वरहितोऽसि शूद्रापुत्रः शूद्रायाः पुत्रोऽशूद्रपुत्रोऽपि शूद्रापुत्र इत्याक्रोश्यते षष्ठ्या आक्रोश इति विहितस्य लुकः पुत्रेऽन्यतरस्यामिति विकल्पनादभाव एवमाक्रुश्यमाणः स वत्सोऽब्रवीत् ऋतेन सत्यभूतेन मन्त्रेणाग्निं व्ययाव आवां विशेषेण गच्छावः प्रविशावेत्यर्थः नावावयोर्मध्ये यतरो यो ब्रह्मीयान् ब्रह्मिष्ठ इति निर्णेतुं एवमुक्त्वा वत्सो वात्सेनानेन साम्ना व्यैत् व्यगच्छदग्निं प्राविशत् मेधातिथेन साम्ना मेधातिथिः तस्य वत्सस्य लोम च नौषत् अग्निर्नादहत् उषदाह इति धातुः तर्हि तस्मिन् समये तत् अदहनं स खलु ऋषिः अकामयत तस्माद्वात्सं साम कामप्रदं गतमन्यत् ॥ ६ ॥

अथ द्वितीयस्तोकृयस्य साम विधत्ते ।

सौश्रवसं भवति ॥ ७ ॥

सुश्रवसः सम्बन्धि सौश्रवसं एतदाख्यं साम त्वन्न इन्द्राभरेति तृचे गातव्यं ॥ ७ ॥

इदमपि सर्वकामप्राप्तिसाधनमिति प्रशंसितुमाख्यायिकामाह ।

उपगुर्व्वै सौश्रवसः कुत्सस्यौरवस्य पुरोहित आसीत् स कुत्सः पर्य्यशपद्य इन्द्रं यजाता इति स इन्द्रः सुश्रवसमुपेत्याब्रवीद्यजस्व मामनायामिवा

इति तमयजत स इन्द्रः पुरोडाशहस्तः कुत्समुपेत्या-ब्रवीदयक्षत मा क्व ते परिशापमभूदिति कस्त्वा यष्टेति सुश्रवा इति स कुत्स औरव उपागाः सौश्रवसस्योद्गा-यत औदुम्बर्य्या शिरोऽच्छिनत्स सुश्रवा इन्द्रमब्रवी-त्वत्तनाहे मेदमीदृगुपागादिति तमेतेन साम्ना समै-रयत्तद्वाव सतत्र्यकामयत कामसनि साम सौश्रवसं काममेवैतेनावरुन्धे ॥ ८ ॥

सौश्रवसः सुश्रवसः पुत्र उपगुर्नाम ऋषिः औरवस्य उरु-पुत्रस्य कुत्सस्य राजर्षेः पुरोहित आसीत् सच कुत्सः मद्विषेण पर्य्यशपत् यो यजमान इन्द्रं यजाता इति यजेत् अपरिपूर्णार्थत्वात् तस्य शिरश्छिन्द्यादिति अध्याहारेण योज्यं एवं शापे कृते साम-र्थ्यप्रकटनाय सः इन्द्रः पुरोडाशहस्तः सुश्रवसा दत्तं पुरोडाशं हस्ते धारयन् कुत्समुपगम्याब्रवीत् मामयक्षत इष्टवान् तव क्व परिशापः परिशापः कुत्स अभूदिति एवमिन्द्रेणाधिक्षिप्ते अत्र पुनरब्रवीत् को यजमानः त्वामिष्टवानिति सुश्रवा इतीन्द्रोऽब्र-वीत् स औरवः कुत्सः सौश्रवसस्य सुश्रवसः पुत्रस्य उपगोः उद्गायतः सदस्युद्गानं कुर्वतः शिरः औदुम्बर्य्या सदसि निखातया औदुम्बर्य्याख्यया स्थूणया अच्छिनत् छिन्नवान् स सुश्रवा इन्द्रमब्र-वीत् त्वत्तनात् यजमानात् खलु ईदृगेवविधमिदमप्राप्नोदिति तं छिन्नं सौश्रवसं एतेन साम्ना समैरयत् सङ्गतावयवमकरोत ॥८॥

अथ तृतीयस्तोकस्य साम विधत्ते।

वौङ्कं भवति ॥ ९ ॥

वौङ्काख्यं साम यदिन्द्रचित्रेति तृचे गातव्यं ॥ ९ ॥

तदेतदाख्यायिकया पूर्ववत् स्तौति।

च्यवनो वै दाधीचोऽश्विनोः प्रिय आसीत्सोऽजीर्य्यत्तमेतेन साम्नाप्सु व्यैङ्कयतान्तं पुनर्य्युवानमकुरुतां तद्वाव तौ तर्ह्यकामयेतां कामसनि साम वौङ्कं काममेवैतेनावरुन्धे ॥ १० ॥

दाधीचो दधीचः पुत्रः च्यवनो नाम ऋषिः अश्विनोरश्विदेवतयोः प्रिय इष्टतमः स्तोतासीत् स च्यवनोऽजीर्य्यत् जीर्णावयवोऽभूत् तं जीर्णमेतेन वौङ्केन साम्ना अप्सूदकेषु व्यैङ्कयतां अश्विनौ व्यचलयतां अस्नजीतामित्यर्थः ततस्तं पुनर्युवानमकुरुतां यौवनावस्थाः प्रापयतां शिष्टं स्पष्टं ॥ १० ॥

अथ पूर्ववदेतदुक्थेषु स्तोत्रीयेषु स्तोमक्लृप्तिं विधत्ते।

चतुर्व्विंश एव स्तोमो भवति तेजसे ब्रह्मवर्च्चसाय ॥ ११ ॥

चतुर्विंशतिभिः स्तोत्रीयाभिर्न्निष्पाद्यस्तोमश्चतुर्विंश एषोक्थानां स्तोमो भवति स चतुर्विंशतिसंख्याद्वारा गायत्रीसम्-

न्यात् गायत्र्याश्च अग्निना सहोत्पत्तेः तेजसे ब्रह्मवर्चसाय भवति तेजः शरीरकान्तिः ब्रह्मवर्चसं श्रुताध्ययनादिजन्यं ब्राह्मं तेजः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य

षष्ठः खण्डः।

अथ सप्तमः खण्डः।

एवं द्वाशरात्रिकस्य सप्तमस्याह्नः स्तोमक्लृप्तिरुक्ता अथाष्टमस्याह्नः स्तोमक्लृप्तिरध्यायपरिसमाप्तेः प्रतिपाद्यते तत्र बहिष्पवमानस्य स्तोत्रीयाख्यं प्रथमं तृचं दर्शयति।

शिशुञ्जज्ञानꣳ हर्य्यतं मृजन्तीत्यष्टमस्याह्नः प्रतिपद्भवति ॥ १ ॥

प्रतिपद्यते आरभ्यतेऽनयेति प्रतिपत् सा चाष्टमस्य चतुश्चत्वारिंशस्तोमकस्याह्नः शिशुं जज्ञानमित्येषा भवति इयमादिको बहिष्पवमाने प्रथमस्तृच इत्यर्थः तृचस्तुक्तानामादिग्रहणेन विधिरनादेश इति परिभाषितत्वात् ॥ १ ॥

अथास्य तृचस्याष्टमेऽहनि सान्त्यर्थं स्तौति।

शिशुरिव वा एष सप्तमेनाह्ना जायते तमष्टमेनाह्ना मृजन्ति ॥ २ ॥

एष: सोम: शिशुरिव वै बाल: पुत्र इव सोऽयं एष: सप्तमे-नानुष्ठितेनाह्ना जायते उत्पद्यते तं जातं शिशुं अष्टसंख्यापूरणे-नानेन क्रियमाणेनाह्ना मर्जन्ति हस्तै: संमृजन्ति जन्मनि हि शिशु: उल्वेन प्रावृतो मलाश्लिष्टो भवति स यथा उष्णोदकादिना प्रक्षाल्य संमृजते तद्वत् तस्मादष्टमेऽहनि शिशुञ्जज्ञानं हर्य्यतं मृजन्तीति शिशुजन्ममार्ज्जनलिङ्गवांस्तृच: संगत इत्यर्थ:॥ २॥

अथास्य च स्तोत्रस्य स्तोत्रीयसंख्यामनूद्य स्तौति।

स्तोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै॥ ३॥

गतमेतत्॥ ३॥

त्रिवृदादीनां स्तोमानां गायत्र्यादिछन्दसां षडहे समाप्त-त्वात् विनियुक्तै: *स्तोत्रैरेव छन्दोमानां त्रयाणामह्नां कल्पेन यातयामत्वं स्यादित्यत आह।

हरिवत्यो भवन्ति छन्दोमानामयातयामतायै॥४

हरिवत्यो हरिशब्दयुक्ता: शिशुञ्जज्ञानमित्याद्या: गतम-न्यत्॥ ४॥

अथ स्तोत्रीयतृचानन्तरं क्रमेण नवर्च्चत्रितयं विधत्ते।

नवर्च्चा भवन्ति॥ ५॥

नवानामृचां समाहारो नवर्च्च: एते सोमा अभीत्येक:

सोमः पुनान इत्येकः सोमा असृग्रमिन्दव इत्यपरः एते त्रयो नवर्चाः सोवीयाः क्रमेण भवन्ति ॥ ५ ॥

अथत्यां नवसंख्यां स्तौति ।

नव वै प्राणाः पशवश्छन्दोमाः पशुष्वेव तत्प्राणा-न्दधाति ॥ ६ ॥

सप्त शीर्षण्याः प्राणाः द्वावञ्चाञ्चौ एवं पुरुषे नवैव खलु प्राणा भवन्ति छन्दोभिर्गीयमानाः सप्तमादीनि त्रीण्यहानि पशवः एव तस्मा सति नवर्चीनां करणेन पशुष्वेव नवसंख्यान् प्राणान् दधाति ॥ ६ ॥

अथ पञ्चर्चं विधाय स्तौति ।

पञ्चर्चो भवति पञ्चपदा पङ्क्तिः पाङ्क्तमन्न-मन्नाद्यस्यावरुध्यै ॥ ७ ॥

उत्ते शुष्मास इत्याद्याः पञ्चर्चः पञ्चानामृचां समाहारो भवति अनया च पञ्चसंख्यया अन्नप्राप्तिमुपपादयति पञ्चपदा पङ्क्तिरित्यादिना ॥ ७ ॥

अस्मिन् पञ्चर्चे विद्यमानं किञ्चिल्लिङ्गं प्रदर्श्य अष्टमेनाह्ना सङ्गतिमाह ।

वाणवान् भवत्यन्तो वै वाणोऽन्त एतदष्टममहा-मन्त एव तदन्तेन स्तुवते प्रतिष्ठायै ॥ ८ ॥

पूर्वोक्तः पञ्चर्चो वाणशब्दयुक्तो भवति वाणः शततन्त्रीको वीणाविशेषः सयान्तो वै वाद्यानां पर्य्यवसानभूमिरेव वाणस्य वादने या परिमितिः तद्वाचकः शब्दो अस्मिन् पञ्चर्चे विधत्ते अह्नां पूर्वमुक्तमेतदष्टममहरन्तस्तत्तथा सति अन्तएव अन्तेन स्तुवम् इति उद्गातारः अन्तसंस्तुतेऽहनि अन्तसंस्तुतवाणशब्द-युक्तस्य पञ्चर्चस्य करणं प्रतिष्ठायै यजमानस्य प्रतिष्ठानाय भवति अन्तत्वसाम्येन संश्लिष्टत्वात् ॥ ८ ॥

अथ तृचत्रयं विधत्ते ।

त्रयस्तृचा भवन्ति प्राणापानानां सन्तत्यै ॥ ९ ॥

तिसृणामृचां समाहारस्तृचः पञ्चर्चानन्तरं अयावीतो परि स्रपन्नन् पवते अयोपवस्व धारयेत्याद्यास्त्रयस्तृचा भवन्ति तथा च नवसंख्योपपत्तेः प्राणापानानामुपरि वर्त्तमानाश्च श्रोत्राद्याः प्राणा अधोवर्त्तमानौ गुह्योपस्थावपानौ संहतानामेषाम्नवानां प्राणापानानां सन्तत्यै सन्तानाय भवन्ति ॥ ९ ॥

अथास्य बहिष्पवमानस्तोत्रस्य स्तोमं विधाय स्तौति ।

चतुश्चत्वारिंश एव स्तोमो भवत्योजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजोवीर्य्यं त्रिष्टुप् ॥ १० ॥

प्रथमतः एकस्तृचः ततस्त्रयोनवर्चाः अथैकः पञ्चर्चः ततस्त्र-यस्तृचा इत्येवं क्रमेण प्रयुज्यमानाश्चतुश्चत्वारिंशतिः स्तोत्रीया

भवन्ति ततः संख्यात्मकश्चतुश्चत्वारिंशस्तोमएवास्य बहिष्पव मानस्य भवति तत्तेन स्तोमेन ओजोरूप एव वीर्य्ये प्रतितिष्ठति यजमानः प्रतिष्ठितो भवति कुत एतत् यस्मादोजोवीर्य्यात्मकं त्रिष्टुप्छन्दः तद्वीर्य्यं यतः प्रजापतेरङ्गादुत्पन्ना सा चतुश्चत्वारिंशदक्षरा भवति तत् संख्यया मीयमानश्चतुश्चत्वारिंशस्तोमओजोवीर्यहेतुरित्यर्थः॥ १०॥

इति ताण्ड्यमहाब्राह्मणे चतुर्द्दशाध्यायस्य सप्तमः खण्डः।

अथ अष्टमः खण्डः।

अथास्मिन्नष्टमेऽहनि प्रथममाज्यस्तोत्रं दर्शयति।

अग्निं वो देवमग्निभिः सजोषा इत्याग्नेयमाज्यं भवति॥ १॥

अग्निं वोदेवमिति तृचः आग्नेयमग्निदेवत्यं प्रथममाज्यस्तोत्रं भवति॥ १॥

अथैनं तृचं स्तौति।

अग्निभिरित्येव पूर्व्वाण्यहानि समिद्धान्यष्टममहरभिसमिन्धे॥ २॥

एतत् तृचगतेनाग्निभिरिति बहुवचनान्तेनाग्निशब्देनैव

पूर्व्वाण्यनुष्ठितानि सप्तसंख्यान्यहानि समिद्धानि सन्दीपितानि अथाग्निं नव इत्येकवचनान्तेन अग्निशब्देनाष्टममहरभिसमिन्धे पूर्वाण्युत्तराण्यभिलक्ष्य सम्यग्दीप्तं करोति ॥ २ ॥

अथ द्वितीयमाज्यस्तोत्रं दर्शयति ।

मित्रं वयꣳ हवामह इति बार्हतं मैत्रावरुणं ॥ ३

मित्रं वयमिति तृचे बार्हतं बृहन्नाम्ना सम्बद्धं बृहत्पृष्ठके द्वितीयेऽहनि अस्य द्वितीयमाज्यस्तोत्रत्वेन विधानात् तत्सम्बन्धस्तदेतन्मैत्रावरुणं मित्रावरुणदेवताकं अष्टमेऽहनि द्वितीयमाज्यस्तोत्रं भवति ॥ ३ ॥

यद्येवं विनियुक्तविनियोगलक्षणो दोषः स्यादित्यत आह ।

उग्रगाधमिव वाएतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसंव्याथाय ॥ ४ ॥

यत् छन्दोमा एतदुग्रगाधमिव वै यथा वेगयुक्तो नदीप्रवाहः उग्रगाधः उग्र उद्गूर्णस्तीक्ष्णो गाधः अवस्थानं यस्य स तथोक्तः दुरवगाह इत्यर्थः एवमेव छन्दोमत्रितयमपि उग्रगाधं दुरवगाहं तत् तथा सति अस्मात्कारणात् उग्रगाधे वेगवत्प्रवाहेण दुरवगाहे प्रदेशे यथा पुरुषाः परस्परं व्यतिषज्य हस्तावलम्ब्य गाहन्ते वेगवत्प्रवाहमुत्तरन्ति एवमेवैतद्रूपे

अग्निं वो देवमिति वैकृतं मित्रं वयं हवामह इति प्राकृतं एते रूपे व्यतिषजति व्यतिषक्ते संश्लिष्टे करोति छन्दोमानामसंव्याथाय संव्याथः सञ्चलनं अव्यवस्थानुष्ठानं तदभावाय पारप्राप्त्या इत्यर्थः ॥ ४ ॥

अथ तृतीयमाज्यस्तोत्रं दर्शयति ।

तमिन्द्रं वाजयामसीत्यैन्द्रं ॥ ५ ॥

तमिन्द्रं वाजयामसीति तृचः ऐन्द्रं इन्द्रदेवत्यं तृतीयमाज्यस्तोत्रं भवति ॥ ५ ॥

अथैतत् स्तौति ।

अष्टमेन वै देवा अहन्द्रिमवाजयन्नवमेन पाप्मानमघ्नन्नहरेवैतेन वाजयन्ति ॥ ६ ॥

अष्टमेन अष्टसंख्यापूरकेण अनेन खल्वह्ना देवाः सुरेन्द्रमवाजयन् बलवन्तमकुर्व्वन् नवमेनाह्ना पाप्मानं पापरूपमसुरं अघ्नन् अहिंसिषुः एवञ्च तमिन्द्रं वाजयामसीति वाजयति धातुयुक्तेनैतेन तृचेन अहरेव वाजयन्ति कुर्व्वन्ति बलवन्तमुद्गातारः ॥ ६ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति ।

इन्द्रे अग्ना नमोबृहदिति बार्हतमैन्द्राग्नं ॥७॥

इन्द्रे अग्ना इति बार्हतं बार्हते द्वितीयेऽहनि विनियुक्तत्वात् बृहता सम्बद्धं ऐन्द्राग्नमिन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रस्य भवति ॥ ७ ॥

अथापि पूर्वव्विनियुक्तविनियोगदोषमाशङ्क्य समाधत्ते ।

उग्रगाधमिव वाएतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसंव्याथाय स्तोमः ॥ ८ ॥

अत तमिन्द्रं वाजयामसीति वैकृतं रूपं अन्यत्सर्व्वं पूर्व्ववद्योज्यं एतेषु चतुर्ष्वाज्यस्तोत्रेषु पूर्व्वोक्तश्चतुश्चत्वारिंश एव स्तोमः कार्य्यः एवं प्रातःसवनिकेषु पञ्चसु स्तोत्रेषु स्तोत्रीया विहिताः तासु प्राकृतमेव गायत्रं साम गातव्यमिति द्रष्टव्यं ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्द्दशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथास्मिन्नष्टमेऽहनि माध्यन्दिनपवमानस्य स्तोमकॢप्तिं विधित्सुस्तोत्रीयास्तावत् दर्शयति ।

अध्वर्य्यो अद्रिभिः सुतमिति गायत्रो भवत्यह्नो धृत्यै ॥ १ ॥

अद्रिभिरिति लिङ्गं गायत्री माध्यन्दिनपवमानस्य प्रतिपद्भवति गायत्रः प्रथमस्तृचो भवतीत्यर्थः सचाष्टमस्याह्नो धृत्यै धारणाय स्थैर्य्याय भवति अद्रिभिरिति लिङ्गात् अद्रयो हि लोके दृढहेतुतया प्रसिद्धाः ॥ १ ॥

नन्वयं त्रिरात्रः त्रिष्टुप्प्रायत्वात् त्रैष्टुभः तत्र कथं गायत्रस्य तृचस्य सङ्गतिरित्यत आह ।

गायत्र्याः सत्यस्त्रिष्टुभो रूपेण त्रैष्टुभꣳ ह्येतदहः ॥ २ ॥

इन्द्रशब्दो मरुच्छब्दश्चास्मिन्नेव तृचे दृश्येते तत् त्रैष्टुभं गतमन्यत् ॥ २ ॥

अथापरं तृचं विधत्ते ।

अभिसोमास आयव इत्यभीति रथन्तरस्य रूपं बृहदिति बृहत उभयोः सह रूपमुपैत्युभौ हि वर्णावेतदहः ॥ ३ ॥

अभिसोमास आयव इत्ययं तृचः तत्र अभीत्यभिशब्दो रथन्तरस्य रूपं तद्योनावभित्वाशूर इति दृष्टत्वात् बृहदिति बृहच्छब्दः बृहत्साम्नो रूपं तद्वाचकत्वात् एवं च बृहद्रथन्तरयोरूपं सहोपैति एकधोपगच्छति कुतः हि यस्मात् एतदहरुभौ वर्णौ उभयवर्णात्मकं ॥ ३ ॥

अथान्यं तृचं विधत्ते।

धर्त्ता दिवः पवते कृत्त्वो रस इत्यधृत इव वा एष-त्र्यहो यद्वर्त्तेति धृत्या एव॥ ४॥

धर्त्ता दिव इति तृचः कार्य्यः एष दशरात्रस्य त्रिरात्रस्तृतीयः अधृत इव वै अधारित इव शिथिल इव खलु तस्मिंस्त्रिरात्रे मध्यमेऽहनि यद्वर्त्तेति पदयुक्तस्तृचः क्रियते तत्तस्य त्रिरात्रस्य धृत्यै धारणाय दार्ढ्याय भवति॥ ४॥

ननु प्रकृतौ माध्यन्दिनपवमानान्त्यस्तृचः त्रैष्टुभः तत्र कथमसौ जागतस्तृचः तस्य त्रिरात्रस्य धृत्यै धारणाय सङ्गत इति तत्राह।

जगत्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते॥ ५॥

सिद्धमेतत्॥ ५॥

अध्वर्य्यो अद्रिभिरिति तृचे पूर्ववद्गायत्रं साम विधाय तद्-ब्राह्मणमतिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं॥ ६॥

गतमेतत्॥ ६॥

अथास्मिन्नेव तृचे सामान्तरं विधत्ते।

वैरूपं भवति ॥ ७ ॥

अध्वर्य्यो अद्रिभिरित्यस्यां योन्यामुत्पन्नं सामान्तरं ॥ ७ ॥

वैरूपं साम प्रशंसति ।

पशवो वै वैरूपं पशूनामवरुध्यै विरूपः संवत्सरो विरूपमन्नमन्नाद्यस्यावरुध्यै ॥ ८ ॥

यदेतद्वैरूपं साम तत्पशवो वै तस्मात्पशूनामवरोधाय एतत् साम भवति कथमस्य पशुरूपतेत्यत आह विरूपः संवत्सर इति वसन्ताद्यृतुभेदेन विरूपो विविधरूपो नानारूपः संवत्सरः तत् सम्बन्धाद्वैरूपं साम तदन्नाद्यस्यं अत्तुं योग्यस्यान्नस्यावरोधाय भवति ॥ ८ ॥

अथैतस्मिंस्तृचे सामान्तरं विधत्ते ।

आशु भार्गवं भवति ॥ ९ ॥

भार्गवं भृगुणा दृष्टं आशु एतदाख्यं साम अध्वर्य्यो अद्रिभिरित्यस्मिन्नेव पुनरावृत्ते तृचे गातव्यं ॥ ९ ॥

अस्य साम्नो हेतुतां ब्रुवन् निर्वक्ति ।

अश्वो वा एतद्भूत्वायत तद्देवा आशुनाभ्यधिन्वंस्तदाशोराशुत्वं ॥ १० ॥

एतदृष्टममंहः खलु पुरा अव्रीयत अशीर्य्यत तत्ताहृशमहृ-

देवाः आशुना आशुसंज्ञेनानेन साम्ना अभ्यधिन्वन् अदृढयन् व्याप्नुवन्नित्यर्थः तत्तस्मात् व्याप्तिसामर्थ्यात् आशोः एतत्संज्ञस्य साम्नः आशुत्वं आश्विति नाम सम्पन्नं ॥ १० ॥

अथ सामान्तरं विधत्ते ।

मार्गीयवं भवति ॥ ११ ॥

मार्गीयवाख्यं साम अध्वर्यो अद्रिभिरिति तृचे पुनरावृत्ते गातव्यं ॥ ११ ॥

तदेतत्पशुहेतुत्वेन स्तौति ।

देवं वा एतं मृगयुरिति वदन्त्येतेन वै स उभयेषां पशूनामाधिपत्यमाश्नुतोभयेषां पशूनामाधिपत्यमश्नुते मार्गीयवेण तुष्टुवानः ॥ १२ ॥

एतं प्रसिद्धं देवं महादेवं मृगयुरिति वदन्ति कथयन्ति एतं कामिकान् मृगानात्मन इच्छतीति मृगयुः महादेवः एतेन खलु साम्ना पुरा उभयेषां उभयविधानां ग्राम्यारण्यानां पशूनामाधिपत्यमधिपतित्वं आश्नुत प्राप्नोत् तस्मादद्यतनोऽपि मार्गीयवेण तुष्टुवानः स्तुतवान् उभयेषां पशूनामाधिपत्यं प्राप्नोति ॥ १२ ॥

अथ सामान्तरं दर्शयति ।

सौमित्रं भवति ॥ १३ ॥

सौमित्राख्यं साम अग्निमेवाष्टत्ते अध्वर्यो अद्रिभिरिति तृचे गातव्यं ॥ १३ ॥

अथास्य स्तावकं प्रागाम्नातं ब्राह्मणमतिदिशति।

यदेव सौमित्रस्य ब्राह्मणं ॥ १४ ॥

यत्पञ्चमेऽहनि सौमित्रस्य साम्नः स्तावकं ब्राह्मणमाम्नातं दीर्घजिह्वी वा इदं रक्षो यज्ञाहेत्यादि तदेव ब्राह्मणमपि सौमित्रस्याश्रयत्वेन द्रष्टव्यं ॥ १४ ॥

अथ सामान्तरं दर्शयति।

ऐढतं भवति ॥ १५ ॥

एतदपि साम आष्टत्ते अध्वर्यो अद्रिभिरित्येव तृचे गेयं॥१५

तदेतत् स्वर्गसाधनत्वेन स्तौति।

इढन्वा एतेन काव्योऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ १६ ॥

काव्यः कवेः पुत्र इढन् वै इढन्नामऋषिः गतमन्यत् ॥ १६ ॥

अथ सामान्तरं विधाय तद्ब्राह्मणञ्चातिदिशति।

**साकमश्वं भवति यदेव साकमश्वस्य ब्राह्मणं॥१७

साकमश्वाख्यं साम प्रकृत एव तृचे गातव्यं तस्य च साकमश्वस्य स्तावकं देवा वा अग्निष्टोममभिजित्येत्यादिना यद्ब्राह्मणमाम्नातं तदत्रानुसन्धेयं ॥ १७ ॥

अथैतत्प्रकारान्तरेण स्तौति ।

तदु धुरा९ सामेत्याहुः प्राणा वै धुरः प्राणानामवरुध्यै ॥ १८ ॥

तदु तत्साकमश्वाख्यं धुरां सामेत्याहुः कथयन्ति ब्रह्मवादिनः कास्ता धुर इति उच्यते प्राणा वै धुर एव ते हि म्रियमाणस्य देहान्निर्गच्छतः समीपस्थं परिजनं धूर्वन्ति हिंसन्तीति तस्मादेतत् धुरां साम प्राणानामवरुध्यै अवरोधनाय शरीरधारणाय भवति ॥ १८ ॥

अथ सामान्तरं दर्शयति ।

विलम्बसौपर्णम् भवति ॥ १९ ॥

विलम्बसौपर्णाख्यमपि साम प्रकृते अध्वर्यो अद्रिभिरिति तृचे गेयं ॥ १९ ॥

अथास्य विलम्बसौपर्णसंज्ञां निर्ब्रुवन् स्तौति ।

आत्मा वा एष सौपर्णानां यदष्टमेऽहनि पक्षावेतावभितो भवतो ये सप्तमनवमयोर्व्वीव वा अन्त-

रात्मा पक्षौ लम्बते यदन्तरात्मा पक्षौ विलम्बते तस्मा-द्विलम्बसौपर्णं ॥ २० ॥

सौपर्णानां साम्नां मध्ये एष आत्मा वै एतद्विलम्बसौपर्णं साम मध्यदेहस्थानीयं यदष्टमेऽहनि विनियुज्यते ये ऐडस्वाराख्ये सौपर्णे सप्तमनवमयोरह्नोर्विनियुज्येते एतावभितः पार्श्वयो-र्वर्त्तमानौ पक्षौ भवतः वयस्तु पक्षावन्तरा पक्षयोर्मध्ये आत्मा मध्यदेहे वीव लम्बते विशेषेण लम्बमानो भवति अन्तरा अन्त-रेण च वीव यद्यस्मात् पक्षौ पक्षभूतयोः सौपर्णयोर्मध्ये आत्मा आत्मभूतं इदं सौपर्णः विलम्बते तस्माद्विलम्बसौपर्णमिति साम्नो नाम सम्पन्नं ॥ २० ॥

किं तत इत्याह ।

स्वर्गस्य लोकस्य समष्ट्यै सौपर्णं क्रियते ॥ २१ ॥

स्पष्टोऽर्थः ॥ २१ ॥

अथ तृचान्तरे सामान्तरं विधत्ते ।

द्विहिङ्कारं वामदेव्यं भवत्यन्नाद्यस्यावरुध्यै ॥ २२

ऊम् आ ऊम् आ इति हिङ्कारद्वययुक्तं वामदेव्यं साम अभिसोमास आयव इति तृचे गातव्यं तच्चान्नाद्यस्यावरोधाय भवति ॥ २२ ॥

वामदेव्यस्य पञ्चात्मनोऽसंसूयमानत्वाद्विहिङ्कारद्वययुक्तस्याष्टमेऽहनि अष्टसंख्यापूरके कः सम्बन्ध इत्यत आह ।

द्वितीयꣳ ह्येतद्रूपं यच्छन्दोमाः ॥ २३ ॥

यत् एतत् द्वितीयं हि रूपं षडहः एकः समूहः तदपेक्षया छन्दोमत्रितयात्मकस्य समूहस्य द्विसंख्यापूरकत्वात् द्विहिङ्कारं सामास्मिन्नहनि सङ्गतमित्यर्थः ॥ २३ ॥

अथ तत्पशुसमृद्धिहेतुरिति स्तौति ।

पशवो वै वामदेव्यं पशवश्छन्दोमाः पशुष्वेव तत् पशून्दधाति ॥ २४ ॥

स्पष्टोऽर्थः ॥ २४ ॥

अथ सामान्तरं विधत्ते ।

गायत्रपार्श्वम्भवति ॥ २५ ॥

अभिसोमास आयव इत्यस्मिन्नेव तृचे गायत्रपार्श्वाख्यं साम गातव्यं ॥ २५ ॥

अथैतत् स्तौति ।

अङ्गिरा एतदब्रवीयत तद्देवा गायत्रपार्श्वेन समतन्वꣳस्तस्माद्गायत्रपार्श्वं ॥ २६ ॥

एतद्दृष्टममङ्गिरब्रवीयत अजीर्यन तदङ्गदेवा गायत्रपार्श्वेन

समतन्वन् समदधुः तस्मादन्ये सन्तानार्थं गायत्रपार्श्वं गातव्य-
मिति शेषः ॥ २६ ॥

एतदेव व्याचष्टे ।

त्रिरात्रो यद्व्यशीर्यत तमेतैः सामभिरभिषज्यन् गायत्रपार्श्वेनोपायच्छन् सन्तनिना समतन्वन संकृतिना समस्कुर्वन् प्रतिष्ठितौ पूर्वौ त्रिरात्रावप्रतिष्ठित एष यद्देतान्येव सामानि क्रियन्त एतस्यैव प्रतिष्ठित्यै॥२७

अयं तृतीयस्त्रिरात्रो यद्यदा व्यशीर्य्यत विशीर्णः शिथि-लावयवोऽभवत् तदा तत् त्रिरात्रं एतैर्वक्ष्यमाणैः सामभिर्देवा अभिषज्यन् दार्ढ्याय भैषज्यमकुर्वन् भिषजप्रकार उच्यते गाय-त्रपार्श्वेन साम्ना उपायच्छन् शिथिलावयवानां पुनः सन्तानार्थ-मुपादानमकुर्वन् अथ सन्तनिसाम्ना समतन्वन् समदधुः सङ्कृ-तिसाम्ना समस्कुर्वन् कृतसन्धाने तस्मिंस्त्रिरात्रे प्राणातिशया-धारं संस्कारः पूर्णं कुर्वन् संपर्य्युपेभ्यः करोतौ भूषणे इति कात् पूर्वसुट् अडभ्यां सव्यवायेऽपीत्यडागमेन व्यवायेऽपि भवति अपि च पूर्वौ त्रिरात्रौ प्रतिष्ठितौ एष तृतीयस्त्रिरात्रः तस्यैव त्रिरात्रे प्रतिष्ठित यद्देतानि गायत्रपार्श्वादीनि सामानि एवं क्रमेण क्रियन्ते तृतीये रात्रे प्रयुज्यन्ते तस्यैव त्रिरात्रस्य प्रतिष्ठामाय भवति सप्तमेऽहनि सन्तनिसाम नवमे सङ्कृति अष्टमेऽहनि तु गायत्रपार्श्वमित्येवमानुपूर्व्वी द्रष्टव्या ॥ २७ ॥

अथ सामान्तरं विधत्ते ।

पौरुहन्मनं भवति ॥ २८ ॥

पौरुहन्मनाख्यमपि साम अभिसोमास आयव इत्यस्मि न्नेव तृचे गातव्यं ॥ २८ ॥

अथैतत् स्तौति ।

पुरुहन्मा वा एतेन वैखानसोऽञ्जसा स्वर्गं लोक-मपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्य-वते तुष्टुवानः ॥ २९ ॥

पुरुहन्मा वा एतेन वैखानसो विखनसगोत्रः पुरुहन्मा नाम ऋषिः गतमन्यत् ॥ २९ ॥

अथैतस्मिन् सामगानविषये किञ्चिद्रूपं विधत्ते ।

अभ्याघात्यं भवत्यभ्याघात्यसामानो हि छन्दोमाः ॥३०

अभ्याघात्यमभ्याघातः अभ्याहननं अभ्यासः अस्मिन् साम्नि भवति अस्य हि योनौ भिराभ्रा १ ईगूरः२ तहता ३ तहता ३ ताहागार ३४ र्णाइ तहा ५ ग्ट्याई इत्यभ्यासो दृष्टः तद्वदेव तृचे गीयमानेऽप्यभ्यासाः कार्या इत्यर्थः कुत एतत् हि यस्मात् छन्दोमा अभ्याघात्यं अभ्यस्यमानावयवं साम येषां ते तथोक्ताः तस्मादित्यर्थः ॥ ३० ॥

अथ सामान्तरं विधत्ते ।

द्वैगतं भवति ॥ ३१ ॥

द्वैगतन्नाम साम अभिसोमास आयव इत्यस्मिन्नेव तृचे गातव्यं ॥ ३१ ॥

अथैतत् द्विविधफलप्राप्तिहेतुरिति स्तौति ।

द्विगद्वा एतेन भार्गवो द्विः स्वर्गं लोकमगच्छ-दागत्य पुनरगच्छद्द्वयोः कामयोरवरुद्ध्यै द्वैगतं क्रि-यते ॥ ३२ ॥

द्विर्वारं गच्छतीति द्विगत् क्विप् चेति क्विपि गमः क्वावित्य नुनासिकलोपो हृस्वस्य पिति कृतीति तुक् एतत् संज्ञो भार्गवो भृगुगोत्रऋषिः द्विर्द्विर्वारं एतेन साम्ना साधनेन स्वर्गं लोकं अगच्छत् गतवान् एतदेव विशदयति आगत्येत्यसकृत् स्वर्गं लोकं गत्वा पुनरिमं लोकमागत्य पुनः स्वर्गमगच्छत् तस्मात् द्वयोः कामयोरवरुद्ध्यै द्विविधफलप्राप्त्यै द्वैगतं सामाष्टमेऽहनि क्रियते ॥ ३२ ॥

अथ सामान्तरं विधत्ते ।

हारायणं भवति ॥ ३३ ॥

हारायणन्नामापि साम अभिसोमास इत्यस्मिन्नेव तृचे गातव्य ॥ ३३ ॥

अथैतत् स्तौति ।

इन्द्रस्तेजस्कामो हरस्कामस्तपोऽतप्यत स एतद्धारायणमपश्यत्तेन तेजो हरोऽवारुन्ध तेजस्वी हरस्वी भवति हारायणेन तुष्टुवानः ॥ ३४ ॥

तेजः शरीरकान्तिः हरः पराभिभवक्षमं सामर्थ्यं एतदुभयं कामयमान इन्द्रः पुरा तपस्तप्तवान् तदनन्तरमेतद्धारायणाख्यं सामापश्यत् अद्राक्षीत् तेन च साम्ना तेजोहरश्चावारुन्ध प्राप्नोत् तस्मादद्यतनोऽपि हारायणेन तुष्टुवानः स्तुवन् तेजस्वी हरस्वी च भवति ॥ ३४ ॥

अथ सामान्तरं विधत्ते ।

अच्छिद्रं भवति ॥ ३५ ॥

अच्छिद्रन्नाम साम प्रकृतएव तृचे गातव्यं ॥ ३५ ॥

अथैतस्याच्छिद्रसंज्ञान्वर्थेति स्तौति ।

यद्वा एतस्याह्नश्छिद्रमासीत्तद्देवा अच्छिद्रेणाप्यौहꣳस्तदच्छिद्रस्याच्छिद्रत्वं ॥ ३६ ॥

एतस्याष्टमस्याह्नो यदेवं छिद्रं शुषिरमासीत् तत् छिद्रमनेनाच्छिद्रेण साम्ना देवा अप्यौहन् अपिहितमकुर्वन् तत्तस्मात्कारणात् अच्छिद्रस्य साम्नः अच्छिद्रत्वं अच्छिद्रमिति नाम सम्पन्नं ॥ ३६

अथ प्रहिन्वानच्चतं बृहदिति अध्यास्यायां गेयं साम दर्शयति ।

बार्हदुक्थं भवति ॥ ३७ ॥

बार्हदुक्थाख्यं तस्यामध्यास्यायां गातव्यमित्यर्थः ॥ ३७ ॥

अथैतत् स्तौति ।

बृहदुक्थो वा एतेन वाम्नेयोऽन्नस्य पुरोधाम-गच्छदन्नं वै ब्रह्मणः पुरोधान्नाद्यस्यावरुध्यै ॥ ३८ ॥

वाम्नेयो वाम्नयाः पुत्र बृहदुक्थोनाम ऋषिः एतेन साम्ना अन्नस्य पुरोधामगच्छत् शिष्टं सिद्धं ॥ ३८ ॥

अथान्तिमे तृचे गेयं साम विधत्ते ।

उद्वद्भार्गवं भवति ॥ ३९ ॥

उद्वद्भार्गवाख्यं साम धर्त्तोदिव इत्यस्मिन् तृचे गातव्यं ॥३९

तदेतत् पूर्वस्मिन्नहनि विहितेन प्रवद्भार्गवेण संहृत्य स्तौति ।

प्रवता वै देवाः स्वर्गं लोकं प्रायन्नुद्वतोदायन् ॥४०

सिद्धमेतत् ॥ ४० ।

तदेतत् पवमानस्य स्तोत्रमुपसंहरति ।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः ॥४१

एतदपि व्याख्यातं, एतदुक्तं भवति अध्वर्यो अद्रिभिरिति तृचे गायत्रं वैरूपं आशुभार्गवं मार्गीयवं सौमित्रमैडतं साकमश्वं वितन्वसौपर्णं इत्येवमष्टौ सामानि, अभिसोमास आयव इति तृचे द्वि हिङ्कारं वामदेव्यं गायत्रपार्श्वं पौरुहन्मनं हैगतं हारायणमछिद्रमिति षट्सामानि धर्त्तादिवः पवत इति तृचे उद्वद्भार्गवमेकं साम प्रहिन्वान इत्यध्यास्यायां गीयमानं बार्हदुक्थं साम इत्थ पञ्चदशसामानि तृचे विहितानि एकमेकर्च्चतया च षट्चत्वारिंशस्तोत्रीया भवन्ति एवं विहितस्य चतुश्चत्वारिंशस्तोमस्यातिरेकः स्यात् अतस्तत्परिहाराय गायत्र्यादीनामन्यतमस्यैकर्च्चं कार्य्यं तथा च चतुश्चत्वारिंशस्तोम एव माध्यन्दिनपवमानस्य भवतीति ॥ ४१ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य

नवमः खण्डः।

अथ दशमः खण्डः।

अथ ब्रह्मसाम्नः स्तोत्रीयां विधित्सुरत्र शाखान्तरीयस्तोत्रे प्रथमं तृचं दर्शयति।

कई' वेद सुतेसचेति सतोबृहत्यः ॥ १ ॥

कई वेदेत्याद्यास्तिस्रः सतोबृहत्यश्चो ब्रह्मसाम्नः स्तोत्री-

याः अयुजौ पादौ जागतौ युजौ गायत्र्यौ यस्याः सा सतोबृहती ॥ १ ॥

अथैतासां सतोबृहतीनां विधानमुपपादयति ।

अपभ्रंश इव वा एष यत्सप्तमेऽहनि सतोबृहत्यो भवन्ति नाष्टमे तस्मादष्टमे कार्य्या अनपभ्रंशाय ॥ २

यत् सप्तमेऽहनि वयङ्क्वेत्याद्याः सतोबृहत्यो भवन्ति अष्टमेऽहनि न भवन्तीति यत् एषोऽपभ्रंश इव वै अधःपतनसदृशमेव अधिकाक्षरात्सतोबार्हताच्छन्दसोन्यूनाक्षरे बार्हते तृचे साम्नो गानप्रसङ्गात् यस्मादपभ्रंशपरिहाराय अष्टमे सतोबृहती कार्य्या प्रयोज्या अतः कईं वेदेत्याद्यास्तिस्रः सतोबृहत्यः ब्रह्मसाम्नः स्तोत्रीयाः कार्य्या इत्यर्थः ॥ २ ॥

अथ सिद्धान्तमाह ।

तदाहुः शिथिलमिव वा एतच्छन्दो यत्सतोबृहत्येषा वै प्रतिष्ठिता बृहती या पुनः पदा यदिन्द्र प्रागपागुदगिति दिशां विमर्शः प्रतिष्ठित्यै ॥ ३ ॥

तत्तत्राष्टमेऽहनि ब्रह्मसामस्तोत्रीयाविषये ब्रह्मवादिन आहुः प्रतिपद्यन्ते सतोबृहत्याख्यं यत् छन्दः एतत् शिथिलमिव वै शिथिलावयवमिव खलु तस्येहायुजौ पादौ जागतो युजौ गायत्र्यौ तथा च नैरन्तर्य्येण पादद्वयस्य संख्यावैलक्षण्ये नैकरूप्याभावा-

त्तस्य शैथिल्योक्तिः एषा खलु प्रतिष्ठिता लब्धास्पदा स्थिरा बृहती या पुनः पदा सकृत्प्रयुक्तः पादः बृहतीत्वसम्पत्तये यस्यामपि पुनरुपादाय प्रयुज्यते सा पुनः पदा यैषा पुनः पदा बृहती का पुनस्ता यदिन्द्रप्रागपागुदगित्याद्याः अत हि पूर्व्वस्याः पूर्व्वस्या ऋचः अन्त्यं पद द्विरभ्यस्य तिस्रो बृहत्यो गानसमये क्रियन्ते अपिचास्मिन् प्रगाथे प्रागपागुदगिति प्राच्यादीनां दिशां विमर्शः कीर्त्तनं दृश्यते अतस्तासु दिक्षु यजमानस्य प्रतिष्ठानाय भवति ॥३

तासु गातव्यं ब्रह्मसाम दर्शयति ।

तासु नैपातिथं ब्रह्मसाम ॥ ४ ॥

तासु यदिन्द्र प्रागित्याद्यासु बृहतीषु नैपातिथं नीपातिथिना दृष्टं एतदाख्यं ब्रह्मसाम कार्य्यं ब्रह्मणः पृष्ठस्तोत्रनिवर्त्तकं साम कार्य्यं ॥ ४ ॥

अथैतदृषिसम्बन्धेन साम्नाभिधेयत्वात् स्वर्गहेतुरित्याह ।

सामार्षेयवत् स्वर्गाय युज्यते स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ ५ ॥

सिद्धमेतत् ॥ ५ ॥

चतुर्थस्य पृष्ठस्य स्तोत्रीयं तृचमाह ।

उभयꣳ शृणवच्चन इति ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथैतं तृचमुभयशब्दयोगिनः सन्तानहेतुरिति स्तौति ।

यच्च पृष्ठानि यानि चैतान्यहानि तेषामुभयेषाᳬ सन्तत्यै ॥ ७ ॥

यत् यानि च पृष्ठानि च रथन्तरबृहद्रूपादीनि प्राक् षडहे प्रयुक्तानि यानि चैतानि छन्दोमाख्यान्यहानि तेषामुभयेषां द्विविधानां सन्तत्यै संश्लेषाय उभयशब्दयुक्तोऽयं तृचो भवति उभयशब्देन द्विधा द्वयस्य स्मारितत्वात् ॥ ७ ॥

अथैतस्मिंस्तृचे गातव्यं साम दर्शयति ।

तासु वैयश्वं ॥ ८ ॥

तासु श्यावश्च न इत्याद्यास्वृक्षु वैयश्वाख्यं साम गेयं ॥ ८ ॥

अथैतदृषिपुरःसरं स्वर्गसाधनमिति ब्रुवन् अच्छावाकसाम कार्य्यमित्याह ।

व्यश्वो वा एतेनाङ्गिरसोऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्या एतत् पृष्ठानामन्ततः क्रियते स्तोमः ॥ ९ ॥

आङ्गिरसोऽङ्गिरोगोत्रः व्यश्वोनाम ऋषिः शिष्टं स्पष्टं एतेषु च पृष्ठस्तोत्रेषु पूर्व्वोक्तएव चतुश्चत्वारिंशः स्तोमः कार्य्यः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्द्दशाध्यायस्य

दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथाभिवपवमानस्य प्रतिपत्तृचं विधाय सवने सङ्गतिमाह ।

पवस्व देव आयुषगिन्द्रं गच्छतु ते मद इति गायत्री भवति मदवद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति ॥ १ ॥

पवस्व देव इति गायत्री प्रतिपद्भवति गायत्रं प्रथमस्तृचो भवतीत्यर्थः पवस्व देव आयुषगिति गायत्री भवति एतावता पर्य्याप्ते पुनरधिकोपादानं मदशब्दप्रदर्शनान्मदवत्त्वेन तृतीयसवने सङ्गतिकथनार्थं शिष्टं पूर्व्ववद्व्याख्येयं ॥ १ ॥

अथान्यं तृचं विधत्ते ।

अभिद्युम्नं बृहद्यश इत्यमीति रथन्तरस्य रूपम्बृहदिति बृहत उभयोः सहरूपमुपैत्यभीह्नि वर्णावेतदहः ॥ २ ॥

एतदपि सिद्धं ॥ २ ॥

अथ तृचान्तरं विधत्ते ।

प्राणाशिशुर्म्महीनामिति प्राणवत्यो भवन्ति प्राणानेव तद्यजमाने दधाति ॥ ३ ॥

प्राणाशिशुर्महीनामित्याद्यास्तिस्रः प्राणवत्यः प्राणशब्दयुक्ताः स्तोत्रीया भवन्ति एकस्यां प्राणशब्ददर्शनात् छत्रिन्यायेन तिस्रोऽपि प्राणवत्यः तत्तेन यजमाने प्राणानीन्द्रियाणि शिशुप्राणसहितानि दधाति धारयति ॥ ३ ॥

अथ तृचान्तरं विधाय अष्टमेनाह्ना तस्य सङ्गतिमाह ।

अभीनोवाजसातममित्यभीति रथन्तरस्य रूपꣳ राथन्तरꣳ ह्येतदहः ॥ ४ ॥

अभिशब्दयुक्तस्तृचोऽष्टमेऽहनि सङ्गतइत्यर्थः शिष्टं सिद्धं ॥४॥

अथाक्षरपङ्क्तिछन्दस्कं तृचं विधाय सप्तमेऽहनीव तत् स्तौति।

पवस्व सोम महान् समुद्र इत्यक्षरपङ्क्तिः स्तोमानां प्रमूतिरथो एतद्ध्वैतर्हि छन्दो यातयाम यदक्षरपङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ब्रह्मवादिनो वदन्ति यत् षड़हे स्तोमाश्छन्दाꣳस्याप्यन्ते किं छन्दसश्छन्दोमा इत्येतच्छन्दसो यदेता अक्षरपङ्क्तय इति ब्रूयात् ॥ ५ ॥

एतत्सर्व्वं यस्ते मदो वरेण्य इति पञ्चमखण्डइवात्रापि व्याख्येयं ॥ ५ ॥

अथान्यं तृचं विधत्ते ।

हिन्वन्ति सूरमुस्रय इति गायत्र्यः सत्यो जगत्यो रूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ ६ ॥

हिन्वन्तीत्याद्यास्तिस्रो गायत्र्यः आर्भवस्यान्तिमाः सौबीयाः ताश्च देवदेवेभ्य इति देवशब्देन जागतेन रूपेण तस्माज्जगत्यः प्रजापतेर्मध्यदेशाद्देवैः सह खलु जगती सृष्टिकाल उत्पन्ना तस्माद्देवानां वाचको देवस्य शब्दो जागत रूपं यस्माद्देवं जगत्यस्तस्माज्जगतीनां लोके आर्भवान्तोहि प्राकृतो जगतीनां स्थाने तत्र क्रियन्ते ॥ ६ ॥

अथास्मिन्नेव तृचे पूर्ववद्गायत्रं साम विधाय तद्ब्राह्मणञ्च अतिदिशति ।

यागत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

अथ पवस्व देव आयुष इति विहितेऽस्मिंस्तृचे सामान्तरं विधत्ते ।

स्वाशिरामर्को भवति ॥ ८ ॥

स्वाशिरामर्काख्यं साम पवस्वेत्यस्मिन्नेवाष्टक्ते तृचे गेयं ॥८॥

अत्र स्वाशिरामर्क इति पदद्वयाभिधेयेन साम्ना साध्यं फलमाह ।

अन्नं वा अर्कोऽन्नाद्यस्यावरुध्यै प्राणा वै स्वाशिरः प्राणानामवरुध्यै ॥ ९ ॥

अन्नं खल्वर्चनसाधनत्वादर्क इति पदद्वयस्याभिधेयं सामान्नाद्यस्याप्त्यै भवति तथा प्राणाः खलु स्वाशिरः स्वयमेव शिरस्याश्रयितारः तस्मात्प्राणानामवरोधाय भवति ॥ ९ ॥

अथ सामान्तरं दर्शयति।

सुरूपं भवति ॥ १० ॥

एतदपि साम पवस्व देव इत्यस्मिन्नेव तृचे गातव्यं ॥ १० ॥

अथैतत् स्तौति।

पशवो वै सुरूपं पशूनामवरुध्यै ॥ ११ ॥

सुरूपं साम पशवो वै तेषां शोभनरूपयोगेन समानशब्दाभिधेयत्वात् तस्मादेतत्साम पशूनामवरोधाय भवति ॥ ११ ॥

अथ सामान्तरं विदधाति।

भासं भवति भाति तुष्टुवानः ॥ १२ ॥

भासाख्यमेतदपि साम पवस्व देव इत्यस्मिन्नेव तृचे गातव्यं अनेन तुष्टुवानः स्तुतवान् भाति यशसा दीप्यते ॥ १२ ॥

अथास्यानेनाह्ना सङ्गतिमाह।

पदनिधनं राथन्तरं ह्येतदहः ॥ १३ ॥

राथन्तरं रथन्तरसम्बन्धि रूपं पदनिधनं रथन्तरपृष्ठे प्रथमेऽहनि पदनिधनं प्रथमस्याह्नोरूपमिति विधिना तद्रूपता एतदहमस्य राथन्तरं रथन्तरसम्बन्धि बृहद्रथन्तरं साम हि द्वितीयः छन्दोमाख्यमहः ॥ १३ ॥

अथैतत्प्रकारान्तरेण स्तोतुं संज्ञां निर्वक्ति ।

स्वर्भानुर्वा आसुर आदित्यं तमसाविध्यत् स न व्यरोचत तस्मान्निर्भासेन तमोऽपाहन् स व्यरोचत यद्वै तद्भा अभवत्तद्भासस्य भासत्वं ॥ १४ ॥

आसुरः असुरवंशजः स्वर्भानुर्नाम पुरा आदित्यं सूर्यं तमसा अन्धकारेणाविध्यत् आच्छादितवान् तदनन्तरं स सूर्यो न व्यरोचत नादीप्यत तस्य सूर्य्यस्य सम्बन्धि स्वर्भानुकृतं तमः अत्रिऋषिः भासेनानेन साम्ना अपाहन् अपहतवान् ततः स सूर्यो व्यरोचत विशेषेण दीप्तोऽभवत् तत्तस्मादेतत्तदानीं सूर्य्योभास्वरोऽभवत् तत्तस्माद्भाससाधनत्वात् भासस्य साम्नो भासत्वं भासमिति नाम सम्पन्नं ॥ १४ ॥

किन्तत इत्याह ।

तम इव वा एतान्यहानि यच्छन्दोमास्तेभ्य एतेन साम्ना विवासयति ॥ १५ ॥

तम इव वै तमो रूपाण्येव एतान्यहानि यद्यानि छन्दोमाख्यानि प्रयोगबाहुल्येन दुःखप्रदत्वादेतस्य तमोरूपत्वं ततस्तेभ्योऽह्नोभ्य एतेन भाससाम्ना विवासयति तमो विश्लेषयति ॥ १५ ॥

अथ सामान्तरं विधत्ते।

काक्षीवतं भवति ॥ १६ ॥

कक्षीवता दृष्टं काक्षीवतं तदपि पूर्व्वोक्त एव तृचे गेयं ॥१६॥

अथैतत् स्तौति।

कक्षीवान्वा एतेनौशिजः प्रजातिं भूमानमगच्छत् प्रजायते बहुर्भवति काक्षीवतेन तुष्टुवानः॥१७

उशिजस्य पुत्रः कक्षीवान्नाम ऋषिः एतेन साम्ना प्रजातिं प्रकृष्टजननं प्रजोत्पत्तिं भूमानं बाहुल्यञ्चागच्छत् अथाद्यतनोऽपि अनेन स्तुवन् फलद्वयं लभत इत्यर्थः ॥ १७ ॥

अथ सामान्तरं विधत्ते।

आसितं भवति ॥ १८ ॥

असितेन दृष्टमासितं तदपि पूर्व्वोक्ते तृचे गेयं ॥ १८ ॥

अथैतत् स्तौति।

असितो वा एतेन दैवलस्त्रयाणां लोकानां

दृष्टिमपश्यत् त्रयाणां कामानामवरुध्या आसितं क्रियते ॥ १९ ॥

दैवलो देवलस्य पुत्रः असितो नाम ऋषिः एतेन साम्ना साधनेन त्रयाणां पृथिव्यादीनां लोकानां दृष्टिं दर्शनसाधनमपश्यत् अजानात् तस्मादद्यतनैरपि पुरुषैस्त्रयाणां कामानां लोकत्रयविषयाणां त्रिविधानां फलानामवरुध्यै अवरोधनाय प्राप्त्यर्थं. आसितं साम क्रियते प्रयुज्यते ॥ १९ ॥

अथ सामान्तरं विधत्ते ।

ऐषिरं भवति प्रजातिर्वा ऐषिराणि प्रजायते बहुर्भवत्यैषिरेण तुष्टुवानः ॥ २० ॥

स्पष्टोऽर्थः * ॥ २० ॥

त्रैतं भवति प्रतिष्ठायै ॥ २१ ॥

त्रितेन दृष्टं साम त्रैतं तत् प्राणाभिर्शुभ्रीनामिति तृचे गेयं तच्च यजमानस्य प्रतिष्ठानाय भवति ॥ २१ ॥

अथास्मिन्नहनि सङ्गतिमाह ।

पदनिधनᳪ राथन्तरᳪ राथन्तरᳪ ह्येतदहः॥ २२

गतमेतत् ॥ २२ ॥

अत्र भाष्यं पतितमनुमीयते ।

अथैतत् स्तौति ।

नाथविन्दु साम विन्दते नाथन्नाथविन्दून्येतान्यह्रानि यत् छन्दोमा नाथमेवैतैर्व्विन्दते ॥ २३ ॥

तत्रैतं साम नाथविन्दु नाथस्य नाथनीयस्य याचनीयस्य लम्भकं अतोऽनेन स्तुवन् नाथं याचितं फलं विन्दते किञ्चानेन साम्ना योगात् एतान्यह्रान्यपि नाथविन्दूनि याचनीयस्य फलस्य लम्भकानि यत् यानि छन्दोमाख्यानि स्पष्टमन्यत् ॥ २३ ॥

अथ सामान्तरं विधत्ते ।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥२४

गौरीविताख्यं साम अभीनो वाजसातममिति तृचे गेयं तस्य च यदेव प्रागाम्नातं ब्राह्मणं गौरीवितिर्वा एतच्छाक्त्य इत्यादि तदत्रापि द्रष्टव्यमित्यर्थः ॥ २४ ॥

अथान्यत्साम विधत्ते ।

कौत्सं भवति ॥ २५ ॥

कुत्सेन दृष्टं साम कौत्सं तच्च अभीन इति पूर्व्वोक्त एव तृचे गेयं ॥ २५ ॥

अथैतत् स्तौति ।

एतेन वै कुत्सोऽन्धसो विपानमपश्यत् स ह स्म वै सुराद्दृतिनोपवसथं धावयत्युभयस्यान्नाद्यस्यावरुध्यै कौत्सं क्रियते ॥ २६ ॥

एतेन खलु साम्ना पुरा कुत्स ऋषिः अन्धसोऽन्धस्य विपानं विशेषेण पातव्यं रसं अपश्यत् दृष्टवान् तत एव स ऋषिः सुराद्दृतिना सुरापूर्णेन दृतिना युक्तः सन् उपवसथं खाद्यस्य अग्निसमीपे वसत्यस्मिन्दिवस इति उपवसथं यागदिवसात् पूर्वमहः तद्धावयति स्म यत एवं ततो हेतोः उभयस्य पेयस्य चान्नाद्यस्य अत्तुं योग्यस्यान्नस्य अवरुध्यै अवरोधनाय कौत्सं क्रियते यजमानैः प्रयुज्यते ॥ २६ ॥

अथास्मिन्नेव तृच आहत्ते सामान्तरं विधत्ते ।

शुद्धाशुद्धीयं भवति ॥ २७ ॥

स्पष्टोऽर्थः ॥ २७ ॥

अशुद्धस्य शुद्ध्यापादकत्वात् शुद्धाशुद्धीयमिति निर्वचनमभिप्रेत्याह ।

इन्द्रोयतीन् सालावृकेयेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत्सोऽशुद्धोऽमन्यत स एतच्छुद्धाशुद्धीयमपश्यत्तेनाशुध्यच्छुध्यति शुद्धाशुद्धीयेन तुष्टुवानः ॥ २८ ॥

यतीन् कर्म्मविरोधिजनान् सालावृकेयेभ्यः सालावृकी-पुत्रेभ्यः इन्द्रो दत्तवान् तमिन्द्रं अश्लीला पापरूपा वागभ्यवदत् इन्द्रस्य ब्रह्महत्या सञ्जातेत्येवं रूपा अपस्करी वाग्जातेत्यर्थः तदनन्तरं स इन्द्रः आत्मानमशुद्धोऽमन्यत अजानात् स च एतत् शुद्धाशुद्धीयाख्यं सामापश्यत् तेनाशुध्यत् शुद्धोऽभवत् तस्मादन्यो-ऽपि शुद्धाशुद्धीयेन तुष्टुवानः स्तुवन् शुध्यति शुद्धो भवति ॥ २८ ॥

अथ सामान्तरं विधाय तत् ब्राह्मणं प्रागाम्नातमत्यति-दिशति।

क्रौञ्चं भवति यदेव क्रौञ्चस्य ब्राह्मणं यत् द्वितीयेऽहनि ॥ २९ ॥

क्रौञ्चं साम अभीनो वाजसातममित्यस्मिन्नेव तृचे गेयं तस्य क्रौञ्चस्य यदेतत् ब्राह्मणं स्तावकमाम्नातं तदत्रापि द्रष्टव्यं तत्र ब्राह्मणं द्वितीयेऽहनि षष्ठेऽहनि च पृथगेवाम्नातं तत्र द्वितीये-ऽहनि वाग्वै क्रौञ्चमित्यादिकं तदेवाम्नातमतिदिश्यत इत्यर्थः ॥२९

अथ सामान्तरं विधत्ते।

रयिष्ठं भवति ॥ ३० ॥

एतत्साम अभीनोवाजसातममित्यस्मिन्नेव तृचे गातव्यं ॥ ३०

अथैतत् स्तौति।

पशवो वै रयिष्ठं पशूनामवरुध्यै ॥ ३१ ॥

यद्देतद्रयिष्ठं साम तत्पशवो वै अतिशयेन रयिमान् हि लोके रयिमित्युच्यते अस्य च बहुपशुत्वमपि सम्भवतीति रयिष्ठस्य पशुरूपता तस्मादेतत्पशूनामवरुध्यै भवति ॥ ३१ ॥

अथास्मिन्नेव तृचेऽन्यत् साम विधत्ते ।

औद्दलं भवति ॥ ३२ ॥

स्पष्टोऽर्थः ॥ ३२ ॥

अथैतत् स्तौति ।

उद्दलो वा एतेन वैश्वामित्रः प्रजातिं भूमानम-गच्छत् प्रजायते बहुर्भवत्यौद्दलेन तुष्टुवानः ॥ ३३ ॥

वैश्वामित्रो विश्वामित्रगोत्रः उद्दलोनाम ऋषिः गतम-न्यत् ॥ ३३ ॥

अथान्यत्साम विधत्ते ।

धर्म्म भवति धर्म्मस्य धृत्यै ॥ ३४ ॥

धर्म्माख्यं साम पवस्व सोमेत्युत्तरपङ्क्तिच्छन्दस्के तृचे गातव्यं तच्च धर्म्मस्य यागजन्यस्यापूर्वस्य धृत्यै धारणाय यावत् फलम-वस्थानाय भवति ॥ ३४ ॥

अथैतत् छन्दोद्वारेण स्तौति ।

ब्रह्मवादिनो वदन्ति यत् षड़ह स्तोमाश्छन्दांऽ-

स्थाप्यन्ते किं छन्दसश्छन्दोमा इति पृच्छेयुः पुरुषः छन्दस इति ब्रूयात् पुरुषो वै पाङ्क्तः पुरुषोद्विपदाश्छन्दोमानामयातयामतायै ॥ ३५ ॥

एतदपि यस्तेमहोवरेण्यइति पञ्चमखण्ड इव व्याख्येयं ॥३५॥

अथान्यत् साम विधत्ते।

विशोविशीयं भवति ॥ ३६ ॥

एतत्संज्ञं साम हिन्वन्ति सूरमुस्रय इति तृचे गेयं ॥ ३६ ॥

अथैतत् स्तौति।

अग्निरकामयत विशोविशोऽतिथिःस्यां विशोविश आतिथ्यमश्नुवीयेति स तपोऽतप्यत स एतद्विशोविशीयमपश्यत्तेन विशोविशोऽतिथिरभवत् विशोविश आतिथ्यमाश्नुत विशोविशोऽतिथिर्भवति विशोविश आतिथ्यमश्नुते विशोविशीयेन तुष्टुवानः॥३७॥

अग्निः पुरा अकामयत किमिति विशोविशः सर्वस्याविशः सर्व्वासां प्रजानामहमतिथिः स्यां अतिथिवत् पूज्यो भवेयं तथा विशोविशः सर्व्वस्याविशः सकाशादातिथ्यं हविरश्नुवीय प्राप्नुयामिति एवं कामयित्वा तदर्थं तपस्तप्तवान् तप्त्वा च सोऽग्निरेतद्विशोविशीयं सामापश्यत् तेन साम्ना विशोविशः सर्व्वस्याः

अपि प्रजायाः अग्निरतिथिरभवत् तथा तर्ह्यस्याग्निः सकाशात् आतिथ्यमाश्नुत प्राप्नोत् तस्मादद्यतनोऽपि विशोविशीयेन तुष्टुवानः स्तुवन् विशोविशोऽतिथिर्भवति आतिथ्यञ्चाश्नुते ॥२७॥

अथैतत् छन्दोद्वारेण स्तौति ।

गायत्रीषु* स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ३८ ॥

गायत्रीषु तु विशोनिशीयेन स्तुवन्ति तासाञ्च त्रिपात्त्वात् अग्निना सहोत्पन्नत्वात् प्रतिष्ठाब्रह्मवर्चसे यजमानस्य सिध्यतः अपि च गायत्रेण तृचे स्तोत्रस्य प्रायणं कृतं उदयनमपि गायत्रेण क्रियते तस्माच्च त्रिवृदात्मकेन प्रायणं स्तुतेन येनैव गायत्रेण प्रयन्ति तेनैव स्तोत्रं परिसमापयन्ति ॥ ३८ ॥

अथैतत्पवमानस्तोत्रं पूर्व्ववदुपसंहरति ।

इडान्ताः पवमाना भवन्ति पशवो वा इडा पशवश्छन्दोमाः पशुष्वेव तत्पशून्दधाति स्तोमः ॥ ३९ ॥

सिद्धमेतत् । एवं गायत्रादीनि विशोविशीयान्तानि षोडश सामानि विहितानि अत्र चतुश्चत्वारिंशस्तोमस्य विधानात् तदतिरेकपरिहाराय सामद्वयमेकर्च्चं कार्य्यं तच्च सूत्रकारेणोक्तं सुरूपक्रौञ्चे एकर्च्चयोरेक इति अयमर्थः अष्टमेऽहन्याभवे स्तोमातिरेकपरिहाराय सुरूपक्रौञ्चे सामनी एकैकस्याञ्चाभाव इत्येतत्

मतं स्वपक्षस्तु द्विप्रभृतिककुप्प्रभृत्यानन्तर्य्येणेति वचनादेतयोरे-कर्चकरणमिति ॥ ३६ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्द्दशाध्यायस्य

एकादशः खण्डः।

अथ द्वादशः खण्डः।

अथोक्थानां प्रथमस्य स्तोत्रीयं तृचन्दर्शयति।

प्रेष्ठं वो अतिथिमित्यातिथ्यस्यैव तद्रूपं क्रियते ॥१॥

प्रेष्ठं वो अतिथिमित्यतिथिशब्दयोगात् एतस्य तृचस्य करणं आतिथ्यस्यैव रूपं क्रियते ॥ १ ॥

अथ द्वितीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति।

ऐन्द्रनोगधिप्रियेतीन्द्रियस्य वीर्य्यस्यावरुध्यै ॥ २ ॥

इन्द्रशब्दयोगात् अयं तृचः इन्द्रियरूपस्य वीर्यस्यावरोध-नाय भवति ॥ २ ॥

अथ तृतीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति।

पुरां भिन्दुर्य्युवकविरमितौजा अजायतेन्द्रो वि-श्वस्य कर्म्मणो धर्त्ता वज्री पुरुष्टुत इति धृत्या एव ॥३

पुरां भिन्दुरिति तृतीयस्योक्थस्य स्तोत्रीयस्तृचः कार्य्यः स च धर्तृशब्दयोगप्रदर्शनाय भूयसः पदसमूहस्यानुवादः ॥ ३ ॥

अथ प्रथमस्योक्थस्य साम विधत्ते ।

औशनं भवति ॥ ४ ॥

औशनाख्यं साम प्रेष्ठं व इति तृचे गेयं ॥ ४ ॥

अथैतत् स्तौति ।

उशना वै काव्योऽकामयत यावानितरेषां काव्यानां लोकस्तावन्तꣳ स्पृणुयामिति स तपोऽतप्यत स एतदौशनमपश्यत्तेन तावन्तं लोकमस्पृणोद्यावानितरेषां काव्यानामासीत्तद्वाव स तर्ह्यकामयत कामसनि सामौशनं काममेवैतेनावरुन्धे ॥ ५ ॥

काव्यः कवेः पुत्रः उशना नाम ऋषिः पुरा कामितवान् इतरेषां स्वव्यतिरिक्तानां काव्यानां कविपुत्राणां स्वदायादानाम् यावान् यत्परिमाणको लोकः तावन्तं लोकं स्पृणुयां अहं प्राप्नुयामिति स च तपस्तप्त्वैतत्साम दृष्टवान् तेन च तावन्तं लोकं प्राप्नोत् यावान् यत्परिमाणः लोकः इतरेषां काव्यानामासीत् सिद्धमन्यत् ॥ ५ ॥

अथ द्वितीयस्योक्थस्य साम विधत्ते ।

सांवर्त्तं भवति ॥ ६ ॥

एतदाख्यं साम ऐन्द्रमो गधीत्यस्मिंस्तृचे गेयं ॥ ६ ॥

अथास्य साम्नः सांवर्त्तसंज्ञां निर्ब्रुवन् पापक्षयहेतुतामाह ।

देवानां वै यज्ञꣳ रक्षाꣳस्यजिघाꣳसꣳस्तान्येतेन इन्द्रः संवर्त्तमुपावपद्यत् संवर्त्तमुपावपत्तस्मात् सांवर्त्तं पाप्मा वाव स तानसचत* तं सांवर्त्तेनापाघ्नतापपाप्मानꣳ हते सांवर्त्तेन तुष्टुवानः ॥ ७ ॥

देवानां सम्बन्धिनं यज्ञं रक्षांस्यजिघांसन् हन्तुमैच्छन् तानि रक्षांसि एतेन साम्ना इन्द्रः संवर्त्तं प्रलयं उपावपत् उपागमयत् यत्संवर्त्तमुपावपत् तस्मादस्य साम्नः सांवर्त्तमिति नाम तं यज्ञं पाप्मा पापमेव अगृह्णात् गृहीतवत् तं पाप्मानं सांवर्त्तेन अनेन साम्ना देवा अपाघ्नत तस्मादद्यतनोऽपि सांवर्त्तेन स्तुवन् पाप्मानमपहते ॥ ७ ॥

अथ तृतीयस्योक्थस्य साम दर्शयति ।

मारुतं भवति ॥ ८ ॥

मारुतं साम पुरां भिन्दुरित्यस्मिंस्तृचे गेयं ॥ ८ ॥

अथैतत् स्तौति ।

मासा वै रश्मयो मरुतो रश्मयोमरुतो वै देवानां भूयिष्ठा भूयिष्ठा असामेति वै सत्त्रमासते भूयिष्ठा एव

* तानसचत इत्यत्र तमगृह्णात् इति भाष्यसम्मतः पाठः ।

भवन्त्यृतुमन्ति पूर्वाण्यहान्यनृतवः छन्दोमा यदेतत्साम भवति तेनैतान्यहान्यृतुमन्ति भवन्ति ॥ ९ ॥

मासा एव संवत्सरस्य रश्मिभूताः मरुतश्चेन्द्रस्य रश्मयः अतो मासानां मरुताञ्च साम्यात् छन्दोमानामृतुमत्त्वमिति उपरिष्टाद्योज्यं एतत्सामसम्बन्धिनो ये मरुतः ते खलु देवानां मध्ये भूयिष्ठा बहुतराः तथैव वयं असाम भवाम एवं कामा यजमानाः सत्रमासते अत भूयसां मरुतां सम्बन्धिनानेन साम्ना स्तुवन्तो भूयिष्ठा एव भवन्ति किञ्च पूर्व्वेऽपि त्रिवृत्पञ्चदशादिस्तोमकानि षडहानि ऋतुमन्ति ऋतुयुक्तानि त्रिवृदादीनां षसां स्तोमानां वसन्ताद्यात्मना संस्तवात् तथाच तैत्तिरीयके वसन्तेन देवाः वसवस्त्रिवृता स्तुतमित्यनुवाके संस्तवो दृश्यते उक्तवैलक्षण्यात् अनृतवः ऋतुरहितास्त्रयश्छन्दोमा यद्यस्मात् एतन्मारुतं साम भवति तेनैतानि छन्दोमाख्यानि त्रीण्यहान्यृतुमन्ति ऋतुयुक्तानि भवन्ति कुत एतत् मासा वै रश्मयो मरुतो रश्मय इति मरुतां मासात्मना संस्तवात् मासद्वयात्मकत्वाच्च ऋतूनां ॥ ९ ॥.

एतेषु त्रिषूक्थस्तोत्रेषु पूर्व्ववत् स्तोमं विधाय स्तौति।

चतुश्चत्वारिंशश्च एव स्तोमो भवत्योजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजो वीर्य्यं त्रिष्टुप् ॥ १० ॥

सिद्धमेतत् ॥ १० ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य द्वादशः खण्डः।

चतुर्दशाध्यायः समाप्तिमगमत्।

पञ्चदशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

एवं दशरात्रस्याष्टानामह्नां स्तोमानां क्लृप्तिरुक्ता अथ नवमस्याष्टाचत्वारिंशस्तोमकस्य प्रथमेनावरणेन स्तोमक्लृप्तिरारभ्यते तत्र बहिष्पवमानस्य प्रतिपत्तृचं दर्शयति ।

अक्रान् समुद्रः परमे विधर्म्मन्निति नवमस्याह्नः प्रतिपद्भवति ॥ १ ॥

प्रतिपद्यतेऽनयेति प्रतिपत् अक्रान् समुद्र इति तृचो बहिष्पवमानस्य प्रथमो भवतीत्यर्थः ॥ १ ॥

परमे विधर्म्मन्निति पदद्वययोगादस्य तृचस्य अनेन नवमेनाऽह्ना सङ्गतिमाह ।

परमं वा एतदहर्विधर्म विधर्म्म वा एतदन्यैरहभिरहर्य्यन्नवमं ज्येष्ठं हि वरिष्ठं ॥ २ ॥

एतन्नवममहः परमं वै उत्कृष्टतरं अष्टाचत्वारिंशेन त्रिर-

दादिभ्यः सर्वेभ्यः स्तोमेभ्योऽधिकेन स्तोमेन युक्तत्वात् अतएवै-तदहर्विधर्म्म स्तोत्रीयाधिक्येन गुरुत्वातिशयात् विशेषेण धार-णीयं एतदेव व्याचष्टे विधर्म्मा वा इति अन्यैस्त्रिवृदादिस्तोमकै-रहर्भिरेतदहर्विधर्म वै विशेषेण धारणीयं यन्नवमन्नवसंख्यापूर-केन तदहः कुतो विधरणीयमित्यत आह ज्येष्ठं बृहत्तरं तस्य व्याख्यानं वरिष्ठमिति यस्मादेतन्नवममहः वरिष्ठतरं तस्मात् विधर्म एवञ्च परमविधर्मशब्दयुक्तस्तृचोऽस्मिन्नहनि संगच्छत इत्यर्थः ॥ २ ॥

अथास्य तृचस्य द्वितीयामनूद्य स्तौति ।

मत्सिवायुमिष्टये राधसे न इति वारुण्येका भवति यद्वै यज्ञस्य दुरिष्टं तद्वरुणो गृह्णाति तदेव तदवय-जति ॥ ३ ॥

मत्सिवायुमिष्टय इत्यस्यामृचि मत्सि मित्रावरुणापूयमान इति वरुणशब्दश्रवणात् एषा ऋक् वारुणी वरुणसम्बन्धिनी यद्वै यत् खलु यज्ञस्य दुरिष्टं दुर्ज्जरं तद्वरुणो गृह्णाति आदत्ते तस्मया वारुण्या तदेव दुरिष्टं तमेव तदवयजति ॥ ३ ॥

अथैतस्य प्रथमस्य तृचस्य स्तोत्रीयसंज्ञां कुर्व्वन् प्रकारान्त-रेण स्तौति ।

स्तोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै ॥४॥

सिद्धमेतत् ॥ ४ ॥

अथैतस्मिन् बहिष्पवमाने दश स्तोत्रीया विधत्ते ।

दशर्च्चो भवति दशाक्षरा विराट् वैराजमन्नमन्ना-द्यस्यावरुध्यै ॥ ५ ॥

दशानामृचां समाहारो दशर्च्चः ऋक्पूरब्धूः पथामानक्षे इत्य-कारः समासान्तः स च एष देवो अमर्त्य इत्यादिकः स्पष्टम-न्यत् ॥ ५ ॥

अथैतत् स्तौति ।

सप्रभृतयो भवन्तीन्द्रियस्य वीर्य्यस्य रसस्यान-तिक्षाराय यत्र वै देवा इन्द्रियं वीर्य्यं रसमपश्यꣳस्त-दनुन्यतुदन् ॥ ६ ॥

ता ऋचः सप्रभृतयः समानोपक्रमा एष देवो अमर्त्यः एषविप्रैरभिष्टुतः एष विश्वानि वार्य्येत्येवंविधा भवन्ति तच्च स-प्रभृतित्वं इन्द्रियस्य इन्द्रलिङ्गस्य वीर्य्यस्य वीर्य्यात्मकस्य रसस्य अनतिक्षाराय अतिक्षरणाभावाय भवति यत्र खलु मन्त्रभागे देवा इन्द्रियं वीर्य्यं रसमपश्यन् दृष्टवन्तः तन्मन्त्रभागं अनुन्यतु-दन् प्रत्यृचमभ्यस्यन् रसस्यानपगमाय अभ्यसनाद्दृढयन्नित्यर्थः ॥ ६

अथान्या अष्टर्चं स्तोत्रीया विधत्ते ।

अष्टर्च्चो भवति ॥ ७ ॥

अष्टानामृचां समाहारोऽष्टर्चः स चैषधिया यात्यवैत्या-
द्दिकः ॥ ७ ॥

अथैतामष्टसंख्यामुपजीव्य स्तौति ।

**अष्टाशफाः पशवः शफशस्तत्पशूनाप्नोति अष्टा-
क्षरा गायत्री तेजो ब्रह्मवर्चसं गायत्री तेज एव
ब्रह्मवर्चसमवरुन्धे ॥ ८ ॥**

सिद्धप्रायमेतत् ॥ ८ ॥

अथ चतुरः षडृचान् विधत्ते ।

षडृचा भवन्त्यृतूनां धृत्यै ॥ ९ ॥

षसामृचां समाहारः षट् संख्यासाम्यात् षसामृतूनां धृत्यै
धारणाय भवति ॥ ९ ॥

अथास्य षडृचस्य चतुःसंख्यामुपजीव्य स्तौति ।

**चत्वारः षडृचा भवन्ति चतुर्विंशतिरर्द्धमासाः
संवत्सरः संवत्सरएव प्रतितिष्ठति ॥ १० ॥**

एष उक्थः एष वाजी एष कविः स सुतः पीतये इति चत्वारः
षडृचा भवन्ति ताः तत्र चतुर्विंशतिस्तोत्रीया भवन्ति संवत्सर-
चतुर्विंशतिरर्द्धमासात्मकः तथा च चतुर्भिः षडृचैः संवत्सर एव
यजमानः प्रतिष्ठितो भवति ॥ १० ॥

तेषु चतुर्थस्य षडृचस्य किञ्चिल्लिङ्गमुपजीव्य स्तौति ।

स वानुत्तमः षडृचो भवत्युभयस्य परोक्षप्रत्यक्ष-स्यावरुध्यै ॥ ११ ॥

स वा सुतः पीतये स पवित्रे स वाजी रोचनं दिव इत्येवं सप्तर्च्युक्तानुत्तमः अन्त्यवर्तनरहितः षडृचो भवति तच्छब्दस्य परोक्षवाचित्वात् तत्र स इति पदं परोक्षवाचकं इतरत्प्रत्यक्ष वाचकमित्युभयस्य द्विविधस्य परोक्षप्रत्यक्षस्य देशकालादिविप्रकृष्टस्य प्रत्यक्षस्य पुरोवर्त्तिनः फलस्यावरोधनाय भवति ॥११

अथ बहिष्पवमानस्यान्त्यं तृचं विधाय स्तौति ।

तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्यु-द्यन्ति ॥ १२ ॥

अत्रोत्तराषाढे विनियुज्यान्तिमस्य तृचस्य पृथगाम्नानात् कोऽसावित्याशङ्क्य सूत्रकारेणोक्तं नवमस्य ज्योतिष्टोमः पर्य्याप्तः साप्तमिक इत्येक इति अयमर्थः नवमस्याह्नो बहिष्पवमानेऽन्त्य-स्तृचो ज्योतिष्टोमः ज्योतिष्टोमसम्बन्धी भवति सर्व्वत्र प्रकृति-भूते ज्योतिष्टोमे सप्तमेऽहनि वा यः पावमानी इत्यस्यान्त्यस्तृचः अनयोरन्यतरोऽस्मिन्नवमेऽहनि बहिष्पवमानस्यान्त्यस्तृचः कार्य्य इत्यर्थः गतमन्यत् ॥ १२ ॥

अथास्मिन् बहिष्पवमाने स्तोमं विधत्ते ।

अष्टाचत्वारिꣳश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥ १३ ॥

अष्टाचत्वारिंशस्तोत्रीयात्मकः स्तोमो भवति संख्याद्वारा प्रतिष्ठायै प्रतिष्ठानाय प्रजात्यै प्रजननाय च भवति जगती ह्यष्टाचत्वारिंशदक्षरा पशवश्च जागताः पशूनाञ्च प्रतिष्ठाहेतुत्वञ्च लोकसिद्धं एवं संख्याद्वारा अष्टाचत्वारिंशस्य प्रतिष्ठाहेतुता द्रष्टव्या ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथास्मिन्नवमेऽहनि प्रथममाज्यस्तोत्रं दर्शयति ।

अगन्म महानमसा यविष्ठमित्याग्नेयमाज्यं भवति ॥ १

अगन्म महेत्ययं तृचः आग्नेयमग्निदेवत्यं प्रथममाज्यस्तोत्रं भवति ॥ १ ॥

गमिधातुयुक्तत्वादयन्नवमेऽहनि सङ्गत इत्याह ।

गच्छन्तीव वा एते ये नवममहर्गच्छन्ति ॥ २ ॥

ये यजमानाः नवममहर्गच्छन्ति प्राप्नुवन्ति एते गच्छन्तीव

वै दशरात्रस्य समाप्तप्रायत्वाद्यागाग्निं गच्छन्तीव तस्माद्गन्मम हेति गमिधातुयुक्तास्तृचो नवमेऽहनि योज्य इत्यर्थः ॥ २ ॥

अथास्य तृचस्य प्रथमायामृचि लिङ्गत्रयमनूद्य सङ्गतिप्रदर्शनायाह ।

यो दीदाय समिद्धस्वे दुरोण इति दीदायेव ह्येष यो नवभिरहर्भिस्तुष्टुवानः स्वाहुतमिति स्वाहुतो ह्येष यो नवभिरहर्भिराहुतो विश्वतः प्रत्यञ्चमिति विश्वतो ह्येष प्रत्यङ् ॥ ३ ॥

योऽग्निर्नवमैरहर्भिः प्रायणीयातिरात्रसहितैरतीतैरष्टभिरहोभिस्तुष्टुवानः स्तुतः एष दीदायेव दिदीप्त एव हि यस्माद्दीदायसमिद्धस्वे दुरोण इति लिट् णिट् स्वस्य दीदतेः प्रयोगः सङ्गत इत्यर्थः तथा योऽग्निर्नवभिरहर्भिराहुत आहुतिभिस्तर्पितः एष हि स्वाहुतः सुष्ठु आहुत्या तर्पितो भवति तस्मात् स्वाहुतमिति पद्योगः तथा एष ह्यग्निर्विश्वतः सर्व्वत्र प्राणिषु प्रत्यङ् प्रत्यग्वृति सरूपेण अन्तर्वर्त्तमानो भवति तस्मात् विश्वतः प्रत्यङ्ङिति पदन्तत्र प्रयुज्यते ॥ ३ ॥

अथास्य तृचस्य तृतीयायामृचि किञ्चिल्लिङ्गं प्रदर्श्य स्तौति ।

त्वं वरुण उत मित्रो अग्न इति वारुण्येका भवति

यद्वै यज्ञस्य दुरिष्टन्तद्वरुणो गृह्णाति तदेव तदवयजति ॥ ४ ॥

त्वं वरुण इति वरुणशब्दश्रवणात् एका स्तोत्रीया वारुणी वरुणसम्बन्धिनी भवति सिद्धं सिद्धं ॥ ४ ॥

अथ द्वितीयमाज्यस्तोत्रं दर्शयति ।

मित्रꣳहुवे पूतदक्षमिति राथन्तरं मैत्रावरुणं ॥ ५ ॥

मित्रं हुव इति रथन्तरसम्बन्धि मैत्रावरुणम्मित्रावरुणदेवताकं द्वितीयमाज्यस्तोत्रं भवति गव्यन्तस्त्वा हवामह इति राथन्तरे प्रगाथे ह्वयतिधातुदर्शनात् अत्रापि तत्सद्भावात् राथन्तरत्वं ॥ ५ ॥

वैकृतेषु मध्ये सकृत्प्रयुक्तस्यास्य राथन्तरस्याज्यस्य पुनः प्रयोगे कारणमाह ।

उग्रगाधमिव वा एतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसंव्याथाय ॥ ६ ॥

एतच्चाग्निं वो देवमग्निभिः सजोषा इति खण्डे व्याख्यातं ॥ ६ ॥

अथ तृतीयमाज्यस्तोत्रं दर्शयति ।

महाꣳ इन्द्रो य ओजसेत्यैन्द्रमष्टमेन वै देवा अहेन्द्रमवाजयन्नवमेन पाप्मानमघ्नन्नहरेवैतेन महयन्ति ॥ ७ ॥

महां इन्द्रो य ओजसेति तृच ऐन्द्रमिन्द्रदैवत्यं तृतीयमाज्यस्तोत्रं भवति शिष्टेनास्य तृचस्य नवमेऽहनि सङ्गतिः उच्यते अष्टमेन खल्वह्ना देवाः पुरा इन्द्रमवाजयन्नबलयन् नवमेनाह्ना पाप्मानं पापरूपं वृत्रं अघ्नन्नहिंसन् एतेन महच्छब्दयुक्तेन तृचेन तन्नवममहरेव महयन्ति महत् कुर्व्वन्ति ॥ ७ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति।

ता हुवे ययोरिदमिति राथन्तरमैन्द्राग्नं ॥ ८ ॥

ता हुवे इति तृचः राथन्तरं रथन्तरसम्बन्धि ऐन्द्राग्नं इन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं भवति मित्र हुव इति पदस्यापि रथन्तरसम्बन्धो द्रष्टव्यः ॥ ८ ॥

रथन्तरसम्बन्धिनोऽस्य तृचस्य प्रयोगे दोषं पूर्ववदुपपादयति।

उग्रगाधमिव वा एतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसंव्याथाय स्तोमः ॥ ९ ॥

एतेष्वपि चतुर्थ्याज्यस्तोत्रेषु पूर्वोक्ताष्टाचत्वारिंश एव स्तोमः

कार्य्यः सिद्धमन्यत् इत्थं पञ्चसु प्रातःसवनिकेषु स्तोत्रीयाः स्तोमक्लृप्तिश्च विहिता तासु गतव्यं साम प्राकृतमेवेत्यधिगन्तव्यं ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथास्मिन्नवमेऽहनि माध्यन्दिनपवमानस्य प्रथमं तृचं दर्शयति ।

पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षतेति हरिवत्यो गायत्र्यो भवन्ति च्छन्दोमानामयातयामतायै ॥ १ ॥

पवमानस्य जिघ्नत इत्याद्यास्तिस्रः हरिवत्यो हरिशब्दयुक्ताः गायत्र्यः स्तोत्रीया भवन्ति तासु हरिशब्दयोगात् छन्दोमानां त्रयाणामह्नामयातयामतायै अगतसारतायै भवति ॥ १ ॥

अथैता ऋचः प्रकारान्तरेण स्तौति ।

पवमानस्य जिघ्नत इति वै बृहतो रूपꣳ हरेश्चन्द्रा असृक्षतेति जगत्या उभयोः सहरूपमुपैति साम्नश्च छन्दसश्च ॥ २ ॥

जिन्वत इति प्रतिपाद्यमानं इननं बृहत्साम्नो रूपं तद्धि क्षत्रियजात्या सहोत्पन्नत्वेन शौर्य्यवत्त्वात् इननक्षमं तथा चन्द्राः आह्लादकरिण्योर्हरेर्हरणशीलादसृक्षत सृष्टा अभूवन्निति आह्लादकत्वं प्रतिपाद्यते तच्च पशूनां सम्भवति पशवश्च जागता इति चन्द्रा इति पदं जगतीछन्दसो रूपं पवमानस्य जिन्वत इति तृचं प्रयुञ्जानः साम्नश्च बृहतश्छन्दसश्च उभयो रूपं सहोपैति उपगच्छति भूयसो फलायेति शेषः ॥ २ ॥

अथान्यं स्तोत्रीयं विधाय स्तौति ।

परीतोषिञ्च तासुतमिति परिवत्यो भवन्त्यन्तो वै नवममहस्तस्यैताः पर्य्याप्त्यै ॥ ३ ॥

परीतोषिञ्च तासुतमित्याद्यास्तिस्रः परिवत्यः परिशब्दयुक्ताः स्तोत्रीया भवन्ति तेन च परिशब्देन पर्य्याप्तिर्लक्ष्यते नवममहस्त्वन्तो वै दशरात्रे तृतीयस्य त्रिरात्रस्य अनेनाह्ना समाधानात् अतस्तस्य नवमस्याह्नः एताः परिवत्यः पर्य्याप्त्यै परिसमापनाय भवन्ति ॥ ३ ॥

अथान्यं तृचं विधत्ते ।

असावि सोमो अरुषो वृषा हरिरिति जगत्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते ॥४॥

असावि सोम इत्याद्यास्तिस्रः स्तोत्रीयाः ताश्च स्वभावतोऽपि

जगत्यौ रूपेण त्रिष्टुभः इषकृद्धौहि त्रैष्टुभं रूपं इषवद्-बृहद्वद्रयिमद्विश्ववदित्यादिना तद्रूपत्वस्य परिगणनात् यस्मा देवमेताः त्रिष्टुभः तस्मात् त्रिष्टुभां लोके स्थाने क्रियन्ते प्रयुज्यन्ते-प्रकृतौ हि माध्यन्दिनपवमानाख्यस्तृचः प्रतुद्रवेति त्रैष्टुभः ॥४॥

इत्थं त्रयस्तृचा विहिताः अथ सामानि क्रमेण विधित्सुः प्रथमतृचे गायत्रं साम विधाय पूर्व्ववद्ब्राह्मणमतिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ५ ॥

प्रकृतौ गायत्रसाम्नो यद्ब्राह्मणं इमे वै लोका गायत्रमि-त्यादिकमाम्नातं तदेव अस्यापि गायत्रस्य ब्राह्मणं ॥ ५ ॥

अथ स्मिन्नेव प्रथमे तृचे सामान्तरं विधत्ते ।

भरद्वाजस्यादारसृद्भवति ॥ ६ ॥

भरद्वाजस्यादारसृदाख्यं साम पवमानस्य जिघ्नत इति तृचे गेयं ॥ ६ ॥

अथास्यैतां संज्ञां निब्रुवन् स्तौति ।

दिवोदासं वै भरद्वाजपुरोहितन्नानाजनाः पर्य्य-यतन्त स उपासीददृषे गातुन्नो विन्देति तस्मा एतेन साम्ना गातुमविन्दद्गातुविद्वा एतत्सामानेन दारे ना-सन्नेति तददारसृतोऽदारसृत्त्वं विन्दते गातुन्न दारे धावत्यदारसृता तुष्टुवानः ॥ ७ ॥

भरद्वाजः पुरोहितो यस्य तं भरद्वाजपुरोहितं दिवोदास-न्नानाजनाः नानाविधाजनाः शत्रुजनाः पर्य्ययतन्त पर्य्यवेष्टयन् स दिवोदासो भरद्वाजमुपासीदत् विनयपूर्व्वमगच्छत् हे ऋषे गातुं मार्गं मे मम विन्द लम्भयेतिब्रुवन् एवमाणताय तस्मै दिवो दासाय एतेन साम्ना गातुं मार्गमविन्दत् अलभत अतएतत्साम गातुविद्दै मार्गलम्भकं । एवमस्य भरद्वाजसम्बन्धमुक्ता अदार-सृत्त्वमपि निर्वक्ति अनेन खलु साम्ना दारे दारभ्रमे नासृन्म ना-गच्छामेति यस्मादेवमब्रुवन् तत्तस्मादारसृत: साम्नोऽदारसृत्त्वं अदारसृदिति नाम सम्पन्नं यस्मादेवं तस्मादनेनादारसृता तु-ष्टुवानो गातुं मार्गं विन्दते दारे दरणे भ्रमे न धावति न प्रापयत्यात्मानं ॥ ७ ॥

अथ सामान्तरं विधाय तद्ब्राह्मणञ्चातिदिशति ।

सुरूपं भवति यदेव सुरूपस्य ब्राह्मणं ॥ ८ ॥

सुरूपाख्यमपि साम पवमानस्य जिन्वत इत्यस्मिन्नेव तृचे गेयं पशवो वै सुरूपमित्यादिकं यद्ब्राह्मणं सुरूपमस्य प्रागा-म्नातं तदेवास्यापि सुरूपाख्यस्य सावकं ब्राह्मणं ॥ ८ ॥

अथान्यत्साम विधत्ते ।

हरिश्रीनिधनं भवति ॥ ९ ॥

हरी३श्री२३४५इः इति निधनं यस्य तत्तथोक्तं एतत्संज्ञं साम पवमानस्य जिन्वत इत्यस्मिन्नेव तृचे गातव्यं ॥ ९ ॥

अथैतत् स्तौति।

पशवो वै हरिश्रियः पशूनामवरुध्यै श्रियञ्च हरश्चोपैति तुष्टुवानः ॥ १० ॥

गवाद्याः पशवः खलु हरिश्रियः हरणशीलाः श्रयणाः अतो हरिश्रीशब्दनिधनमेतत्साम पशूनामवरोधनाय भवति अथानेन तुष्टुवानः स्तुतवान् श्रियं सम्पदं हरस्तेजश्चोपैत्युपगच्छति हरिश्रीशब्दाभ्यां उभयोः सूचनात् ॥ १० ॥

अथान्यत्साम विधत्ते।

सैन्धुक्षितं भवति यदेव सैन्धुक्षितस्य ब्राह्मणं ॥ ११ ॥

सिन्धुक्षिता दृष्टं साम सैन्धुक्षितं तदपि पवमानस्य जिन्वत इत्येव तृचे गेयं तस्य च सैन्धुक्षितस्य सिन्धुक्षिद्वै राजन्य ऋषिरित्यादिकं यद्ब्राह्मणं स्तावकं प्रागाम्नातं तदेवास्य ब्राह्मणं स्तुत्यर्थमानेतव्यं ॥ ११ ॥

अथान्यत्साम विधत्ते।

गतनिधनं वाभ्रवं भवति गत्यै ॥ १२ ॥

गमिधातुनिष्पन्नगशब्दयुक्तं निधनं यस्य तद्गतनिधनं वभ्रुणा दृष्टं साम पूर्वोक्तएव तृचे गेयं तच्च गत्यै गमनाय भवति ॥ १२ ॥

अथैतद्बभ्रुसम्बन्धप्रदर्शनपुरःसरं स्वर्गसाधनतया स्तौति।

बभ्रुर्वा एतेन कौम्भ्योऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः॥ १३॥

कौम्भ्यः कुम्भगोत्रः बभ्रुर्नाम ऋषिः एतेन साम्ना साधनेन अञ्जसा आर्जवेन स्वर्गं लोकमपश्यत् अजानात् शिष्टं स्पष्टं॥१३॥

अथान्यत्साम विधत्ते।

इडानाᳪ संचारो भवति॥ १४॥

इडानां संचाराख्यं साम पवमानस्य जिन्वतेत्यस्मिन्नेव तृचे गेयं॥ १४॥

अथैतत् स्तौति।

पशवो वा इडा पशवश्छन्दोमाः पशुष्वेव तत्पशून्दधाति॥ १५॥

इडानां संचार इत्यत्र षष्ठ्यन्तेनेडाशब्देनाभिधेया इडानां पशवो वै पशव एव छन्दोमानां च पशुत्वं प्रागुक्तं तत्तथा च पशुष्वेव पशून्दधाति स्थापयति॥ १५॥

अथान्यत्साम विधत्ते।

ऋषभः पावमानो भवति ॥ १६ ॥

पावमानः पवमानसामसम्बन्धी ऋषभ एतत्सञ्ज्ञयाभिधेयं सामापि पवमानस्य जिघ्नत इत्यस्मिन्नेव तृचे कार्य्यं ॥ १६ ॥

अथैतत्पशुजन्मत्वेन स्तौति ।

पशवो वै छन्दोमाः पशुष्वेव तन्मिथुनमप्यर्ज्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥१७॥

छन्दोमाख्यान्यहानि पशवो वै पशुरूपाण्येव एतेष्वृषभे भवतीति यत्तत्तेन पशुष्वेव मिथुनमप्यर्ज्जति सम्पादयति किमर्थं प्रजात्यै प्रजननाय वत्सादिरूपेणाभिवृद्ध्यर्थं न खल्वनृषभाः ऋषभेण पुंसा वियुक्ताः पशवः प्रजायन्ते वत्साञ्जनयन्ति ॥ १७ ॥

अथान्यत्साम विधत्ते ।

पृष्ठं भवति ॥ १८ ॥

पृष्ठाख्यं साम परीतोषिञ्चतासुतमित्यस्मिन् तृचे गेयं ॥१८॥

अथैतत् स्तौति ।

पृष्ठं वा एतदह्नां यन्नवमं पृष्ठ एव तत्पृष्ठेन स्तुवते प्रतिष्ठायै ॥ १९ ॥

यन्नवममहः एतदह्नां प्रायणीयादीनां पृष्ठं वै पृष्ठवंशस्था-

नीयं तत्तथा च पृष्ठरूप एवैतस्मिन्नवमेऽहनि पृष्ठेन स्तुवते स्तुवन्त्युद्गातारः किमर्थं प्रतिष्ठायै प्रतिष्ठानार्थं उभयोः साम्याद्यजमानस्य प्रतिष्ठाहेतुर्भवतीत्यर्थः ॥ १९ ॥

अथान्यत्साम विधत्ते ।

कौल्मलबर्हिषं भवति ॥ २० ॥

कुल्मलबर्हिःसम्बन्धि कौल्मलबर्हिषं एतदाख्यं साम परीतोषिञ्चेत्यस्मिन्नेव तृचे गेयं ॥ २० ॥

अथैतत् स्तौति ।

कुल्मलबर्हिर्वा एतेन प्रजापतिं भूमानमगच्छत् प्रजायते बहुर्भवति कौल्मलबर्हिषेण तुष्टुवानः ॥२१

स्पष्टोऽर्थः ॥ २१ ॥

अथान्यत्साम दर्शयति ।

अर्कपुष्पं भवति ॥ २२ ॥

अर्कपुष्पाख्यं सामापि परीतोषिञ्चेत्यस्मिन्नेव तृचे गातव्यं ॥२२

अथैतद्रससहितान्नाद्यहेतुत्वेन स्तौति ।

अन्नं वै देवा अर्क इति वदन्ति रसमस्य पुष्पमिति सरसमेवान्नाद्यमवरुन्धेऽर्कपुष्पेण तुष्टुवानः ॥२३

देवा अन्नं खलु अर्क इति वदन्ति अर्च्यते अनेनेति व्युत्पत्तेः अस्यान्नस्य रसं पुष्पमिति वदन्ति तस्मादन्नरसयोर्वाचकोऽर्क-पुष्पशब्दः तदाख्येन साम्ना स्तुतवान् सरसं रससहितमेवान्नाद्य-मवरुन्धे ॥ २३ ॥

अथान्यत्साम विधत्ते ।

दैर्घ्यश्रवसं भवति ॥ २४ ॥

दीर्घश्रवसः सम्बन्धि दैर्घ्यश्रवसं एतदाख्यं सामापि परो-तोषिस्त्वेत्यस्मिन्नेव तृचे गेयं ॥ २४ ॥

अथैतत् स्तौति ।

दीर्घश्रवा वै राजन्य ऋषिर्ज्योगपरुद्धोऽशना-यꣳश्चरन् स एतद्दैर्घश्रवसमपश्यत्तेन सर्वाभ्यो दिग्भ्योऽन्नाद्यमवारुन्ध सर्वाभ्यो दिग्भ्योऽन्नाद्य-मवरुन्धे दैर्घश्रवसेन तुष्टुवानः ॥२५॥

दीर्घश्रवा नाम राजन्यो राजपुत्र ऋषिः ज्योक् चिरकाल-मपरुद्धः शत्रुभिराक्रान्तो राज्याद्भ्रष्टः अशनायम् अशनामात्मन इच्छन् क्षुधार्त्तः चरन् सर्वतः परिभ्रमन् आसीत् स ऋषिः एत-द्दैर्घश्रवसमपश्यत् तेन च साम्ना सर्वाभ्यो दिग्भ्यः अन्नाद्यम-वारुन्ध प्राप्नोत् अतोऽद्यतनोऽपि दैर्घश्रवसेन स्तुतवान् सर्वाभ्यो दिग्भ्यः प्राच्यादिसर्वदिक्सकाशात् अन्नाद्यमवरुन्धे प्राप्नोति ॥२५

अथान्यत्साम विधत्ते ।

वैयश्वं भवति यदेव वैयश्वस्य ब्राह्मणं ॥ २६ ॥

व्यश्वेन दृष्टं साम वैयश्वं तदपि परीतोषिञ्चेति तृचे गेयं तस्य च स्तावकं व्यश्वो वा एतेनेत्यादिकं यद्ब्राह्मणं पूर्वमाम्नातं तदत्रापि स्तुत्यर्थमानेतव्यं ॥ २६ ॥

अथैतस्मिन्नेव तृचे अन्यत्साम विधाय तद्ब्राह्मणञ्चातिदिशति ।

आभीशवं यदाभीशवस्येति ॥ २७ ॥

आभीशवमिति भवति ब्राह्मणमिति पदद्वयमनुषज्यते आभीशवाख्यं साम यद्वा अध्वतमभीशुनातद्धाधारेत्यादिकं तस्य प्रागाम्नातं अन्यस्मिन्नुं ॥ २७ ॥

अथान्यत्सामद्वयं विधत्ते ।

देवस्थानं भवति प्रतिष्ठायै संकृति भवति सꣳस्कृत्यै ॥ २८ ॥

देवास्तिष्ठन्त्यस्मिन् साम्नीति देवस्थानं तत्साम परीतोषिञ्चत्यस्मिन्नेव तृचे गेयं तच्च स्थितिवाचिस्थानशब्दाभिधेयत्वात् प्रतिष्ठायै प्रतिष्ठानाय भवति तथा संकृत्याख्यमपि तस्मिन्नेव तृचे गेयं तच्च संस्कृत्यै संस्काराय भवति ॥ २८ ॥

अथैतत्सामद्वयं संप्रयुज्य स्तौति ।

अङ्गिरसो एतदब्रुवत तद्देवा देवस्थाने तिष्ठन्तः संकृतिना समस्कुर्वंस्तत् संकृतेः संकृतित्वं देवस्थानेन वै देवाः स्वर्गे लोके प्रत्यतिष्ठन् स्वर्गे लोके प्रतितिष्ठामेत्येतत् ॥ २९ ॥

एतन्नवमहः खलु पुरा अब्रुवत व्यभीर्य्येत तद्देवा देवस्थाने साम्नि आधारभूते तिष्ठन्तः तन्नवममहः संकृतिना साम्ना समस्कुर्वन् तत्तस्मात्संस्कारसाधनत्वात्संकृतेरस्य साम्नः संकृतित्वं संकृतीति नाम सम्पन्नं अतएव संस्कृत्या इति युक्तं तथा देवस्थानेन खलु साम्ना देवाः पुरा स्वर्गे लोके प्रत्यतिष्ठन् प्रतिष्ठिता अभवन् यजमाना अपि स्वर्गे लोके प्रतितिष्ठाम प्रतिष्ठिता भवामेति हि एतत् एतर्हि एतस्मिन्काले सत्रमासते अतो देवस्थानं एवं प्रतिष्ठाप्रापकमित्यर्थः ॥ २९ ॥

अथ देवस्थानं वियुज्य श्रैष्ठ्यहेतुत्वेऽपि स्तौति ।

वरुणाय देवता राज्याय नातिष्ठन्त स एतद्देवस्थानमपश्यत्ततो वै तास्तस्मै राज्यायातिष्ठन्त तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय ॥ ३० ॥

वरुणाय षष्ठ्यर्थे चतुर्थी पुरा वरुणस्य राज्याय राजत्वाय अन्याः सर्वा देवता नातिष्ठन्त राजत्वं नाभ्युपागच्छन् राजत्वान-

भ्युपगमं प्रकाशितवन्त इत्यर्थः अतो यो देवस्थानेन स्तौति अस्मै यजमानाय समानाः सदृशा ज्ञातयः श्रैष्ठ्याय श्रेष्ठत्वाय तिष्ठन्ते अनुमन्यन्ते पूर्ववदात्मनेपदश्चतुर्थ्यौ ॥ ३० ॥

अथैतद्वेदनफलमाह ।

क्षत्रस्येवास्य प्रकाशो भवति प्रतितिष्ठति य एवं वेद ॥ ३१ ॥

क्षत्रस्य क्षत्रियस्येव अस्य वेदितुः प्रकाशः कीर्तिर्भवति स्पष्टमन्यत् ॥ ३१ ॥

अथान्यत्सामद्वयं विधत्ते ।

भर्गएव भर्गेण तुष्टुवानो भवति यशो यशसा ॥३२

परीतोषिञ्चतेत्यस्मिंस्तृचे क्रमेण भर्गेण यशसा च द्वाभ्यां सामभ्यां स्तुतवान् भर्गः तेजस्वी यशो यशस्वी च भवति ॥ ३२ ॥

अथान्यत्साम विधाय तद्ब्राह्मणमतिदिशति ।

वासिष्ठं भवति यदेव वासिष्ठस्य ब्राह्मणं ॥ ३३ ॥

वसिष्ठेन दृष्टं साम वासिष्ठं तदपि परीतोषिञ्चेति तृचे श्रीणन्त इत्यध्यास्यायामृचि गेयं वसिष्ठो वा एतेन वैहव इत्यादिकं तत्सावकं यद्ब्राह्मणं प्रागाम्नातं तदत्रापि स्तुत्यर्थमाम्नेयं ॥ ३३ ॥

अथान्यत्साम विधत्ते ।

दीर्घतमसोऽर्को भवत्यन्नं वा अर्कोऽन्नाद्यस्याव-रुध्यै ॥ ३४ ॥

दीर्घतमा नाम ऋषिः तस्य सम्बन्धी अर्कः एतत्संज्ञं साम असावि सोमो द्रुषाहरिरित्यस्मिंस्तृचे गेयं शिष्टं सिद्धं ॥ ३४ ॥

अथान्यत्साम विधत्ते ।

सामराजं भवति साम्राज्यमाधिपत्यं गच्छति सामराज्ञा तुष्टुवानः ॥ ३५ ॥

साम्नां राजा सामराजः राजाहःसखिभ्यष्टचिति समासान्तः एतत्संज्ञं साम असावि सोमो अरुष इत्यस्मिन्नेवाद्यत्ते तृचे गेयं अनेन च साम्ना सामराज्ञा तुष्टुवानः स्तुतवान् साम्राज्यमभिषिक्तस्य राजसूयेनेष्टवतः सार्वभौमस्य राज्ञः कर्म आधिपत्यं अधिपतित्वञ्च गच्छति अत्र सामराज्ञेति समासान्तविधेरनित्यतेति टज्भावरूपं ॥ ३५ ॥

अथैतत्स्वर्गसाधनमित्याह ।

तदु संवदित्याहुः संवता वै देवाः स्वर्गं लोकं प्रायन्नुद्दतोदायन् ॥ ३६ ॥

तदु तत्सामराजाख्यं साम संवत् स्वर्गप्रापणाय भवतीत्यर्थः ॥ २६ ॥

अथैतत्पवमानस्तोत्रमुपसंहरति ।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोभः ॥२७

अष्टाचत्वारिंशः पूर्व्वोक्त एवास्य स्तोत्रस्य स्तोमः सिद्धमन्यत्। ननु पवमानस्य जिघ्नत इति गायत्रे तृचे गायत्रादि सामाष्टकं विहितं तथा परीतोषिञ्चेति बार्हते पृष्ठकौल्मलबर्हिषादीनि एकादशसामानि असावि सोमो अरुषो वृषाहरिरिति जागते तृचे सामद्वयं एवं एकविंशतिसामसु तृचेषु गीयमानेषु त्रिषष्टिस्तोत्रीयाः सम्पद्यन्ते तथा चाष्टाचत्वारिंश स्तोमातिरेकस्थानेनैष दोषः सूत्रकृता परिहृतत्वात् स खल्वेवं नवममहः प्रस्तुत्यासूत्रयत् तस्य बृहत्यामरण्ये गेयानि तृचेषु पृष्ठस्येति अस्यायमर्थः यानि बार्हते तृचे एकादशसामानि विहितानि तेषु पृष्ठं कौल्मलबर्हिषं आर्कपुष्पं दैर्घश्रवसं वैयश्वमाभीशवं वासिष्ठमिति सप्त ग्रामे गेयानि देवस्थानं संकृतिभर्गो यश इति चत्वार्य्यरण्ये गेयानि तथा च तस्य नवमस्याह्नो बृहत्यां गेयेषु सामसु मध्ये देवस्थानप्रभृति अरण्ये गेयं सामचतुष्टयं ग्रामे गेयेषु च पृष्ठस्येत्येतत्सामपञ्चकमेव तृचे कुर्य्यात् अन्यानि षट्सामान्येकर्चानि कार्य्याणि दैर्घतमसो कौत्सः सामराजस्येति सूत्रकारेण जगत्यां गीयमानस्य सामद्वयस्य विकल्पनाभिधानात् अन्यतरस्यैव प्रयोगात् पञ्चदशस्तोत्रीया हीयन्ते तथाष्टाचत्वा-

रिंश एव स्तोमो भविष्यति पक्षान्तरमपि सूत्रकृतोक्तं तत् अति-
विस्तारभयात् न लिखितमिति तत्रैव द्रष्टव्यं ॥ ३७ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य
तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ पृष्ठस्तोत्रे चतुर्षु तृतीयं स्तोत्रीयं तृचं दर्शयति ।

आयन्तइव सूर्य्यवत्यो भवन्ति ॥ १ ॥

सूर्य्यवत्यः सूर्य्यशब्दयुक्ताः आयन्त इवेत्याद्यास्तिस्रः ऋचो ब्रह्मसाम्नः स्तोत्रीयाः ॥ १ ॥

अत्रासां सूर्य्यवत्त्वं कोऽसावस्मिन्नहनि सङ्गतिरित्याह ।

आदित्यदेवत्यं ह्येतदहरन्तो वै सूरोऽन्त एतन्नवममह्नामन्तएव तदन्तेन स्तुवते प्रतिष्ठायै ॥ २ ॥

एतन्नवममहरादित्यदेवत्यं आदित्यदेवतार्थं अग्निवायु-
सूर्य्यक्रमेणादित्यस्तृतीयो भवति एतदहश्च छन्दोमानां तृती-
यमिति तद्देवत्यत्वं यस्मादेवं तस्मात् सूर्य्यवत्यः सङ्गता इत्यर्थः
अपि च सूरः सूर्य्योऽन्तो वै उक्तप्रकारेणान्तिमः एतन्नवममहश्च
अह्नां अनुष्ठितानां प्रायणीयादीनामन्तः अवसानं अनेन नव-
रात्रस्य समाप्यमानत्वात् तत्तथा च अन्तएवान्तेन सूर्य्यवतीभिः

स्तोत्रीयाभिः स्तुवते तत्र सवनं उभयोरेकरूप्यात्प्रतिष्ठानाय भवति ॥ २ ॥

अथाच्छावाकपृष्ठस्य स्तोत्रीयं तृचं दर्शयति ।

यत इन्द्र भयामहे ततो नो अभयं कृधि मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहीति द्विषश्चैव मृधश्च नवमेनाह्ना विहत्य दशमेनाह्नोत्तिष्ठन्ति ॥ ३ ॥

यत इन्द्र भयामहे इत्याद्यास्तिस्रः ऋचोऽच्छावाकसाम्नः स्तोत्रीयाः स्तुत्यर्थमृचोऽनुवादः अस्यामृचि द्विषो द्वेष्टॄन् मृधः संग्रामकारिणः एवमुभयविधान् शत्रून् हे इन्द्र त्वं जहि विनाशये-त्यर्थः प्रतिपाद्यते अतएवं रूपवाचकशब्दयुक्तेन तृचेन द्विषश्चैव मृधश्च द्वेष्टॄंश्च संग्रामकारिणः उभयविधांश्च शत्रून् अनेन नवमेनाह्ना विहत्य विनाश्य दशमेनानुष्ठास्यमानेनाविवाक्य-संज्ञेनाह्ना उत्तिष्ठन्ति सत्रादुत्थानं कुर्व्वन्ति तस्माद्विद्विषो विमृधो जहीति लिङ्गयुक्तस्तृचो नवमेऽहनि सङ्गत इत्यर्थः ॥३॥

अथ ब्रह्मपृष्ठनिवर्त्तकं साम दर्शयति ।

आयन्तीयं भवति ॥ ४ ॥

आयन्त इव सूर्य्यमित्याद्यासु गीयमानं आयन्तीयं ब्रह्म-साम भवति ॥ ४ ॥

अथैतत् स्तौति ।

**श्रीर्वै आयन्तीयꣳ श्रीमेवममः श्रियमेव तच्छ्रि-
यां प्रतिष्ठापयति ॥ ५ ॥**

श्रीः सम्पद्रूपमेव आयन्तीयं श्रीशब्दोदितश्रियतिधातौ निष्पन्नः श्रीयतीति यः शब्दश्च तथेति तादृप्यं नवममहश्च श्रीर्वै च सूर्य्यरूपं अष्टाचत्वारिंशस्तोमकत्वेन स्तोत्रीयाबाहुल्यात् तत्तेन श्रियमेव सम्पदमेव श्रियां सम्पदि प्रतिष्ठापयति उद्गाता प्रतिष्ठितां करोति ॥ ५ ॥

अथाच्छावाकपृष्ठस्तोत्रनिवर्त्तकं साम दर्शयति ।

समन्तं भवति ॥ ६ ॥

समन्ताख्यं साम यत इन्द्रभयामह इत्यस्मिं स्तृचे गातव्यं ॥ ६

एवं नित्यत्वेन विधाय काम्यमप्याह ।

**समन्तेन पशुकामः स्तुवीत पुरोधाकामः सम-
न्तेन स्तुवीत ॥ ७ ॥**

पशुकामः पशून् कामयमानो यजमानः समन्तेन साम्ना स्तुवीत तथा पुरोधाकामः पौरोहित्यं कामयमानोऽप्येतेन समन्तेन स्तुवीत एवन्नित्यकाम्यविषयवाक्यद्वयेन खादिरो यूपो भवति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीतेति तत् एकस्यैव नित्यत्वं काम्यत्वञ्चोक्तं भवति तदुक्तं एकस्य तूभयत्वे संयोगपृथक्त्वमिति ॥ ७

अथैतस्य फलद्वयसाधनतामुपपादयति ।

आग्नेयी पृथिव्याग्नेयो ब्राह्मण ऐन्द्री द्यौरैन्द्रो राजन्योऽन्तरिक्षेण द्यावापृथिवी समन्ते अन्तरिक्षेणैवैनꣳ समन्तं करोति विन्दते पशून् प्र पुरोधामाप्नोति य एवं विद्वान् समन्तेन स्तुते स्तोमः ॥ ८ ॥

आग्नेयी अग्निदेवत्या पृथिवी ब्राह्मणश्चाग्नेयः अग्निना सह प्रजापतिमुखादुत्पत्तेः तथा द्यौरैन्द्री इन्द्रदेवत्या राजन्यश्चैन्द्रेण सह प्रजापतेः उरसोबाहुभ्याञ्चोत्पत्तेः एतेन ब्राह्मणराजन्ययोर्द्यावापृथिव्यात्मकत्वमुक्तं भवति तच्च द्यावापृथिवी द्यावापृथिव्यौ अन्तरिक्षेण मध्यवर्त्तिना समन्ते सङ्गच्छते अतः समन्तेन स्तुवन् समतान्तत्वहेतुनान्तरिक्षेणैव एनं यजमानं समन्तं समतान्तगतं करोति किमुक्तं भवतीत्यत आह विन्दत इत्यादि य एवं ब्राह्मणार्थं विद्वान् समन्तेन स्तुते सोऽयं पशून् विन्दते लभते पुरोधां पुरोधानं पौरोहित्यञ्च प्राप्नोतीति तेषु च पृष्ठस्तोत्रेषु पूर्व्वोक्त एवाष्टाचत्वारिंश एव स्तोमः कार्य्यः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथास्मिन्नवमेऽहन्यार्भवपवमानस्तोत्रीयांस्तृचान् क्रमेण दर्श-यति । तत्र प्रथमं तृचं विधाय स्तौति ।

त्वꣳ सोमासि धारयुरिति गायत्रो भवत्यह्नो धृत्यै त्वमिति बृहतो रूपं बार्हतꣳ ह्येतदहः ॥ १ ॥

त्वं सोमासीति गायत्री आर्भवस्य प्रतिपद्भवति तदादिक-स्तृचो भवतीत्यर्थः तच्च धारयुरिति धृञ् धातोर्निष्पन्नेन शब्देन योगात् अस्य नवमस्याह्नो धृत्यै धारणाय भवति सा चास्याने-नाह्ना सङ्गतिः इति तदाह त्वमित्येतत्पदं बृहत्साम्नो रूपं तद्यो-नौ त्वामिद्धि हवामह इति युष्मच्छब्ददर्शनात् एतदहश्च बार्हतं बृहत्साम्नः सम्बन्धि तृतीयं बृहत्पृष्ठोहि छन्दोमाः अतोऽस्मि-न्नहनि तृचः सङ्गत इत्यर्थः ॥ १ ॥

अथ तृचान्तरं विधाय सङ्गतिमाह ।

त्वꣳ ह्यङ्ग दैव्येति त्वमिति बृहतो रूपं बार्हतꣳ ह्येतदहः ॥ २ ॥

त्वं ह्यङ्ग दैव्येति तृचोऽप्यार्भवस्य स्तोत्रीयः सिद्धमन्यत् ॥ २ ॥

अथापरं तृचं विधाय सङ्गतिमाह ।

पवस्व देव वीतय इति बृहतो रूपं बार्हतꣳ ह्ये-
तदहः ॥ ३ ॥

पवस्व देव वीतय इति तृचः तत्र पवस्वेत्येतद् बृहत्साम्नो रूपं लिङ्गमन्यत् ॥ ३ ॥

अथान्यं तृचं विधत्ते ।

परित्यꣳ हर्य्यतꣳ हरिमिति परिवत्यो भवन्त्यन्तो वै नवममहस्तस्यैताः पर्य्याप्त्यै ॥ ४ ॥

परित्यं हर्य्यतं हरिमिति परिशब्दयुक्तास्तिस्रः स्तोत्रीया भवन्ति शिष्टं लिङ्गप्रायं ॥ ४ ॥

अथाक्षरपङ्क्तिछन्दस्कं तृचं विधाय पूर्व्वयोरह्नोरिव तं प्रशंसति ।

पवस्व सोम मन्दयन्नायेत्यक्षरपङ्क्तिः स्तोमानां प्रभूतिरथो एतद्ध्वैतर्हि छन्दोऽयातयाम यदक्षर-पङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ब्रह्म-वादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाꣳस्याप्यन्ते किं छन्दसश्छन्दोमा इत्येतच्छन्दसा यदेता अक्षर-पङ्क्तय इति ब्रूयात् ॥ ५ ॥

एतत्सर्व्वं पूर्व्वस्मिन्नध्याये व्याख्यातं ॥ ५ ॥

अथापरं तृचं विधत्ते।

उपोषुजातमप्तुरमिति गायत्त्राः सत्योजगत्यो रूपेण तस्मात् जगतीनां लोके क्रियन्ते ॥ ६ ॥

गोभिर्भङ्गं परिष्कृतमिति गोशब्देन जागतं रूपं पशवो वै जगत्य इति श्रुतेः जगत्यो रूपेण योगाज्जगत्यः गतमन्यत् ॥ ६ ॥

अथैतेषु तृचेषु क्रमेण सामानि विधास्यन्ते। तत्र प्रथमे तृचे गायत्रं प्रथमं साम गातव्यं, तस्य पूर्व्वोक्तं ब्राह्मणमतिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ७ ॥

स्पष्टं ॥ ७ ॥

अथैतस्मिन्नेव तृचे साम विदधाति।

आश्वसूक्तं भवति ॥ ८ ॥

आश्वसूक्तन्नाम त्वं सोमासीत्येव तृचे गातव्यं ॥ ८ ॥

तस्य च साम्नोऽवसाने शुक्र आहुत इति पदद्वयं श्रूयते तत् स्तौति।

अग्निं वै पूर्व्वैरहभिराजुह्वात्यथैतदादित्यदेवत्य-मह: शुक्र आहुत इत्यसौ वा आदित्यः शुक्रस्तमे-वैतेनाजुह्वाति ॥ ९ ॥

पूर्व्वैः पूर्व्वमनुष्ठितैरष्टभिरहोभिः अग्निं वै अग्निमेवाभिजुहोति हविर्भिर्जुहोतीति तेन सूर्य्यः अधुना तु एतन्नवममहः आदित्यदैवत्यं आदित्यदेवतार्थं एवञ्चास्मिन्नहनि आप्लवसूक्ते शुक्रआङ्कत इति श्रूयमाणेनैतेन पदेन तमेवादित्यमभिजुहोति असौ खल्वादित्यः शुक्रोदीप्तः सोऽयं शुक्र आङ्कतः आङ्कतिभिः तर्पित इति अस्यार्थस्य प्रतिभासमानत्वात् एतद्विशिष्टेनानेन नवमेनाह्ना अभिजुहोतीति व्यपदेशः ॥ ६ ॥

अथैतस्मिन्नेव तृचे सामान्तरं विदधाति ।

शाम्मदं भवति ॥ १० ॥

शम्मदा ऋषिणा दृष्टं साम शाम्मदं एतदपि त्वं सोमासीत्यस्मिन्नेव तृचे गेयं ॥ १० ॥

तदेतत् साक्षात् स्वर्गसाधनमिति स्तौति ।

शम्मदा एतेनाङ्गिरसोऽञ्जसा स्वर्गं लोकमपश्यन् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ ११ ॥

आङ्गिरसो अङ्गिरोगोत्रः शम्मदृषिः एतेन साम्ना सिद्धमन्यत् ॥ ११ ॥

अथास्मिन्नेव तृचेऽन्यत् साम विधत्ते ।

दावसुनिधनं भवति ॥ १२ ॥

दावसुर्निधनं यस्य तत्तथोक्तं ॥ १२ ॥

अथैतत् स्तौति।

आशिषमेवास्मा एतेनाशास्ते साम हि सत्याशीः ॥ १३ ॥

दावसुनिधनं यस्येति दावसुशब्दार्थः तथाचास्मै यजमानाय धनविषयमाशिषमेवैतेन दावसुनिधनेन साम्ना आशास्ते कामयते साम खलु सत्याशीः ऋचां यजुषाञ्च मध्ये अवितथत्वेन फलप्रतिपादकं सामेत्यर्थः ॥ १३ ॥

अथैतत्पशुपोषहेतुत्वेन स्तौति।

दावसुर्वा एतदाङ्गिरसः पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत् साम भवति पशूनां पुष्ट्यै ॥ १४ ॥

दावसुर्नामाङ्गिरसः ऋषिः पशुकामः सन् तत्साधनत्वेनैव तत्साम दृष्टवान् तेन साम्ना सहस्रसंख्यान् पशून् असृजत अलभत तथा चैतत् सामास्मिन्नवमेऽहनि भवतीति यत् तत्पशूनां पुष्ट्यै पोषायाभिवृद्ध्यै भवति ॥ १४ ॥

अथ सामान्तरं विधत्ते।

प्रतीचीनेडं काशीतं भवति ॥ १५ ॥

प्रतीचीना इडा यस्य तथाविधं काशीताख्यं साम त्वं सोमा-
भि धारयुरित्यस्मिन्नेव तृचे गेयं ॥ १५ ॥

अथैतस्य प्रतीचीनेडत्वं पुत्रपश्वादिरूपस्य फलस्य जनि-
हेतुरिति स्तौति ।

**पराचीभिर्वा अन्याभिरिडाभी रेतो दधदेत्य-
थैतत्प्रतीचीनेडङ्काशीतं प्रजात्यै तस्मात्पराञ्चो गर्भाः
सम्भवन्ति प्रत्यञ्चः प्रजायन्ते तस्माद् तेऽवाचीन-
बिलेभ्यो नावपद्यन्त एतेन ह्येव ते धृताः॥ १६ ॥**

कालेयगौतमरौरवारिष्टैरस्थ्नान्धीगवादिषु पूर्व्वं प्रयुक्तेषु
सामसु हो इडा इत्येवं रूपाः पराचीना इडाः ताभिरन्याभिः
पराचीभिर्निवृत्ताभिः पराग्गताभिरिडाभिर्यजमानो रेतोदधत्
पुत्रपश्वादेरुपादानभूत वीर्य्यं स्वयोनावादधाति गच्छति अथा-
धुना प्रयुज्यमानं प्रतीचीनेडं काशीतं प्रजात्यै पूर्व्वां हि तस्य
गर्भस्य प्रजननाय भवति होवा इडा इत्यनेन योगादेतत्साम
प्रतीचीनेडं यस्मादेवं वेदे प्रतिपाद्यते तस्मादेव कारणाल्लोकेऽपि
गर्भाः पुंसां योनौ निषिच्यमानाः पराचः प्राङ्मुखाः सम्भवन्ति
उत्पत्तिसमये प्रत्यञ्चः प्रत्यङ्मुखाः प्रजायन्ते उत्पद्यन्ते हि
यस्मादेतेन साम्ना ते गर्भा धृताः तस्मादेव हेतोरवाचीनबिलेभ्यो
योनिभ्यो नावपद्यन्ते नाधःपद्यन्ते ॥ १६ ॥

अथान्यत्साम विधत्ते ।

हाविष्कृतं भवति प्रतिष्ठायै कृतानुवाद एव सः ॥ १७ ॥

हाविष्कृतं हविष्कृता दृष्टं साम तदपि त्वं सोमासि धारयु-रिति तृचे गातव्यं तत्र यजमानस्य प्रतिष्ठानाय भवति स च हविष्कृत् पुरा हविष्मान् वै हविःश्रुषाङ्गिरसावास्तामित्यादिना कृतानुवाद उक्तानुवाद एव तत्र हि नवमेऽहनि हविष्कृदरा-ध्नोदित्यर्थः प्रतिपादितः अथ एतत्साम समृद्धिहेतुरित्युक्तं भवति ॥ १७ ॥

अथ सामान्तरं विधाय तद्ब्राह्मणञ्चातिदिशति।

सौपर्णं भवति यदेव सौपर्णस्य ब्राह्मणं ॥ १८ ॥

सौपर्णाख्यं साम त्वं ह्याङ्ग दैव्येत्यस्मिंस्तृचे गातव्यं यज्ञो वै देवेभ्योऽपाक्रामत् स सुपर्णोरूपं कृत्वाऽचरदित्यादिकं सौप-र्णस्य ब्राह्मणं प्रागाम्नातं तदेवास्यापि सौपर्णस्य ब्राह्मणमा-नीय तेन स्तोतव्यं ॥ १८ ॥

अथान्यत्साम विधत्ते।

वैश्वमनसं भवति ॥ १९ ॥

विश्वमनसा ऋषिणा दृष्टं साम वैश्वमनसं तत्यवस्य देव वीतय इत्यस्मिंस्तृचे गेयं ॥ १९ ॥

अथैतत्साम्नो विश्वमनसः सम्बन्धं पापहननहेतुतां च प्रतिपादयितुमाख्यायिकामाह ।

विश्वमनसं वा ऋषिमध्यायमुदव्रजितꣳ रक्षोऽगृह्णात्तमिन्द्रोऽचायदृषिं वै रक्षोऽग्रहीदिति तमभ्यवददृषे कस्त्वैष इति स्थाणुरिति ब्रूहीति रक्षोऽब्रवीत् स स्थाणुरित्यब्रवीत्तस्मै वा एतेन प्रहरेत्यस्मा इषीकां वज्रं प्रयच्छन्नब्रवीत्तेनास्य सीमानमभिनत् सैषेन्द्रेणतेषीका पाप्मा वाव स तमगृह्णात्तं वैश्वमनसेनापाहतापपाप्मानꣳ हते वैश्वमनसेन तुष्टुवानः ॥२०॥

अध्यायमध्ययनं उदव्रजितं प्राप्तं वैश्वमनसं विश्वमनससंज्ञमृषिं रक्षोऽगृह्णात् पुरा कश्चित् राक्षसो गृहीतवान् तं हन्तारमिन्द्रोऽचायत् ध्यानयोगेनाज्ञासीत् चायृपूजानिशामयोरिति धातुः ऋषिं खलु रक्षोऽग्रहीदिति मनसाजानत् सइन्द्रः तमृषिमभ्यवदत् ऋषे कः खल्वेष तव गृहीतेति एवमिन्द्रेण पृष्टे ऋषिं रक्षोऽब्रवीत् स्थाणुर्मामग्रहीदितीन्द्राय ब्रूहीति ततः स ऋषिः स्थाणुर्मां गृहीतवानित्यब्रवीत् एवमृषिणोक्ते तस्मै तद्रक्षः एतेन वज्रेण प्रहर जहीति अस्मा ऋषये इषीकां वज्रं इषीका तृणविशेषः तदेव वज्रीकृत्य प्रयच्छन् इन्द्रोऽब्रवीत् ततः तेन वज्रेण स ऋषिरस्य रक्षसः सीमानं शिरःकपालमध्यमभिनत् विदारितवान् इन्द्रेणता । इन्द्रेण निर्मिता सैषेषीका भूमावुपलभ्यते

एवं तस्मिन् रक्षसि हते स एव स्थाणुः पाप्मा वाव स पापरूप एव भूत्वा तं विश्वमनसमभ्यक्रामत् तं पाप्मानं वैश्वमनसेन साम्ना-पाहत व्यनाशयत् अतो अद्यतनोऽपि वैश्वमनसेन स्तुतवान् यजमानः पाप्मानमपहते ॥ २० ॥

अथान्यस्मिंस्तृचे सामान्तरं विधाय तत् स्तावकं ब्राह्मणमातिदिशति ।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥२१॥

परित्यं हर्य्यतं हरिमिति तृचे गौरीवितं साम गातव्यं तस्य च गौरीवितिर्वा एतच्छाक्त्य इत्यादिकं यद्ब्राह्मणमाम्नातं तदत्राप्यनुसन्धेयं ॥ २१ ॥

अथास्मिन्नेव तृचेऽन्यत् साम विधत्ते ।

निहवो भवत्यन्नाद्यस्यावरुध्ये ॥ २२ ॥

वसिष्ठनिहवाख्यं साम परित्यमिति पूर्व्वोक्त एव तृचे गेयं तच्चान्नाद्यस्यावरोधनाय भवति ॥ २२ ॥

कुत एतदित्यत आह ।

हीति वा अन्नं प्रदीयत इत्यग्निरन्नमत्ति ॥ २३ ॥

अस्मिन् साम्नि ओ ही ही३ ओ ही एहि या औ २३४ वा हा ही इति स्तोभो दृश्यते लौकिके च हिङ्कारेणान्नं प्रदीयते

बालानामन्नस्य निवारणार्थं भोजयितृभिर्हीशब्दस्य प्रयोगात् तद्देवैतामुब्रूहीति हिशब्दमुच्चार्य्य ततो देवेभ्यो हविर्लक्षणमन्नं दीयते तथा ई इति एवं रूपं शब्दं कुर्व्वन्नग्निरन्नं स्वात्मनि हुतं हविरत्ति दहति अतो ईहीत्यन्नप्रदानसम्बद्धयोः शब्दयोः प्रयोगादस्य साम्नोऽन्नहेतुत्वं ॥ २३ ॥

अथैतत्साम प्रकारान्तरेण स्तोतुमाख्यायिकामाह।

ऋषयो वा इन्द्रं प्रत्यक्षन्नापश्यन् स वसिष्ठोऽकामयत कथमिन्द्रं प्रत्यक्षं पश्येयमिति स एतन्निहवमपश्यत्ततो वै स इन्द्रं प्रत्यक्षमपश्यत् स एनमब्रवीद् ब्राह्मणन्ते वक्ष्यामि यथा त्वत्पुरोहिता भरताः प्रजनिष्यन्तेऽथ मान्येभ्य ऋषिभ्यो मा प्रवोच इति तस्मा एतान् स्तोमभागानब्रवीत्ततो वै वसिष्ठपुरोहिता भरताः प्राजायन्त सेन्द्रं वा एतत्साम यदेतत्साम भवति सेन्द्रत्वाय ॥ २४ ॥

वसिष्ठाद्या ऋषयः पुरा इन्द्रं प्रत्यक्षन्नापश्यन् अपरोक्षेण नाजानन् तेष ऋषीणाम्मध्ये स प्रसिद्धो वसिष्ठ ऋषिरकामयत कथं केन प्रकारेणोपायेन इन्द्रं प्रत्यक्षं पश्येयं साक्षात्कार्य्यमिति एवं कामयमानः सः निहवाख्यमेतत्सामापश्यत्तस्मादेतस्य वसिष्ठस्य निहव इति संज्ञा ततोऽनन्तरमेव स ऋषिरिन्द्रं प्रत्य-

मपश्यत्साक्षात् कृतवान् स इन्द्र एवमृषिमब्रवीत् हे वसिष्ठ ते तुभ्यं ब्राह्मणं वक्ष्यामि अनुष्ठेयार्थप्रतिपादकं वेदभागमुपदेक्ष्यामि यथा येन प्रकारेण त्वत्पुरोहिताः त्वं पुरोहितो येषां तथाविधा भरता एतत्संज्ञाः राजानः यद्वा भरता इति मनुष्यनाम सर्व्वे मनुष्याः प्रजनिष्यन्ते उत्पत्स्यन्ते अथ मदुपदेशानन्तरं मामिन्द्र अन्येभ्यस्त्वद्व्यतिरिक्तेभ्य ऋषिभ्यो मा प्रवोचः न ब्रूयाः इत्येवमुक्ता तस्मै वसिष्ठाय एतान् पूर्व्वोक्तान् स्तोमभागान् रश्मिरसीत्याद्यान् स्तोमानुमन्त्रणान् मन्त्रान् अब्रवीत् उक्तवान् ततो वै तत एव कारणात् सर्वे भरता वसिष्ठपुरोहिताः प्राजायन्त वसिष्ठः पुरोहितो येषां ते तथोक्ताः एवमिन्द्रप्रत्यक्षीकरणं वसिष्ठेन दृष्टत्वात् एतन्निहवाख्यं साम सेन्द्रं वै इन्द्रसहितं खलु स्पष्टमन्यत् ॥ २४ ॥

अथान्यत्साम विधत्ते ।

यद्वाहिष्ठीयं भवति ॥ २५ ॥

योऽसौ यद्वाहिष्ठशब्दान्वयाद्यद्वाहिष्ठीयं एतत्संज्ञं सामापि परित्यमित्यस्मिन्नेव तृचे गेयं ॥ २५ ॥

अथैतत् स्तौति ।

ब्रह्मयशसं वा एतानि सामान्यृचा स्तोचोक्याणि ब्रह्मयशसी भवति यद्वाहिष्ठीयेन तुष्टुवानः ॥ २६ ॥

एतानि यद्वाहिष्ठीयप्रभृतीनि सामानि ऋचा योनिभूता

ऋचोऽवयवेन पदेन श्रोत्रीयाणि श्रोतव्यानि ब्रह्मयशसं वै ब्राह्मणजातेः सम्बन्धि यशोरूपाणि अतो अनेन यद्वाहिष्ठीयेन तुष्टुवानः स्तुतवान् यजमानो ब्रह्मयशसी भवति ॥ २६ ॥

अथ सामान्तरं विधाय तत्स्तावकं ब्राह्मणमतिदिशति।

आसितं भवति यदेवासितस्य ब्राह्मणं ॥ २७ ॥

असितेन ऋषिणा दृष्टं सामासितं तदपि परित्यं इर्य्यतमित्यस्मिन्नेव तृचे गातव्यं तस्य चासितस्यासिवा एतेन देवल इत्यादिकं यद्ब्राह्मणं पूर्व्वमाम्नातं तदस्याप्यसितस्य स्तावकं ब्राह्मणं ॥ २७ ॥

अथैतस्मिं स्तृचेऽन्यत्साम विधत्ते।

साध्रं भवति सिद्ध्यै ॥ २८ ॥

राधसाध संसिद्धाविति धातोः इक् प्रत्यये साध्रशब्दनिष्पत्तिः तथा च साध्रशब्दाभिधेयं साम परित्यं इर्य्यतं हरिमिति तृचे गीयमानं यजमानाभिमतफलस्य सिद्धौ प्राप्त्यै सम्पद्यते ॥ २८

अथान्यत्साम विधत्ते।

आकूपारं भवति ॥ २९ ॥

एतदपि परित्यमिति पूर्वोक्त एव तृचे गेयं ॥ २९ ॥

अथैतत् स्तौति।

अकूपारो वा एतेन कश्यपो जेमानम्महिमान-मगच्छज्जेमानम्महिमानं गच्छत्याकूपारेण तुष्टु-वानः ॥ ३० ॥

अकूपाराख्यः कश्यपगोत्रऋषिः जेमानं जेतृत्वं महिमानं महत्त्वञ्च एतेन साम्ना प्राप्नोत् स्पष्टमन्यत् ॥ ३० ॥

अथ सामान्तरं विधत्ते ।

विधर्म्म भवति धर्म्मस्य विधृत्यै ॥ ३१ ॥

पवस्व सोममहेदच्चायेत्यस्मिन्नचरपङ्क्तिछन्दस्कतृचे विध-र्म्माख्यं साम गेयं एतद्विधर्मेत्यस्य साम्नेवावसाने दर्शनाद्विध-र्मसंज्ञा यस्मादेतत्साम विधर्म विधृत्य कारणं तस्माद्धर्मस्यानुष्ठे-यस्य यागस्य विधृत्यै विधारणाय भवति ॥ ३१ ॥

अथैतेषु छन्दोमाख्येष्वहःसु ब्रह्मवादिभिः कृतं कञ्चित् प्रश्न-मुपन्यस्यास्य साम्न आधारभूतछन्दसा परिहरति ।

ब्रह्मवादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाᳬ-स्याप्यन्ते किं छन्दसश्छन्दोमा इति पुरुषः छन्दस इतिब्रूयात् पुरुषो वै पाङ्क्तः पुरुषोद्विपदाश्छन्दो-मानामयातयामतायै ॥ ३२ ॥

ब्रह्मवादिनो वेदार्थविचारकाश्छन्दोमेषु चोदयन्ति किमिति

पृष्ठषडहे समाप्ते त्रिवृदादय: स्तोमा: गायत्र्यादीनि छन्दांसि च क्रमेण षट्स्वह:सु विनियुक्तत्वाद्यस्मात्समाप्यन्ते तस्मात् छन्दोमा: किं छन्द: केन छन्दसा निष्पन्ना: यदि वेति स्तुक्तानां गायत्र्यादीनामन्यतममेतर्हि गतसारता स्यात् अस्योत्तरं पुरुष: छन्दस: छन्दोमा इति ब्रूयात् ननु पुरुषो नाम गायत्र्यादिछन्दोऽनन्तरं न प्रसिद्ध इत्यत आह पुरुषो वै पाङ्क्त: इति अयमर्थ: पङ्क्तिस्तावत् पञ्चपदत्वात् पञ्चसंख्यावती पुरुषश्च त्वङ्मांसस्नावास्थिमज्जेति पञ्चधातुभि: पञ्चज्ञानेन्द्रियै: पञ्चकर्मेन्द्रियैश्चोत्पत्तिमत्त्वेन पञ्चसंख्याद्वारा पङ्क्ति: द्विपदाश्च पदद्वयसाम्यात् पुरुषस्थानीया: ताश्च पवस्व सोममहेदक्षायेत्यादि तिस्रोऽक्षरपङ्क्तिछन्दस्का: द्विपदा: अतएव छन्दोद्वयं पूर्वमविनियुक्तत्वात् छन्दोमानामयातयामतायै अगतसारतायै भवति ॥ ३२ ॥

अथान्यत्साम विधत्त ।

शुद्ध्यं भवति ॥ ३३ ॥

उपोषु जातमित्यस्मिंस्तृचे तत् शुद्ध्याख्यं साम गेयं ॥ ३३ ॥

अथैतत्पशुसाधनत्वेन स्तौति ।

पशवो वै शुद्ध्यं पशूनामवरुध्यै ॥ ३४ ॥

स्पष्टोऽर्थ: ॥ ३४ ॥

एतदेव स्पष्टे ।

प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टा अपाक्रामꣳ स्तानेतेन साम्ना श्रुधिया एहियेत्यन्वह्वयत्त एन- मुपावर्त्तन्त यदेतत् साम भवति पशूनामुपावृत्त्यै ॥ ३५

पुरा प्रजापतिः पशूनसृजत सृष्टवान् ते च सृष्टा अस्मात् प्रजापतेः सकाशादपाक्रामन् अपलायन्त तानपाक्रान्तान् पशूने- तेन श्रुद्धेन साम्ना श्रुधिया एहियेति सामावयवेन स्तोभेनान्व- ह्वयत् अनुक्रमेणाह्वतवान् स्तोभस्यायमर्थः हे पशुसङ्घ त्वं मद्वचन श्रुधि शृणु एहि आगच्छेति एवमाह्वतास्ते पशव एनं प्रजापति- मुपावर्त्तन्तोपागताः तस्मादेतत्साम पशूनामुपावृत्त्या उपावर्त्त- नाय भवति ॥ ३५ ॥

अथैतद्वेदनफलमाह ।

उपैनं पशव आवर्त्तन्ते य एवं वेद ॥ ३६ ॥

स्पष्टोऽर्थः ॥ ३६ ॥

अथास्य साम्न आधारभूतानामेषां छन्दोद्वारेण स्तुतिं कुर्व्वन् एतत्पवमानस्तोत्रमुपसंहरति ।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्तोडान्ताः पवमाना भवन्ति पशवो वा इडा पशवश्छन्दोमाः पशुष्वेव तत्पशून्द- धाति स्तोमः ॥ ३७ ॥

उपोषु जातमप्तुरमित्याद्यासु गायत्रीषु श्रुद्धेन साम्ना स्तुवन्त्युद्गातारः अस्य चावसाने इड शब्दः श्रूयते तस्मादस्य पवमानस्तोत्रस्येडान्तत्वं सिद्धमन्यत् एवं गायत्र्यादिश्रुद्धान्तेषु षोडशसु सामसु प्रत्येकं तृचे गीयमानेषु अष्टाचत्वारिंशत् स्तोत्रीयाः सम्पद्यन्ते तस्मादुद्गातात्मकोऽष्टाचत्वारिंशस्तोम एवास्य स्तोत्रस्य कार्य्यः॥ ३७॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

अथोक्थेषु प्रथमस्य स्तोत्रीयं तृचं विधित्सुराह।

आग्नेयीषु पूर्व्वं पामह्नामुक्थानि प्रणयन्त्यथै-तस्याह्न आग्नेय्यैन्द्र्यां प्रणयन्त्युभयोरेव रूपयोः प्रतितिष्ठति॥ १॥

अथाग्नेयीषु अग्निदेवत्यासु ऋतु एन्यूषु ब्रवाणित इत्याद्यासु पूर्व्वेषां गतानामह्नां उक्थानि तृतीयसवन उक्थस्तोत्राणि प्रणयन्ति कुर्व्वन्ति अथशब्दस्तुशब्दार्थे एतस्य नवमस्याह्नस्तु आग्नेय्यैन्द्र्यां अग्निरिन्द्रश्चोभे देवते यस्यास्तस्यामृचि प्रणयन्ति

तथा चोभयोरेव रूपयोः अग्नाविन्द्रे च यजमानः प्रतिष्ठितो भवति ॥ १ ॥

अथ प्रथमोक्थस्तोत्रनिर्वर्त्तकं साम दर्शयति ।

ऐध्मवाहं भवति ॥ २ ॥

ऐध्मवाहाख्यं साम आग्नेय्यैन्द्र्याङ्गातव्यमित्यर्थः ॥ २ ॥

एतद्देवानूद्य स्तौति ।

आग्नेय्यैन्द्रीषु स्तुवन्ति ब्रह्म चैव तत् क्षत्रञ्च सयुजी करोति ब्रह्मैव क्षत्रस्य पुरस्तान्निदधाति ब्रह्मणो क्षत्रञ्च विशञ्चानुगे करोति ॥ ३ ॥

आग्नेय्यैन्द्रीषु अग्नीन्द्रौ देवते यासां तासु आद्या ये अग्निमिन्धत इत्याद्यासु ऐध्मवाहेन स्तुवन्ति ब्रह्म ब्राह्मणजातिं क्षत्रं क्षत्रियजातिञ्चैव सयुजी समानयुञ्जाने संयुक्ते करोति अग्नेः ब्राह्मणजात्या सह प्रजापतिमुखादुत्पन्नस्य इन्द्रस्य क्षत्रियजात्या सह प्रजापतेरुरसो बाहुभ्याञ्चोत्पन्नस्य च उभयोरेकस्यार्थंच संयोजनात् तत्राप्यग्निशब्दः प्रथमः श्रुतः पश्चादिन्द्रस्य क्षत्रियजातेः पुरस्ताद्ब्रह्मैव ब्राह्मणजातिमेव निदधाति तथा ब्रह्मणे ब्राह्मणजातये क्षत्रं क्षत्रियजातिं च विशं वैश्यजातिञ्चानुगे अनुगन्त्र्यौ करोति ॥ ३ ॥

अथ द्वितीयोक्थस्तोत्रनिर्वर्त्तकं साम दर्शयति ।

त्रैककुभं भवति ॥ ४ ॥

य एक इद्विदयत इत्यादिके तृचे एतत्त्रैककुभाख्यं साम गीयमानं ब्रह्मण उक्थस्तोत्रं भवति ॥ ४ ॥

अथैतत् स्तौति ।

ओजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजोवीर्य्यन्त्रैक-कुभं ॥ ५ ॥

तत्तेन त्रैककुभेन ओजोरूप एव वीर्य्ये प्रतितिष्ठति अस्य साम्नो वीर्य्यं त्रैककुभमिति त्रिककुभं विनिधाय चरदित्यारभ्य त्रिवीर्य्यं वा एतत्सामेत्यादिना पूर्व्वमेव प्रतिपादितं ॥ ५ ॥

अथ तृतीयस्योक्थस्य निर्वर्त्तकं साम दर्शयन् तद्ब्राह्मणं चादिशति ।

उद्वंशीयं भवति यदेवोद्वंशीयस्य ब्राह्मणं ॥ ६ ॥

गायन्ति त्वा गायत्रिण इत्यस्मिंस्तृचे गीयमानमुद्वंशीयमच्छावाकस्योक्थस्तोत्रं भवति तस्य चोद्वंशीयस्य पृष्ठानि वा अस्व्यन्त तेषां यत्तेजोरसोत्यरिच्यतेत्यादिकं यत् स्तावकं ब्राह्मणमाम्नातं तदत्रापि स्तुत्यर्थमनुसन्धेयं ॥ ६ ॥

अथैतेषु स्तोत्रेषु पूर्व्ववत् स्तोत्रीयं विधाय स्तौति ।

अष्टाचत्वारिंशः एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥ ७ ॥

अस्य स्तोमस्य संख्याद्वारा जगतीसम्बन्धात्तस्याश्च पश्वात्मकत्वात्पशूनाञ्च प्रतिपादनहेतुत्वञ्च स्पष्टमित्येवं संख्याद्वारा अष्टाचत्वारिंशस्तोमस्योभयहेतुत्वमधिगन्तव्यं ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

इत्थं दाशरात्रिकाणामहानामह्नां स्तोमक्लृप्तिरुक्ता, अथ दशमस्याह्नः स्तोमक्लृप्तिरध्यायशेषेण विधीयते, प्रथमं तावत्तस्मिन्नहनि अनुष्टुभां प्रयत्नोपायनं निषेद्धुकामः तत्रानुष्टुभस्य छन्दसः प्रशस्तिमाह ।

गायत्रं वै सप्तममहस्त्रैष्टुभमष्टमञ्जागतं नवममथैतदानुष्टुभमहर्य्यद्दशमं ॥ १ ॥

गायत्र्यादीनां छन्दसां पृष्ठ्यषडहे क्रमेण विनियुक्तत्वेन समाप्तत्वात् पुनरपि सप्तमाष्टमादिष्वहःसु तान्येव गायत्र्यादीनि छन्दांसि क्रमेण प्रयोज्यानि तस्माद्गायत्रं गायत्रीछन्दस्कं सप्तम-

मह्स्त्रिष्टुप्छन्दस्कमष्टमं जगतीछन्दस्कन्नवमं यद्दशममहः एतदानुष्टुभं अनुष्टुप्छन्दस्कं तस्मादनुष्टुभोऽस्मिन् दशमेऽहनि प्रयोज्या इत्यर्थः ॥ १ ॥

इत्थं प्रयोज्यानामनुष्टुभां प्रत्यक्षापायने दोषं दर्शयन् सम्पत्त्या तासां सद्भावमाह ।

तदाहुर्य्यदनुष्टुभꣳ स्तोम्यां प्रत्यक्षमुपेयुः परास्परावतं यजमानो गच्छेन्न प्रतितिष्ठेदिति या वै चतुर्व्विꣳशतिर्गायत्र्यस्ता अष्टादशानुष्टुभोऽनुष्टुभमेव तत् स्तोम्यां परोक्षमुपयन्ति प्रतिष्ठायै प्रतितिष्ठति ॥ २ ॥

तत्तत्र दशमेऽहनि विषये ब्रह्मवादिनः आहुः स्तोम्यां स्तोमार्हां स्तोत्रीयामनुष्टुभमृचं यद्यपि प्रत्यक्षस्वरूपेणोपेयुरुपगच्छेयुः कुर्य्युरित्यर्थः तदा परां परावतं अतिशयेन दूरं यजमानो गच्छेत् तथा न प्रतितिष्ठेत् प्रतिष्ठितश्च न भवेदिति तस्मादनुष्टुप् तत्प्रत्यक्षमुपेयात् कथं तर्ह्यस्याह्न आनुष्टुभत्वं प्रतिज्ञातमिति तदुच्यते चतुर्विंशस्तोमो ह्यस्मिन्नहनि विधास्यते तत्र वक्ष्यमाणे विधास्यमाना याः चतुर्विंशतिः गायत्र्यस्ता अष्टादशानुष्टुभो भवन्ति अष्टादशसु गायत्रीषु अवशिष्टा गायत्रीषट्कसम्बन्धिनां पादानामष्टादशानां एकैकस्य प्रक्षेपणेन द्वात्रिंशदक्षरसम्पत्तेः तत्तस्मात् स्तोम्यां स्तोत्रीयामनुष्टुभमेव परोक्षं छन्दःसम्पत्तिद्वारा

परोक्षेणोपयन्त्युपगच्छन्ति प्रतिष्ठायै प्रतिष्ठार्थं अनुष्टुभो हि चतुष्पात्त्वात् प्रतिष्ठाहेतवः ॥ २ ॥

अथास्मिन्नहनि प्रमादाद्विस्मृतस्यानुष्ठेयस्य प्रतिबोधनं पार्श्वस्थैर्न्न कार्य्यमिति दर्शयति।

प्रजापतिं वा एतेनाह्ना परिवेविषति तन्न व्यववद्यं यद्वै श्रेष्ठे परिविष्यमाणेऽवदत्यन्नाद्यस्य सोवग्रहस्त-स्मान्न व्यववद्यमन्नाद्यस्यानवग्राहाय ॥ ३ ॥

प्रजापतिं सर्व्वकारणभूतं स्रष्टारं खलु एतेन दशमेनाह्ना परिवेविषति भोजयति तर्पयति तत्तस्मान्न व्यववद्यं ऋत्विग्भिर्वि स्मृतं अनुष्ठेयं न विवाच्यं एतदेव सदृष्टान्तमुपपाद्यते यद्वा इत्या-दिना श्रेष्ठे प्रशस्यतमे विद्यातपःप्रभृतिभिरधिके अतिशयोक्ते परिविष्यमाणे भोज्यमाने यत् खलु तवत्यं वैकल्यं वदति सो-ऽन्नाद्यस्य भोजनस्यावग्रहः प्रतिबन्धकः तस्मात्कारणान्न व्यववद्यं विवादो न कार्य्यः किमर्थमन्नाद्यस्य भोजनस्यानवग्राहाय अप्र-तिबन्धाय एवमत्रापि प्रजापतेर्भोजनाविच्छेदाय विस्मृतमनुष्ठे यजातं न केनचिदप्यभिज्ञेनाविष्करणीयमित्यर्थः ॥ ३ ॥

अथ पक्षान्तरमाह।

तदु व्यववद्यं यथा श्रेष्ठाय बलिं ह्रियमाणां पन्थानं पर्य्यवनुदति गत्यै तथा तत् ॥ ४ ॥

उशब्दोऽवधारणे तत्तत्र दशमेऽहनि व्यववद्यं निश्चितमनुष्ठेयं कर्म व्यववद्यं विविच्य कथनीयमेव यथा खलु श्रेष्ठाय प्रशस्यतमायातिथये अपथेन ह्रियमाणं नीयमानं बलिमुपहारं मार्गाभिज्ञः पन्थानं पर्य्यवनुदति प्रापयति गत्यै गमनार्थं तथैव तत् यद्दशमेऽहन्यनुष्ठेयस्य विस्मृतस्य प्रकरणमिति ॥ ४ ॥

अस्मिन् पक्षे कश्चिद्धर्मं विधत्ते ।

यावत्यनुष्टुप्तावतीं वाचं सम्पाद्य विब्रूयुस्तद्वनतिरिक्तꣳ स्वस्योचैव यज्ञस्यारिष्ट्यै ॥ ५ ॥

यावती यत् परिमाणाक्षरानुष्टुप् तावतीं तावत्परिमाणां वाचं सम्पाद्य उच्चार्य्य विब्रूयुः विस्मृतं स्मारयेयुः विस्मरणं हि मन्त्रविषयमर्थविषयं चेति द्वेधा सम्पद्यते तत्रानुष्टुभोऽधिके छन्दसि विस्मरणे द्वात्रिंशदक्षरपर्य्यन्तं मन्त्रमुच्चार्य्य ततो विवेचनं कार्य्यं न्यूने छन्दसि गायत्र्यादौ यावत् द्वात्रिंशदक्षरसम्पत्तिस्तावदभ्यस्य विविच्य अथ विस्मृतौ तु समर्थमनुष्टुप्श्लोकेन स्मारयेयुः तद्यथा पृष्ठ्होमस्त्वया कार्य्यस्तदनन्तरमृग्जपः ततश्च स्तोमयोगः स्यात्ततः स्तोत्रं ततो जप इति एतत्सर्व्वं सूत्रकृतोक्तं अप्रतिभासे तस्मिन्नहन्यनुष्टुम्मात्रां कृत्वाचक्षीरन् ज्यायसि छन्दसि लुम्पेयुरक्षराणि कनीयस्यभ्यस्येयुरिति वाचैव ब्रूयुरिति धानञ्जय्यो वागनुष्टुबिति हि ब्राह्मणं भवतीत्यादिना एवमनुष्टुभं सम्पाद्य च द्विवचनं तत् उअनतिरिक्तं अतिरिक्तमधिकन्न भवति

स्वस्याश्च आनुष्टुभत्वात् एवं विवेचनं यज्ञस्यारिष्ट्यै अहिंसायै सम्पूर्णतायै भवति ॥ ५ ॥

एवं कारणाहःसम्बन्धिधर्मविशेषमुक्त्वा वहिष्पवमानस्य स्तोत्रीयां विधित्सुराह।

अभि वा एते देवानारोहन्तीत्याहुर्ये दशभिरहभिः स्तुवत इति पञ्चानामह्नामनुरूपैः प्रत्यवयन्ति यथाभ्यारुह्य प्रत्यवरोहेत्तथा तन्नवर्चो भवति या एवामूः प्रयन्त्यस्या अवदधाति ता एता उदस्यति ॥ ६ ॥

ये यजमाना अतीतैः प्रायणीयातिरात्रसहितैर्दशभिः स्तुवते एते देवानारोहन्ति क्रमेण तैरहोभिः देवान् प्राप्नुमेतदारोहन्ति तथा चेह लोके स्थितिर्न स्यात्तदर्थं पञ्चानामह्नामनुरूपैः प्रत्यवयन्ति अवरोहन्ति एतत् स्तुवन्ततविस्पष्टं व्याख्यातं दशमस्य वहिष्पवमानं द्वितीयप्रभृतीनां पञ्चानामह्नामनुरूपाः प्रथमाश्च वहिष्पवमानं तन्नवर्चमिति तस्यायमर्थः पृष्ठ्यषडहस्य द्वितीयप्रभृतीनामह्नां वहिष्पवमानेषु येऽनुरूपास्तृचाः पवस्वेन्दो वृषासुत एते असृग्रमिन्दवः पवमानैरजीजनत् पवमानस्य विश्ववित् असृक्षत प्रवाजिन इत्यादिकाः ताननत्राहरेत् प्रथमाश्चाह्नः कृत्स्नं वहिष्पवमानं अस्य प्रत्नामनुद्युतमित्यादिकमाहरेदिति यथा खलु वृक्षमारुह्य प्रत्यवरोहेत् तथा तदनुरूपैः

प्रत्यवरोहणं एवमनुरूपतृचपञ्चकानन्तरं तन्नवर्चो भवति अथ-मस्याह्नो वहिष्पवमानस्य अस्य प्रत्नामनुद्युतमित्यादिकं तन्न-वर्चं प्रयोक्तव्यमित्यर्थः तत्र च प्रत्यवरोहणे सूत्रकारेण बहवः पक्षाः दर्शिताः अनुरूपेषु तृचाः प्रतिलोमा ऋचो नवर्चे इति गौतमः इत्येकः पक्षः, अनुरूपेषु असृग्रत प्रवाजिन इति षष्ठस्याह्नोऽनुरूपतृचं प्रथममाहृत्य पञ्चमचतुर्थाद्यनुरूपं तद-वरोहेणाहरेत् तदस्य प्रत्नामनुद्युतमिति तन्नवर्चेषूपास्मै गायतानर इत्युपक्रम्य अस्य प्रत्नामनुद्युतमित्यन्तं ऋचएव प्रतिलोमाः स्युरिति गौतमपक्षस्यार्थः, अथ तथैव सूत्रकृता पुन-स्त्रिपक्षाः प्रतिपादिताः सर्व्वत्र तृचा इति धानञ्जप्यो यथा-धीतनवर्चमिति शाण्डिल्यायनः सर्व्वत्रर्चः प्रतिलोमा इति शाण्डिल्य इति यथानुरूपेषु तृचानां प्रातिलोम्यं नवर्चे तथा नवर्चे नास्त्येव प्रातिलोम्यं यथाधीतमेव प्रयोक्तव्यमिति शा-ण्डिल्यायनमतं अनुरूपेषु नवर्चे च ऋचएव प्रतिलोमाः स्युर्न पुनस्तृचा इति शाण्डिल्यमतं, प्रकृतमनुसरामः अथ दशरात्रं प्रारभमाणः प्रथमेऽहनि या एवामूः अस्य प्रत्नामनुद्युत-मित्याद्या नवर्चः शम्याः नवरात्रस्य शम्यास्थानीयाः अवद-धाति योजनाय प्रक्षिपति ता एताः शम्या इदानीमुदस्यति अङ्गां विमोचनार्थमुत्क्षिपति ॥ ६ ॥

अथ तस्मिन्नवर्चे द्वयोर्ऋचोर्लिङ्गमनूद्य स्तौति।

वारुण्येका भवति यद्वै यज्ञस्य दुरिष्टन्तद्वरुणो

२, २०

गृह्णाति तदेव तदवयजत्यादित्यैका भवतीयं वा अदितिरस्यामेव प्रतितिष्ठति ॥ ७ ॥

एष प्रत्नेन मन्मना देवो देवेभ्य इत्यस्यामृचि कविर्विप्रेण वावृध इति कविशब्दश्रवणात् एषा वारुणी कवी नो मित्रावरुणेत्यादौ कविशब्दस्य मित्रावरुणयोर्वाचकत्वात् इत्थं वारुणी वरुणसम्बन्धिनी एकाक्षरवती यत् खलु यज्ञसम्बन्धि दुरिष्टं दुर्यजनं तद्वरुणो गृह्णात्यादत्ते तत्र या वारुण्या तदेव दुरिष्टं तदवयजति निरस्यति तथा आदित्या अदितिसम्बन्धिनी एका भवति दुह्वानः प्रत्नमित्ययमित्यस्यामृचि क्रन्दं देवां अजीजन इति देवजनयितृत्वं प्रतिपाद्यते तच्चादितेरेवेति लिङ्गात् एषा आदित्या इयं पुरोवर्त्तिनी भूमिरेवादितिः अदितिशब्दाभिधेया तथा चादित्यया ऋचा अस्यां पृथिव्यामेव यजमानः प्रतितिष्ठतीति ॥ ७

अथैतस्मिन् बहिष्पवमाने स्तोमं विधाय स्तौति ।

चतुर्विंश एव स्तोमो भवति तेजसे ब्रह्मवर्च्चसाय ॥ ८ ॥

पञ्चस्वनुरूपतृचेषु तन्नवर्चे च क्रियमाणे चतुर्विंशस्तोत्रीयाः सम्पद्यन्ते तत्सङ्घातात्मकचतुर्विंशस्तोम एवास्य बहिष्पवमानस्य भवति स च चतुर्विंशतिसंख्याद्वारा गायत्रसम्बन्धात् गायत्रस्य वा छन्दसः प्रजापतिमुखादग्निना सहोत्पत्तेस्तेजोरूपत्वाद्

ब्रह्मवर्चसस्य च तेजोऽवान्तरजातित्वात् तेजोब्रह्मवर्चसयोर्हेतु-र्भवतीत्यर्थः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

अथास्मिन् दशमेऽहनि प्रथममाज्यस्तोत्रं दर्शयति ।

सुषमिद्धो न आवहेत्याप्रिय आज्यानि भवन्ति ॥१॥

आप्रिय इति प्रयाजानुयाजानां संज्ञा सुषमिद्धो न आवहे-त्याद्या एकादशर्चो दाशतय्यामाम्नाताश्वलायनेन सूत्रकृता समिद्धो अद्येति सर्व्वेषां यथर्षिचेति प्रयाजयाज्यात्वेन विहिताः तस्मादेता आप्रीसंज्ञाः सुषमिद्धो न आवहेत्याद्यास्तिस्र ऋचः आग्नेयं प्रथममाज्यस्तोत्रं भवति आज्यानि भवन्तीति बहुव-चनं आप्रिय इति बहुत्वापेक्षया ॥ १ ॥

अथैतस्यामाप्रीसंज्ञां निर्ब्रुवन् स्तौति ।

प्रजापतिः प्रजा असृजत सदुग्धो रिरिचानो ऽमन्यत स एतान्याप्रिय आज्यान्यपश्यत्तैरात्मान-माप्रीणात् दुग्धइव वा एष रिरिचानो यो दशभि-

रेकभिस्तुष्टुवानो यदेतान्याप्रिय आज्यानि भवन्त्या-त्मानमेवैतैराप्रीणाति ॥ २ ॥

पुरा प्रजापतिः एतान्याप्रिय आज्यानि आप्रीभिर्निष्पाद्य-मिह आज्यस्तोत्रमपश्यत् तैराज्यैरात्मानमाप्रीणात् अतएव आप्रीणसाधनत्वात् एतासां आप्री इति संज्ञा तच्छब्दः केवलो ऽप्युपपूर्वैतिष्ठतेरर्थे वर्त्तते इत्यर्थः ॥ २ ॥

यदद्य सूर उदित इति सूरवन्मैत्रावरुणमन्तो वै सूरोऽन्त एतद्दशममहरामन्त एव तदन्तेन स्तुवते प्रतिष्ठाया उत्वा मन्दन्तु सोमा इत्युद्दैन्द्रमुत्थानस्य रूपं* ॥ ३ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति ।

इन्द्राग्नी आगतं सुतमिति येनैव रूपेण प्रयन्ति तदभ्युद्यन्ति स्तोमः ॥ ४ ॥

इन्द्राग्नी आगतं सुतमिति तृचः इन्द्राग्निदेवताकं चतुर्थ-माज्यस्तोत्रं दशरात्रस्य प्रथमेऽह्न्यपि एतदेव चातुर्थमाज्यस्तोत्रं पूर्व्वं विहितं तथाच येनैव रूपेण एतत्तृचलक्षणं प्रयन्ति दशरात्रं प्रारभन्ते तदेवाभिलक्ष्योद्यन्ति दशरात्रं परिसमापयन्ति एतेषु

* अस्य ब्राह्मणवाक्यस्य भाष्यन्तु पतितमनुमीयते ।

चतुर्थ्याज्यस्तोत्रेषु पूर्व्वोक्तश्चतुस्त्रिंश एव स्तोमः कार्य्यः इत्थं प्रातः-सवनिकानां स्तोत्राणां स्तोत्रीया ऋचो विहिताः साम एतासु प्राकृतमेवेत्यधिगन्तव्यं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथास्मिन् दशमेऽहनि माध्यन्दिनपवमानस्य स्तोत्रीयं तृचं दर्शयति ।

उच्चाते जातमन्धस इत्युद्वत्यो गायत्त्रो भवन्त्यानस्य रूपं ॥ १ ॥

उच्चाते जातमन्धस इत्याद्यास्तिस्रो ऋचः साधनत्वात् तासामाप्रीसंज्ञा एवञ्च यो दशभिरहभिस्तुष्टुवान् स्तुतवान् यजमानः एषदुग्धोरिरिचानो रिक्तो भवति यत् यान्येतान्याप्रिय आज्यानि भवन्ति आत्मानमेव एतैराज्यैराप्रीणाति तर्पयति* ॥१

अथान्यं स्तोत्रीयं तृचं दर्शयति ।

पुनानः सोमधारयेति पन्थानमेव तत् पर्य्यवयन्ति ॥ २ ॥

* एवञ्चेत्यादि तर्पयति इति पर्यन्तं भाष्यं अष्टमखण्डीयद्वितीयब्राह्मणस्य भाष्यमित्यनुमीयते ।

* पुनानः सोमधारयेति वार्हतस्तृचो भवति तत्तेन पथ्यामेव पर्य्यवयन्ति परिप्राप्नुवन्ति सर्व्वप्रकृतिभूतेऽग्निष्टोमे उच्चाते जात-मन्धस इत्यनन्तरं पुनानः सोमेति तृचो विहितः स च तत्क्रमत्वात् पथ्या इत्युच्यते ॥ २ ॥

अथान्यं तृचं विधत्ते ।

आजागृविर्विप्रऋतम्मतीनामिति यदाप्ते प्रवतः कुर्य्युरतिपद्येरन्यदावत्यो भवन्त्यनतिपादाय ॥ ३ ॥

आजागृविरिति आद्यास्तिस्रः स्तोत्रीयाः कार्य्याः यद्यदि आप्ते समाप्यमाने दशरात्रे प्रवतीः प्रतुद्रवेत्याद्याः प्रशब्दयुक्ताः कुर्युः यदाप्ते अतिपद्येरन् अतिदूरं गता भवेयुः प्रशब्देन प्रकर्षगमनस्य सूचनात् तस्मादावत्यः आ इत्यनेनोपसर्गेण युक्ताः स्तोत्रीयाः भवन्ति पशुवद्यजमानानामनतिपादाय अतिदूर-गमनाभावाय भवति ॥ ३ ॥

अथ प्रथमे तृचे पूर्व्ववद्गायत्रं साम विधाय तद्ब्राह्मण-मतिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ४ ॥

उच्चा ते जातमन्धस इति तृचे गायत्रं साम गातव्यं तस्य चेमे वै लोका गायत्रमित्यादिकं यद्ब्राह्मणमाम्नातम् तदत्राप्य-नुसन्धेयं ॥ ४ ॥

अथास्मिन्नेव तृचेऽन्यत्साम विधाय स्तौति।

आमहीयवं भवति क्षुधिश्चान्नाद्यञ्च क्षुधिञ्चै-वैतेनान्नाद्यञ्चाभ्युत्तिष्ठन्ति ॥ ५ ॥

आमहीयवाख्यमपि साम उच्चा ते जातमन्धस इत्यस्मिन्नेव तृचे आवृत्ते गेयं तच्च साम क्षुधिः कल्पकं सामर्थ्यप्रदं अन्नाद्यं अदनीयानुरूपञ्च तथाच क्षुधिञ्चैवान्नाद्यञ्चाभिलक्ष्य एतेनामहीयवेन साम्नोत्तिष्ठन्ति ॥ ५ ॥

अथ सामान्तरं विधत्ते।

आजिगं भवत्याजिजित्यायै ॥ ६ ॥

आजिगाख्यमपि साम पूर्व्वोक्त एव तृचे गेयं आजिं गच्छतीत्याजिगमिति अन्वर्थसंज्ञकत्वात् तत्साम आजिजित्यायै आजिगन्तव्यभूमेर्मध्यपर्य्यन्तं तच्च जयाय भवति ॥ ६ ॥

एतदेव व्याचष्टे।

आजिर्वा एष प्रततो यद्द्वादशाहस्तस्यैतदुज्जित्यै ॥ ७ ॥

यत् योऽयं द्वादशाहस्तः प्रततो विस्तृत आजिः वै यथा धावतां पुरुषाणामतिशीघ्रपरीक्षार्थं आजिः कल्प्यते एवममुष्ठातृणां

सामर्थ्यपरीक्षणाय आजिवत्कल्पित इत्यर्थः तस्य द्वादशाहस्य लक्षणस्याजेः उज्जित्यै उज्जयाय एतत्साम भवति ॥ ७ ॥

अथान्यत्साम विधत्ते ।

आभीकं भवत्यभिक्रान्त्यै ॥ ८ ॥

आभीकाख्यमपि साम उच्चाते जातमन्धस इत्यस्मिन्नेव तृच आहृते गेयं तच्चाभिक्रान्त्यै स्वर्गस्याभिक्रमणाय भवति ॥ ८ ॥

अथैतत् शोकापशमनहेतुरिति आख्यायिकाप्रदर्शनेन स्तौति ।

अङ्गिरसस्तपस्तेपानाः शुचमशोचꣳस्त एतत्सामापश्यꣳस्तानभीकेऽभ्यवर्षत्तेन शुचमशमयन्त यदभीकेऽभ्यवर्षत्तस्मादाभीकं यामेव पूर्वैरहभिः शुचꣳ शोचन्ति तामेतेनात्र शमयित्वोत्तिष्ठन्ति ॥ ६ ॥

अङ्गिरसस्तपस्तेपानाः तपःकुर्वन्तः शुचमशोचन् शोकं प्रापुवन् ततः शोकस्य निष्कृतिं कामयमानाः एतत्सामापश्यन् तच्च साम तान्दृषीन् अभीके समीपेऽभ्यवर्षदभिप्राप्नोत् तेन समीपं गतेन साम्ना तेऽङ्गिरसः शुचमशमयन्त अपाघ्नन् यस्मादेतत् सामाभीकेऽभ्यवर्षत् तस्मादाभीकसम्बन्धादस्य साम्नः आभीकमिति नाम सम्पन्नं यस्मादेवं तस्मात् यामेव शुचं शोकं पूर्वैरहभिः प्रायणीयाद्यैरनुष्ठितैः शोचन्ति शोकं प्राप्नुवन्ति तां

पुरुषं प्रोक्तं एतेनाभीकेन साम्ना अस्मिन् काले प्रमर्यित्वा अपहत्योत्तिष्ठन्ति यागादुत्थानं कुर्व्वन्ति यागं समापयन्तीति यावत् ॥ ९ ॥

अथ तृचान्तरेऽन्यत्साम विधत्ते ।

उत्सेधो भवति ॥ १० ॥

उत्सेधाख्यं साम पुनानः सोमधारयेत्यस्मिंस्तृचे गेयं ॥ १० ॥

अथैतत् स्तौति ।

उत्सेधेन वै देवाः पशूनुदस्रेधन्निषेधेन पर्य्य-गृह्णन् ॥ ११ ॥

उत्सेधाख्येन साम्ना पर्य्यगृह्णन् पर्य्यवेष्टयन् एतेन निषेधाख्यमपि सामास्मिन्नेव तृचे गेयमिति विहितं भवति ॥ ११ ॥

अथैतयोः साम्नोर्मध्ये सामान्तरस्य गानं विधत्ते ।

अन्तरोत्सेधनिषेधौ यज्ञायज्ञीयं ॥ १२ ॥

उत्सेधनिषेधावन्तरावुत्सेधनिषेधयोः साम्नोर्मध्ये यज्ञायज्ञीयं साम पुनानः सोमेति तृचे गेयं प्रथममुत्सेधं गीत्वा ततो यज्ञायज्ञीयं ततो निषेधं गायेदित्यर्थः ॥ १२ ॥

अथैतस्य यज्ञायज्ञीयस्य उत्सेधनिषेधयोरन्तराले करणं स्तौति ।

पशवोऽन्नाद्यं यज्ञायज्ञीयं पशूनेव तदन्नाद्यमुत्सेध-निषेधाभ्यां परिगृह्णाति ॥ १३ ॥

यदेतद्यज्ञायज्ञीयं साम एतत्पशवः पश्वात्मकं अन्नाद्यरूपञ्च तत्सामात्मकान् पशूंश्चैवान्नाद्यञ्च उत्सेधनिषेधाभ्यामुभयतो वर्त्तमानाभ्यामिति परितोबध्नाति ॥ १३ ॥

अथैतद्यज्ञायज्ञीयस्य माध्यन्दिनपवमाने गानं स्वर्गसाधनमिति स्तौति ।

माध्यन्दिने वै पवमाने देवा यज्ञायज्ञीयेन यज्ञं सꣳस्थाप्य स्वर्गं लोकमारोहꣳस्तद्य एवं वेद माध्यन्दिन एवैतत्पवमाने यज्ञायज्ञीयेन यज्ञꣳसꣳस्थाप्य स्वर्गं लोकमारोहति ॥ १४ ॥

पुरा देवाः माध्यन्दिनपवमान एव यज्ञायज्ञीयेन साम्ना स्तुत्वा यज्ञं संस्थाप्य परिसमाप्य स्वर्गं लोकमारोहन् यज्ञायज्ञीयेन हि साम्ना प्रकृतिभूतस्याग्निष्टोमस्य समापनात् यत्र कुत्रापि क्रियमाणमेतत्साम समाप्तिहेतुर्भवति तत्तथा च यो यजमानः एवमुक्तं ब्राह्मणार्थं वेद जानाति एतत् एष वेदिता माध्यन्दिने पवमान एव यज्ञायज्ञीयेन साम्ना यज्ञं समाप्य स्वर्गं लोकमारोहति ॥ १४ ॥

यदुक्तं अस्मिन् दशमेऽहनि अनुष्टुप् परोक्षमुपेतोद्यन्ति तदप्यनेन साम्ना सिध्यतीत्याह ।

अथो परोक्षमनुष्टुभं सम्पद्यत एषा वै प्रत्यक्ष-मनुष्टुब्यद्यज्ञायज्ञीयं तद्यत्तृतीयसवने कुर्युः प्रत्यक्ष-मनुष्टुभमृच्छेयुस्तस्मान्मध्यन्दिने कुर्वन्ति तेन परो-क्षमनुष्टुभमुपयन्ति ॥ १५ ॥

अथोऽपि च एतद्दशममहः परोक्षं परोक्षेण वर्त्तमानमनुष्टुभं सम्पद्यते सम्प्राप्नोति कथमिति तदुच्यते एषा वै प्रत्यक्षं प्रत्यक्षेण वर्त्तमानानुष्टुप् यद्यज्ञायज्ञीयाख्यं साम वाङ्निधनत्वात् वागनुष्टुबिति हि ब्राह्मणं तत्सामानुष्टुप्संस्तुतं यज्ञायज्ञीयं यद्यदि तृतीयसवने कुर्युः प्रयुञ्जीरन् प्रत्यक्षमनुष्टुभं अस्मिन् दशमेऽहनि ऋच्छेयुः प्राप्नुयुः तच्च न कार्य्यमित्युक्तं तस्मान्माध्यन्दिने पवमाने यज्ञायज्ञीयं कुर्युः तथाच स्तोत्रमध्ये सामान्तरैर्निगूढ़त्वात् परोक्षं परोक्षेणैव वर्त्तमानमनुष्टुभमुपयन्त्युपगच्छन्ति ॥ १५

अथान्तिमे तृचे गेयं साम दर्शयति ।

गौरीवितं भवति ॥ १६ ॥

आजागर्विविप्रऋतमितीनाविति तृचे गौरीवितं साम गेयं ॥ १६ ॥

अथैतस्य माध्यन्दिने करणं स्तौति ।

एतद्वै यज्ञस्य स्वस्तनं यद्गौरीवितमेतदायतनो

यजमानो यन्माध्यन्दिनो यद्गौरीवितम्माध्यन्दिने भवति स्वस्तनमेव तद्यजमान आत्मन्धत्ते स्तोमः॥ १७॥

स्वस्तनमेव तद्यजमान आत्मन् आत्मनि यस्मिन् धत्ते धारयति एवं गायत्र्यादि गौरीवितान्तेष्वष्टसु सामसु प्रत्येकं तृचे गीयमानेषु चतुर्विंशतिस्तोत्रीयाः सम्पद्यन्ते तथाच तत्सङ्घातात्मकचतुर्विंशएव स्तोमस्य पवमानस्य स्तोत्रमस्य भवति॥ १७॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

नवमः खण्डः।

अथ दशमः खण्डः।

अथ प्रथमस्य पृष्ठस्य स्तोत्रीयं तृचं दर्शयति।

कयानश्चित्र आभुवदिति कवत्यस्तेन प्राजापत्याः को हि प्रजापतिः प्रजापतेराप्त्यै॥ १॥

कयानश्चित्र इत्याद्यास्तिस्रः स्तोत्रीयाः प्रथमस्य पृष्ठस्तोत्रस्य सम्भवति तास्तु कवत्यः कशब्दोपेताः तेनैव कारणेन प्रजापतिदेवताकाः हि यस्मात्प्रजापतिः कः कशब्दाभिधेयः एव स्वैताः स्तोत्रीयाः प्रजापतेराप्त्यै प्राप्त्यै सम्पद्यन्ते॥ १॥

अथ द्वितीयस्य पृष्ठस्य स्तोत्रीयं तृचं दर्शयति।

माचिदन्यद्विशंसतेत्युत्थानमेतदाशिषोह्येतर्हि ॥२

माचिदन्यद्विशंसतेति तृचः मैत्रावरुणपृष्ठस्तोत्रीयाः अन्यन्माचिद्विशंसत स्तुतशस्त्रान्तरमावृत्तेति शंसनादुपरमस्य प्रतिपाद्यमानत्वात् एतदुत्थानस्य योगान्निर्गमनस्य रूपं एतर्हि एतस्मिन् दशमस्याह्नोऽनुष्ठानकाले एतदाशिषो हि एतदुत्थानमाशीः आशीर्थं फलं येषां तथाविधाः खलु यजमानाः भवन्ति तस्मादेतस्मिन्नहन्ययं तृचः सङ्गत इत्यर्थः ॥ २ ॥

अथ तृतीयस्य पृष्ठस्तोत्रीयं तृचं दर्शयति ।

उदुत्ये मधुमत्तमा इत्युदुत्य उदयनीयेऽहन्येतदाशिषोह्येवैतर्हि ॥ ३ ॥

उदुत्ये मधुमत्तमा इत्याद्यास्तिस्र ऋचो ब्रह्मसाम्नः स्तोत्रीया भवन्ति तास्वोदित्य उच्छब्दयुक्ता उदयनीये दशरात्रस्य समापके दशमेऽहनि सम्बन्धयोग्या गतमन्यत् ॥ ३ ॥

अथ चतुर्थस्य पृष्ठस्य स्तोत्रीयं तृचं दर्शयति ।

तरोभिर्वो विदद्वसुमिति स्तोमो वै तरो यज्ञो विदद्वसुः स्तोमेन वै यज्ञो युज्यते यत्तरोभिर्वो विदद्वसुमित्याह यज्ञमेव तद्युनक्ति ॥ ४ ॥

तरोभिर्वो विदद्वसुमिति तृचोऽच्छावाकपृष्ठसाम्नः स्तोत्रीय-

सृचः सोमो वै देवेषु तरो नामासीदित्यादिना पूर्वं प्रतिपादितत्वात् सोमो वै तरः तरशब्देन सोम एवोच्यते विदद्वसुशब्देन च यज्ञः सोमेन खलु त्रिष्टादिना यज्ञो युज्यते संयुक्तो भवति एवञ्च तरोभिर्वो विदद्वसुमिति यदाह तत्तेन यज्ञमेव सोमेन युनक्ति योजयति ॥ ४ ॥

अथ प्रथमपृष्ठस्तोत्रनिवर्त्तकं साम विधत्ते।

वामदेव्यस्यर्क्षु रथन्तरं पृष्ठं भवति गायत्री वै रथन्तरस्य योनिः स्वायामेव तद्योनौ रथन्तरं प्रतिष्ठापयति ॥ ५ ॥

वामदेव्यस्य साम्नो योनिभूतास्वृक्षु कयानश्चित्र इत्याद्यासु पूर्वं विहितासु रथन्तरं साम पृष्ठस्तोत्रं भवति अथैतासु कयानश्चित्र इत्याद्यासु गायत्रीषु रथन्तरस्य करणं युक्तमित्याह गायत्री खलु रथन्तरस्य योनिः उत्पत्तिकारणं प्रजापतिर्वा एतां गायत्रीं योनिमपश्यत्स आदीधीतेत्यादिना तत्रैव पूर्वं प्रतिपादितत्वात् तत्तथा स्वायां स्वकीयायां रथन्तरं जननकेतावेव योनौ कयानश्चित्र इत्यस्यामृचि तत् साम प्रतिष्ठापयति ॥५॥

अथ ऋक्सामस्तोमानां समुदायमत्वं प्रशंसति।

तेजो वै गायत्री छन्दसां तेजो रथन्तरं साम्नां

तेजश्चतुर्विंशस्तोमानां तेज एव तत्सम्यक् सन्दधात्यपिह पुत्रस्य पुत्रस्तेजस्वी भवति ॥ ६ ॥

तेज एव खलु गायत्री छन्दसाम्मध्ये तथा साम्नाम्मध्ये रथन्तरं तेजः उभयोरग्निना सह प्रजापतिमुखादुत्पत्तेस्तेजस्त्वं स्तोमानां मध्ये चतुर्विंशाख्यस्तोमस्तेजः चतुर्विंशतिसंख्यायोगेन तस्य गायत्रीसम्बन्धात्तस्यास्तु तेजस्त्वमुक्तं तथाच गायत्र्यादीन्येतानि त्रीणि संयोजयन् तेजएव सम्यक् समीचीनं सन्दधाति संयोजयति एवं प्रयोक्तुर्यजमानस्य यः पुत्रः तस्य पुत्रोऽपि तेजस्वी भवति ॥ ६ ॥

अथैतस्य रथन्तरस्य प्रथमस्तोत्रीयायां पूर्वं विहितं प्रस्तावभागपरिमाणमभित्वा शूरेत्यस्यामेव कयानश्चित्र इत्यस्यामपि तथैव भवितव्यमनूद्य स्तौति ।

अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौत्यष्टाशफांस्तत्पशूनवरुन्धे ॥ ७ ॥

अष्टाक्षरेण कयानश्चित्र आभुवदित्यनेन पादेन प्रथमायां स्तोत्रीयायामृचं प्रस्तौति क्रियाग्रहणं कर्त्तव्यमिति कर्मणः संप्रदानसंज्ञा। चतुर्थ्यर्थे षष्ठी यस्मादेवमष्टाक्षरेण प्रथमायाः प्रस्तावस्तस्मात् अष्टाशफान् अष्टौ शफाः खुरा येषां तथाविधान् पशूनवरुन्धे यजमानो लभते ॥ ७ ॥

अथ द्वितीयतृतीययोः स्तोत्रीययोः प्रस्तावभागं पूर्ववदनूद्य स्तौति ।

द्व्यक्षरेणोत्तरयोर्ऋचोः प्रस्तौति द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु प्रतिष्ठापयति ॥ ८ ॥

उत्तरयोः कस्त्वासत्यो मदानामित्यादिकयोर्ऋचोरादितो द्व्यक्षरेण प्रस्तावः कार्य्यः स्पष्टमन्यत् ॥ ८ ॥

अथैतद्रथन्तरं ऋद्धिसाधनत्वेन स्तौति ।

गायत्रं वै रथन्तरं गायत्रछन्दो यद्गायत्रीषु रथन्तरं भवति तेन स्वायाञ्जनतायामृध्नोतीमे वै लोका गायत्री यद्गायत्रीषु रथन्तरं भवतीमानेव तल्लोकान् समाप्योत्तिष्ठन्ति ॥ ९ ॥

रथन्तरं साम गायत्रं वै गायत्र्याः सम्बन्धि प्रजापतेर्वा एतद्गायत्रीमित्यादिना रथन्तरस्य गायत्रीसकाशात् सृष्टेः प्रतिपादितत्वात् तथाच रथन्तरं गायत्रीछन्दस्कं च्छन्दसाम्मध्ये गायत्र्याख्यं छन्दो यस्य सम्बन्धि तत्तथोक्तं द्वादशरात्रिके प्रथमे गायत्रेऽहनि रथन्तरपृष्ठस्तोत्रतया सम्बन्धात् गायत्रछन्दस्कं एवञ्च यद्गायत्रीषु कयानश्चित्र इत्याद्यासु रथन्तरं साम भवति तेन कारणेन स्वीयां स्वकीयायामेव जनतायां जनसमूहे यजमानः ऋध्नोति अभिवृद्धो भवति अपिच इमे वै पृथिव्यादयस्त्रयोलोका

गायत्री त्रिष्टुं त्रिष्टुमायं, समाप्य सम्यक् प्राप्य उत्थानं कुर्वन्तीत्यर्थः ॥ ६ ॥

अथ मैत्रावरुणपृष्ठनिवर्त्तकं साम विधत्ते ।

मैधातिथं भवति ॥ १० ॥

मेधातिथिना दृष्टं साम मैधातिथं तच्चाषिदन्यद्धिसंसतेत्यस्मिंस्तृचे गेयं ॥ १० ॥

अथैतदृषिसम्बन्धप्रदर्शनेन पशुप्राप्तिसाधनमित्याह ।

एतेन वै मेधातिथिः काण्वो विभिन्दुकाद्व्यूर्भी-गा उदसृजत पशूनामवरुध्यै मैधातिथं क्रियते ॥११॥

काण्वः कण्वगोत्रो मेधातिथिर्नाम ऋषिः एतेन साम्ना साधनेन विभिन्दुकात् विभेदनशीलादेतत्संज्ञकादसुरात् व्यूर्भीः विद्धोधस्का गा उदसृजत उदगमयत् तस्मादेतन्मैधातिथं पशुप्राप्त्यर्थमेवेदानीं क्रियते ॥ ११ ॥

अथ तृतीयस्य पृष्ठस्य निवर्तकं साम दर्शयति ।

अभीवर्त्तो ब्रह्मसाम भवत्येकाक्षरणिधनः प्रतिष्ठायै ॥ ११ ॥

अभीवर्त्ताख्यं साम उदुत्ये मधुमत्तमा इत्यस्मिंस्तृचे ब्रह्म-

साम अन्यथा: पृष्ठस्तोत्रनिवर्त्तकं साम कार्य्यं सवाभीवर्त्त: एकाक्षरणिधन: वा २ ३ ४ ५ इति ऋचस्यान्त्यमक्षरं निधनं यस्य स तथोक्त: सोऽयं प्रतिष्ठायै यजमानस्य प्रतिष्ठानाय भवति ॥ १२ ॥

कथं प्रतिष्ठाहेतुतेत्यत आह ।

एकाक्षरा वै वाग्वाच्येव प्रतिष्ठायोत्तिष्ठन्ति ॥१३॥

वागित्येकेनाक्षरेणाभिधेया हि वाक् तस्याश्च प्रतिष्ठाहेतुत्वं राजसु दृष्टं तथाच वाच्येव प्रतिष्ठाया ऋच उत्तिष्ठन्ति ॥ १३ ॥

अथ चतुर्थं पृष्ठस्तोत्रनिवर्त्तकं साम दर्शयति ।

कालेयमच्छावाकसाम भवति ॥ १४ ॥

कालेयाख्यं साम तरोभिर्वो विदद्वसुमित्यस्मिंस्तृचे गीयमानमच्छावाकस्य पृष्ठसाम भवति ॥ १४ ॥

अथास्मिन्नहनि रथन्तरकालेययो: प्रयोगं संहृत्य स्तौति ।

समानलोके वै कालेयञ्च रथन्तरञ्चेयं वै रथन्तरं पशव: कालेयमस्याञ्चैव पशुषु च प्रतिष्ठायोत्तिष्ठन्ति स्तोम: ॥ १५ ॥

कालेयञ्च रथन्तरञ्चैते सामनी समानलोके वै समानस्थाने खलु यस्मिन्नहनि रथन्तरं साम पृष्ठं तत्र कालेयमप्यच्छावाकसामत्वेन प्रयुक्तं यथा रथन्तरपृष्ठे प्रकृतौ ज्योतिष्टोमे ह्यत्र

त्रिके प्रथमेऽहनि च अतोऽस्य दशमस्याह्नो रथन्तरपृष्ठत्वात् कालेयमपि प्रयोज्यं इयं वै सर्वैरनुभूयमाना पृथिव्येव रथन्तरं पशव इव कालेयं तत्साधनत्वात् तथाच अस्यामेव पृथिव्यां पशुषु च प्रतिष्ठाय प्रतिष्ठिताभूता उत्तिष्ठन्ति सत्रादुत्थानं कुर्व्वन्ति एतेषु पृष्ठस्तोत्रेषु पूर्व्वोक्तः चतुर्व्विंश एव स्तोमः कार्य्यः ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथास्मिन् दशमेऽहन्यार्भवपवमानस्य स्तोत्रीयं प्रथमं तच दर्शयति ।

स्वादिष्ठया मदिष्ठयेति गायत्री भवति मदवद्वै रसवत्तृतीयसवनम्मादमेव तद्रसं दधाति ॥ १ ॥

स्वादिष्ठयेति आर्भवस्य स्तोत्रीया शिष्ट सिद्धं ॥ १ ॥

अथास्मिंस्तृचे पूर्व्ववद्गायत्रं साम विधाय तद् ब्राह्मणमप्यति-दिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ २ ॥

सिद्धमेतत् ॥ २ ॥

अथास्मिन्नेव तृचेऽन्यत्साम विधत्ते।

सꣳहितं भवति द्व्यक्षरणिधनं प्रतिष्ठायै प्रतिष्ठायैवोत्तिष्ठन्ति ॥ ३ ॥

संहिताख्यं साम स्वादिष्ठयेत्यस्मिंस्तृचे गेयं तच्च द्व्यक्षरणिधनं द्वे अक्षरे निधनं यस्य तत्तथोक्तं तच्च पादद्वयसाम्यात् प्रतिष्ठायै भवति तथा च प्रतिष्ठायैवोत्तिष्ठन्ति ॥ ३ ॥

अथान्यत्साम विधत्ते।

सफं भवति ॥ ४ ॥

पवस्व मधुमत्तम इत्यस्मिंस्तृचे सफाख्यं साम गेयं ॥ ४ ॥

अथैतस्य सफसंज्ञान्निर्ब्रुवन् लोकत्रयप्राप्तिहेतुतामाह।

सफेन वै देवा इमान् लोकान् समाप्नुवन्यत्समाप्नुवꣳस्तत्सफस्य सफत्वमिमानेवैतेन लोकान् समाप्योत्तिष्ठन्ति ॥ ५ ॥

सफाख्येन खलु साम्ना पुरा देवा इमान् लोकान् समाप्नुवन् संप्राप्ताः यद्यस्मात् अनेन साम्नाप्नुवन् तत्तस्मात् सफाख्यस्य साम्नः सफत्वं सफमिति नाम जातं संपूर्व्वादाप्नोतेर्वर्णव्यात्यया सफशब्दनिष्पत्तिरित्यर्थः ततश्चेदानीन्तना अपि यजमानाः एतेन सफेनेमानेव लोकान् समाप्य सम्यक्प्राप्य यज्ञादुत्तिष्ठन्ति ॥ ५ ॥

अथान्यस्मिन् सामान्तरं विधाय तत् स्तावकं ब्राह्मणमतिदिशति ।

रौहितकूलीयं भवति यदेव रौहितकूलीयस्य ब्राह्मणं ॥ ६ ॥

रौहितकूलीयाख्यं साम इन्द्रमच्छेत्यस्मिंस्तृचे गेयं तस्य च रौहितकूलीयस्य एतेन वै रौहिताभ्यां रौहितकूल आजिमजयदित्यादिकं यद्ब्राह्मणं पूर्व्वमाम्नातं तदस्यापि रौहितकूलीयस्य ब्राह्मणं ॥ ६ ॥

अथ सामद्वयं विधत्ते ।

श्यावाश्वान्धीगवे भवतः समीच्यौ विराजौ दधात्यन्नाद्याय ॥ ७ ॥

श्यावाश्वान्धीगवे सामनी भवतः ते च प्रकृतौ पुरोजिती वो अन्धस इत्यस्मिंस्तृचे गीयेते तत्र च पद्यावा अन्या विराडन्यान्येति विराट् द्वयं पूर्व्वमुक्तं एवञ्चैते सामनी प्रयुञ्जानः समीच्यौ सङ्गते ते एवं विराजौ दधाति किमर्थमन्नाद्यर्थं ॥ ७ ॥

अथैतयोराधारभूताः तृचो विधत्ते ।

पिपीलिकमध्यासु स्तुवन्ति ॥ ८ ॥

पर्व्वेषु प्रधन्व वाजसातय इत्याद्यास्तिस्रोऽनुष्टुभः पिपीलिक-

मध्यास्त्रिपदाः प्रथमतृतीयौ पादौ द्वादशाक्षरौ मध्यमोऽष्टाक्षर इति पिपीलिकमध्या मध्यं यथा अल्पीयो भवति एवं न्यूनाक्षरत्वेन मध्यमपादस्याल्पीयस्त्वात् पिपीलिकमध्या तासु स्वाशास्त्रान्धीगवाभ्यां स्तुवन्ति ॥ ८ ॥

अथैतासु गानं स्तौति ।

इन्द्रो वृत्रं हत्वा नास्तृषीति मन्यमानः परां परावतमगच्छत्स एतामनुष्टुभं व्यौहत्तामध्ये व्यवासर्पदिन्द्रगृहे वा एषोऽभये यजतेऽभय उत्तिष्ठति यएवं विद्वानेतासु स्तुते ॥ ९ ॥

इन्द्रो वृत्रमसुरं हत्वा नास्तृपि नाहिंसिषं वृत्रमिति मन्यमानः मन्वानः तस्माद्भीतः सन् परां परावतं पलायमानोऽत्यन्तं दूरं प्राप्नोत् गत्वा च स इन्द्रः एतां पिपीलिकमध्यामनुष्टुभं व्यौहत् विशेषेणाहृतवान् ततस्तस्यामध्ये व्यवासर्पत् अभयार्थं प्राविशत् अतो यो यजमानः एवं ब्राह्मणार्थं विद्वाञ्जानन् एतासु पिपीलिकमध्यानुष्टप्सु एताभ्यां सामभ्यां स्तुते एषोऽभये भयरहिते इन्द्रगृहे यजते तथा अभय एव स्थान उत्तिष्ठति ॥ ९ ॥

अथ सामान्तरं विधत्ते ।

यज्ञायज्ञीयनिधनꣳ सौहविषं भवति यज्ञायज्ञीयादेव तत्तृतीयसवने न यन्ति ॥ १० ॥

यज्ञायज्ञीयस्य वागिति निधनं तदेव निधनं यस्य तथाविधं यौद्धविधं साम परिप्रधन्वेत्यस्मिंस्तृचे गेयं तथाच तृतीयसवने यज्ञायज्ञीयादेव साम्नो न यन्ति नापगच्छन्ति तृतीयसवनं हि यज्ञायज्ञीयस्य स्थानं तच्चैतस्मिन्नहनि माध्यन्दिन एव पवमाने प्रयुक्तं तृतीयसवनेऽपि तदेकदेशस्य निधनस्य प्रयोगात् यज्ञायज्ञीयमेव तृतीयसवने कृतं भवति ॥ १० ॥

अथान्यत्साम विधत्ते ।

वाजजिद्भवति ॥ ११ ॥

वाजजिदाख्यं साम सूर्य्यस्येव रश्मय इत्यस्मिंस्तृचे गेयं ॥११॥

वाजोऽन्नं जनयेत्यनेनेति निर्वचनमभिप्रेत्य स्तौति ।

सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्वं वा एते वाजं जयन्ति ये दशममहरागच्छन्त्यन्नं वै वाजोऽन्नाद्यस्यावरुध्यै ॥ १२ ॥

एतदिन्द्रायेन्द्रो मरुत्वत इति मरुत्वत्यो गायत्र्यो भवन्तीत्यस्मिन् खण्डे व्याख्यातं ॥ १२ ॥

अथास्य साम्नो निधनपरिमाणं विधाय स्तौति ।

दशाक्षरन्निधनमुपयन्ति दशरात्रस्य धृत्यै दशाक्षरा विराड्वैराजमन्नमन्नाद्यस्यावरुध्यै ॥ १३ ॥

दशाक्षराणि निधनानि यस्य तत्तथोक्तं तच्च दशाक्षरनि-
धनं अक्षरशो दशर. तस्य दशानामन्नां धारणाय भवति शिष्टं
सिद्धं ॥ १३ ॥

अथैतस्याधारभूतौ विधाय स्तौति ।

**सूर्य्यवतीषु स्तुवन्त्यतो वै सूरोऽन्न एतद्दशमम-
हामन्नएवं तदन्तेन स्तुवते प्रतिष्ठायै ॥ १४ ॥**

सूर्यस्येव रश्मय इत्याद्यासु सूर्य्यशब्दयुक्तासु तिसृषु ऋक्षु
स्तुवन्ति शिष्टं सुषमिद्धो न आवहेत्याप्रिय आज्यानीत्यत्र व्या-
ख्यातं ॥ १४ ॥

तथैवास्येव लिङ्गद्वयमनूद्य स्तौति ।

**उपवत्यो भवन्ति प्रतिष्ठायै परिवत्यो भवन्ति स-
र्वस्य पर्य्याप्त्यै ॥ १५ ॥**

उपोमतिः पृच्यते सिच्यते मधुमित्युपशब्दयोगादेता उपवत्यो
भवन्ति उपशब्दस्योपगमनद्योतक इति ता यजमानस्य प्रति-
ष्ठायै भवन्तीति तथा मधुमां द्रप्सः परिवारमर्षतीति परिशब्द-
वत्यः परिवत्यो भवन्ति तथाच सर्वस्य फलस्य पर्य्याप्त्यै संपूर्ण-
तायै ॥ १५ ॥

एवं गायत्र्यादि वाजजिदन्तेष्वष्टसु सामसु प्रत्येकं तृचे

गीयमानेषु यः स्तोमः तस्मद्युते स एवास्य पवमानस्य स्तोत्रस्य स्तोम इत्याह ।

चतुर्विंशएव स्तोमो भवति तेजसे ब्रह्मवर्चसाय ॥ १६ ॥

स्पष्टोऽर्थः ॥ १६ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथास्मिन्नहन्यग्निमं स्तोत्रीयं दर्शयति ।

विराट्सु वामदेव्यमग्निष्टोमसाम भवति शान्त्यै क्लृप्त्यै ॥ १ ॥

अग्निन्नरोदीधितिभिररण्योरित्याद्यासु विराट्सु वामदेव्यं गीयमानं अग्निष्टोमसाम भवति तच्च शान्त्यै परितापशमनाय क्लृप्त्यै कल्पनाय सामर्थ्याय च भवति ॥ १ ॥

तथैतस्मिन् स्तोत्रे सहत्सामस्तोमान् संहृत्य स्तौति ।

सद्वै वामदेव्यꣳ साम्नाꣳ सद्विराट् छन्दसाꣳ सत्त्रयस्त्रिꣳशः स्तोमानाꣳ सतामन्तान् सन्धायोत्तिष्ठन्त्यपीह पुत्रस्य पुत्रः सत्त्वमश्नुते ॥ २ ॥

साम्नाम्मध्ये वामदेव्यं साम यत् उत्कृष्टं तथा विराट् छन्दसां मध्ये स्तोमानाम्मध्ये त्रयस्त्रिंश एवञ्चैतान् सह प्रयुञ्जानः सतामुत्कृष्टानामन्तान् पर्य्यन्तान् सन्धाय संहृत्य एकीकृत्य सत्रादुत्तिष्ठन्ति अपि वास्य यः पुत्रः तस्य पुत्रोऽपि सत्त्वं सद्भावमश्नुते प्राप्नोति ॥ २ ॥

यथास्य दशरात्रस्य समापने ब्रह्मवादिभिः कृतञ्चोद्यमुद्भाव्य परिहरति ।

ब्रह्मवादिनो वदन्ति यतः सत्रादुदस्थाता ३ स्थिता ३दिति यद्यत इति ब्रूयुरप्रतिष्ठाना अप्रजसो भविष्यन्तीत्येनान् ब्रूयाद्यत् स्थितादिति ब्रूयुः स्थायुकैषाꣳ श्रीर्भविष्यति न वसीयाꣳसो भविष्यन्तीत्येनान् ब्रूयात् पूर्णादेव पूर्णमभ्युदस्थामेति ब्रूयुः ॥ ३ ॥

ब्रह्मवादिनो वेदार्थचिन्तकाश्चोदयन्ति किमेते यजमानाः यतो गच्छतः सत्राद्दशरात्रादुदस्थाता उत्तिष्ठन्ति उत स्थितात् सत्रादिति यद्यपि यतो गच्छतः सत्रादुदस्थाता इति ब्रूयुः तथा च गमनशीलाद्यज्ञादुत्थितत्वात् यजमाना अप्रतिष्ठानाः प्रतिष्ठानरहिताः गन्तुकामाः अप्रजसः प्रजारहिताश्च भविष्यन्तीत्येनान् यजमानानभिज्ञः प्रतिब्रूयात् यद्यदि स्थितान्निश्चलात् सत्रादुदस्थातेति ब्रूयुस्तर्ह्येषां श्रीः स्थायुका स्थानशीला भविष्यति नोत्तरोत्तरं वर्द्धते अत एतेन वसीयांसो वसुमत्तरास्ते

भविष्यन्तीत्येनान् यजमानान् प्रतिब्रूयात् एवं पक्षद्वयेऽपि दोषदर्शनात् पूर्णादेव पूर्णमभ्युदस्यामेति ब्रूयुः ॥ ३ ॥

एतद्व्याचष्टे ।

एते वै पूर्णात् पूर्णमभ्युत्तिष्ठन्ति ये वामदेव्येन स्तुत्वोत्तिष्ठन्ति ॥ ४ ॥

एते खलु पूर्णात् अधिकात् पूर्णमधिकमभिलक्ष्य सत्रादुत्तिष्ठन्ति ये वामदेव्येन साम्ना स्तुत्वोत्तिष्ठन्ति ॥ ४ ॥

वामदेव्यस्य च पूर्णत्वमुपपादयति ।

अन्तरिक्षं वै वामदेव्यमन्तरिक्षेणेदꣳ सर्वं पूर्णं ॥ ५ ॥

अन्तरिक्षेण च इदं सर्वं जगत् पूर्णं सर्वव्यापकान्तरिक्षात्मकत्वात् वामदेव्यस्य पूर्णत्वमित्यर्थः ॥ ५ ॥

एवं साम्नः समृद्धिहेतुमुक्त्वा स्तोमस्यर्चां समृद्धिहेतुतामाह ।

एष वै समृद्धः स्तोमो यत् त्रयस्त्रिꣳशस्त्रयस्त्रिꣳशदक्षरासु समृद्धावेव प्रतितिष्ठन्ति ॥ ६ ॥

यस्त्रयस्त्रिंशः स्तोमः एष वै खलु समृद्धः पूर्णः स्तोमः त्रिवृदादिभ्यः पञ्चभ्यः स्तोमेभ्योऽधिकत्वात् स च त्रयस्त्रिंशः स्तोमः त्रयस्त्रिंशदक्षरास्त्वग्निर्नक्षर इत्याद्यासु विराट्सु निष्पद्यते तत्राच समृद्धावेव यजमानाः प्रतितिष्ठन्ति ॥ ६ ॥

अथैता ऋचः सर्व्वछन्दोरूपेण स्तौति।

सर्व्वेषां वा एतास्छन्दसाꣳ रूपं यत्त्रिपदास्तेन गायत्र्यो यदेकादशाक्षराणि पदानि तेन त्रिष्टुभो यत् द्वादशाक्षरं पदं तेन जगत्यो यत् त्रयस्त्रिꣳशदक्षरास्तेन विराजस्तेनो अनुष्टुभो न ह्येकस्मादक्षराद्विराधयन्ति॥ ७॥

एता अग्निन्नरोदीधितिभिरित्याद्याः सर्व्वेषां गायत्र्यादीनां छन्दसां रूपं यद्यस्मादेतास्त्रिपदास्तेन गायत्र्यो भवन्ति यद्यस्मादासां एकादशाक्षराणि पदानि एकादशाक्षराः पादाः तेनैतास्त्रिष्टुभः यद्यस्मात् द्वादशाक्षरं पदं अक्षरव्यूहेन प्रथमः पादो द्वादशाक्षरो भवति तेनैता जगत्यः यद्यस्मादेतास्त्रयस्त्रिंशदक्षराः तेनेताविराजः तेनैव चानुष्टुभः तत्रानुष्टुप् द्वात्रिंशदक्षराणामनुष्टुप्त्वमिति नह्येकस्मादिति न खल्वेकस्मादक्षरादधिकात् न्यूनाद्वा छन्दांसि विराधयन्ति विभिद्यन्ते अतो अधिकमप्येकमक्षरमासामनुष्टुप्त्वं न चान्तर इत्यर्थः॥ ७॥

अथैतस्य स्तोत्रस्य विधिस्थितं पूर्व्वं सुतं स्तोमं विधाय स्तौति।

त्रयस्त्रिꣳशएव स्तोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः॥ ८॥

अस्याग्निष्टोमसाम्नः त्रयस्त्रिंशएव स्तोमः कार्य्यो न प्रकृतस्त्रिवृत्‌ त्रयस्त्रिंशत्सङ्ख्याकासु देवतासु खलु एष त्रयस्त्रिंशः प्रतिष्ठितः तस्मात्‌ त्रयस्त्रिंशएवान्ततः प्रयोक्तव्य इत्यर्थः।

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्‌।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ८॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य द्वादशः खण्डः।

पञ्चदशाध्यायः समाप्तिमगमत्‌।

षोडशोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

एवं द्वादशाहस्य व्यूढस्य दशरात्रस्य स्तोमक्लृप्तिरुक्ता समूढस्य तु कल्पकारेण क्लृप्ताऽवगन्तव्या स च व्यूढो दशरात्रो हीनात्मकः सत्रात्मकश्च उभयलिङ्गसद्भावात् एकोदीक्षेतैकस्यैव दीक्षाविधानं द्वादशाहेन यजत इति यजतिचोदना अतिरिक्तं वा एतदतिरिक्तेन स्तुवन्ति यद्गौरीवितेनाहीनानिति अहीनत्वस्य सिद्धवदनुवादः यजमानं वा अनुप्रतितिष्ठन्त्युद्गाता प्रतितिष्ठतीति ऋत्विग्यजमानयोर्भेददर्शनं यजमानमेवैतया वर्द्धयन्तीति एकस्यैव यजमानस्य वर्द्धनं ध्वस्मे वै पुरुषन्तीतरन्तपुरुमीढाभ्यां वैददश्विभ्यां सहस्राण्यदित्सतामिति दक्षिणाप्रवाद इत्यादीनि बहून्यहीनलिङ्गानि स्तोमो युज्यते सन्ति येभ्योऽहर्भ्यः यतः सत्रादुदस्थाता २ स्थिता २ इति सत्रसंशब्दनं सर्व्वं वा एतेवाजञ्जयन्ति ये दशममहरागच्छन्तीति येनैव रूपेण प्रयन्ति तमभ्युद्यन्तीत्यादीनि बहुकर्तृकत्वप्रतिपादनानि बहुशः सत्रलिङ्गानि यान्युपलभ्यन्ते तस्मादेवमुभयलिङ्गसद्भावात् सत्रा-

हीनात्मको दशरात्रः सोऽयं प्रायणीयोदयनीयावतिरात्राभ्यां संयुक्तो द्वादशाहाख्यः क्रतुर्भवति स च द्वादशाहो विधास्यमानानां द्विरात्रप्रभृतीनां अहीनानामेकादशरात्रादीनां सत्राणाञ्च प्रकृतिरिति सर्व्वप्रकृतेरग्निष्टोमस्य विधानानन्तरं गतैरध्यायैर्विहितः एवं प्रकृतिभूतावग्निष्टोमद्वादशाहौ येनैव क्रमेण विहितौ तेनैव क्रमेणातः परं तद्विकृतयो विधास्यन्ते तत्र प्रथममग्निष्टोमविकृतिभूतानेतान् विधित्सुस्त्रिकद्रुकाख्यानां तयाणामेकाहानां प्रथमस्य ज्योतिरिति संज्ञां निर्वक्ति।

प्रजापतिर्वा इदमेक आसीन्नाहरासीन्न रात्रिरासीत्सोऽस्मिन्नन्धे तमसि प्रासर्पत्स ऐच्छत्स एतमभ्यपद्यत ततो वै तस्मै व्यौच्छद्व्युष्टिर्वा एष आह्रियते यद्वै तज्ज्योतिरभवत्तत् ज्योतिषो ज्योतिष्ट्वं ॥ १ ॥

प्रजापतिः प्रजानामधिपतिः सर्व्वकारणभूतः स्रष्टा इदं दृश्यमानं यज्जगदस्ति एतदात्मकः एक एव पुरा आसीत् पुरातनस्य प्रपञ्चस्य प्रविलीनत्वात् अद्यतनस्य चासृष्टत्वात् अद्वितीयः प्रजापतिरेक एवावर्त्तत इत्यर्थः एवञ्चाहोरात्रविभागहेतोः सूर्य्यस्याप्यभावात् अहोरात्रविभागोऽपि नासीत् एवं प्रकाशाभावात् स प्रजापतिः अस्मिन्नन्धे तमसि अन्धत्वापादके दृष्ट्याच्छादके अन्धकारे प्रासर्पत् प्रावर्त्तत स च तमोनिरोधकं तेज ऐच्छत् अकामयत स च कामयमानः एतं ज्योतिराख्यं यज्ञ-

मभ्यपद्यत अभिप्राप्नोत् ततोऽनन्तरं तस्मै प्रजापतये व्यौच्छत् तमोऽपागच्छत् तस्माद्व्युष्टिर्विवासनं तमसो निवृत्तिः एतदात्मक एव एष क्रतुराह्रियते यस्मात्तदानीं ज्योतिस्तमोनिवर्त्तकं तेजोऽभवत् तस्मादस्य ज्योतिषः ज्योतिराख्यस्य क्रतोः ज्योतिष्ट्वं ज्योतिःसंज्ञकत्वं ज्योतिर्नाम सम्पन्नमित्यर्थः एवञ्च स स्वर्गः स्यात् सर्व्वान् प्रत्यविशिष्टत्वादिति न्यायेन स्वर्गकामः एतेन ज्योतिषा एकाहेन यजेतेति विधिरुन्नेतव्यः प्रकृतिभूतस्य ज्योतिष्टोमस्य प्रकरणात् अन्यत्राम्नातत्वादेतत् ज्योतिःसंज्ञं कर्मान्तरं यथा कुण्डपायिनामयने मासमग्निहोत्रं जुह्वतीति मासाग्निहोत्रं नित्याग्निहोत्रात् कर्मान्तरं तथेति द्रष्टव्यं ॥ १ ॥

अथैतस्य ज्योतिष्टोमविकृतेः स्तुत्यर्थं सर्व्वप्रकृतेर्ज्योतिष्टोमस्य प्रथमानुष्ठानं स्तौति।

एष वाव प्रथमो यज्ञानां य एतेनानिष्ट्वाथान्येन यजते कर्त्तपत्यमेव तज्जीयते वा प्रवामीयते ॥ २ ॥

योऽयमिदानीं ज्योतिःसंज्ञ एकाहो विधीयते एष एव यज्ञानां प्रथमः अन्येषां सोमयागानां प्रथमोऽनुष्ठेयः एतदुक्तं भवति प्रजापतिरकामयत बहुः स्यां प्रजायेयेति स एतमग्निष्टोम मपश्यदित्यादिभिरध्यायैर्योऽयं सर्वप्रकृतिभूतोऽग्निष्टोमो विहितः तत्सदृश एष ज्योतिराख्यः एकाह इति एतेन प्रकृतिभूतेन ज्योतिष्टोमेनाग्निष्टोमेनानिष्ट्वा अथान्येन यज्ञक्रतुना यजते तत् स यज-

मानः कर्म्मपत्यं कर्म्मपतनं यथा भवति तथैव जीयते ज्यावयोहानाविति धातुः अथवा प्रमीयते म्रियते तस्मादन्येभ्यो यज्ञेभ्यः पूर्वमेष एवानुष्ठेयः ॥ २

एवं विपक्षे बाधोपन्यासमुखेन प्राथम्यमुक्त्वा अथान्येषां यज्ञानां तज्जन्यत्वेन पश्चाद्भावित्वात्तज्जनकत्वेन चैतस्य प्रथमानुष्ठानं सदृष्टान्तमुपपादयति।

यथा वा इदमग्नेर्ज्जातादग्नयो विह्रियन्त एवमेतस्मादध्यन्ये यज्ञा विह्रियन्ते ॥ ३ ॥

इदं इदानीं यथा वै यथा खलु जातात्रिर्मथनादुत्पन्नादग्नेः अन्ये अग्नय आहवनीयाद्याः पश्चाद्विह्रियन्ते विभज्यन्ते तं देशमाह्रियन्ते एवं एतस्मात् ज्योतिष्टोमात् अधि ऊर्द्धं अन्ये तद्विकृतयो यज्ञा विह्रियन्ते विस्तार्य्यन्ते अतः सर्व्वेषामुत्पादकत्वादेष एव प्रथमोऽनुष्ठेयः ॥ ३ ॥

ज्योतींषि स्तोमा यस्यासौ ज्योतिष्टोम इति हि नामनिर्वचनं तत्सिद्ध्यर्थं त्रिवृदादीनां स्तोमानां ज्योतीरूपत्वमाह।

यो हि त्रिवृदन्यं यज्ञक्रतुमापद्यते सतन्दीपयति यः पञ्चदशः सतं यः सप्तदशः सतं य एकविंशः सतं ॥ ४ ॥

यो हि त्रिवृत् स्तोमः अन्यं सर्वमकृतेर्ज्योतिष्टोमात् अन्यं

सोमयागमापद्यते प्राप्नोति स्तोमस्तं सोमयागं दीपयति एव-मुत्तरत्रापि योज्यं त्रिवृदादीनां मध्ये एकैक एव सोमयागं निर्वर्त्तयितुं शक्त इत्यर्थः अतएव दशरात्रे प्रथमादिष्वहःसु त्रि-वृदादि एकैक एव स्तोमः क्रमेण विहितः॥ ४॥

नन्वेवं दीपकत्वादस्त्वेतेषां ज्योतीरूपत्वं तथापि ज्योति-ष्टोमस्य त्रिवृदादिज्योतिः स्तोमचतुष्टयसाध्यत्वादेकैकस्तोमकानां ज्योतिष्टोमता नस्यादित्यत आह।

एतत्तद्यदाहुरेको यज्ञ इत्येतद्धि सर्वे ज्योति-ष्टोमा भवन्ति॥ ५॥

त्रिवृदादीनामेक एव यज्ञोयज्ञसाधन इति यदाहुर्ब्रह्मवा-दिनः तदेतदेव यत्सामर्थ्यं यो हि त्रिवृदन्यं यज्ञक्रतुमित्यादिना त्रिवृदादीनां प्रत्येकं प्रतिपादितं एतर्ह्मि एकैकस्य स्तोमस्य प्रत्येकं यज्ञसाधनत्वात् एकस्तोमका एव सर्व्वे ज्योतिष्टोमाः ज्योतिष्टोमशब्दवाच्या भवन्ति॥ ५॥

एवं त्रिवृदादीनां प्रत्येकं ज्योतीरूपत्वेन ज्योतिष्टोमनिष्पा-दकत्वमभिधाय अथ प्रकृतिभूते ज्योतिष्टोमे तेषां समावेश-विशेषमाह।

अस्थूरिर्वा एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमौ सवनं वहतस्त्रिवृत्पञ्चदशौ प्रातःसवनं पञ्चदश-

सप्तदशौ माध्यन्दिनꣳ सवनꣳ सप्तदशैकविंशौ तृतीयसवनं ॥ ६ ॥

सन्ततो वक्ष्यमाणप्रकरणे अन्योन्यासंश्लिष्टस्तोमकाः एष ज्योतिष्टोमोऽस्थूरिर्वै एकेनाश्वेन युक्तोरथः स्थूरिः तद्विलक्षणो द्वाभ्यामश्वाभ्यान्नीयमानो रथोऽस्थूरिः तत्सदृशोज्योतिष्टोम इत्यर्थः तथाहि द्वौ द्वौ स्तोमौ त्रिवृदादिकौ संहतौ अस्य ज्योतिष्टोमस्यैकैकं सवनं वहतः कतमं कतमौ वहत इति उच्यते त्रिवृत्पञ्चदशश्च स्तोमौ प्रातःसवनं वहतः तत्र वहिष्पवमाने त्रिवृत्स्तोमः चतुर्ष्वाज्येषु पञ्चदशसवनयोः सान्तत्यार्थं अनुवर्त्तमानः पञ्चदशः सप्तदशश्च इत्येतौ स्तोमौ माध्यन्दिनं सवनं वहतः माध्यन्दिने पवमानस्तोत्रे पञ्चदशः पृष्ठस्तोत्रेषु सप्तदशः तथैव सप्तदशैकविंशौ तृतीयसवनं वहतः आर्भवपवमाने सप्तदशएकविंशोऽग्निष्टोमसाम्नीत्यर्थः ॥ ६ ॥

एवं ज्योतिःशब्दवाच्यानां समावेशमुक्त्वा परिच्छिन्नदक्षिणावत्त्वादपि ज्योतिष्टोम एव प्रथमः कार्य्य इत्याह ।

या मितदक्षिणैव स्यादेष एव कार्य्य इयं वै ज्योतिरियममितस्य यन्त्रिकैषा वा एतं यन्तुमर्हति ॥ ७॥

या यज्ञक्रिया मितदक्षिणा एव स्यात् परिमितदक्षिणैव भवेत् एष एव यज्ञः कार्य्योऽनुष्ठेयः नन्वेवमपरिमितस्यानुष्ठानात् अपरिमितं फलं नस्यादित्यत आह इयं वै सर्व्वैः परि-

दृश्यमाना इयमेव पृथिवी ज्योतिः पृथिव्यात्मको ज्योतिष्टोम इत्यर्थः इयञ्च पृथिवी स्वयमपरिमितत्वात् अमितस्य अपरिमितस्य यागस्य फलस्य वा यन्त्रिका नियन्त्री एतदेव पपाद्यते एषा वा इति ॥ ७ ॥

अथैनं ज्योतिष्टोमं स्तोत्रीयासङ्ख्यया स्तौति ।

तस्य नवतिशतꣳ स्तोत्रीयास्तासां या अशीतिशतं ताः षट्त्रिꣳशिन्यो विराजः षड्तव ऋतुष्वेव विराजा प्रतितिष्ठति ॥ ८ ॥

तस्य ज्योतिष्टोमस्य विहितस्तोमानुसारेण नवतिशतं नवत्युत्तरशतसङ्ख्यास्तोत्रीयाः सम्पद्यन्ते प्रातःसवने पञ्चसु स्तोत्रेषु एकोनसप्ततिस्तोत्रीयाः माध्यन्दिनसवनेऽप्युत्तरा अशीतिस्तोत्रीयाः तृतीयसवने त्वष्टात्रिंशदिति नवतिशतस्य सम्पत्तिः तासां स्तोत्रीयाणाम्मध्ये या अशीतिशतं अशीत्युत्तरशतसंख्याकाः स्तोत्रीयाः त्रिंशिन्यस्त्रिंशदक्षरास्त्रिंशत्सङ्ख्यया विभज्यमानाः षट् विराजो भवन्ति वसन्ताद्या ऋतवश्च षट् तस्मादृतुष्वेव एकैकया विराजा प्रतितिष्ठति यजमानः प्रतिष्ठितो भवति ॥ ८ ॥

अथावशिष्टाभिः स्तोत्रीयाभिः स्तौति ।

अथ या दशैषा वा आत्मन्वा विराडेतस्यां वा इदं पुरुषः प्रतिष्ठितः ॥ ९ ॥

अथाशीतिशतादनन्तरं या दशस्तोत्रीया एष खल्वात्मस्था-नसम्बन्धिनी देहसम्बद्धदशेन्द्रियरूपा विराट् एतस्यां खलु विराजि अयं पुरुषः आत्मा प्रतिष्ठित आश्रितः ॥ ९ ॥

अथास्मिन् ज्योतिष्टोमदक्षिणात्वेन दातव्यानि द्रव्याणि प्रदर्श्य स्तौति ।

गौश्चाश्वश्चाश्वतरश्च गर्द्दभश्चाजाश्चावयश्च व्रीह-यश्च यवाश्च तिलाश्च माषाश्चैतस्यामेव विराजि प्रति-तिष्ठति ॥ १० ॥

एवं गवादीनि दशद्रव्याणि दातव्यानीत्यर्थः यदुक्तं सूत्र-कारेण स्वतन्त्रस्य ज्योतिष्टोमस्य संस्थाविकल्पा अग्निष्टोम-मुक्थ्यतातिरात्रमितीति तस्य चायमर्थः योऽयं मूलसंस्तुतः पुरु-षस्यावश्यको ज्योतिष्टोमः स अग्निष्टोम उक्थ्यो वा अतिरात्रो वा स्यात् इति विकल्पः ॥ १० ॥

एवं प्रथमप्रयोज्यानां त्रयाणाम्मध्ये द्वयोरेवैतद्दक्षिणाविधा-नमिति तेनैव सूत्रकृतोक्तं ।

तस्य द्वादशꣳ शतं दक्षिणाः ॥ ११ ॥

तस्य अनतिरात्रस्य द्वादशं शतं दक्षिणा इति ॥ ११ ॥

सोत्रीयावद्दक्षिणामप्यनुवुच्य स्तौति ।

वीरहा वा एष देवानां यः सोममभिषुणोति याः

शतं वैरं तद्देवानवदयतेऽथ या दशदश प्राणाः प्राणाꣳ स्ताभिस्पृणोति यैकादश्यात्मानं तया या द्वादशी सैव दक्षिणा ॥ १२ ॥

यो यजमानः सोममभिषुणोति एष देवानां मध्ये वीरहा वै वीरोवीर्य्यवान् यः सोमः तस्य हन्ता खलु तस्मादस्य वीर-हन्तृतालक्षणो दोषो जायत इत्यर्थः तत्र याः शतं शतसंख्या-भावः तत्तेन शतेन वैरं वीरहननलक्षणं पापं देवान् प्रत्यनव-दयते निरस्यति अथ शतादधिकान् दश या गावः ताभिः प्राणान् स्पृणोति प्रीणयति दशसंख्या हि प्राणा नव वै पुरुषे प्राणाः नाभिर्दशमीति हि ब्राह्मणं अथ या एकादशी गौः तयात्मानं स्पृणोति अथ या द्वादशी द्वादशसंख्यापूरणी सैव यज्ञस्य दक्षिणा ॥ १२ ॥

अथैतद्दक्षिणावत्त्वं स्तौति ।

श्लेष्म वा एतद्यज्ञस्य यद्दक्षिणा नवा अश्लेष्मा रथो वहत्यथ यथाश्लेष्मवता यं कामं कामयते तम-भ्यश्नुत एवमेतेन दक्षिणावता यं कामं कामयते तमभ्यश्नुते ॥ १३ ॥

* पुरुषः प्राप्नोति एवमेतेन दक्षिणा च यागेन यत् फलं कामयते तत् फलं प्राप्नोति ॥ १३ ॥

* अत्र भाष्यं पतितमनुमीयते ।

अथ प्रकारान्तरेण दक्षिणादानं स्तौति।

शुभो वा एता यज्ञस्य यद्दक्षिणा यद्दक्षिणावता यजते शुभमेवास्मिन्दधाति ॥ १४ ॥

यत् या दक्षिणा एता यज्ञस्य शुभो वै शोभाहेतवोऽलङ्काराः तस्मात् यत् यो दक्षिणावता यागेन सोमेन यजते तस्मिन् यज्ञे शुभं शोभाहेतुमलङ्कारमेव दधाति निदधाति स्थापयति इत्थं सर्व्वप्रकृतिभूतस्य ज्योतिष्टोमस्य स्तुतिः कृता सैव प्रकृतिवद्विकृतिः कर्त्तव्येत्यतिदेशवाक्येन ज्योतिष्टोमविकृतौ ज्योतिराख्येऽस्मिन्नेकाहेऽतिदिश्यमाना अस्यैव स्तुतिर्भवति यद्यप्येतत्सर्वं तत्प्रकरण एव वक्तव्यं तथापि विधास्यमानानां विकृतीनां तत्प्रकृतित्वं द्योतयितुं तदुपन्यास इत्यदोषः ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य
प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

अथान्यमेकाहं विधत्ते।

अथैष गौः ॥ १ ॥

अथानन्तरं गवाख्योऽन्य एकाहोऽभिधीयते इति शेषः ॥ १ ॥

तत्र भ्रातृव्यजयहेतुत्वं वक्तुमाह।

गवा वै देवा असुरानेभ्यो लोकेभ्योऽनुदन्तैभ्यो लोकेभ्यो भ्रातृव्यन्नुदते य एवं वेद ॥ २ ॥

गवा वै गवाख्येनैकाहेन खलु देवाः पुरा असुरानेभ्यो लोकेभ्यः पृथिव्यादिभ्यस्त्रिभ्यो लोकेभ्यः सकाशात् अनुदन्त प्रेरितवन्तः अपाक्रमयन् स्पष्टमन्यत् ॥ २ ॥

अथास्य गौरितिसंज्ञां निर्वक्ति ।

यद्वै तद्देवा असुरानेभ्यो लोकेभ्यो गोवयंस्त-द्गोर्गोत्वं ॥ ३ ॥

तत्तदानीन्तनसमये यद्वै यस्मादेव असुरानेभ्यो लोकेभ्यो गोवयन् गुप्तांस्तिरोहितान् कुर्व्वन् तत्तस्माद्गोः गवाख्यैकाहस्य गोत्वं गौरितिनाम सम्पन्नं गोवयतिः तिरोधानार्थः छान्दसो धातुः तस्य च क्विपि पृषोदरादित्वात् गोभाव इति श्रुत्यभिप्रायः यद्वा गमेर्डो इति डोप्रत्यये यथा गमेर्गोशब्दनिष्पत्तिः एवं गोवयतेरित्यौणादिको डोप्रत्ययः ॥ ३ ॥

अथैतद्वेदनफलमाह ।

गोवयति पाप्मानं भ्रातृव्यं य एवं वेद ॥ ४ ॥

पाप्मानं पापरूपं भ्रातृव्यं गोवयति तिरोहितं करोति. य एवमुक्तं ब्राह्मणार्थं जानाति इत्थं वाक्यदोषपर्य्यालोचनया भ्रातृव्यवाननेन गवा यजेतेत्युक्तं भवति ॥ ४ ॥

अथैतस्य एकाहस्य स्तोमक्लृप्तिरभिधीयते, तत्र बहिष्य-वमानस्य स्तोमं विधाय स्तौति।

तस्य पञ्चदशं बहिष्पवमानं वज्रो वै पञ्चदशो वज्रमेव तत्पुरस्तान्निदधाति तेन विजयते ॥ ५ ॥

तस्य गोरेकाहस्य बहिष्पवमानं पञ्चदशं पञ्चदशस्तोमकं भवति स च पञ्चदशो वै वज्रो वज्ररूप एव इन्द्रेण सहोत्पत्ते-रैन्द्रत्वात् वज्रस्य च तदायुधत्वात् पञ्चदशस्य वज्रत्वोपचारः तत्तथा च वज्रमेव पुरस्तात् पूर्व्वभागे यज्ञस्यादौ निदधाति स्थाप-यति तेन च वज्रेण परान् विजयते विपराभ्याञ्जेरित्यात्मने-पदं ॥ ५ ॥

अथैतस्य पञ्चदशस्य प्राथम्यं प्रकारान्तरेण स्तौति।

पशुस्तोमो वा एष एवमिव वै पशुः समाहितः शिरः स्थवीयोऽणीयस्यो ग्रीवा पार्श्वाभ्यां वरीयाꣳ सक्थिभ्यां वरिष्ठः ॥ ६ ॥

एष सोमयागो गोशब्दाभिधेयत्वात् पशुस्तोमः स्तोमसं-स्थानेन पशुसदृशः एवमिव वै एवम्विध एव खलु पशुः समा-हितः अवस्थितो भवति एवं शब्देन परामृष्टमेव प्रदर्श्यते शिर इत्यादिना पशोः शिरो मूर्द्धा स्थवीयः स्थूलतरं स्थूलतरेत्यादिना ईयसुनियसुनियमादिपरलोपः पूर्व्वस्य च गुणः शिरसः

सकाशादणीयस्यः अणुतरा अल्पपरिमाणा ग्रीवा कण्ठो भवति स च पशुः पार्श्वाभ्यां पार्श्वद्वयेन वरीयान् गुरुतरोऽतिशयेन विस्तीर्णः तथा सक्थिभ्यां जघनाभ्यां वरिष्ठ उरुतरोऽतिवि-स्तृततमः एवं ग्रीवास्थानीयेभ्य आज्येभ्यः शिरःस्थानीयं बहि-ष्पवमानं अधिकेन स्तोमेन युज्यमानं सङ्गच्छत इत्यर्थः ॥६॥

अथोक्तग्रीवादिसाम्यप्रदर्शनायाह ।

यत् पञ्चदशं बहिष्पवमानं भवति त्रिवृन्त्याज्यानि सप्तदश माध्यन्दिनꣳ सवनमेकविꣳशं तृतीयसवनꣳ रूपेणैवैनन्तत् समर्द्धयति ॥ ७ ॥

बहिष्पवमानं पञ्चदशस्तोमकं भवति आज्यानि त्रिवृन्ति त्रिवृत्स्तोमकानि भवन्ति माध्यन्दिनꣳ सवनं कृत्स्नं पवमा-नादिषु पञ्चस्वपि स्तोत्रेषु सप्तदशः स्तोम इत्यर्थः तृतीयसवनं कृत्स्नमेकविंशं एकविंशस्तोमकं उक्थसंस्थोऽयं तेन तृतीय-सवने पञ्चसु स्तोत्रेषु एकविंशः स्तोमः कार्य्यः एवमस्मिन्नहनि स्तोमक्लृप्तिर्भवतीति यत् तत्तेन पशुसम्बन्धिरूपेणैव एनं सोम-यागं समर्द्धयति ॥ ७ ॥

एवं स्तोमक्लृप्तौ सत्यां एका स्तोत्रीया विराट्सम्पत्तेरति-रिच्यते सा च पशोः पुच्छस्थानीयेत्याह ।

एका सꣳस्तुतानां विराजमतिरिच्यते तस्मात् पशोः पश्चादतिरिक्तं ॥ ८ ॥

संस्तुतानां सहस्तुतानां स्तोत्रीयाणां परिगणनायां एका स्तोत्रीया विराजं अतिरिच्यते तस्मादेव पशोः लौकिकस्य पश्चादपरभागे सति एकैकस्याः स्तोत्रीयाया अतिरेको भवति सा च पश्वात्मना संस्तूयमानस्य क्रतोः पुच्छस्थानीयेत्यर्थः ॥८॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य

द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथान्यमेकाहं विधत्ते ।

अथैष आयुः ॥ १ ॥

उच्यत इति शेषः, अथानन्तरं एष वक्ष्यमाणः आयुराख्यः सोमयागः ॥ १ ॥

अथास्यायुरिति संज्ञामर्थान्निर्वक्ति ।

आयुषा वै देवा असुरानायुवतायुते भ्रातृव्यं य एवं वेद ॥ २ ॥

आयुषा वै आयुराख्येन एतेन यज्ञेन देवा असुरानायुवत आसमन्तात्प्राणादिभिर्वियोजयत यौतिरत्र पृथग्भावे वर्त्तते तस्मादायुर्वर्त्तनसाधनत्वात् अस्यायुरिति संज्ञेत्यर्थः यएवं

ब्राह्मणार्थं वेत्ति असौ भ्रातृव्यं शत्रुं आयुते आत्मनः सका-शात् पृथक्करोति ॥ २ ॥

अथास्मिन्नधिकारिणमाह।

स्वर्गकामो यजेत ॥ ३ ॥

आयुराख्यो यज्ञः स्वर्गसाधनमित्यर्थः ॥ ३ ॥

अथास्मिन्नहनि स्तोमक्लृप्तिमाह।

ऊर्द्ध्वाः स्तोमा यन्त्यनपभ्रंशाय ॥ ४ ॥

गवाख्येऽतीतएकाहे यैव स्तोमक्लृप्तिरुक्ता सैवास्यापि स्तोम-क्लृप्तिः इयांस्तु विशेषः ऊर्द्ध्वाः ऊर्द्ध्वगामिनः त्रिवृत्पञ्चदशसप्त-दशादिक्रमेणोत्तरोत्तरमधिकसंख्यां प्राप्ताः स्तोमा यन्ति गच्छ-न्ति सवनत्रये सम्बध्यन्ते पूर्व्वत्र हि प्रथमं पञ्चदशस्तोमो बहि-ष्पवमाने आज्येषु त्रिवृदित्युक्तं यद्येवमेवात्रापि क्रियते तमधिक-संख्याता न्यूनसंख्यायामाक्रमणात् अपभ्रंशोऽधःपातः स्यात् आयुराख्ये एकाहे बहिष्पवमाने त्रिवृत्स्तोमः आज्येषु पञ्च-दशः शिष्टं गोष्टोमवदिति एवमूर्द्ध्वा अभिमुखा एव स्तोमा भवेयुः तस्मात् अनपभ्रंशाय अपभ्रंशाभावाय भवति ॥ ४ ॥

अथास्याधिकारिविशेषे संस्थान्तरमाह।

एतेनैवामयाविनं याजयेदतिरात्रः कार्य्यः ॥ ५ ॥

एतेनैवायुराख्येनैकाहेन आमयाविनं दीर्घरोगिणं यजमानं याजयेत् तदानीमयमतिरात्रसंस्थः कार्य्यः उक्थसंस्थो-ह्यायुः ॥ ५ ॥

आमयाविनः प्रयोगे अतिरात्रसंस्थाया आनुकूल्यमाह ।

स गायत्रीᳫं सम्पद्यते प्राणो गायत्र्यायुरेष आयु-श्चैवास्मिन् प्राणञ्चोभे समीची दधाति ॥ ६ ॥

योऽतिरात्रसंस्थ आयुः स गायत्रीं सम्पद्यते तथाहि प्रातः-सवने बहिष्पवमानेन स्तोत्रीयास्तु चतुर्ष्वाज्येषु षष्टिर्मिलित्वा नवषष्टिस्तोत्रीया भवन्ति एवं सवनत्रयगतानि मिलित्वा अष्टाच-त्वारिंशदधिकचतुःशतसंख्याकाः स्तोत्रीया भवन्ति तास्तुर्विं-शतिसंख्यया विभज्यमाना अष्टादशगायत्र्यो भवन्ति द्वौ च गायत्रौ पादौ भवतः एवमतिरात्रस्य गायत्रीसम्पत्तिर्द्रष्टव्या, अस्त्वेवं किन्तत इत्यत आह प्राणो गायत्रीति प्राणापानव्यान-रूपेण गायत्र्यात्मकः प्राणः गायत्री च त्रिपदा तथा साम्यात् प्राणएव गायत्रीत्युपचारः तथा एष सोमयाग आयुःसंज्ञकः एवं प्राणायुषोः सद्भावात् अस्मिन्नामयाविनि यजमाने आयु-र्जीवनञ्च प्राणञ्च उभे समीची सङ्गते दधाति स्थापयति ॥६॥

अथ विहितान् ज्योतिरादिकान् त्रीन् एकाहान् संहृत्य स्तौति ।

स्वर्ग्या वा एते स्तोमा यत् ज्योतिर्भवति ज्योति-

रेवास्मै स पुरस्ताद्धरत्यथैष गौरेकया विराज-मतिरिक्त आरम्भणमेव तदथैष आयुरेकस्या विराज ऊन आसाद एव सोऽथो ऊनातिरिक्तौ स्तोमौ मिथुनौ प्रजात्यै ॥ ७ ॥

एते स्तोमाः स्तोमयुक्ता ज्योतिराद्या एकाहाः स्वर्ग्या वै स्वर्गार्हाः खलु स्वर्गहेतव इत्यर्थः एवं सह स्तुत्वा अवयज्य सूयते यत् ज्योतिराख्य एकाहो भवति सोऽस्मै यजमानाय ज्योतिरेव पुरस्तात् पूर्व्वभागे ज्योतिः प्रकाशं हरति गमयति ज्योतिष्मान यत्र यत्र गच्छति तत्र तत्र सर्व्वप्रकाशो जायते इत्यर्थः अथेति वाक्यान्तरोपक्रमे एष पूर्व्वोक्तो गौर्नामाख्यः एकाहः एकया स्तोत्रीयया विराजमतिरिक्तो अधिको भवति तदाधिक्यं विराजं तस्यारम्भणं उपक्रम एव अथैषः आयुः एकस्या विराज ऊनः एकया स्तोत्रीयया विराट्सम्पत्तेर्न्यूनः स गोष्टोमोपक्रान्ताया विराज आसाद एव आसक्तिः प्राप्तिरेव आयुष एकया स्तोत्रीयया विराजो न्यूनता प्रदर्श्यते स्वभावत उक्थसंस्थत्वात् एतस्मिन् पञ्चदशस्तोत्राणि तेषु च पूर्व्वोक्त-संख्यापरिगणनायां नवपञ्चाशदधिकशतद्वयसंख्याका स्तोत्रीया भवन्ति तथा च दशसंख्यया विभागे पञ्चदशविराजः ततः परा विराट् एकया स्तोत्रीयया न्यूना गोष्टोमेऽधिकया स्तोत्रीयया सहास्या ऊनाया विराजो योजने विराट् सम्पत्तिर्भवति अथो अपि ऊनातिरिक्तौ उक्तप्रकारेण न्यूनाधिको आयुष्टोमगोष्टोमौ

मिथुनरूपौ मिथुनौ स्त्रीपुमांससदृशौ प्रजात्यै यजमान-प्रकृष्टजन्मने भवतः ॥ ७ ॥

अथैतान् संहृत्य प्रकारान्तरेण स्तौति ।

एते वै त्रिकद्रुकाः स्तोमा एतैर्वा इन्द्रः सर्व्वां तृप्तिमतृप्यत् ॥ ८ ॥

एते खलु त्रिकद्रुकाख्याः स्तोमाः एतैः खलु इन्द्रः सर्व्वां सम्पूर्णां तृप्तिं अतृप्यत् अतिशयेन तृप्तोऽभवत् त्रिकद्रुकेषु महिषोयवाशिरन्नु विष्णुपसुम्पदिति मन्त्रवर्णात् ॥ ८ ॥

अथैतद्वेदितुः फलमाह ।

तृप्यति प्रजया पशुभिर्य्य एवं वेद ॥ ९ ॥

स्पष्टोऽर्थः । एषां त्रयाणां एकाहानां स्तोत्रीयोक्तिभिः कल्पकारेण क्लृप्तो ज्योतिष्टोमो गोर्वार्कजन्मस्य लोक इत्यादिना चहुंशीयस्य मार्मेधमिति रात्रिः समानमितरं सांवत्सरिकेणेत्यन्तेन प्रतिपादिता सा चात्र विस्तरभयान्न लिख्यते ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथाभिजिद्विश्वजितावेकाहौ विधित्सुस्तत्संज्ञां निर्वक्तुमा-ख्यायिकामाह ।

प्रजापतिः प्रजा असृजत ता अस्मै श्रैष्ठ्याय नातिष्ठन्त स आसान्दिशां प्रजानाञ्च रसं प्रवृह्य स्रजं कृत्वा प्रत्यमुञ्चत ततोऽस्मै प्रजाः श्रैष्ठ्यायातिष्ठन्त ॥ १ ॥

पुरा प्रजापतिः प्रजाः सृष्टवान् ताः सृष्टाः प्रजाः अस्मै अस्य प्रजापतेः श्रैष्ठ्याय नातिष्ठन्त श्रेष्ठत्वं नावमन्यन्त स प्रजापतिः आसां प्रसिद्धानां प्राच्यादिदिशां सर्व्वासां प्रजानाञ्च रसं सारं प्रवृह्य उद्धृत्य स्रजं मालां कृत्वा प्रत्यमुञ्चत स्वगले ऽबध्नात् ततोऽनन्तरं स्रजो महिम्ना प्रजापतेः श्रैष्ठ्ये प्रजाः अन्वमन्यन्त ॥ १ ॥

अथैतद्वेदितुः फलमाह ।

तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय य एवं वेद ॥ २ ॥

समानाः विद्याकर्म्मवयोभिः सदृशाः पुरुषाः अस्मै वेदित्रे श्रैष्ठ्याय श्रेष्ठत्वाय तिष्ठन्ते अवतिष्ठन्ते श्रेष्ठत्वमनुजानन्तीत्यर्थः स्पष्टमन्यत् ॥ २ ॥

ततः प्रजापतिः किमकार्षीदिति तदाह ।

सोऽकामयतेन्द्रो मे प्रजायाᳬ श्रेष्ठः स्यादिति ता-मस्मै स्रजं प्रत्यमुञ्चत्ततो वा इन्द्राय प्रजाः श्रैष्ठ्यायातिष्ठन्त तच्छिल्पं पश्यन्त्यो यत्पितर्य्यपश्यन्॥ ३॥

प्रजयामिति जातावेकवचनं मे मदीयासु प्रजासु मध्ये इन्द्रः श्रेष्ठः प्रशस्यतमः अधिकः स्यादिति सः प्रजापतिः कामितवान् कामयित्वा च तां माल्योयां स्रजं अस्येन्द्रस्य प्रत्यमुञ्चत गले बद्धवान् ततोऽस्येन्द्रस्य श्रैष्ठ्यार्थं प्रजा अन्वजानन् यत्पितरि श्रैष्ठ्यकारणं शिल्पमपश्यत् तच्छिल्पमाश्चर्य्यं सुरूपमिन्द्रे पश्यन्त्यः विलोकयन्त्यः लक्षणहेत्वोः क्रियाया इति हशेर्हेतौ शतृप्रत्ययः॥ ३॥

अथान्यं प्रासङ्गिकमाह ।

तस्माद्यः पुत्राणां दायन्धनतममिवोपैति तं मन्यन्ते यमेवेदं भविष्यतीति॥ ४॥

यस्मात्पितुः प्रजापतेः सकाशात् स्रजोलाभेन श्रेष्ठोऽभूत् तस्माल्लोके पुत्राणां मध्ये यः पुत्रो धनतममिव अतिशयितमेव धनदायमुपैति पितुः सकाशात् दायत्वेनोपगच्छति तं पुत्रम्मन्यन्ते लौकिका जानन्ति अयमेव पुत्र इदं सर्व्वं पितृसम्बन्धि ग्रामादिकं भविष्यति सर्व्वस्याधिपतिः भविष्यति॥ ४॥

अस्त्वेवं प्रकृते क्रियमाणे किमायातमित्यत आह।

ततो वा इदमिन्द्रो विश्वमजयद्यद्विश्वमजयत्त-स्माद्विश्वजित्॥ ५॥

ततः श्रैष्ठ्यप्राप्त्यनन्तरमिदं विश्वं जगदजयत् जितवान् आत्म-स्वेन कृतवान् यद्यस्मात्कारणात् स्वरूपावस्थितेनानेन यज्ञेन विश्वमजयत् तस्माद्विश्वजिदिति यज्ञस्याख्या॥ ५॥

अथाभिजितः संज्ञानिरुक्तिमाह।

सोऽकामयत यन्मेऽनभिजितं तदभिजयेयमिति स एतमभिजितमपश्यत्तेनानभिजितमभ्यजयत्॥६॥

स इन्द्रोऽकामयत यन्मे ममानभिजितं जयेनाप्राप्तमस्ति तदिदानीमभिजयेयं यज्ञेनाप्नुयामिति स एतमभिजिदाख्यं सोम-यागमपश्यत् तेनानभिजितं सर्व्वमभ्यजयत् तस्मादभिजयसाधन-त्वात् अस्याभिजित्संज्ञा॥ ६॥

अथैतावभिजिद्विश्वजितौ विधत्ते।

यदभिजिद्भवत्यनभिजितस्याभिजित्यै॥ ७॥

एतद्विश्वजितोपलक्षणं अयमर्थः अभिजिदाख्य एकाहो भवति यश्चानभिजितस्य वस्तुनोऽभिजित्यै अभिजयाय भवति विश्वजिदाख्य एकाहो भवति स च विश्वस्य जयाय भवति

विश्वजिद्भवति विश्वस्य जित्या इति हि ब्राह्मणान्तरं ॥ ७ ॥

अथैतौ स्तौति ।

तौ वा एताविन्द्रस्तोमौ वीर्य्यवन्तौ शिल्पं वा एतौ नाम स्तोमावास्तां ॥ ८ ॥

तावेतावभिजिद्विश्वजिताविन्द्रस्तोमौ उक्तप्रकारात्तस्येन्द्र-सम्बन्धत्वादिन्द्रस्तोमाख्यौ इन्द्रसम्बन्धिनौ स्तोमवन्ताविन्यर्थः ततो वीर्य्यवन्तौ वीर्य्ययुक्तौ एतौ च पुरा उक्तं शिल्पं वै शिल्पं नाम शिल्पाख्यौ विचित्रसंस्थानौ स्तोमौ स्तोमवन्तावास्तां अभूतं यच्छिल्पं पश्यन्तो यतितव्यंपश्यन्ति विश्वजितः शिल्परूप-त्वमुक्तं तत्सम्बन्धादभिजितोऽपि शिल्पत्वोपचारः ॥ ८ ॥

अथैतद्वेदनफलमाह ।

पश्यते गृहे शिल्पं य एवं वेद ॥ ९ ॥

य एवं ब्राह्मणार्थं जानाति सोऽयं गृहे शिल्पनामाख्यं वस्तुजातं पश्यति ॥ ९ ॥

अथैतयोः प्रयोगप्रकारमाह ।

न वै यमौ नाम स्तोमौ स्तो ये यमाभ्यां यजेतै-ताभ्यां यजेत सम्भृत्यौ ॥ १० ॥

न वै खलु यमौ नाम स्तोमौ यमाख्यस्तोमवन्तौ यमौ भवतः

यो यजमानो यमाभ्यां यजेत स एताभ्यामभिजिद्विश्वजिद्भ्या-मेकाहाभ्यां यजेत समृद्धौ समृद्ध्यर्थं एतदुक्तं भवति यमाभ्यां यमलाभ्यां संहताभ्यामभिजिद्विश्वजिद्भ्यां यजेत तौ दर्श-पौर्णमासवत् संहतौ एव फलसाधनमिति तयोश्चानुष्ठानक्रमः सूत्रकृतोक्तः विश्वजिदभिजितौ यमाभ्यां यजमानः पूर्व्वा-पराभ्यां यजेतेति धानञ्जप्यो युगपदिति शाण्डिल्योऽभिजितो दक्षिणा देवयजनं स्याद्विश्वजित उत्तरं तत्रैव पत्नीशाला स्यान्नानर्त्विज इत्यादिना अयमर्थः दर्शपौर्णमासवदेव पौर्व्वा-पर्य्येणानयोरनुष्ठानमिति धानञ्जप्यमतं एकस्मिन् काले उभयोः सहानुष्ठानमिति शाण्डिल्यमतं दक्षिणत उत्तरतश्च देवयजन द्वयं कृत्वा दक्षिणेऽभिजित् उत्तरे विश्वजित् विश्वजितः पश्चा-त्पत्नीशाला नाभिजितः प्रत्येकं षोड़शर्त्विज इति एवं संहतयो-रेव फलसाधनत्वमिति यमाभ्यामिति शब्देनावगम्यते पक्षान्त-रमपि सूत्रकृतोक्तं कामञ्च यमाभ्यां यजेतेति नावश्यं संहत-योरेव फलसाधनत्वमपि तु पृथक् साधनत्वमपि विद्यते तस्मा-दन्यतरपरिहारेणान्यतरप्रयोगोऽपि कर्त्तुं शक्यत इत्यर्थः ॥ १० ॥

उभयोः स्तोमानामावृत्तिं विधत्ते

पुनरभ्यावर्त्तꣳ स्तोमा भवन्ति पुनरभ्यावर्त्तꣳ ह्येताभ्यामिन्द्रोऽजितमजयत् ॥ ११ ॥

पुनरभ्यावर्त्तं पुनः पुनरावृत्तं अनयोरभिजिद्विश्वजितोः स्तोमा भवन्ति हि यस्मात् पुनरभ्यावर्त्तं आवृत्याऽऽवृत्य एता

भ्यामभिजिद्भ्यां अजितं जेतव्यं इन्द्रो अजयत् जितवान् तस्मादित्यर्थः ॥ ११ ॥

अथाभिजिति स्तोमानां तानेवाभ्यावृत्तिं विवृणोति ।

त्रीꣳस्त्रिवृदभिजितः प्रणयति त्रीन् पञ्चदश स्त्रीन् सप्तदश स्त्रीनेकविꣳशस्ते द्वादश सम्पद्यन्ते द्वादशमासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापति-मेवाप्नोति ॥ १२ ॥

त्रिवृत्स्तोमोऽभिजितः त्रीन् प्रणयति बहिष्पवमानादीनि त्रीणि स्तोत्राणि निष्पादयति एवं पञ्चदशादिष्वपि योजना त्रिवृदादिनैकैकेन स्तोमेन बहिष्पवमानादीनां स्तोत्राणां त्रयं त्रयं अभिजिति निर्व्वर्त्यमित्यर्थः तथाच कल्पकारेण अभिजित-मधिकृत्योक्तं सर्व्वस्तोमस्य सतस्त्र्यावृतस्तोमास्त्रुत्ःप्रणाया इति एवं द्वादशस्तोत्राणि सम्पद्यन्ते द्वादशमासात्मकः संवत्सरः संव-त्सरः प्रजापत्यात्मकः तथाच तमेव प्रजापतिं द्वादशभिः स्तोमैः प्राप्नोति ॥ १२ ॥

अथ विश्वजिति स्तोमानामभ्यावृत्तिं स्पष्टयति ।

चतुरस्त्रिवृद्विश्वजितः प्रणयति चतुरः पञ्चद-शश्चतुरः सप्तदशस्ते द्वादश सम्पद्यन्ते द्वादशमासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिमेवाप्नोति ॥१३॥

विश्वजितो बहिष्पवमानादीन् चतुरश्चत्वारि स्तोत्रादीनि त्रिवृत् प्रणयति निर्वर्त्तयति तथा पञ्चदशस्तदनन्तरभावीनि चत्वारि स्तोत्राणि सप्तदशोऽप्येवं तथाच द्वादश स्तोत्राणि सम्पद्यन्ते अन्यत् पूर्ववत् इमामभ्यावृत्तिं विश्वजितमधिकृत्य कल्पक्रदुक्तवान् सर्व्वस्तोमस्य सतश्चतुरावृत्तस्तोमास्त्रिप्रणाया इति॥१२

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य
चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

अथ विश्वजिति बहिष्पवमानस्य नवस्तोत्रीयाः क्रमेण विदधाति तत्र प्रथमामाह।

उप त्वा जामयोगिर इत्युपवतो प्रतिपद्भवति स्तोमस्य रूपं॥ १॥

उपवती उपशब्दयुक्ता प्रतिपद्यते अनयेति प्रतिपद्बहिष्पवमानस्य प्रथमा भवति तद्योपेति स्तोमस्य अत्र प्रयोज्यस्य त्रिवृदाख्यस्य रूपं उपास्मै गायतानर इति प्रकृते त्रिवृत्स्तोमके बहिष्पवमाने दर्शनात् ॥ १ ॥

वायोरनीके अस्थिरन्नित्यस्यास्तृतीयः पादस्तद्योगेनैतां प्रशंसितुमाह।

प्राणैर्वा एष व्यृध्यत इत्याहुर्य्यः सर्व्वं ददाति सर्व्वान् स्तोमान् सर्व्वाणि पृष्ठान्युपैतीति यद्वायव्या भवति प्राणानाꣳ समृद्ध्यै ॥ २ ॥

प्राणैरेव एष यजमानो व्यृध्यते वियुज्यत इत्याहुर्ब्रह्मवादिनः योऽयं यजमानः सर्वं ददाति सर्वांश्च त्रिवृदादीन् स्तोमान् सर्व्वाणि च रथन्तरबृहद्वैरूपवैराजादीनि षाडहिकानि पृष्ठसामान्युपैति उपगच्छति विश्वजित् सर्वपृष्ठः सर्वस्तोमः सर्ववेदसदक्षिणः एवं विशिष्टमेनं कुर्वन् प्राणैरेव वियुज्यत इति तथाच वायोरनीक इति वायुशब्दयोगात् वायव्या वायुदेवत्या उपत्वा जामय इत्येषा भवतीति यत् तत्प्राणानां समृद्ध्यै पुनः समर्थनाय भवति यः प्राणः स वायुरिति वायुप्राणयोस्तादात्म्यश्रवणात् एवं प्रथमतृचस्य प्रथमा विहिता ॥ २ ॥

अथोत्तरे विधत्ते ।

सारस्वतश्च सारस्वत्याश्चोत्तरे भवतः ॥ ३ ॥

जनीयन्तोन्वग्रव इत्येषा सारस्वता देवस्य सम्बन्धिनी उत नः प्रियेति सारस्वत्या एते ऋचावुत्तरे भवतः ॥ ३ ॥

अथैते स्तौति ।

मिथुनं वा एतद्यत् सरस्वाꣳश्च सरस्वती च मिथुनमेवास्य यज्ञमुखे दधाति प्रजननाय ॥ ४ ॥

सरस्वांश्च सरस्वती चेति यद्देतद्दृग्द्वयप्रतिपाद्ये देवते एतन्मिथुनं वै स्त्रीपुंसात्मकत्वात् एवञ्चास्य यजमानस्य प्रजननाय प्रजात्यर्थं मिथुनमेव यज्ञमुखे यज्ञप्रारम्भे दधाति स्थापयति ॥४॥

अथान्यां स्तोत्रीयां विधत्ते ।

सावित्री चतुर्थी भवति ॥ ५ ॥

तत्सवितुर्वरेण्यमित्येषा सावित्री सवितृदेवताका चतुर्थी-त्वम्भवति ॥ ५ ॥

अथैतां स्तौति ।

दुष्करं वा एष करोति यः सर्व्वं ददाति यत् सावित्री भवति सवितृप्रसूतं मे कर्म्मासदिति सवितृ-प्रसूतमेवास्य कर्म भवति ॥ ६ ॥

यो यजमानः सर्व्वं धनं ददाति एष दुष्करं कर्त्तुमशक्यं एव करोति तथा सर्वस्मिन् दक्षिणे अस्मिन् यदेषा सावित्री भवति सवितृप्रसूतं सविता प्रसवित्रा देवेन प्रसूतमनुज्ञातं मम मदीयं कर्म सर्वस्वदानदक्षिणं असत् अस्त्वित्यभिप्रायेण सवितृ-देवत्या प्रयुज्यते तस्य यजमानस्य कर्म सवितृप्रसूतं भवति ।६॥

अथान्यां स्तोत्रीयां विधत्ते ।

ब्राह्मणस्पत्या पञ्चमी भवति ॥ ७ ॥

सोमानां स्वराणामिति एषा ब्रह्मणस्पतिदेवताका पञ्चमी ऋग् भवतीति ॥ ७ ॥

अथ स्तौति।

ब्रह्म वै ब्रह्मणस्पतिर्ब्रह्मैवास्य यज्ञमुखे दधाति ॥८॥

ब्रह्म वेदस्तस्य पतिरीशिता ब्रह्मणस्पतिः स च ब्रह्म वै परब्रह्म तथा चास्य यजमानस्य यज्ञमुखे तदेव ब्रह्म निदधाति ॥८॥

अथान्यां स्तोत्रीयां विधत्ते।

आग्निपावमानी षष्ठी भवति ॥ ९ ॥

अग्निः पवमानो देवता यस्याः सा आग्निपावमानी अग्न आयूंषि पवस इत्येषा षष्ठी भवति ॥ ९ ॥

अथ स्तौति।

अग्निरेवैनन्निष्टपति पवमानः पुनाति पूतमेवैनं यज्ञियं पृष्ठान्युपनयति ॥ १० ॥

अस्यां हि अग्निः पवमानः सोम इति देवताद्वयं प्रतिपद्यते तयोर्मध्ये अग्निरेव एनं यजमानं निष्टपति निःशेषेण तप्तकलुषं करोति पवमानः सोमः पुनाति पूतं शुद्धं करोति एवं हि बहिष्पवमानेन पूतमेवैनं यजमानं यज्ञियं यज्ञार्हं पृष्ठानि रथन्तरादीनि करिष्यमाणानि उपनयति उपगमयति ॥ १० ॥

अथोत्तमं तृचं विधित्सुराह।

यन्ति वा एते पथ इत्याहुर्ये सम्भार्य्याः कुर्वते ॥११

य उद्गातारः सम्भार्य्याः सम्भरणीयाः प्रदेशान्तरे आम्नाता-
मेकैकामृचमुपादाय उक्तक्रमेण सम्भृताः सम्पन्नाः कुर्व्वते प्रयु-
ञ्जते एते पथो न्याय्यादनुष्ठानमार्गात् यन्ति अपगच्छन्तीति
ब्रह्मवादिन आहुः ॥ ११ ॥

कस्तर्हि परिहार इति तदाहुः ।

पावमान उत्तमस्तृचो भवति तेन पथो नयन्ति ॥१२

पवमानस्य ते वयमिति पवमानसोमदेवताक इति पवमान-
सोमदेवताकबहिष्पवमानस्यान्त्यस्तृचो भवति तेन यथाम्नात-
तृचकरणेन पथः सकाशान्न गच्छन्ति आम्नातानां तृचां तथैव
प्रयोगो ह्यनुष्ठानमार्गः ॥ १२ ॥

एवं विश्वजितो बहिष्पवमानस्य नवस्तोत्रीयाः संस्तुतिका
दर्शिताः अथैताभिरेव करिष्यमाणानां रथन्तरादीनां षणां
पृष्ठानां योगं प्रतिपादयति ।

**स तु वै पृष्ठैः स्तुवीतेत्याहुर्य एतानि बहिष्पव-
माने युञ्ज्यादिति ॥ १३ ॥**

स तु वै स एव पृष्ठैः रथन्तरादिभिः स्तुवीत स्तौति य एतानि
पृष्ठानि बहिष्पवमाने युञ्ज्यात् योजयेदिति ब्रह्मवादिन आहुः
तस्मात् पृष्ठानां बहिष्पवमाने स्तोत्रीयाभिर्योजनं कार्य्यं यथा
दशरात्रस्य प्रथमेऽहनि अस्य प्रत्नामनुद्युतमित्यादिभिर्नवभिर्न-
वानामृचां योगस्तथात्रापि पृष्ठानां योजनं कार्य्यमित्यर्थः ॥१३॥

तत्र कया स्तोत्रीयया किं योज्यत इत्याशङ्क्य रथन्तरयोगं तावदाह ।

उपवती प्रतिपद्भवत्युप वै रथन्तरꣳ रथन्तरमेवास्मै तया युनक्ति ॥ १४ ॥

उपत्वाजामयोगिर इत्येषा प्रथमा भवति उपशब्दसम्बद्धं हि रथन्तरपृष्ठं ज्योतिष्टोमे उपास्मै गायतानर इति उपशब्दस्य प्रयुक्तत्वात् एवञ्चैतयोपवत्या अस्मै यजमानाय रथन्तरं साम युनक्ति ॥ १४ ॥

अथ बृहतो योगं दर्शयति ।

सरस्वतो द्वितीया भवति स्वर्गो लोकः सरस्वान् स्वर्गोलोको बृहद् बृहदेवास्मै तया युनक्ति ॥ १५ ॥

सरस्वतः सरस्वदाख्यस्य देवस्य सम्बन्धिनो द्वितीया जनीयन्तोन्वग्रव इत्येषा भवति स्वर्गाख्यो लोकएव सरस्वान् अमावास्या वै सरस्वती पौर्णमासः सरस्वानिति ब्राह्मणान्तरात् सरस्वतः पूर्णमासत्वात् तस्य च स्वर्गसाधनत्वात् तदात्मकत्व व्यपदेशः बृहत्साम च स्वर्गलोकात्मकं इयं वै रथन्तरमसौ वै लोको बृहदिति श्रुतेः एवं परम्परया सरस्वतो बृहत्सम्बन्धिन्या एतया सरस्वद्देवताकया बृहदेव तस्मै युनक्ति ॥ १५ ॥

अथ वैरूपस्य योगमाह ।

सरस्वत्यास्तृतीया भवति वाग्वै सरस्वती वाग्वै रूपं वैरूपमेवास्मै तया युनक्ति ॥ १६ ॥

सरस्वत्याः सम्बन्धिनी उप नः प्रियास्विर्त्येषा तृतीया भवति वाक्शब्दात्मिका हि सरस्वती वैरूपञ्च वाक्संस्तुतं तथा च तया तृतीयया वैरूपमेवास्मै युनक्ति ॥ १६ ॥

अथ वैराजस्य योगमाह ।

सावित्री चतुर्थी भवति प्रजापतिर्वै सविता प्रजापतिर्वैराजं वैराजमेवास्मै तया युनक्ति ॥ १७ ॥

सावित्री सवितृदेवताका तत्सवितुर्वरेण्यमित्येषा चतुर्थी भवति सा प्रजापतिरेव सविता सर्व्वस्य प्रेरकत्वात् वैराजञ्च साम प्रजापतिसंस्तुतं तथा चैतया सावित्र्या वैराजमेवास्मै युनक्ति ॥ १७ ॥

अथ शाक्वरस्य साम्नो योगमाह ।

ब्राह्मणस्पत्या पञ्चमी भवति ब्रह्म वै ब्रह्मणस्पतिर्ब्रह्म शक्वर्य्यः शक्वरीरेवास्मै तया युनक्ति ॥१८॥

ब्राह्मणस्पत्या ब्रह्मणस्पतिदेवताका सोमानां स्वरणमित्येषा पञ्चमी भवति परब्रह्मैव ब्रह्मणस्पतिरित्युच्यते विदा मघवन्नित्याद्याः शक्वर्य्यश्च परब्रह्मणः प्रतिपादकत्वात् ब्रह्मात्मिका तथा चैतया ब्राह्मणस्पत्यया शक्वरीरेव शक्वरीषु ऋचु गीयमानं शाक्वरं सामैवास्मिन् युनक्ति ॥ १८ ॥

अथ रैवतस्य साम्नो योगमाह ।

आग्निपावमानी षष्ठी भवति गायत्री वै रेवती गायत्रछन्दा अग्नोरेवतीरेवास्मै तया युनक्ति ॥१९॥

आग्निपावमानी अग्न आयूंषि पवस इत्येषा षष्ठी भवति गायत्री गायत्रछन्दस्का खलु रेवती: रैवतसाम्नो योनिभूता रेवतीर्न्न इत्येषा अनया प्रतिपाद्यमानोऽग्निश्च गायत्रछन्दा: गायत्रं छन्दो यस्य स तथोक्त: एवञ्चैतया आग्नेय्या गायत्र्या रेवतीरेव रैवतीषु गीयमानं रैवतं सामास्मै युनक्ति ॥ १९ ॥

ननु एवं रथन्तरादीनि षट्सामानि योजितानि कथं तेषां चतुर्षु पृष्ठस्तोत्रेष्वन्तर्भाव इत्यत आह ।

न चत्वारि षड्भ्यो विभवन्ति यदनिरुक्तानि तेन विभवन्ति ॥ २० ॥

सत्यं चत्वारि पृष्ठस्तोत्राणि न षड्भ्य: सामभ्यो विभवन्ति न व्याप्नुवन्ति यद्यस्मादेतानि षट्सामान्यनिरुक्तानि पृष्ठस्तोत्रेष्वेव कार्य्याणीति न नि:शेषेणोक्तानि तेन कारणेन पृष्ठस्तोत्रेष्वन्यत्र प्रयोक्तुं शक्यत्वात् विभवन्ति व्याप्तुं शक्नुवन्ति ॥ २० ॥

आज्यस्तोत्रेषु कञ्चिद्दोषमाशङ्क्य समाधत्ते ।

सर्व्वाणि स्वाराण्याज्यानि तज्जामि नानादेवत्यै: स्तुवन्त्यजामितायै ॥ २१ ॥

सर्व्वाणि चत्वार्य्याज्यस्तोत्राणि स्वारनिधनानि तथा च स

सर्व्वेषां समानावसानत्वात् जामितादोषः स्यात् अतस्तत्परिहाराय नानादेवत्यैः अग्निर्मित्रावरुणाविन्द्राग्नी चेति क्रमेण तद्देवताकैराज्यैः स्तुवन्ति ॥ २१ ॥

कानि पुनस्तथाविधानीत्यत आह।

सुषमिद्धो न आवहेत्याप्रिय आज्यानि भवन्ति ॥ २२ ॥

आप्रिय इति प्रयाजानुयाजा इत्युच्यन्ते सुषमिद्धो न आवहेत्याद्यास्तिस्र आप्रियस्तोत्रीया आग्नेयं प्रथममाज्यस्तोत्रं भवति इतराणि च त्रीणि कल्पकारेणोक्तानि ता नः शक्रं पार्थिवस्य युञ्जन्ति ब्रध्नमरुषम् तमीडिष्वयो अर्च्चिषेति ॥२२॥

अथाप्रीणामाज्यत्वं सर्व्वस्वदानेन रिक्तीकृतस्य यजमानस्य पुनः पोषणार्थमिति स्तौति।

प्रजापतिः प्रजा असृजत स दुग्धो रिरिचानोऽमन्यत स एतान्याप्रिय आज्यान्यपश्यत्तैरात्मानमाप्रीणाद्दुग्धइव वा एष रिरिचानो यः सर्व्वन्ददाति यदाप्रिय आज्यानि भवन्त्यात्मानमेव तैराप्रीणाति ॥ २३ ॥

एतत्सर्व्वं पूर्वस्मिन्नेवाध्याये व्याख्यातं ॥ २३ ॥

अथ रथन्तरादीनां षसां पृष्ठानां स्थानविशेषं व्यवस्थापयितुमाह।

एतर्हि तु वै पृष्ठानि यथायतनं कल्पन्त इत्याहु-र्यद्रथन्तरं प्रथमं बृहदुत्तमम्मध्य इतराणीति ॥ २४ ॥

माध्यन्दिनपवमाने रथन्तरं साम बृहदग्निष्टोमसाम इतराणि चत्वारि पृष्ठस्तोत्रेषु प्रयोज्यानि तथाच कल्पः अस्य प्रत्नामनुद्युतमिति गायत्रमामहीयवञ्च परीतोषिञ्च तासु तमिति कालेयमेकस्यां रथन्तरं तिसृषु दैर्घश्रवसन्तिसृषु यौधाजयमेकस्यां अयं सोम इति पार्थमन्त्यं वैराजञ्च महानाम्नीश्च वैरूपञ्च रैवत्यश्चेति तथा त्वमग्ने यज्ञानां होतेति बृहदग्निष्टोमसामेति अयमर्थः माध्यन्दिनपवमाने परीतोषिञ्च तासु तमिति तिसृषु रथन्तरं कार्य्यं वैराजञ्च होतुः पृष्ठे शाक्करं मैत्रावरुणपृष्ठे वैरूपञ्च ब्रह्मपृष्ठे रैवतमच्छावाकपृष्ठे त्वमग्ने यज्ञानामिति तिसृषु बृहदग्निष्टोमसामत्वेन कार्य्यमिति ॥२४॥

अथैवं क्रियमाणे किञ्चिद्दूषणमाशङ्क्य निरस्यति ।

जामि वा एतद्यज्ञे क्रियत इत्याहुर्यत्सर्वाणि निधनवन्ति सह क्रियन्त इति यदन्तरा सोमा यन्त्यन्तरोक्थानि शस्यन्तेऽन्तरा वषट्कुर्वन्ति तेनाजामि ॥ २५ ॥

अलसमेतद्यज्ञे क्रियते यत्सर्वाणि वैराजादीनि सामानि निधनवन्ति निधनयुक्तानि सह क्रियन्ते नैरन्तर्य्येण प्रयुज्यन्त इति एतज्जामि क्रियत इति ब्रह्मवादिन आहुः अयं दोषः

परिह्रियते यदन्तरेत्यादिना यद्यस्मादन्तरा अन्तराले तेषां मध्ये सोमाः ग्रहचमसपूरिताः सन्तो होमार्थं यन्ति उत्तरवेदिं गच्छन्तीति तथान्तरा मध्ये उक्थानि शस्त्राणि च शस्यन्ते बह्वृचैः तथान्तराले होत्रादयः सप्त वषट् कुर्वन्ति वौषडन्तया याज्यया यजन्ति तेन कारणेन द्वयोर्द्वयोर्मध्ये उक्तस्य बहुविधस्यानुष्ठेयस्य सद्भावेन व्यवधानात् जामिदोषो न भवतीत्यर्थः ॥ २५ ॥

अथ प्रकारान्तरेणाजामित्वमुपपादयति ।

व्यत्यासमिडास्य निधनानि चाहुस्तेनाजामि ॥२६

व्यत्यासं व्यत्यस्य व्यत्यस्य परिहृत्य परिहृत्य इडास्याद्यानि च निधनान्याहुः तेन निधनवत्त्वे समानेऽपि तेषान्निधनानां व्यत्यस्य प्रयोगे परस्परं वैलक्षण्याज्जामिदोषो न भवतीत्यर्थः अतएव पूर्व्वमुक्तं निधनं वैराजं प्रथमं कृत्वा इडानिधनं शाक्वरमनन्तरं कार्य्यमित्यादि ॥ २६ ॥

अथ रैवतसाम्नि कञ्चिद्दोषमाशङ्क्य समाधत्ते ।

च्यवन्ते वा एतद्रेवत्यः स्वादायतनादित्याहुर्यत् त्रयस्त्रिंशात् स्तोमाद्यन्तीति यद्गायत्रो भवन्ति तेनायतनान्न च्यवन्ते या हि का च गायत्री सा रेवती ॥ २७ ॥

एतत् एतर्हि रेवत्यः रैवतं साम स्वादात्मीयादायतनात् च्यवन्ते प्रच्युता भवन्तीति ब्रह्मवादिन आहुः यद्यस्मात् त्रयस्त्रिं

मात् सोमाद्यन्ति गच्छन्तीति षष्ठेऽहनि तस्यैव सोमस्य तदा-यतनत्वेन श्रुतत्वात्, तत्रायं परिहारः यद्यस्मात् अस्य रैवत-साम्नो गायत्र्यो गायत्रीछन्दस्का ऋच आधारभूता भवन्ति तेन कारणेन स्वादायतनान्न च्यवन्ते कुत एतत् रेवतीर्नः सधमाद इति गायत्री रैवतसाम्नो योनिस्तत्सामान्यात् अन्यापि या कापि गायत्री सैव रेवती हि यस्मादेवं तस्मात् स्वयोनिसदृशीषु गायत्रीषु ऋक्षु गीयमानं रैवतं स्वादायतनान्न च्यवन्त इति ॥१७॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य

पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

अथ सर्व्वस्वदाननिमित्तं यजमानस्य व्रतं दर्शयति, तदङ्ग-त्वेनादौ वस्त्रत्वचः परिधानं विधत्ते ।

पशुभिर्वा एष व्यृध्यत इत्याहुर्यः सर्वन्ददातीति कृवीं परिधत्ते पशुभिरेव समृध्यते ॥ १ ॥

यो यजमानः सर्व्वं धनं ददाति एष पशुभिः खलु व्यृध्यते विहीयते इति ब्रह्मवादिन आहुः ॥ १ ॥

तत्र परिधानं विधाय स्तूयते ।

रोहिणी कृवी भवत्येतद्वै पशूनां भूयिष्ठꣳ रूपं यद्रोहितꣳ साक्षादेवैनानवरुन्धे ॥ २ ॥

रोहिणी रोहितं वस्त्रं छवी भवति सर्वेषां गवादीनां पशूनां भूयिष्ठं रोहितं तद्वृत्ततरं यद्रोहितं लोहितवर्णस्तथा च साक्षात् प्रत्यक्षमेव एतान् पशूनवरुन्धे लभते ॥ २ ॥

एवं कृतपरिधानस्य यजमानस्य विरात्रमरण्यवासं परिधत्ते।

अरण्ये तिस्रोवसत्यारण्यं ताभिरन्नाद्यमवरुन्धे॥३॥

तिस्रो रात्रीः अरण्ये वसति अत्यन्तसंयोगे द्वितीया तेन वासेन आरण्यमरण्यसम्बन्धि अन्नाद्यमवरुन्धे लभते ॥ ३ ॥

तत्रारण्यवासे स्थानविशेषं विधत्ते।

उदुम्बरे वसत्यूर्गुदुम्बर ऊर्ज्जमेवावरुन्धे ॥ ४ ॥

उदुम्बरे उदुम्बरमूले वसति ऊर्ज्जं अन्नं ऊदुम्बरः सदा फलत्वात् तथा च तन्मूले वसन् ऊर्ज्जमन्नमेवावरुन्धे ॥ ४ ॥

अथ तत्र जीविकां विधत्ते।

खनित्रेण जीवत्यरत्तिमपजयति ॥ ५ ॥

यदरण्ये कन्दमूलादिकं खान्यमस्ति तत् खनित्रेण खननसाधनेन खात्वा तेन जीवेदित्यर्थः तथाच अरत्तिदारिद्र्यमेवापजयति अपजितं करोति ॥ ५ ॥

किं तत् खनित्रमिति तदाह।

उभयतः क्ष्णुदभ्रिर्भवत्युभयत एवास्मा अन्नाद्यं रुन्धे रदत्यस्माच्च लोकादमुष्माच्च ॥ ६ ॥

तत् खनित्वं उभयतः स्यात् उभयतस्तीक्ष्णमुखोदङ्किर्भवति सा च वैणवी कल्माषीति केचित् अन्यदृष्टजातापि इति यत्रा न्तरं एवम्भूताभिरुभयतः उभयविधानादेव अस्मै यजमानाय अन्नाद्यं रुन्धयति उभयत इत्येतद्व्याक्रियते अस्मात् भूर्लोकात् अमुष्माच्च स्वर्गात् ॥ ६ ॥

अथ त्रिरात्रं निषादकुले निवासं विधाय स्तौति ।

निषादेषु तिस्रोवसत्यस्यां वा एते परोक्षाय देवा-स्यामन्नाद्यन्तदवरुन्धे ॥ ७ ॥

निषादेषु निषादग्रामसमीपे तिस्रोरात्रीर्वसेत् अस्यां भूमौ एते निषादाः परोक्षाः प्राप्तपरिदाना भवन्ति एवं तेषां भूमि-सम्बन्धात् यद्देवास्यां पृथिव्यामन्नाद्यन्तदवरुन्धे लभते एवं वसतो जीवनं सूत्रकृतोक्तं तेषाङ्गामसारण्यं भुञ्जीत नैवारं श्यामाकम्मार्गमिति ॥ ७ ॥

अथापरं त्रिरात्रवासं विधत्ते ।

जने तिस्रो वसति जन्यन्ताभिरन्नाद्यमवरुन्धे ॥८

विवाह्ययोग्योऽसमानगोत्रो ब्राह्मणो जनः यद्वा राजन्य बन्धुस्तस्य गृहे तदीयमन्नं भुञ्जानः तिस्रो रात्रीर्वसेत् तथा च ताभीरात्रीभिर्जन्यं जनसम्बन्ध्यन्नाद्यमवरुन्धे ॥ ८ ॥

अथापरं त्रिरात्रवासं विधत्ते ।

समानजने तिस्रः समानजन्यन्ताभिः ॥ ९ ॥

वसति अन्नाद्यमवरुन्ध इत्यनुवर्त्तते समानगोत्रोजनः समानजनः यद्वा ब्राह्मणमात्रं तस्य गृहे तदीयमन्नं भुञ्जानस्तिस्रो रात्रीर्वसेत् जने तिस्रोवसतीत्यादिवाक्यद्वयं राजन्यबन्धुना ब्राह्मणः समानजन इति शाण्डिल्य इत्यादिना सूत्रकारेण बहुधा व्याख्यातं ॥ ९ ॥

अथैता रात्रीः संहृत्य स्तौति ।

द्वादशैता रात्रयो भवन्ति द्वादशमासाः संवत्सरः संवत्सरमन्वन्नाद्यं प्रजायते तदेवाप्त्वावरुन्धे ॥ १० ॥

अरण्ये तिस्रो निषादे तिस्रो जने तिस्रः समानजने तिस्र इत्येवमेतारात्रयो द्वादश भवन्ति संवत्सरस्य द्वादशमासात्मकः तथाच संवत्सरं संवत्सरपर्य्यन्तं अन्नं अनु अत्तुमर्हं प्रजायते तेनोत्पद्यते एवं रात्रिगतसंख्यया तदेवान्नाद्यं आप्त्वा अवरुन्धे स्वीकरोति ॥ १० ॥

अथान्यत् व्रतमाह ।

संवत्सरन्न याचेदामाद्यमिव वा एतद्यः सद्योदत्तं प्रत्यत्ति सद्यो वै देवानाꣳ संवत्सरः ॥ ११ ॥

संवत्सरं सर्वस्वदानानन्तरं संवत्सरपर्य्यन्तं न याचेत् मह्यमेतद्देहीति परं नाभ्यर्थयेत् किं कारणमयाचनं तदाह आमाद्यमिव वा एतद्यः सद्योदत्तं प्रत्यत्तीति एतदामाद्यमिव वै आमस्यापरिपक्वफलस्य भक्षणमिव खलु यो दत्तं धनं सद्यस्तदानीमेव प्रत्यत्ति प्रतिनिवृत्त्य भक्षयति, नतु बहुषु दिवसेषु गतेषु

संवत्सरमध्येऽपि प्रतिग्रहो न विरुध्यत इत्यत आह सद्यो वा इति अस्माकं संवत्सर इति यत् तद्देवानां सद्यो वै अविलम्बित: काल: एकं वा एतद्देवानामहर्यत् संवत्सर इति हि ब्राह्मणा-न्तरं तस्मात् संवत्सरस्यापि सद्य:कालात्मकत्वात् यदि तन्मध्ये सर्वस्वं दत्तवान् पुनर्याचेत् तदा तदपरिपक्कफलभक्षणसदृशं भवेत् इति याञ्चाप्रतिषेध: समर्थ्यते ॥ ११ ॥

यद्ययाचमानायापि तस्मै यत्किञ्चिदन्नं दातुमिच्छेत्तदा न विरोधमित्याह ।

नोदीयमानं प्रति नुदेदन्नाद्यस्याप्रतिनोदाय ॥१२

अयाचितमन्येन दीयमानं न प्रतिनुदेत् न प्रतिषेधेत् अपि तु प्रतिगृह्णीयादेव अन्नाद्यस्यात:परं प्राप्तस्यान्नस्य प्रतिनोद: प्रतिषेधो माभूत् इत्येवमर्थम् ॥ १२ ॥

अथास्योष्णीषधारणं विधत्ते ।

उष्णीषम्बिभर्त्ति शिल्पत्वाय ॥ १३ ॥

उष्णीषं शिरोवेष्टनवस्त्रं तद्बिभृयात् तद्धरणं शिल्पत्वाय वैचित्र्याय भवति परिधानीयाया रोहिण्या: वत्सत्वच: सकाशात् वैलक्षण्यात् ॥ १३ ॥

अथान्यन्निषेधयति ।

न मृन्मयेन पिबेदाहुतिर्वा एषा यद्ब्राह्मणस्य मुखम्मा वै मृन्मयमाहुतिमानशेऽथ यन्मृन्मयपो भव-ति खएव मुखआहुतिञ्जुहोति ॥ १४ ॥

मृण्मयेन मृद्विकारेण पात्रेण जलादिकन्न पिबेत् एषा आ-हुतिर्वै यज्ञमिव आहुत्यधिकरणं यत् ब्राह्मणमुखं न खलु मृण्मयं मृद्विकारपात्रं आहुतिमानस्ये आहुतियोग्यतां प्राप्नोति अतो यत् यस्मात् अमृन्मयपः अमृण्मयेन दारुमयादिना पात्रेण पाता भवति तेन स्वएव आत्मीयएव मुखे आहुतिं हविर्जुहोति ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

षष्ठः खण्डः।

अथ सप्तमः खण्डः।

अथ सर्व्वजित्संज्ञमेकाहं विधास्यन् तस्य स्तोमसंस्थे दर्शयति।

पञ्चविंशोऽग्निष्टोमः ॥ १ ॥

अग्निष्टोमसंस्थाः पञ्चविंशस्तोमका इत्यर्थः ॥ १ ॥

अथ तं विधत्ते।

सर्व्वजिता वै देवाः सर्वमजयन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वञ्जयति ॥ २ ॥

सर्व्वजिता सर्व्वजिताख्येन यज्ञेन खलु पुरा देवाः सर्वं जगदजयन् तस्मात् सर्व्वस्य फलस्य प्राप्त्यै सर्वस्य जेतव्यस्य जित्यै जयाय अनेन सर्वजिता यष्टव्यं स्पष्टमन्यत् ॥ २ ॥

अथाग्निमेकाहे प्रथमं पृष्ठस्तोत्रं विधत्ते।

तस्य महाव्रतं पृष्ठं ॥ ३ ॥

तस्य सर्वजितः महाव्रताख्यं प्रागुक्तं स्तोत्रं पृष्ठं भवति माहेन्द्रस्तोत्रं भवतीत्यर्थः कल्पकारेण विस्तरेण महाव्रतस्तोत्रस्वरूपमुक्तं इन्द्रमिद्गाथिनो बृहदिन्द्रोदधीचो उद्वेदभिश्रुतामघमिति त्रिवृच्छिरो गायत्रं पञ्चदशं रथन्तरं दक्षिणः पक्षः सप्तदशं बृहदुत्तरः पक्षः एकविंशं भद्रं पुच्छं तदिदास भुवनेषु ज्येष्ठमिति पञ्चविंश आत्मा राजनमिति शिर आद्यवयवपञ्चकत्वेन कृप्यमाणं गायत्र्यादि सामपञ्चकं उक्तस्तोमकं महाव्रतस्तोत्रमिति कल्पार्थः ॥ ३ ॥

अथ शस्त्रं विधत्ते ।

अर्क्यꣳ शस्यते ॥ ४ ॥

अर्कः सूर्यः तत्सम्बन्धिबृहती सहस्राख्यं शस्त्रं शस्यते अनेन शस्त्रेण होत्रा महाव्रतस्यानुशंसनं कार्य्यमित्यर्थः ॥ ४ ॥

अथ पञ्चविंशस्तोमकत्वं स्तौति ।

चतुर्विꣳशतिः संवत्सरस्यार्द्धमासाः संवत्सरः पञ्चविंशोऽन्नं व्रतꣳ संवत्सरादेतेनान्नाद्यमवरुन्धे ॥ ५ ॥

संवत्सरस्य चतुर्विंशतिः संख्या ह्यर्द्धमासास्तत्स्थानीयाश्चतुर्विंशतिः स्तोत्रीयाः तेषामर्द्धमासानां पञ्चविंशः पञ्चविंशतिसंख्यापूरकः संवत्सरः स एवं पञ्चविंशस्तोत्रीयात्मकः यदेतन्महाव्रताख्यं स्तोत्रं तदन्नं तस्यान्नरूपत्वं प्रथमपञ्चिकायामुक्तं

एवञ्च पञ्चविंशस्तोमं महाव्रतं प्रयुञ्जानः संवत्सरादेव एतेन यागेनान्नाद्यमवरुन्धे ॥ ५ ॥

अथैतद्विदुः फलमाह ।

अन्नादो भवति य एवं वेद ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथ प्रकारान्तरेण स्तौति ।

एतेन वै गौराङ्गिरसः सर्वं पाप्मानमतरत्सर्वं पाप्मानन्तरत्येतेन स्तोमेन तुष्टुवानः ॥ ७ ॥

एतेन पञ्चविंशस्तोमेन गौर्नामाङ्गिरसः ऋषिः सर्व्वं पाप्मानं पापं अतरत् अत्यक्रमीत् स्पष्टमन्यत् अस्यावशिष्टस्तोत्रकल्पनं कल्पकारोक्तं द्रष्टव्यं ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य

सप्तमः खण्डः ।

अथ अष्टमः खण्ड

अथ सहस्रदक्षिणाः साहस्रा नाम चत्वारएकाहास्तत्र ज्योतिरग्निष्टोमः प्रथमस्तं दर्शयति ।

अथैषज्योतिः ॥ १ ॥

अथेत्यानन्तर्य्ये एष वक्ष्यमाणो ज्योतिःसंज्ञ एकाहः ॥ १ ॥

अस्याग्निष्टोमसंस्थां विधित्सुराह ।

पराङ्वै त्रिरात्रोऽर्वाङग्निष्टोमो यस्त्रिरात्रे विभ्रꣳ-शते न तस्मिन् पुनरस्त्यथ योऽग्निष्टोमे प्रायश्चित्ति-मत्तदपि ह्येतेनैकविꣳशतिदक्षिणेन पुनर्यजेत यस्मिन् ह्येव यज्ञक्रतौ विभ्रꣳशते सैव तस्य प्रायश्चित्तिः ॥२॥

योऽयं त्रिरात्रस्तिसृणां रात्रीणां समाहारः अहीनोगर्ग-त्रिरात्राख्यो विधास्यते स पराङ्वै पराग्गतः पराङ्मुखः योऽयं प्रकृतिभूतोऽग्निष्टोमः सः अर्वाङ् अभिमुखः अतो यो यज-मानस्त्रिरात्रे क्रतौ विभ्रंशते विभ्रष्टो भवति स तस्मिंस्त्रिरात्रे पुनर्नास्ति पुनरधिकृतो न भवति योऽग्निष्टोमे विभ्रंशते तत्तस्य प्रायश्चित्तिमत् प्रायश्चित्तयुक्तं कर्म्म भवति किं तत् प्रायश्चित्त-मुच्यते एतेनाग्निष्टोमेन एकविंशतिदक्षिणेन पुनरविकलेन यजेत यस्मिन्नेव यज्ञक्रतौ विभ्रंशते पूर्व्वं विभ्रष्टो भवति तस्य यज्ञस्य सैव प्रायश्चित्तिः अतस्त्रिरात्रादप्यग्निष्टोमस्य गरी-यस्त्वात् अग्निष्टोमसंस्थैवास्य ज्योतिषः कार्य्येत्यर्थः ॥ २ ॥

अथ तस्मिन्नेकाहे प्रातरनुवाकस्य होत्रानुवक्तव्यस्य परि-माणं कालविशेषं दक्षिणापरिमाणं ब्रह्मसाम्नः स्तोत्रीयाक्षर-परिमाणञ्च मिथुनवदनूद्य प्रतिष्ठाहेतुत्वेन स्तौति ।

उपसदि सहस्रं प्रातरनुवाकमन्वाह तदसौ लोकः सहस्रं दक्षिणास्तदन्तरिक्षꣳ सहस्रमेतान्यक्षराणि तदयं लोक एषु लोकेषु प्रतितिष्ठति य एवं वेद ॥३॥

उपसदि उपसद्दिवसे सहस्रं सहस्रसंख्याभिर्ऋग्भिः परिमितं प्रातरनुवाकं होतानुब्रूयात् तं सहस्रं असौ स्वर्गलोकः तथाग्निष्टोमे सहस्रं दक्षिणाः सहस्रसंख्यागावो दक्षिणात्वेन दातव्याः तत् सहस्रमन्तरिक्षात्मकं एतानि ब्रह्मसामानि ब्रह्मसाम्नः सम्बन्धीनि ब्रह्मसाम्नः सहस्रमक्षराणीत्युक्तं कल्पकारेण ब्रह्मसामस्वादोरित्थेति पंक्त्यां ग्रुतमाम्नातं सा च चत्वारिंशद्भिरक्षरैरुपेता एवञ्च पञ्चविंशस्तोमकल्पनया सहस्रं सम्पद्यत इति तदयं भूर्लोकः एवं सहस्रत्रयस्य लोकत्रयात्मकतां यो वेत्ति विदित्वा चानुतिष्ठति स एषु त्रिषु लोकेषु प्रतितिष्ठति ॥ ३ ॥

अथैतत् सहस्रदक्षिणापरिमाणं प्रकारान्तरेण स्तौति।

ऋक्था वा अन्यत् सहस्रमित्याहुरक्षरेण्या अन्यदिति यत् त्रिरात्रे दीयते तदृक्था अथ यदग्निष्टोमे तदक्षरेण्या ॥ ४ ॥

अन्यदेकं सहस्रं सहस्रसंख्यादक्षिणा ऋक्था ऋक्संख्यया तत्स्थिताः अपरं सहस्रं सहस्रसंख्यादक्षिणा अक्षरेण्या अक्षरसंख्ययावस्थिता इति ब्रह्मवादिन आहुः का पुनः कुत्रेति विविच्यते यत् सहस्रं गर्गत्रिरात्रे दक्षिणात्वेन दीयते तदृक्था तत् सहस्रसंख्यादक्षिणा ऋक्था तत्र हि सहस्रं स्तोत्रीयाः सहस्रं दक्षिणा इति स्तोत्रीयाणामेषां सहस्रसंख्या दृश्यते तथाच तत्संख्यया दक्षिणा ऋक्था भवति अथ यत् सहस्रमग्नि-

ष्टोमे अग्निष्टोमसंस्थे अश्विन्नेकाहे दक्षिणा सहस्रमक्षरेष्वा ब्रह्मसाम्नः स्तोत्रीयाक्षरसंख्यावस्थिता अक्षरेष्वा ॥ ४ ॥

एतावद्विदृणोति ।

यत् सहस्राक्षरासु ब्रह्मसाम भवति सहस्रस्यैव सा प्रतिष्टुतिः ॥ ५ ॥

स्वादोरित्थाविषूवत इत्याद्यासिस्त्रः पङ्क्योऽत्र ब्रह्मसाम्नः स्तोत्रीयास्ताः प्रत्येकं चत्वारिंशदक्षराः पञ्चविंशस्तोमकत्वात् आवृत्या पञ्चविंशतिसंख्याकाः पङ्क्यो भवन्ति एवञ्च प्रत्यृचां चत्वारिंशत्सङ्ख्यया परिगणनायां सहस्राक्षराणि सम्पद्यन्ते तदिदमुक्तं सहस्राक्षरास्विति यत् सहस्राक्षरासु ब्रह्मसाम ब्रह्मणः पृष्ठस्तोत्रनिर्वर्त्तकं श्रैताख्यं साम भवति सा सहस्रस्यैव दीयमानस्यैव प्रतिष्टुतिः प्रतिस्तवनं ॥ ५ ॥

अथान्यप्रकारेण दक्षिणादानं स्तौति ।

यावद्वै सहस्रङ्गाव उत्तराधरा इत्याहुस्तावदस्मात् लोकात् स्वर्गोलोक इति तस्मादाहुः सहस्रयाजी वा इमान् लोकान् प्राप्नोति ॥ ६ ॥

सहस्रं सहस्रसङ्ख्यागावः उत्तराधरा अन्योन्यस्योपरि उत्तराधरभावेनावस्थिताः यावदुच्छ्रिता भवन्ति अस्माल्लोकात्तावत्प्रमाणे उन्नते स्थाने स्वर्गाख्योलोक इति ब्रह्मवादिन आहुः यस्मादेवं सहस्रगवोर्द्धप्रमाणे स्वर्गः तस्मादेव आहुर्मेधावा-

दिन: सहस्रयाजी सहस्रगोदक्षिणेन यागेनेष्टवान् पृथिव्यादीन् लोकान् व्याप्नोतीति यद्यपि पूर्व्वं सहस्रगवोर्द्ध्वप्रमाण: स्वर्ग इति एकस्यैव लोकस्य प्राप्यत्वमवगम्यते तथापि नान्तरीयकं पृथिव्यन्तरिक्षयो: प्रापणमित्यभिप्रायेणेमान् लोकानिति बहुवचनं ॥ ६ ॥

अथ ब्रह्मसाम्न: पङ्क्तिच्छन्दस्का ऋचो विधातुमाह ।

पशुभिर्वा एष व्यृध्यत इत्याहुर्य: सद्य: सहस्रं ददातीति पङ्क्तिषु ब्रह्मसाम भवति पाङ्क्तो यज्ञ: पाङ्क्ता: पशवो यज्ञ एव पशुषु प्रतितिष्ठति ॥ ७ ॥

योऽयं यजमान: सद्योयुगपदेव गवां सहस्रं ददाति एष पशुभि: व्यृध्यते हीयते तत्परिहाराय पङ्क्तिषु पङ्क्तिच्छन्दस्कासु ऋक्षु स्वादोरित्थाविषूवत इत्याद्यासु स्वैतं ब्रह्मसाम भवति पाङ्क्त: पङ्क्तिसम्बन्धो यज्ञ: पशवश्च पाङ्क्ता: पङ्क्तिसम्बन्धा: एवञ्च पङ्क्तिछन्दसा यज्ञएव पशुषु प्रतितिष्ठति पुनर्बहुपशुको भवतीत्यर्थ: ॥ ७ ॥

अथैतस्यास्त: स्तोत्रीयासम्पन्निद्वारेण स्तुतिं करोति ।

त्रिष्टुभ स्तोमं सम्पद्यते विराजं छन्द: ॥ ८ ॥

स्तोत्रीयाणामियत्तापरिज्ञानाय कल्पकारेण कृतास्तोमक्लृप्ति: प्रदर्श्यते त्रिष्टवहिष्पवमानं पञ्चदश: तृचस्त्राज्यानीति द्वे

पञ्चदशके द्वे त्रिवृती इत्यर्थः पञ्चदशत्रिवृद्भ्यामन्यानि सप्तदशो माध्यन्दिनः पवमानो होतुश्च पृष्ठं पञ्चदशं मैत्रावरुणस्य पञ्चविंशं ब्राह्मणाच्छंसिनः सप्तदशमच्छावाकस्य एकविंश आर्भवः पवमान एकविंशोऽग्निष्टोम इति एवञ्च प्रातःसवनीयाः स्तोत्रीयाः सप्तपञ्चाशत् ५७ माध्यन्दिनपवमानीया एकनवतिः ९१ तृतीयसवने द्विचत्वारिंशत् ४२ संहृत्य नवत्यधिकशतस्तोत्रीया भवन्ति १९० तास्त्रतुर्विंशतिसंख्या त्रिवृतः एका विराट् भवति तदेतदुच्यते त्रिवृतं स्तोममिति पूर्व्वोक्तस्तोमको यज्ञस्त्रिवृतं स्तोमं सम्पद्यते विराडाख्यं छन्दश्च त्रिवृतो हि नवस्तोत्रीयाः तथाच स्तोत्रीयाणां नवनवशो भागे अशीतिशताभिः स्तोत्रीयाभिः विंशतित्रिवृतः सम्पद्यन्ते ॥ ८ ॥

अवशिष्टा दशस्तोत्रीयाः सा एका विराट् किन्तत इत्याह।

प्राणो वै त्रिवृदन्नं विराणनवैव प्राण ऋतेऽन्नात्पारयति नान्नमृते प्राणात्प्राणेषु चैवान्नाद्ये च प्रतितिष्ठति ॥ ९ ॥

त्रिवृत् स्तोमः प्रजापतिमुखादुत्पन्नः प्राणवायुश्च मुखे वर्त्तत इति तस्य प्राणात्मकत्वं विराट् छन्दः दशाक्षरं अन्नञ्च दशविधेन्द्रियतर्पकं तस्माद्विराजोऽन्नत्वं नवैव खलु प्राणः प्राणवायुः अन्नाद्यो अन्नं विहाय पारयति शरीरे वस्थातुं शक्नोति अन्नं प्राणमन्नमपानमाहुरिति श्रुतेः तथा प्राणादृते प्राणं विहाय अन्नमपि शरीरं पोषयितुन्न शक्नोति तस्मादनयोः

परस्परसहकारित्वादुभयोरेव सह सम्पादनेन प्राणेषु चैव अन्नाद्येषु यजमानः प्रतिष्ठितो भवति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य
अष्टमः खण्डः।

अथ नवमः खण्डः।

अथ द्वितीयमन्यं साहस्रमेकाहं दर्शयति।

अथैष सर्व्वज्योतिः सर्व्वस्याप्तिः सर्वस्य जितिः सर्वमेवैतेनाप्नोति सर्वञ्जयति ॥ १ ॥

अथानन्तरमेष वक्ष्यमाणः सर्व्वज्योतिर्नामैकाह उच्यत इति शेषः स च सर्व्वस्य फलस्याप्तिः प्राप्तिसाधनं तथा सर्व्वस्य जेतव्यस्य जितिर्जयसाधनं तस्मादनेन यो यजते स सर्व्वमेतेन फलमाप्नोतीति सर्व्वं च जेतव्यं जयति ॥ १ ॥

अथास्य सहस्रदक्षिणात्ववेदनं स्तौति।

परमो वा एष यज्ञः परमꣳ सहस्रं परमतां गच्छति य एवं वेद ॥ २ ॥

एष सर्वज्योतिर्नाम यज्ञः परमो वै सर्वेभ्य उत्कृष्टः सर्वज्योतिरिति संज्ञया सकलतेजोमयत्वात् यदस्य दक्षिणारूपं सहस्रं

तदपि परमं शतादिसंख्याया आधिक्यात् एवं सहस्रदक्षिणस्य परमत्वं यो वेद परमतां श्रेष्ठतां गच्छति ॥ २ ॥

अथास्य स्तोत्रीयाः संहत्यानूद्य सहस्रदक्षिणात्वमित्याह ।

तस्य द्विशताः स्तोत्रीया अन्तो वै वाचो द्विशतमन्तः सहस्रमन्त एव तदन्तं प्रतिष्ठापयति ॥ ३ ॥

पूर्ववदत्रापि स्तोमक्लृप्तिः कल्पकारकृता प्रदर्श्यते तस्य त्रिवृत्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमानस्तोत्राणि च पृष्ठानि पञ्चविंशं ब्राह्मणाच्छंसिनः सप्तदश आर्भव एकविंशोऽग्निष्टोम इति एवञ्च प्रातःसवने एकोनसप्ततिः ६८ स्तोत्रीयाः माध्यन्दिने त्रिनवतिः ८३ तृतीयसवनेऽष्टत्रिंशत् ३८ मिलित्वा द्विशतं स्तोत्रीया भवन्ति २०० तदिदमुक्तं तस्य द्विशता इति तस्य सर्वज्योतिर्नाम्नः द्विशता शतद्वयपरिमिताः स्तोत्रीया ऋचो भवन्ति वाचः शब्दस्य द्विशतसंख्यान्तो वै अवसानभूतं सहस्रसंख्या चान्तः तस्मात् न्यूनसंख्यानां अवसानभूतत्वात् तथाच द्विशतस्तोत्रीयात्मके क्रतौ सहस्रदक्षिणादानं कुर्वन् अन्तत एवान्तं पतिष्ठापयति परस्परं सम्बद्धं करोतीत्यर्थः ॥३॥

अथैतत् प्रकारान्तरेण स्तौति ।

कृतस्तोमो वा एष सर्वमेवैतेनाप्नोति सर्वं जयति सर्वꣳ हि कृतेन जयति ॥ ४ ॥

एष सर्वज्योतिर्नामैकाहः कृतस्तोमो वै कृतः पूर्वस्मिन्नेकाहे

क्लृप्त: स्तोम: स्तोत्रीयासमूहो यस्य स तथोक्त: निष्पन्नस्तोत्रक इत्यर्थ: स्पष्टमन्यत् सर्व्वजयहेतु: सर्वं हि क्लृतेनेति सर्वं जेतव्यं हि यस्मात् क्लृतेन निष्पन्नेनैव साधनेन लोकोजयति यस्मादित्यर्थ: ॥ ४ ॥

अथान्नप्राप्तिसाधनत्वेन स्तौति ।

विराजꣳ सम्पद्यतेऽन्नं विराडन्नाद्यमेवावरुन्धे ॥५॥

दशाक्षरा विराट् अस्य चैकाहस्य पूर्व्वोक्तानां स्तोत्रीयाणां दशसंख्यया विभागे विंशतिर्विराजो भवन्ति तथा चायं यज्ञो विराजं सम्पद्यते प्राप्नोति शिष्टं सिद्धं ॥ ५ ॥

अथाग्निष्टोमसाम्न: स्तोमं विधाय स्तौति ।

एकविंशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविंशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥ ६ ॥

एकविंशस्तोमकोऽग्निष्टोमो भवति अग्निष्टोमसाम एकविंशस्तोमको भवतीत्यर्थ: किमतो भवति तदुच्यते तथा प्रतिष्ठारूपो ह्येकविंश: पूर्व्वमुक्त: तथा च यज्ञस्यान्ततोऽवसान एव यजमान: प्रतिष्ठितो भवतीति ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य

नवम: खण्ड: ।

अथ दशमः खण्डः ।

अथ विश्वज्योतिःसंज्ञं तृतीयं साहस्रमेकाहं दर्शयति ।

अथैष विश्वज्योतिरुक्थ्यः ॥ १ ॥

अथानन्तरं एष वक्ष्यमाणो विश्वज्योतिर्नाम उक्थ्यः उक्थसंस्थः अन्यः साहस्र एकाहः ॥ १ ॥

अथैतस्य विश्वज्योतिरिति संज्ञां उक्थसंस्थताञ्च स्तौति ।

पशवो वा उक्थानि पशवो विश्वं ज्योतिर्विश्व एव ज्योतौ पशुषु प्रतितिष्ठति ॥ २ ॥

उक्थान्युक्थस्तोत्रीयाणि पशवो वै तत्साधनत्वात् तच्छब्दवाच्याः पशवश्च विश्वं व्याप्तं ज्योतिस्तेजः बहुपशुको हि लोकेऽतिशयेन प्रकाशते तस्माद्विश्वज्योतिःसंज्ञ एकाहे उक्थस्तोत्राणि प्रणयन् विश्वव्याप्ते ज्योतौ ज्योतींष्येव पशुषु प्रतितिष्ठति ॥ २ ॥

अथैतं त्रिरात्रसाम्येन स्तौति ।

अहर्भिर्वै त्रिरात्र इमान् लोकानाप्नोति सवनेरेष उत्तरमुत्तरं त्रिरात्रस्याहर्वर्षीय उत्तरमुत्तरमेतस्य सवनं वर्षीयस्तेन त्रिरात्रमाप्नोत्युत्तर उत्तर एषां लोकानां ज्यायाꣳस्तेनेमान् लोकानाप्नोति ॥३॥

योऽयं वक्ष्यमाणो गर्गत्रिरात्राख्यः सोमयागः अयमहर्भिः क्रमेणानुष्ठितैः अग्निष्टोमोक्थ्यातिरात्रसंस्थैस्त्रिभिरहोभिरेव इमान् पृथिव्यादीन् लोकानाप्नोति एष तु विश्वज्योतिर्नाम यज्ञस्त्रिभिरेव सवनैस्तानाप्नोति तथा चास्य त्रिरात्रस्य यदुत्तरमुत्तरमहस्तद्वर्षीयः वृद्धतरं अग्निष्टोमोक्थ्यातिरात्रसंज्ञानामुत्तरोत्तरं विवृद्धस्तोमकत्वात् एतस्यैकाहस्य उत्तरमुत्तरं सवनं वर्षीयः प्रातःसवनात् माध्यन्दिनं सवनं वृद्धतरं ततोऽपि तृतीयसवनं वृद्धतरं एतच्चाग्रे दर्शयिष्यते तथाच एष यत्त्रिरात्रं यज्ञक्रतुमाप्नोति तद्वत्प्रशस्तो भवतीत्यर्थः अपिच एषां पृथिव्यादिलोकानां मध्ये उत्तरउत्तरो लोकोज्यायन् वृद्धतरोऽतिशयेन विस्तीर्णः तेनोत्तराधिकसवनेन यज्ञेन इमानेव लोकानाप्नोति ॥ ३ ॥

अथास्य सवनानामुत्तरोत्तराधिक्यं दर्शयितुमाह।

अस्थूरिर्वा एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमौ सवनं वहतः ॥ ४ ॥

अस्थूरिरश्वद्वन्द्वयुक्तो यो रथस्तत्सदृश एष सन्ततः संहितो यज्ञः कुतः हि यस्मात् द्वौ द्वौ स्तोमौ संहत्य अस्यैकैकं सवनं वहतः ॥ ४ ॥

कतमौ च द्वौ द्वौ स्तोमाविति तत्राह।

त्रिवृत्पञ्चदशौ प्रातःसवनꣳ सप्तदशपञ्चविꣳशौ

माध्यन्दिनꣳ सवनञ्चतुर्विꣳशैकविꣳशौ तृतीयस-
वनं ॥ ५ ॥

त्रिवृद्वहिष्पवमानस्य स्तोमः पञ्चदश आज्यानां एवमेतौ
युंहतौ प्रातःसवनं वहतः एवमुत्तरौ द्वौ द्वावपि द्वे सवने
वहतः ॥ ५ ॥

अथैतत् स्तोमद्वययोजनं प्रशंसन् पूर्ववत्सहस्रं देयमित्याह ।

यद्वै युक्ते सन्तत आधीयते वहति तद्यथा युक्ते
सन्तत आदध्यादेवमेतस्मिन् सहस्रमाधीयते ॥ ६ ॥

यद्वै यत् खलु द्रव्यं युक्ते अश्वाभ्यां योजिते सन्तते सम्बद्धे
रथे आधीयते आरोप्य निधीयते स रथस्तद्द्रव्यं वहति यथैव
युक्ते सन्तते च रथे आदध्यात् वोढव्यं भारं निदध्यात् एवमेवै-
तस्मिन्नेकाहे प्रतिसवनं स्तोमद्वयेन युक्ते दक्षिणानां गवां सहस्र-
माधीयते आरोप्यते अत्रापि यज्ञस्य पूर्व्ववत् सहस्रं दक्षिणा
दातव्या इत्यर्थः ॥ ६ ॥

चोदकेन प्राप्तयोर्बृहद्रथन्तरयोः प्रकृतिवद्विकल्पे प्राप्ते समु
च्चयं विधत्ते ।

उभे बृहद्रथन्तरे भवतः ॥ ७ ॥

रथन्तरम्माध्यन्दिने पवमाने कार्य्यं बृहद्धोतुः पृष्ठइति उभयं
सामसु पूर्व्वमुक्तं ॥ ७ ॥

अथैतत् स्तौति ।

इयं वै रथन्तरं द्यौर्बृहदेवास्माल्लोकाद्गायत्येवा-मुष्मादुभयोरनयोर्लोकयोः प्रतितिष्ठति ॥ ८ ॥

इयं पृथिव्येव रथन्तरं साम द्यौः स्वर्गोलोको बृहत् एव आद्य अस्मादेव भूर्लोकाद्रथन्तरं गायति अमुष्मात् द्युलोक द् बृहद्गायति तथा चानयोरुभयोर्द्यावापृथिव्योर्लोकयोर्यजमानः प्रतितिष्ठति ॥ ८ ॥

अथान्यत्साम विधत्ते ।

अनुष्टुभ्याथर्वणं भवति ॥ ९ ॥

आभीवे पवमाने पुरोजिती वो अन्धस इत्यस्मिन्नानुष्टुभे तृचे श्यावाश्वान्धीगवे गीत्वा तस्मिन्नेव तृचे पुनराथर्व्वणं साम गातव्यं तथा च कल्पकृतोक्तं यस्तेमदो वरेण्य इति गायत्रमौक्ष्णे आन्धी-गवादुत्तरमाथर्वणं इति ॥ ९ ॥

अथैतत् स्तौति ।

भेषजं वै देवानामथर्वाणो भेषज्यायैवारिष्ट्यै ॥१०

अथर्व्वाणा अथर्वणा ऋषिणा दृष्टा मन्त्राः देवानां भेषजं वै भैषज्यरूपास्तस्मादेतत्साम भेषजाय भैषज्याय अरिष्ट्यै अहिं-सायै भवति ॥ १० ॥

अथोक्थस्तोत्रेष्वन्तिमेऽन्यत्साम विधाय स्तौति ।

उद्वंशीयमुक्थानामन्ततो भवति सर्व्वेषां वा एतत् पृष्ठानाꣳ रूपꣳ सर्वेष्वेव रूपेषु प्रतितिष्ठति ॥ ११ ॥

उक्थ्यानामुक्थस्तोत्राणामन्ततोऽवसाने अच्छावाकोक्थस्तोत्रे उद्वंशीयं साम भवति यथोक्तं कल्पकारेण साकमश्वं सौभरं नैककुभञ्चोद्वंशीयमित्युक्थानीति साकमश्वं होतुरुक्थं सौभरनैककुभयोरन्यतरद् ब्रह्मणः उद्वंशीयमच्छावाकस्येति कल्पार्थः एतदुद्वंशीयं सर्व्वेषां रथन्तरादीनां षस्रां पृष्ठानां रूपं एतच्चाष्टमेऽध्याये प्रपञ्चेन दर्शितं स्पष्टमन्यत् ॥ ११ ॥

अथास्य पूर्व्वोक्तामुक्थसंस्थामनूद्य स्तौति ।

उक्थो भवति पशवो वा उक्थानि पशवः सहस्रं पशुष्वेव तत्पशून्दधाति ॥ १२ ॥

अयमुक्थसंस्थो भवति उक्थस्तोत्राणि पशुसाधनत्वात् पश्वात्मकानि सहस्रसंख्यादक्षिणाश्च पशवस्तेन पशुष्वेव पशून् दधाति स्थापयति ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथाग्निष्टोमसंस्थं चतुर्थं साहस्राख्यं एकाहं विधित्सुराह ।

यो वा अग्निष्टोमे त्रिरात्रं प्रेतं विद्यात्सोऽग्निष्टोमे सहस्रं दद्यात् त्रिरात्रायतनꣳ हि सहस्रं ॥१॥

यो ह्यग्निष्टोमे अग्निष्टोमसंस्थे एकाहे त्रिरात्रं वक्ष्यमाणं गर्गत्रिरात्राख्यंयज्ञं प्रोतं प्रतिमुक्तं विद्यात् जानीयात् सोऽस्मिन्नग्निष्टोमे सहस्रं दक्षिणा दद्यात् त्रिरात्रायतनं त्रिरात्र एव आयतनमिति स्थानं यस्य तथाविधं हि सहस्रं सहस्रदक्षिणादानं तस्मादस्यैकाहस्य त्रिरात्रसम्बन्धं विदुषा सहस्रगावो दक्षिणात्वेन दातव्या इत्यर्थः एवञ्चाग्निष्टोमसंस्थेन सहस्रदक्षिणेन यजेतेति विधिरुन्नेतव्यः ॥ १ ॥

अथास्मिंस्त्रिरात्रस्य प्रोतत्वं दर्शयितुं तदीयानां त्रयाणामह्नां याः प्रतिपदस्तासामन्यतमास्य प्रतिपत्कार्य्येत्याह।

उपास्मै गायतानर उपोषु जातमप्तुरं पवस्व वाचो अग्रिय इति प्रतिपदो भवन्त्येतद्वै त्रिरात्रमकः ॥ २ ॥

उपास्मै गायतानर इत्यादितृचानां मध्ये अन्यतमस्तृचोऽस्मिन्नहनि बहिष्पवमानस्य प्रथमस्तृचः कार्य्यः एतत् वै एतद्धि प्रतिपत्त्रयं त्रिरात्रं गर्गत्रिरात्रं अकः अकार्षीत् तदीयेषु त्र्यहःसु एतेषां बहिष्पवमानस्य क्रमेण प्रथमतृचत्वात् तस्मादत्राप्येषामन्यतमः प्रथमस्तृचः अपरौ तृचौ दविद्युतत्यारुचा पवमानस्य ते कव इति कल्पकारोक्तौ द्रष्टव्यौ ॥ २ ॥

अथ त्रिरात्रसम्बन्धिष्वहःसु यानि पृष्ठसामानि तान्यप्यत्र क्रियन्त इत्याह।

पवमाने रथन्तरं करोति पवमानस्यान्त्यं वाम-
देव्यं बृहत् पृष्ठं ॥ ३ ॥

अत्र कल्पः उच्चाते जातमन्धस इति गायत्रञ्चामहीयवञ्च पवस्व मधुमत्तम इतीडानां संक्षार एकस्यां प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यमिति यौधाजयं तिसृषु पुनानः सोमधारयेति रौरव-मेकस्यां रथन्तरं तिसृषु शिशुञ्जज्ञानं हर्य्यतम्मृजन्तीति वामदेव्य-मन्त्यं बृहत् पृष्ठमिति तस्मादेवं क्लृप्तान् माध्यन्दिने पवमाने पुनानः स मेति तृचे रथन्तरं साम बृहत्साम होतुः पृष्ठं स्तोत्रं गातव्यं तथा शिशुञ्जज्ञानमित्यस्मिंस्तृचे गीयमानं वामदेव्यं तस्य पवमानस्यान्त्यं साम भवति तथा बृहत्साम होतुः पृष्ठं भवति ॥ ३ ॥

अथैतेषां सङ्घातकरणं स्तौति ।

इयं वै रथन्तरमन्तरिक्षं वामदेव्यं द्यौर्बृहदिमे लोकास्त्रिरात्रो यदेतानि सामानि मध्यञ्चि करोती-मानेव तल्लोकान् सन्दधाति तेन त्रिरात्रमाप्नोति ॥ ४

रथन्तरवामदेव्यबृहतां पृथिव्यन्तरिक्षस्वर्गात्मकत्वं प्रागुक्तं त्रिरात्रश्चेमे पृथिव्यादयो लोकाः वसुरुद्रादित्यैस्त्रिरात्रावयवा-नामग्निष्टोमोक्थ्यातिरात्राणां त्रयाणामह्नां पृथिव्यादिलोक-त्रयसाधनतया क्रमेण प्रयुक्तत्वात् तथा चाम्नायते एवञ्च यदे-तानि त्रिरात्रे वियुज्य प्रयुज्यमानानि रथन्तरादीनि सामानि

सभ्रग्ग्नि सहाग्नतीति तत्तथा अग्निम्नहमि सह प्रयुक्तानि करोति तत्तेनेमानेव पृथिव्यादिलोकान् सन्दधाति परस्परं संयोजयति तथा लोकद्वारा विरातं यज्ञक्रतुमाप्नोति ॥ ४ ॥

अथ सर्वप्रकृतौ ज्योतिष्टोमे तृतीयसवने पवस्व मधुमत्तम इति यः काकुभः प्रगाथ सोऽत्रापि चोदकेन तृतीयसवन एव प्रयोज्यत्वेनातिदिश्यते तस्य माध्यन्दिनपवमान आकृष्य प्रयोगं विधत्ते ।

ककुभं प्राचीमुद्रूहति ॥ ५ ॥

पवस्व मधुमत्तम इत्येतां ककुप्छन्दस्कां स्तोत्रीयां प्राचीं प्राग्भागे वर्त्तमानामुद्रूहति आर्भवात् पूर्वभागे माध्यन्दिनपवमाने तां प्रापयेत प्रयुञ्जीतेत्यर्थः ॥ ५ ॥

अथैतस्मात् पूर्वस्मिन् भागे आकर्षणमुपपादयति ।

पुरो ह्येतया सत्या अपशुवीर्य्यं करोति ॥ ६ ॥

पुरः पुरस्तात् पूर्वभागे वर्त्तमानया ह्येतया ककुभा स्तोत्रीयया अपशुः पशुरहितः सोमयागः तदुत्पत्त्यर्थं वीर्य्यं करोति तस्मात्तां प्राचीमुद्रूहेदित्यर्थः ॥ ६ ॥

अथ तत्र कर्त्तव्भिगेयं साम विधाय स्तौति ।

तस्यामिडानाꣳ संक्षारः पुरुषो वै ककुप् पशव इडानाꣳ संक्षार आत्मन्येव तत्पशून् प्रतिष्ठापयति ॥ ७ ॥

तस्यां ककुभि स्तोत्रीयायामिडानां संयाराख्यं साम गातव्यं तथैव पूर्व्वं काल्य उदाहृतः किमतस्तदुच्यते पुरुषो हि ककुप्छन्दः ककुप्प्राणः रूपस्य पुंस्त्वात् अस्यापि ककुप्स्थानीयेनाधिक्येन मध्यमपादेन युक्तत्वेन तत्साम्यात् पुंस्त्वं योऽयमिन्द्रानां संयारः सपशवः गोवाश्वक्रेनेडानां शब्देनाभिधेयत्वात् तत्तथा च कक्-सामयोः पुरुषपश्वात्मकत्वात् पुरुषरूपे आत्मन्येव पशून् प्रतिष्ठापयति ॥ ७ ॥

अथास्मिन्नेव माध्यन्दिने पवमाने यौधाजयस्याधारभूतास्तिस्रः स्तोत्रीया विदधाति ।

प्रत्नम्पीयूषम् पूर्व्यं यदुक्थ्यमिति सतोबृहत्यो भवन्ति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

अथैताः स्तौति ।

सतोबृहत्या वै देवा इमान् लोकान् व्याप्नुवन्निमानेवैताभिर्ल्लोकान् व्याप्नोति ॥ ९ ॥

सतोबृहत्या बृहतीछन्दस्कया खलु पुरा देवाः इमान् पृथिव्यादिलोकान् व्याप्नुवन् स्पष्टमन्यत् ॥ ९ ॥

अथैतासां गायत्र्यादिसर्व्वछन्दोरूपत्वं प्रदर्श्य सर्व्वपशुसाधनतामाह ।

ता वा एता गायत्र्यो यत्त्रिपदास्तेन गायत्र्य-

स्तावा एता जगत्यो यद्द्वादशाक्षराणि पदानि तेन जगत्यस्तावा एता बृहत्यो यत् षट्त्रिꣳशदक्षरास्तेन बृहत्यः सर्वेषां वा एताश्छन्दसाꣳ रूपꣳ सर्व्वाणि रूपाणि पशूनामवरुन्धे ॥ १० ॥

ता वा एताः प्रत्नं पीयूषमित्याद्याः गायत्र्यो भवन्ति कथं सतोबृहतीनां गायत्रीत्वमिति अत्रोच्यते यद्यस्मात् एतास्त्रि-पदास्तेन गायत्रीसाम्यात् गायत्र्यस्तथा ता एता जगत्यो भवन्ति एतदुपपद्यते यत् द्वादशाक्षराणि पदानीति पादाः प्रथमपादस्य अक्षरव्यूहेन द्वादशाक्षरत्वं एवं बृहतीत्वमपि योज्यं यस्मादेव-मेताः सर्वेषां गायत्र्यादीनां छन्दसां रूपं तस्मादेताभिः सर्व्वाणि पशूनां रूपाण्यवरुन्धे नानारूपान् सर्व्वान् पशून् लभत इत्यर्थः॥१०

अथैतं यज्ञम्महाव्रतात्मना रूपयन् स्तौति।

एतद्वै प्रत्यक्षं महाव्रतन्तस्य गायत्रꣳ शिरो बृह-द्रथन्तरे पक्षौ वामदेव्यमात्मा यज्ञायज्ञीयं पुच्छन्द-क्षिणा एवाक्यमेष वाव प्रत्यक्षम्महाव्रतेन स्तुते य एतेन यजते ॥ ११ ॥

एष खलु वै यज्ञः प्रत्यक्षं मुख्यं महाव्रतं यद्येवं शिरः-पक्षादिभिरवयवैर्भवितव्यं महाव्रतस्तोतस्य शिरःप्रभृति पञ्चाव-यवात्मकत्वात् अत कथं तेषां सद्भाव इति तत्राह तस्येति तस्य प्रकृतस्य चाहरस्य महाव्रतस्य यतः यज्ञाग्रतं साम प्रातःसव-

नादौ प्रयुज्यते तच्छिरः पश्चात् माध्यन्दिनपवमाने बृहत् स्तोत्रे च प्रयुज्यमाने बृहद्रथन्तरे पक्षौ भवतः माध्यन्दिनपवमानान्ते प्रयुज्यमानं वामदेव्यं आत्मा मध्यदेहः अग्निष्टोमसामत्वेन प्रयुज्यमानं यज्ञायज्ञीयं पुच्छं याः सहस्रसंख्याका दक्षिणास्ता एवास्मिन्महाव्रतस्तोत्रानुशंसनं बृहती सहस्राख्यं शस्त्रं तस्मादेतेनैवंगुणविशिष्टेन एकाहेन यो यजते एष एव प्रत्यक्षं साक्षान्महाव्रतेन महाव्रतस्तोत्रेण स्तुते स्तौति उक्तसामपञ्चकात्मकत्वात्तस्य ॥ ११ ॥

अथ आयन्तीयं ब्रह्मसाम विधित्सुः पक्षान्तरमुपन्यस्य तत्र दोषमुद्भावयति ।

तस्य बृहत्पृष्ठं पङ्क्तिषु ब्रह्मसाम तदाहुश्छन्दोव्याधीयते यद्बृहत्पृष्ठम्भवति पङ्क्तिषु ब्रह्मसामेति ॥ १२ ॥

अस्मिन्नहनि बृहत्साम होतुः पृष्ठमित्युक्तं तस्यायमनुवादः पङ्क्तिषु स्वादोरित्था विषूवत इत्याद्यासु यत् प्रथमे सहस्र एकाहे ब्रह्मसाम विहितं तत् पङ्क्तिषु तदेव ब्राह्मणः पृष्ठस्तोत्रं तत्तत्र एवं क्रियमाणे सामद्वये आहुर्ब्रह्मवादिनस्तोदयन्ति कथमिति यद्यदि बृहत् बृहत्साम बृहतीषु गीयमानं पृष्ठस्तोत्रं भवति पङ्क्तिषु गीयमानं ब्रह्मसाम भवति तदा छन्दो व्याधीयते स्पष्टं विभिद्यते तन्नायुक्तमिति ॥ १२ ॥

किं तर्हि कार्य्यं तदाह ।

आयन्तीयमेव कार्य्यन्न छन्दो व्याधीते ॥ १३ ॥

आयन्तीयमेव स्वासु ब्रह्मसाम कार्य्यं तथा च बृहतो ब्रह्मसाम्नस्य बार्हते तृचे गानात् न छन्दोव्याधीयते भिद्यते ॥ १३ ॥

नन्वेवं पङ्क्तीर्विहाय बृहत्यां ब्रह्मसाम्नि क्रियमाणे सहस्राक्षरसम्पत्तेरभावात् पूर्व्वोक्तसहस्रप्रतिष्टुतिर्न स्यादित्यत आह ।

एषो सहस्रस्य प्रतिष्टुतिः ॥ १४ ॥

एषो एषैव आयन्तीयस्य स्वासु स्तोत्रीयासु गानमेव सहस्रस्य दक्षिणारूपस्य गवां सहस्रस्य प्रतिष्टुतिः प्रतिस्तवनं ॥ १४

ननूक्तं ब्रह्मसाम्नोऽक्षराणां सहस्रसंख्यापूर्त्त्यभावात् प्रतिष्टुतिर्न स्यादिति तत्राह ।

सहस्रमन्यमभितिष्ठतीत्याहुः सहस्रमन्योऽन्वातिष्ठतीति ॥ १५ ॥

सहस्रस्ययं अन्यं यज्ञमभितिष्ठति तत्रत्यब्रह्मसाम्नोऽक्षरसङ्ख्यया तमधितिष्ठते अन्यस्तु यागः सहस्रमन्वातिष्ठतीति हीने अग्नेः कर्म प्रवचनीयत्वं सहस्रसंख्यातो न्यूनया ब्रह्मसाम्नोऽक्षरसंख्ययैव स्वयं सहस्रमधितिष्ठतीति ब्रह्मवादिन आहुः एवमुभयथापि सहस्रसम्बन्धसद्भावात् सहस्रस्य प्रतिष्टुतिः सिद्ध्यतीत्यर्थः ॥ १५ ॥

कथमयं यज्ञः सहस्रमन्वातिष्ठतीति तत्राह ।

ककुभं प्राचीमुदूहत्यथ यदेषा द्विपदा ककुभो लोके क्रियते सहस्रस्यैव सोऽन्वाख्यायः ॥ १६ ॥

आर्भवपवमाने स्थितां पवस्व मधुमत्तम इत्येतां ककुभं प्राचीमुदूहति प्राग्देशम्माध्यन्दिनपवमानलक्षणं नयति अथानन्तरं तस्याः ककुभो लोके स्थाने यत्पारिप्रधन्वेत्येषा द्विपदा क्रियते प्रयुज्यते स च सहस्रस्यान्वाख्यानं ॥ १६ ॥

अथ स्तोत्रियासङ्घातं संहत्य स्तौति ।

अनुष्टुभꣳ सम्पद्यते वागनुष्टुब्वाक् विराट्तेन विराजमाप्नोति ॥ १७ ॥

अयमेकाहः संस्तुतोऽनुष्टुभं अनुष्टुप्छन्दः सम्पद्यते अत्र कल्पः त्रिवृद् बहिष्पवमानं पञ्चदशानि त्रीण्याज्यानि त्रिवृन्मैत्रावरुणस्य सप्तदशो माध्यन्दिनः पवमानो होतुश्च पृष्ठं पञ्चदशं मैत्रावरुणस्य पञ्चविंशं ब्राह्मणाच्छंसिनः सप्तदशमच्छावाकस्य सप्तदश आर्भव एकविंशोऽग्निष्टोम इति एवञ्च स्तोमक्लृप्तौ सत्यां प्रातःसवने त्रिषष्टि स्तोत्रीया भवन्ति ६३ माध्यन्दिने त्वेकनवतिः ९१ तृतीयसवनेऽष्टत्रिंशत् ३८ मिलित्वा द्व्यधिकनवतिशतं स्तोत्रीया भवन्ति १९२ द्वात्रिंशदक्षराऽनुष्टुप् तथा च द्वात्रिंशत्संख्यया विभज्यमाना षडनुष्टुभो भवन्ति एवमनुष्टुभं सम्पद्यते अयं यज्ञः प्राप्नोति अनुष्टुप् खलु वाक्संस्तुता विराजोऽपि वाक्संस्तुतः

तेनानुष्टुभा वाचा च त्रिरात्रं गर्गत्रिरात्राख्यं यज्ञक्रतुमाप्नोति तत् फलं प्राप्नोतीत्यर्थः ॥ १७ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य एकादशः खण्डः।

अथ द्वादशः खण्डः।

अथ साद्यःक्रानाम पञ्चैकाहास्तेषु प्रथमद्वितीययोर्दीक्षा-प्रभृत्यवभृथान्तं सर्वमेकस्मिन्नेवाहन्यनुष्ठेयं तृतीयस्य तु एकस्मिन् दिवसे दीक्षा परस्मिन् दिवसे सोमक्रयाद्यवभृथान्तं चतुर्थपञ्चमयोरप्येवं यद्वा एका दीक्षा सोमक्रयप्रभृतिउपवसथान्तं द्वितीयेऽहनि सुत्येति एवं सूत्रकारमतं पञ्चस्वपि साद्यःक्रान्वयात् सद्यएव एकस्मिन्नेवाहनि दीक्षाद्यवभृथान्तं कर्त्तव्यमिति मतान्तरं एतत्सर्वं साद्यःक्रेण वक्ष्यमाणे महाराते प्रातराहुतिं हुत्वेत्यादिना सूत्रकारेण विस्पष्टमुक्तं तत्र प्रथमस्य यदुक्तं सर्वं सद्योऽनुष्ठेयमिति तद्विधित्सुराह।

आदित्याश्चाङ्गिरसश्चादोक्षन्त ते स्वर्गे लोके-ऽस्पर्द्धन्त तेऽङ्गिरस आदित्येभ्यः श्वः सुत्यां प्राब्रुवꣳस्त आदित्या एतमपश्यꣳस्तꣳ सद्यः परिक्रीयायास्य-मुद्गातारं वृत्वा तेन स्तुत्वा स्वर्गं लोकमायन्नहीय-न्ताङ्गिरसः ॥ १ ॥

पुरा आदित्याश्चाङ्गिरसश्च अदीक्षन्त यज्ञाय दीक्षां कृत-वन्तः ते उभे स्वर्गे लोके स्वर्गलोकनिमित्तमस्पर्द्धन्त वयं प्रथमं गमिष्यामो वयं प्रथमं गमिष्याम इति स्पर्द्धां कृतवन्तः एवं स्पर्द्धमानास्तेऽङ्गिरस आदित्येभ्यः सुत्यां श्वः परस्मिन्दीक्षानन्तर-दिने करिष्यमाणं सोमयागं प्राब्रुवन् प्रोक्तवन्तः अथ ते आदित्या एवं वक्ष्यमाणयज्ञमपश्यन् तं यज्ञं सद्यः एकस्मिन्नेवाहनि परि-क्रीय सोमं क्रीत्वा अयास्यमृषिमुद्गातारं वृत्वा त्वमुद्गाता भवे-त्युद्गातृत्वेन वृत्वा तेनायास्येन सर्व्वैः स्तोत्रैः स्तुत्वा स्तावयित्वा समापयन् दीक्षाद्यवभृथान्तं सर्वं कर्म्म एकस्मिन्नेवाहनि अन्व-तिष्ठन्नित्यर्थः यज्ञसमाप्त्यनन्तरमेव ते स्वर्गं लोकमायन् प्राप्नुवन् अङ्गिरसस्त्वहीयन्त दीक्षानन्तरदिवसे सुत्येति तैरुक्तत्वात् एत-स्मिन् दिने दीक्षाद्यवभृथान्तस्य सर्वस्याननुष्ठानेन स्वर्गप्राप्त्य-भावात् सह दीक्षितैरादित्यैः सद्योऽनुष्ठानेन स्वर्गगतैः हीनाः-भूमावेव परित्यक्ताः आसन् ॥ १ ॥

एवं सद्योऽनुष्ठेये यज्ञेऽधिकारिणमाह ।

भ्रातृव्यवान्यजेत ॥ २ ॥

भ्रातृव्यः शत्रुस्तद्वान् अनेन यागेन यजेत शत्रुक्षयहेतुरयं याग इत्यर्थः ॥ २ ॥

अथैतद्वेदितुः फलमाह ।

भवत्यात्मना परास्य भ्रातृव्यो भवति यएवं वेद ॥ ३

य एवं ब्राह्मणार्थं जानाति स आत्मना स्वयमेव भवति भवनशील: समृद्धो भवति ॰अस्य यो भ्रातृव्य: शत्रु: स परा भवति पराभूत: तिरस्कृतो भवति ॥ ३ ॥

अथास्मिन् यागे दक्षिणां विधित्सुराह।

तस्मा अमुमादित्यमश्वꣳ श्वेतं कृत्वा दक्षिणा-मानयꣳस्तं प्रतिगृह्य व्यभ्रꣳशत स एतान्यायास्या-न्यपश्यत्तैरात्मानꣳ समश्रीणात् ॥ ४ ॥

तस्मै अयास्यायोद्गात्रे अमुं दृश्यमानमादित्यं श्वेतं शुक्ल-वर्णमश्वं कृत्वा दक्षिणामानयन् क्रतुदक्षिणात्वेन प्रायच्छन् तमश्वं प्रतिगृह्य सोऽयास्यो व्यभ्रंशत विभ्रष्टवीर्य्योऽभूत् स ऋषि: एतानि इदानीं समाम्नायमानान्यायास्यानि सामान्यपश्यत् तै: दृष्टै: सामभिरात्मानं समश्रीणात् वीर्य्येण समयोजयत् तस्मात् श्वेताश्वोऽस्य क्रतोर्दक्षिणा सचोद्गातुर्द्दातव्य: इतरे-ऽप्यृत्विजो यथा सन्तोषमायान्ति तथा तेभ्यो यत्किञ्चित् धनं दद्यादिति विधिरुन्नेतव्य: तदेतत् सूत्रकृतोक्तं अश्व: श्वेत एतस्य दक्षिणामुद्गात्रे दद्यात् किञ्चिच्चेतरेभ्य इति ॥ ४ ॥

यस्मादेवं तस्मादिदानीमप्यस्मिन् यज्ञे आयास्यं साम प्रयो क्तव्यमित्याह।

यदायास्यानि भवन्ति भेषजायैव शान्त्यै ॥ ५ ॥

यदेतेषु साद्य:क्रेष्वेतान्यायास्यानि सामानि भवन्ति तद्-

प्रजायैव अश्वप्रतिग्रहजनितस्य दोषस्य चिकित्सायाः एव प्रायश्चित्ते उपशमाय च भवति तथा चास्मिन् यज्ञे माध्यन्दिनसवने दक्षिणारूपाश्वप्रतिग्रहजन्यदोषनिर्हरणाय आर्भवे पवमाने इन्द्रमच्छेत्यस्यां स्तोत्रीयायां आयास्यं साम कार्य्यं तथा चास्याः स्तोमस्तोत्रीयाविधाने कल्पकारेणोक्तं उपास्मै गायतानरः पवमानो अजीजनत् पवमानस्य ते कवे इममूषु त्वमस्माकमिति प्रकम्य स्वादिष्ठया मदिष्ठयेति गायत्रञ्च स्वाशिरामर्कः पवस्वेन्द्रमच्छेति सफायास्ये पुरोजिती वो अन्धस इति श्यावाश्वान्धीगवे कावमन्त्य' यज्ञायज्ञीयमग्निष्टोमसामेति ॥ ५ ॥

अथाधिकार्य्यन्तरमाह ।

स्वर्गकामो यजेत ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथैतस्य स्वर्गसाधनतामुपपादयति ।

बृहतीं सम्पद्यते बृहत्या वै देवाः स्वर्गं लोकमायन् स्वर्गमेवैतेन लोकमाप्नोति ॥ ७ ॥

अस्य यज्ञस्याग्निष्टोमसंस्थत्वात् द्वादशस्तोत्राणि तेषु सर्व्वेषु त्रिवृदेव स्तोमः तथाच प्रतिस्तोत्रं नवस्तोत्रीया इति मिलित्वा अष्टोत्तरशतं स्तोत्रीया भवन्ति १०८ षट्त्रिंशदक्षरा च बृहती तत्सङ्ख्यया विभज्यमानास्तास्तिस्रो बृहत्यो भवन्ति एवञ्च अयामेकां बृहतीं सम्पद्यते बृहत्या बृहतीच्छन्दसा साधनेन देवाः

पुरा स्वर्गं लोकमायन्नगच्छन् अतो बृहतीसम्पन्नेनैतेन स्वर्गमेव लोकमाप्नोति ॥ ७ ॥

अथान्यमधिकारिणमाह।

पशुकामो यजेत ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

तथैव तस्य पशुसाधनत्वमुपपादयति।

पशवो वै बृहती पशुष्वेव प्रतितिष्ठति ॥ ९ ॥

छन्दांसि पशुर्वाजिमजयंस्तान् बृहत्यजयत् तस्माद्बार्हताः पशव उच्यन्ते इति ब्राह्मणान्तरात् बृहत्याः पशुरूपत्वं अतः पशुरूपान्वयात् बृहत्या सम्पत्तेः पशुष्वेव यजमानः प्रतितिष्ठतीति ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य

द्वादशः खण्डः।

अथ त्रयोदशः खण्डः।

अथ द्वितीयं साद्यःक्रमेकाहं दर्शयति।

एतस्यैवैकविंशमग्निष्टोमसाम कृत्वामयाविनं याजयेत् ॥ १ ॥

एतस्यैव पूर्व्वोक्तस्य यज्ञस्याग्निष्टोमसाम एकविंशं एकविंशस्तोमकं कृत्वा एतेनामयाविनं रोगिणं यजमानं याजयेत् यथा दर्शपौर्णमासयोर्गुणविकृता राकायज्ञादयः यथा वा अग्निष्टोमस्य गुणविकृता उक्थादयः एवं अयं द्वितीयः साद्यःक्रः पूर्व्वोक्तएव गुणविकृतः ॥ १ ॥

अथास्य व्याधिनिर्हरणहेतुतामाह।

प्राणो वै त्रिवृत्प्राण आदित्यः प्राणैरेष व्यृध्यते य आमयावी प्राणैरेवैनꣳ समर्द्धयति ॥ २ ॥

अस्मिन् हि यागे बहिष्पवमानादौ प्रथमं त्रिवृत्स्तोमः प्रयुज्यते स च प्राणसंस्तुतः प्राणश्चादित्यः स हि सर्व्वेषां भूतानां प्राणनहेतुः योऽसौ तपत्युदेति स सर्व्वेषां भूतानां प्राणानादाय्योदेतीति श्रुतेः य आमयावी व्याधिग्रस्तः एष प्राणैः व्यृध्यते वियुज्यते एवञ्च प्राणसंस्तुतस्त्रिवृत्स्तोमकेन तेनैनं आमयाविनं पुनः प्राणैरेव समर्द्धयति ॥ २ ॥

अथ प्रकारान्तरेण आमयाव्यधिकारमुपपादयति।

विराजꣳ सम्पद्यतेऽप वा एतस्मादन्नाद्यं क्रामति य आमयाव्यन्नं विराडन्नाद्यमेवास्मिन् दधाति ॥ ३ ॥

अयं द्वितीयः साद्यःक्रो विराजं छन्दः सम्पद्यते अस्य हि अग्निष्टोमसामव्यतिरिक्तान्येकादशत्रिवृन्ति स्तोत्राणि तेषु नवनवतिस्तोत्रीया भवन्ति एकविंशस्तोमकमग्निष्टोमसामेति त्रिंश-

त्रिवृतं स्तोत्रीया भवन्ति दशाक्षरा विराडिति दशसङ्ख्यया विभागे सति विराट्सम्पत्तिः य आमयावी रोगी एतस्मात् अन्नाद्यं अन्नस्यादनमपक्रामति अपगच्छति स्पष्टमन्यत् ॥ ३ ॥

अथाग्निष्टोमसाम्न एकविंशतिस्तोमतामनूद्य आमयाविनः प्रतिष्ठाहेतुतामाह।

एकविꣳशोऽग्निष्टोमो भवत्यप्रतिष्ठितो वा एष य आमयावी प्रतिष्ठैकविꣳशः प्रत्येव तिष्ठति ॥ ४ ॥

एकविंशकमग्निष्टोमसाम भवति य आमयावी रोगी एषो ऽप्रतिष्ठितः प्रतिष्ठारहितः गतमन्यत् ॥ ४ ॥

अथापरावधिकारिणावाह।

एतेनैवान्नाद्यकामो वा प्रतिष्ठाकामो वा यजेतान्नं विराट् प्रतिष्ठैकविꣳशोऽन्नमन्नं प्रतितिष्ठति ॥ ५ ॥

अन्नाद्यमदनीयमन्नं कामयमानो वा प्रतिष्ठाकामो वा एतेनैव साद्यःक्रेण यजेत अयं हि विराट्सम्पन्न इत्युक्तं सा च विराट् अन्नं अन्नात्मिका अतोऽन्नाद्यकामोऽन्नमत्ति अत्तुं योग्यो भवति अग्निष्टोमसाम्नः एकविंशस्तोमकत्वात् प्रतिष्ठाकामोऽपि प्रतितिष्ठति अथैतस्य स्तोमक्लृप्तिः कल्पकारोक्ता प्रदर्श्यते तस्यैकविंशमग्निष्टोमसामोभौ त्रिवृताविति उभौ प्रथमद्वितीयावेतौ साद्यःक्रौ त्रिवृत्स्तोमकौ द्वितीये त्वग्निष्टोमसामैकविंशस्तोमकमिति तस्यार्थः अथ साद्यःक्राणां साधारणधर्मा विधास्यन्ते यद्य-

येते प्रथमसाद्यःक्रानन्तरमेव वक्तव्याः तथापि तस्यैवायं द्वितीयः साद्यःक्रो गुणविकार इत्यभिप्रेत्य विकारसहितस्य तस्यानन्तरं धर्म्माणां प्रतिपादनं तथाच सूत्रकारेणोक्तं उर्व्वरावेदिरिति प्रथम इति अयमर्थः उर्व्वरावेदिरित्याद्यङ्गजातं वक्ष्यमाणं प्रथमेऽपि साद्यःक्रे द्रष्टव्यं न केवलमस्मिन्नेवेति ततो यन्नवनीतमुदियात्तदाज्येऽपि कार्य्यं सद्यस्त्वायेति आम्नास्यमानत्वात् साद्यःक्रतैव धर्म्मान्वयहेतुः नान्यत् साद्यःक्रता च प्रथमादीनां सर्व्वेषां समानेति सर्व्वत्र वक्ष्यमाणा धर्म्माः कर्त्तव्या इति ॥ ५ ॥

तत्र वेदिं विधाय स्तौति ।

उर्व्वरा वेदिर्भवत्येतद्वा अस्या वीर्य्यवत्तमं वीर्य्येणैव यज्ञꣳ समर्द्धयति ॥ ६ ॥

उर्व्वरा सर्व्वसस्याढ्या यवोर्व्वरा पक्वा स्याद्व्रीह्यूर्वरावेति सूत्रकृतोक्तत्वात् ब्रीहियवयोरन्यतरेण परिपक्केन सस्येनाढ्या भूमिर्वेदिर्भवति एतत् खलु स्थानं अस्याः पृथिव्या वीर्य्यवत्तमं अतिशयेन वीर्य्यवत् अतो वीर्य्येणैव यज्ञं समर्द्धयति समृद्धं करोति उर्व्वरां वेदिं कुर्वन् ॥ ६ ॥

अथोत्तरवेदिस्थानं विधत्ते ।

खल उत्तरवेदिरत्र हि स रसः समवैति सरसमेव यज्ञं करोति ॥ ७ ॥

तस्यामुर्व्वरायां परिपक्का ब्रीहियवा यस्मिन् स्थाने सर्व्वेभ्यो

विविच्यन्ते स खल उत्तरवेदिः अत हि स्थाने स प्रसिद्धः व्रीहि-यवानां रसः समवैति समवेतो भवति धान्यसारस्यावस्थानात् तथाच सरसं रससहितमेव यज्ञं करोति ॥ ७ ॥

अथ यूपं विधत्ते ।

खलेवाली यूपोभवत्येतया हि तं रसमुत्कर्षन्ति ॥ ८ ॥

खले मध्ये निखाता मेढी खलेवाली स एव यूपो भवति एतया हि खलेवाल्या तं खलसमवेतं रसं उत्कर्षन्ति उद्गमयन्ति अयं वाक्यशेषो खलेवालीमेढोत्यस्मिन् पक्षे न सङ्गच्छत इत्यभिप्रेत्यै-तद्वाक्यमनूद्य लाङ्गलेषा यूपः स्यादिति सूत्रकृता व्याख्यातं लाङ्गलसम्बन्धिनी ईषा दण्डो यूपः कार्य्य इति तस्य च कर्षण-साधनत्वात् भूगतं रसं तेनोत्कर्षन्ति कर्षुका इति सङ्गतिर्भ-वति ॥ ८ ॥

अथ सोमक्रयसाधनं द्रव्यं विधत्ते ।

त्रिवत्सः साण्डः सोमक्रयणः सेन्द्रत्वाय ॥ ६ ॥

ईषदपरिसमाप्तत्रिवर्षस्य त्रिवत्स इति यौगिकी संज्ञा यद्वा यो वत्सः तिस्रोऽर्द्धेऽनूद्दपेत् स तिसृणां वत्सत्वात् त्रिवत्सः यद्वा वत्सरपदस्यान्त्यवर्णलोपः त्रिवत्सः त्रिवर्ष इत्यर्थः एतत्य-भवयं सूत्रकृतोक्तं बक्कतिवर्षस्य जानपदी त्रिवत्स इति यो वा तिस्रो धयेत्त्रिवर्षोवैव स्यादिति स च त्रिवत्सः साण्डः समुष्कः

सोमक्रयणः सोमक्रयसाधनं द्रव्यं ईदृशेन गवा सोमः क्रेतव्य इत्यर्थः स चाण्डसहितत्वेन वर्षणसमर्थत्वात् इन्द्रस्य च वर्षितृत्वात् ऐन्द्रत्वाय इन्द्रसाहित्याय भवति ॥ ९ ॥

अथैतेषु साद्यःक्रेषु प्राच्यादिचतुर्दिगवस्थितान् सहर्त्विज आनेतुं सोमप्रवाकानां गमनं विधत्ते।

सर्व्वा दिशोऽश्वरथाः सोमप्रवाका विधावन्ति ॥१०॥

अत सूत्रं प्राञ्चं होतारं वहेयुरुदञ्चमुद्गातारं प्रत्यञ्चमध्वर्युं दक्षिणा ब्रह्माणमिति अयमर्थः अश्वरथाः अश्वयुक्तरथसहिताः सोमप्रवाकाः सोमस्य प्रवक्तारो यजमानपुरुषाः सर्व्वाश्चतस्रो दिशः विधावन्ति वक्ष्यमाणप्रकारेण गच्छेयुः गत्वा च प्रतीच्यां दिश्यवस्थितं होतारं रथे आरोप्य तत्रत्यः सोमप्रवाकः प्राङ्मुखन्तमानयेत् एवमन्यास्वपि दिक्षु अन्ये सोमप्रवाकाः कुर्युः ॥ १० ॥

किमतस्तदाह।

सर्व्वाभ्य एवास्मै दिग्भ्योऽन्नाद्यमवरुन्धे ॥ ११ ॥

एवं सर्व्वासु दिक्षु विधानात् सर्वाभ्य एव दिग्भ्यः सकाशात् अस्मै यजमानाय अन्नाद्यमवरुन्धे प्राप्नोति ॥ ११ ॥

कस्यान्दिशि केन रथेन कियत्परिमाणं धावनमिति क्रमेण सर्व्वमाह

योजने चतुर्व्वाहिणा प्राच्यां दिशि प्राष्टेवमिव वा

अध्वानो विमिता यैवाध्वनोमात्रा तान्धावयन्ति त्रैपदे प्रष्ठिवाहिनोदीच्याङ्गव्यूतौ द्योगेन प्रतीच्यां क्रोशे स्थूरिणा दक्षिणैतद्वै दिशाꣳ रूपं यदेव दिशाꣳ रूपन्तेन यज्ञꣳ समर्द्धयन्ति॥ १२॥

चतुर्व्वाहिणा चत्वारो वाहा यस्मिन् युज्यन्ते स चतुर्व्वाही तादृशेन रथेन प्राच्यान्दिशि योजने क्रोशचतुष्टयपरिमिते दूरे धावेत् अहेति प्रसिद्धौ एवमिव खल्वध्वानो मार्गाः प्रकर्षेण विमिता अतिदीर्घोऽप्यध्वा पञ्चयोजनो दशयोजनः शतयोजन इति योजनप्रमाणेनैव परिच्छिद्यत इत्यर्थः तस्माद्योजनपरिमितं दूरं गच्छेदित्यर्थः तथाच यैव खल्वध्वनोमार्गस्य मात्रा प्रमाणन्तां धावयन्ति प्राप्नुवन्ति उदीच्यामुत्तरदिशि त्रैपदे त्रिपाद्योजने क्रोशत्रयपरिमिते प्रष्ठिवाहिना अश्वत्रययुक्तोरथः प्रष्ठिवाही तेन रथेन धावेयुः तथा प्रतीच्यान्दिशि गव्यूतौ क्रोशद्वयपरिमितदूरे द्योगेन अश्वद्वययुक्तेन रथेन च वहेयुः दक्षिणा दक्षिणदिशि क्रोशपरिमिते दूरे स्थूरिणा एकाश्वयुक्तेन रथेन वहेयुः एवं रथविशेषैः प्राच्यादिदिक्षु योजनादिदूरं गत्वा तत्रत्यानां महर्त्विजां सोमं प्रोच्य सोमप्रवाकांस्तान् रथेष्वारोप्य प्रागुक्तनीत्या नयेयुरित्यर्थः यदेतच्चतसृषु दिक्षु रथाध्वनोविशेषप्रतिपादनं एतत् खलु तासां दिशां रूपं तथाच यद्वै दिशां रूपं तेन यज्ञं समर्द्धयन्ति समृद्धं कुर्व्वन्ति॥ १२॥

अथान्यदङ्गं विधत्ते।

सक्षीरदृतयो रथा भवन्ति ततोऽयन्नवनीतमुदि-याक्तदाज्येऽपि कार्य्यं सद्यस्त्वाय ॥ १३ ॥

ते च रथाः सक्षीरदृतयः सद्योदुग्धेन क्षीरेण पूर्णाः सक्षीरास्ताः दृतयो येषु रथेषु तथाविधा भवेयुः तदुक्तं सूत्रकारेण ततो यन्नवनीतमुदियात् फेनो वा तदाज्येऽपि सृजेयुरिति ॥१३॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य त्रयोदशः खण्डः ।

अथ चतुर्द्दशः खण्डः ।

अथान्यं साद्यःक्रमेकाहं दर्शयति ।

अथैषोऽङ्गिरसामनुक्रोः ॥ १ ॥

अथानन्तरमेष वक्ष्यमाण अङ्गिरसामृषीणां सम्बन्धी अनुक्रीर्नाम साद्यःक्रः एकाहः ॥ १ ॥

अथास्मिन्नधिकारिणमाह ।

एतेन वा अङ्गिरस आदित्यानाप्नुवन् यो हीन आनुजावर इव स्यात् स एतेन यजेताप्नोति पूर्व्वेषां महामाप्नुवन् ह्येतेनाङ्गिरस आदित्यान् ॥ २ ॥

एतेन खलु यज्ञेन अङ्गिरस ऋषयः आदित्यान् सह दीक्षितेकस्मिन्नेव दिने यागं समाप्य पूर्व्वमेव स्वर्गं गतान् पश्चादाप्नुवन्

अतोऽस्य यज्ञस्याङ्गिरसां सम्बन्धः तस्माद्यो यजमानः हीनो निकृष्ट आनुजावर इव अनुजादप्यवर इव स्यात् स एतेन यजेत स यजमानः पूर्व्वेषां स्वस्मादधिकानां यजमानानां प्रहां प्रहाणं आप्नोति पूर्व्वं ये स्वस्माद्गुणैरधिकास्तेऽपि यथा प्रहीना भवन्ति तथा स्वयमुत्कृष्टो भवतीत्यर्थः हि यस्मात् हीना अङ्गिरसः एतेन यागेन आदित्यानधिकानाप्नुवन् तत्सायुज्यमगच्छन्नित्यर्थः ॥२

अथास्य माध्यन्दिनार्भवयोः पवमानयोः स्तोमक्लृप्तिं विधत्ते।

तस्य चतुर्व्विंशौ पवमानौ ॥ ३ ॥

तस्यानुक्रीसंज्ञस्य चतुर्व्विंशौ चतुर्व्विंशस्तोमकौ पवमानौ यद्यपि बहिष्पवमानस्य प्राथम्यात्तस्य माध्यन्दिनपवमानस्य च चतुर्व्विंशस्तोमविधानमिति व्याख्यानं न्याय्यं तथापि कल्पकृता चतुर्व्विंशावुत्तरौ पवमानाविति कल्पितत्वात् माध्यन्दिनार्भवयोरेतत् स्तोमविधानं ॥ ३ ॥

तदेतत् स्तौति।

चतुर्व्विंशत्यक्षरा गायत्री गायत्र्या वै देवा इमान् लोकान् व्याप्नुवन्निमानेवैतेन लोकान् व्याप्नोति ॥ ४ ॥

चतुर्विंशस्तोमे चतुर्विंशतिसंख्या विद्यते गायत्री चतुर्विंशत्यक्षरा गायत्र्यैवं छन्दसा साधनेन देवाः पुरा इमान् पृथिव्यादिलोकान् व्याप्नुवन् तत्संख्यासाम्यादेतेन चतुर्विंशस्तोमेन इमानेव लोकान् यजमानो व्याप्नोति ॥ ४ ॥

अथैतत्प्रकारान्तरेण स्तौति ।

तेजो ब्रह्मवर्चसं गायत्री तेज एव ब्रह्मवर्चसमव-रुन्धे प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते ॥ ५ ॥

या इयं गायत्री सा तेजोरूपा ब्रह्मवर्चसरूपा च प्रजापतेर्मुखादग्निना ब्राह्मणजात्या च सहोत्पत्तेः तथा च गायत्री-संस्तुतेन चतुर्विंशस्तोमकेन तेजश्च ब्रह्मवर्चसञ्च यजमानोऽव-रुन्धे तथा प्राणरूपा गायत्री प्रजननं प्रजासाधनञ्च एवञ्च प्राणात् प्राणरूपाया एव गायत्र्याः सकाशात् प्रजायते पुत्र-पौत्रादिरूपेणोत्पद्यते ॥ ५ ॥

अथास्य यज्ञस्य प्रकारान्तरेण प्रजासाधनतामाह ।

उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मा-न्मिथुनात्प्रजायते ॥ ६ ॥

उभये उभयविधा युग्मन्तश्च युक्संख्याका अयुजश्च विष-मसंख्याकाश्च स्तोमा भवन्ति अस्य च पवमानयोश्चतुर्विंशस्तोमो विहितः स च समसंख्याक एकविंशोऽग्निष्टोमसाम्नि विधास्यति स विषमसंख्याकः अन्येषु स्तोत्रेषु कल्पकारेण समानमितरत् पूर्व्वेण स स्तोममिति द्वितीयस्याह्नःक्रमसम्बन्धिनः स्तोमस्यातिदिष्टत्वात् त्रिवृत्स्तोम एवमुभयविधा स्तोमा भवन्ति तन्मिथुनं

स्त्रीपुंसात्मकं तस्मान्मिथुनात् प्रजायते यजमानस्यापत्यपुत्र पौत्रादिकमुत्पद्यते ॥ ६ ॥

अथ स्तोत्रीयासङ्ख्यसम्पत्तिद्वारेण स्तौति ।

विराजꣳ सम्पद्यतेऽन्नं विराडन्नाद्यमेवावरुन्धे ॥ ७

अस्य यज्ञस्य स्तोत्रीयासमुदायः विराजश्छन्दः सम्पद्यते अग्निष्टोमसंस्थोह्ययं तत्र नवानां स्तोत्राणां त्रिवृत्स्तोमकत्वात् एकाशीतिस्तोत्रीया भवन्ति ८१ द्वयोश्चतुर्विंशत्वात् अष्टाचत्वारिंशदग्निष्टोमसाम्न एकविंशतिरिति एवं पञ्चाशदधिकं शतं स्तोत्रीया भवन्ति १५० एवं दशसंख्यया विभज्यमाने विराट्सम्पत्तिः शिष्टं स्पष्टं ॥ ७ ॥

एकविꣳशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविꣳशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥ ८ ॥

एकविंशस्तोमकोऽग्निष्टोमो भवति गतमन्यत् ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य
चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

अथ चतुर्थं साद्यःक्रमेकाहं दर्शयति ।

अथैष विश्वजिच्छिल्पः ॥ १ ॥

अथानन्तरमेष वक्ष्यमाणः विश्वजिन्नाम साद्यःक्र एकाहः स च शिल्पश्चित्रभूतः तस्य च शिल्पत्वं एकाहिकस्य विश्वजितः शिल्पत्वव्याख्यानेन पूर्व्वकृतेन व्याख्यातं ॥ १ ॥

अथैतस्य वेदितुः फलमाह ।

शिल्पं वा एष स्तोमानां पश्यते गृहे शिल्पं य एवं वेद ॥ २ ॥

स्तोमानां स्तोमसाध्यानां एषः यज्ञः शिल्पं वै सर्वपृष्ठत्वात् सर्वस्तोमकत्वात् सर्वस्वदक्षिणावाच्चाश्चर्य्यभूतः य एवमस्य शिल्पं वेत्ति सः स्वकीये गृहे शिल्पं चित्रं पश्यति ॥ २ ॥

अथास्य माध्यन्दिनार्भवयोः पवमानयोः स्तोमं विधत्ते ।

तस्याष्टादशौ पवमानौ ॥ ३ ॥

तस्य साद्यःक्रस्य विश्वजितः अष्टादशावष्टादशस्तोमकौ माध्यन्दिनार्भवपवमानौ कार्य्यौ ॥ ३ ॥

अथ रथसाम्येन इमं यज्ञं स्तौति ।

चक्रीवान्वा एष यज्ञः कामाय यङ्कामङ्कामयते तमेतेनाभ्यश्नुते यत्र हि चक्रीवता कामयते तदभ्यश्नुते ॥ ४ ॥

चक्रीवान्वै चक्रयुक्तोरथ एवैष यज्ञः कामाय फलप्राप्त्यै अतो यङ्कामङ्कामयते यजमानस्तमेतेन यज्ञेनाभिप्राप्नोति यत्र हि

यस्मिन् खलु विषये चक्रीवता रथेन पुरुषः कामयते तदश्नुते प्राप्नोति तस्माच्चक्रीवत्संस्तुतेनापि यज्ञेन फलप्राप्तिरिति ॥ ४ ॥

अथास्मिन्नधिकारिणमाह ।

स्वर्गकामो यजेत ॥ ५ ॥

स्पष्टोऽर्थः । ५ ।

अथैतत् स्वर्गफलत्वमुपपादयति ।

स्वर्गो लोकः पृष्ठानि स्वर्गमेवैतेन लोकमाप्नोति ॥ ६ ॥

स्वर्गपृष्ठो हि विश्वजित् पूर्वमनुक्रान्तः अत्रापि विश्वजिन्नाम्ना इतराङ्गवत्सर्वपृष्ठत्वमप्यतिदिश्यते तस्माद्रथन्तरादीनि षट्पृष्ठसामान्यत्र प्रयोज्यानि तानि च पृष्ठानि स्वर्गलोकः केवलैन्द्रत्वात् स्वर्गलोकात्मकानि तस्मादेतेन सर्वपृष्ठेन विश्वजिता स्वर्गमेवाप्नोति ॥ ६ ॥

अथ प्रकारान्तरेणास्य सर्वपृष्ठतां स्तौति ।

तेजो ब्रह्मवर्चसं पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिंस्तेजो ब्रह्मवर्चसं दधाति ॥ ७ ॥

तेजोरूपाणि ब्रह्मवर्चसरूपाणि च पृष्ठानि रथन्तरस्य तावत् प्रजापतिमुखात् अग्निना ब्राह्मणजात्या च सहोत्पत्तेस्तेजोरूपत्वं ब्रह्मवर्चसरूपत्वञ्च तत्कार्य्यकारित्वे तत्साम्यादितरेषामपि बृहदादीनां पृष्ठानां तेजोब्रह्मवर्चसरूपता यद्य

स्यादेकधा सह अस्मिन् रथन्तरादीनि षट् पृष्ठानि भवन्ति एकधैव एकयज्ञेनैवास्मिन् यजमाने तेजो ब्रह्मवर्चसञ्च दधाति ॥७॥

अथ प्रकारान्तरेण स्तौति ।

अन्नं पशवः पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिन्नन्नाद्यं पशून् दधाति ॥ ८ ॥

वैराजस्यान्नरूपत्वं पूर्वमुक्तं तथा शाक्वररैवतयोरपि पशुरूपत्वं प्रागुक्तं तत्सम्बन्धादितरेषामन्नपश्वात्मकता शिष्टं पूर्ववद्योज्यं ॥ ८ ॥

अथास्य स्तोत्रद्वय एकविंशं स्तोमं विधातुमाह ।

तदाहुर्नानालोकानि पृष्ठानि यदेकस्मिन्यज्ञक्रतौ समवरुध्यन्त ईश्वरो यजमानोऽप्रतिष्ठातोरिति ॥ ९ ॥

तत्तस्मिन् विश्वजिद्विषये आहुश्चोदयन्ति ब्रह्मवादिनः कथमिति यान्येतानि पृष्ठानि रथन्तरादीनि एतानि नानालोकानि विभिन्नस्थानानि दशरात्रस्थादितः षट्स्वहःसु तेषां रथन्तरादीनां नियुज्येकैकस्य प्रत्यहं विनियुक्तत्वात् तथा चैकस्मिन्यज्ञक्रतौ यदि एतानि सर्व्वाणि समवरुध्यन्ते सह प्रयुज्येरन् तर्हि यजमानोऽप्रतिष्ठातोः अप्रतिष्ठातु अप्रतिष्ठानमप्राप्तयङ्गन्तुं ईश्वरः शक्तः स्यात् स्वकीयस्थानेभ्यः पृष्ठानाञ्चालितत्वादिति ॥ ९ ॥

कस्तर्ह्यस्य दोषस्य परिहार इत्यत आह ।

एकविꣳशꣳ होतुःपृष्ठं भवति प्रतिष्ठा वा एकविꣳशोमध्यत एव यज्ञस्य प्रतितिष्ठत्येकविꣳशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविꣳशोऽन्ततएव यज्ञस्य प्रतितिष्ठति ॥ १० ॥

होत्रनुशंसनीयं पृष्ठं होतुःपृष्ठन्तदेकविंशस्तोमकं भवति प्रतिष्ठारूपोऽप्येकविंशस्तोमः प्रतिष्ठाहेतोः प्रजापतिपादप्रदेशोत्पत्तेः इदं हि स्तोत्रं यज्ञस्य मध्यन्तथाच प्रतिष्ठाहेतुनैकविंशेन यज्ञस्य मध्यतो मध्यदेश एव प्रतितिष्ठति अपि चाग्निष्टोमोऽग्निष्टोमसामापि एकविंशः एकविंशस्तोमकं भवति गतमन्यत् ॥ १० ॥

अथैतयोरेकविंशयोर्द्वित्वसंख्यामुपजीव्य स्तौति ।

द्वावेतावेकविꣳशौ भवतो द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु च प्रतिष्ठापयति ॥ ११ ॥

पूर्व्वोक्तावेतौ एकविंशौ द्वौ भवतः यजमानश्च द्विपात् पादद्वययुक्तः तथाच द्वित्वसंख्यया यज्ञे पशुषु च प्रतिष्ठापयति प्रतिष्ठितं करोति द्वयोरेकविंशयोः प्रयोक्ता उद्गातेत्यर्थः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य

पञ्चदशः खण्डः ।

अथ षोडशः खण्डः।

अथ श्येनाख्यः पञ्चमः साद्यःक्रः कल्पकारेण लुप्तः स षड्विंशब्राह्मणे विधास्यते, अथैकत्रिकाख्यं षष्ठं साद्यःक्रं दर्शयति।

अथैष एकत्रिकः प्रजापतेरुद्भित्॥ १॥

एकया तिसृभिश्च स्तोत्रीयाभिः स्तोमक्लृप्तिर्य्यस्य स एकत्रिकः एष एकत्रिकाख्यो यज्ञः प्रजापतेर्विधातुः सम्बन्धी उद्भिद्बलभिद् भेदनसाधनं अयमपि शौचिवृक्षिमतेन साद्यःक्रत्वात् एकस्मिन्नेव दिनेऽनुष्ठेय इति पूर्व्वमुक्तं मतान्तरमपि सूत्रकारेणोक्तं एकदीक्षस्त्र्युपसत्क इति गौतम इति॥ १॥

अथैतस्य प्रजापतेरुद्भित्त्वमुपपादयति।

एतेन वै प्रजापतिरेषां लोकानामुदभिनत्॥ २॥

एतेन खलु यज्ञेन प्रजापतिः स्रष्टा एषां पृथिव्यादिलोकानां सम्बन्धीनि वस्तून्युदभिनत् उद्भिन्नवान् निर्म्मितवान्॥ २॥

अथैतं प्रकारान्तरेण स्तौति।

क्लृप्तस्तोमो वा एष उद्भिन्नꣳ ह्येव क्लृप्तस्य॥ ३॥

एष यागः क्लृप्तस्तोमो वै क्लृप्तो निष्पन्नः स्तोमो यस्य स तथोक्तः अस्य हि षट्सु स्तोत्रेषु एकैव स्तोत्रीया अपरेषु षट्सु तिस्रस्तिस्र इति स्तोमान्तरवत् आवृत्त्या निष्पत्त्यनपेक्षत्वात् तथा च क्लृप्तस्य तृतीयार्थे षष्ठी क्लृप्तेन हि तेन सर्व्वं फलं उद्भिन्नं निष्पन्नमेव भवति॥ ३॥

अथैतस्य पूर्व्वोक्तां स्तोमक्लृप्तिं विधाय स्तौति ।

यदेकया स्तुवन्त्येको वै प्रजापतिः प्रजापति-मेवाप्नोत्यथ यत्तिसृभिस्त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठति ॥ ४ ॥

बहिष्पवमानादीनाम्मध्ये षट्सु स्तोत्रेषु एकयैव स्तोत्रीयया स्तुवन्ति यदेतत् स्तवनं तेन प्रजापतिमेवाप्नोति कुतः एको वै एक एव खलु प्रजापतिः सर्व्वकारणभूतः एकैव स्तोत्रीया इति उभयोः साम्यात् अथ एकस्तोत्रानन्तरं यत् तिसृभिः स्तुवन्ति त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठति यत्तिसृभिः स्तोत्रीयाभिः स्तुवन्ति इमे पृथिव्यादयस्त्रयोलोकास्तस्मात्तेन तिसृभिः स्तवनेन एष्वेव लोकेषु यजमानः प्रतिष्ठितो भवति अयमर्थः त्रिकस्तोमं बहिष्पवमानं एकस्तोमं तदनन्तरमाज्यं एवं व्यत्यासमस्य द्वादशस्तोत्राणि भवन्तीति अत सूत्रं एकत्र्यकिनमेक इति त्रिकं बहिष्पवमान स्यादिति शाण्डिल्य इत्यादिनान्येपि पक्षाः सूत्रकारेणोक्ताः तेऽपि द्रष्टव्याः ॥ ४ ॥

अथैताः संहत्य स्तौति ।

ता उ चतस्रः सम्पद्यन्ते चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठति ॥ ५ ॥

ता उ ता एव पूर्व्वोक्ताश्चतस्रः सम्पद्यन्ते एका तिस्रश्च मिलित्वा चतस्रो ऋचो भवन्ति स्पष्टमन्यत् ॥ ५ ॥

अथ सर्व्वस्तोत्रगतस्तोत्रीयासम्पत्तिद्वारेण स्तौति ।

गायत्रीᳪ सम्पद्यते तेजो ब्रह्मवर्चसं गायत्री तेज एव ब्रह्मवर्चसमवरुन्धे ॥ ६ ॥

एष संस्तुतो गायत्रीछन्दः सम्पद्यते एषां स्तोत्राणामेकस्तोमत्वात् षट्स्तोत्रीयाः अवशिष्टेषु षट्सु त्रिकस्तोम इत्यष्टादशस्तोत्रीया १८ मिलित्वा चतुर्विंशतिस्तोत्रीया भवन्ति २४ चतुर्विंशत्यक्षरा गायत्रीति सङ्ख्यासाम्याद्गायत्रीसम्पत्तिः गतमन्यत् ॥ ६ ॥

प्रकारान्तरेण गायत्रीसम्पत्तिं स्तौति ।

प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते ॥ ७ ॥

एतदपि सिद्धं ॥ ७ ॥

अथार्भवपवमाने स्तोत्रीयां विधीयते ।

अयारुचा हरिण्या पुनान इत्यार्भवः पवमानः ॥ ८ ॥

अयारुचेत्येषातिछन्दस्का स्तोत्रीया आर्भवः पवमानो भवति ॥ ८ ॥

अथैनां स्तौति ।

सर्वेषां वा एषा छन्दसाᳪ रूपᳪ सर्व्वेष्वेव छन्दःस्वार्भवं पवमानं प्रतिष्ठापयति ॥ ९ ॥

अस्यां अतिछन्दःस्वेव गायत्र्यादीनां सर्व्वेषां छन्दसामन्त-र्भावात् एषा सर्व्वच्छन्दसां रूपं स्वरूपभूता तथा चैनामार्भवपव-मानस्तोत्रीयां कुर्व्वन् सर्व्वेष्वेव छन्दःस्वार्भवं पवमानं प्रति-ष्ठापयतीति ॥ ९ ॥

अथैतस्यां गातव्यं साम विधाय स्तौति।

तस्यां गायत्रपार्श्वं न गायत्रादेति न साम्नो न निधनात् ॥ १० ॥

तस्यां पूर्व्वोक्तायां अयारुचाहरिण्येतस्यां गायत्रपार्श्वाख्यं साम गातव्यं अस्यापि नामैकदेशेन गायत्रशब्देनाभिधेयत्वात् गायत्रीच्छन्दसो नैति नापगच्छति अतएव गायत्राख्यात् सा-म्नोऽपि नापगच्छति प्रकृतौ ह्यार्भवे स्वादिष्ठयामदिष्ठयेति गाय-त्र्यां गायत्रं साम क्रियते तत्परित्यज्य छन्दोऽन्तरे सामान्तरे क्रियमाणे ततो गायत्रादयो यस्मादित्याशङ्क्य गायत्रपार्श्वमि-त्यत्र गायत्रशब्दसद्भावात् उक्तदोषो न भवतीत्यर्थः तथा गायत्र-पार्श्वस्य करणान्निधनादपि नापगच्छति अस्य हि निधनं भवति ततो निधनत्वात् आर्भवपवमानो निधनयुक्तोऽपि भव-तीत्यर्थः।

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ १०।

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य षोड़शः खण्डः।

षोड़शाध्यायः समाप्तिमगमत्।

सप्तदशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ चत्वारो व्रात्ययज्ञा एकाहास्तेषु षोडशस्तोमं साधारण्येन विधित्सुराह ।

देवा वै स्वर्गं लोकमायꣳस्तेषां देवा अहीयन्त व्रात्यां प्रवसन्तस्त आगच्छन् यतो देवाः स्वर्गं लोकमायꣳस्तेन तꣳ स्तोमन्न च्छन्दोऽविन्दन्येन तानाप्स्युꣳस्तेदेवा मरुतोऽब्रुवन्नेतेभ्यस्तꣳ स्तोमन्नच्छन्दः प्रायच्छत येनास्मानाप्नवानिति तेभ्य एतꣳ षोडशꣳ स्तोमं प्रायच्छन् परोक्षमनुष्टुभं ततो वै ते तानाप्नुवन् ॥ १ ॥

देवाः पुरास्मिन् लोकेऽवस्थाय यागानुष्ठानेन स्वर्गं लोकं प्राप्नुवन् तेषां देवानामनुचराः अतएव देवसम्बन्धात् देवा जनाः व्रात्यां व्रात्यतां आचारहीनतां प्राप्य प्रवसन्तः प्रवासं कुर्वन्तः सन्तोऽहीयन्त हीनाः पृथिव्यामेव परित्यक्ता आसन् अथ देवेषु

स्वर्गङ्गतेषु ते देवजना आगच्छन् यतः यस्मिन् स्थाने देवाः स्वर्ग-साधनयागमन्वतिष्ठन् तत्स्थानं प्रति स्वर्गसाधनदिदृक्षया समागता इत्यर्थः आगत्य च तं स्वर्गसाधनं स्तोमन्नाविन्दन् तथा छन्दश्च नाविन्दन् नालभन्त येन स्तोमेन छन्दसा चाप्स्यमाना-न्देवान् ते प्राप्नुयुरिति एवन्देवैरुक्ता मरुतः तेभ्यो हीनेभ्यः एतं षोडशं षोडशस्तोत्रीयात्मकं स्तोमं प्रायच्छन् परोक्षेण वर्त्त-मानं अप्रत्यक्षमनुष्टुभं छन्दश्च प्रायच्छन् व्रात्ययज्ञेषु प्रथमस्य चतुर्षु स्तोत्रेषु षोडशः स्तोमः तथाच चत्वारः षोडशाः द्वे अनुष्टुभौ भवतः एवमनुष्टुभः परोक्षत्वं द्रष्टव्यं ततोऽनन्तरं स्तोमछन्दोरूपेण साधनेन ते हीनास्तान् देवान् आप्नुवन् एवं सर्वेष्वपि व्रात्ययज्ञेषु षोडशस्तोमः प्रयोक्तव्य इत्युक्तं भवति परोक्षमनुष्टुभमित्यनेन चतुःषोडशी व्रात्ययज्ञः कार्य्य इति विधिरुन्नेतव्यः चतुर्व्विधा हि व्रात्याः निन्दिताः कनीयां-सो ज्यायांसः एतत्त्रितयव्यतिरिक्ता हीनाचाराश्चेति तत्र कनीयः-प्रभृतीनां व्रात्यानां उत्तरे त्रयो यज्ञाः त्रितयव्यतिरिक्तानां व्रात्यानां अयं प्रथमश्चतुःषोडशी तदुक्तं आपस्तम्बेन चतुः-षोडशी सर्व्वेषाम् इति ॥ १ ॥

अथैतत् प्रकृते योजयति ।

हीना वा एते हीयन्ते ये व्रात्यां प्रवसन्ति न हि ब्रह्मचर्य्यञ्चरन्ति न कृषिन्न वणिज्याᳪ षोडशो वा एतत् स्तोमः समाप्तुमर्हति ॥ २ ॥

ये पुरुषाः व्रात्यां व्रात्यतां विहिताकरणप्रतिषिद्धनिषेवनरूपामाप्य प्रवसन्ति एते हीना निकृष्टाः सन्तो हीयन्ते निकृष्टतमा भवन्ति तत् कस्य हेतोः न खल्वेते ब्रह्मचर्य्यं ब्राह्मणोचितं कर्म्माचरन्ति ततो हीनाः सम्पन्ना यस्माच्च कृषिवणिज्यां वणिजः क्रियां क्रयविक्रयादिरूपाञ्च न कुर्व्वन्ति ततो वैश्यजातेरपि हीनाः तस्मादेते निकृष्टतमा भवन्तीत्यर्थः तथा विधानात् यत् यः स्तोमः समाप्तुमर्हति श्रैष्ठ्यं प्रापयितुं योग्यो भवति एष षोडशः स्तोमः ॥ २ ॥

कथमस्येदृशं सामर्थ्यमिति तदाह ॥

मरुत्स्तोमो वा एष यानि क्षुद्राणि छन्दाᳬसि तानि मरुतां ॥ ३ ॥

एष षोडशस्तोमो मरुत्स्तोमो वै मरुतां सम्बन्धि स्तोमः कथमस्य मरुतां सम्बन्ध इति तदुच्यते यानि क्षुद्राणि न्यूनाक्षराणि छन्दांसि तानि मरुतां सम्बन्धीनि सप्तगणात्मका एकोनपञ्चाशत् ४९ संख्यया च विभक्तत्वेन तेषामपि क्षुद्रत्वात् ॥ ३ ॥

अतः क्षुद्रत्वसाम्यात् आह ।

ककुभं प्राचीमुदूहत्यथ यदेषा द्विपदा ककुभो-स्लोके क्रियते रूपेणैवैनाᳬ स्तत् समर्द्धयति ॥ ४ ॥

पवस्व मधुमत्तमः परिप्रधन्व अधाहीन्द्रगिर्व्वण इत्यादीनि ककुप्शब्देन वृषभस्य ककुदः स्थानीयत्वात् द्विपदेत्यनेन च पाद-

हृदयक्षरणात् एतान् व्रात्यान् रूपेण स्मारयन्नेनैव समृद्धान् करोतीत्यर्थः ॥ ४ ॥

अथ ब्रह्मसाम्नः स्तोत्रीया विधाय स्तौति ।

अथाहीन्द्र गिर्वण इति विषमं छन्दो विषम-इव वै व्रातः सर्व्वानेवैतान् समान् करोति ॥ ५ ॥

अथाहीन्द्रगिर्व्वण इत्याद्यास्तिस्रो ब्रह्मसाम्नः स्तोत्रीयास्तासु च विषमं विविधं छन्दो दृश्यते प्रथमा ककुप् मध्यमपादस्य द्वादशाक्षरत्वात् द्वितीया उष्णिक् तृतीयपादस्य द्वादशाक्षरत्वात् तृतीयायास्तु द्वौ पादौ द्वादशाक्षरौ तृतीयोऽष्टाक्षर इति छन्दोवैषम्यं व्रातो व्रात्यसमुदायो विषम इव वै विविध इव भवति विविधानाचारयुक्ता हि व्रात्याः तथा विषमछन्दसा तेषां वैषम्यं परिहरन् सर्व्वानेवैतान् व्रात्यान् समान् श्रेष्ठत्वापादनेन समवीर्य्यान् करोति ॥ ५ ॥

अथ तासु गातव्यं साम विधत्ते ।

तासु द्यौतानं ॥ ६ ॥

तासु पूर्व्वोक्तास्वथाहीन्द्रगिर्व्वण इत्याद्यासु द्युतानेन दृष्टं साम द्यौतानं गातव्यं तच्च ब्रह्मसाम भवतीत्यर्थः तथा च कल्पकारः अथाहीन्द्रगिर्व्वण इत्येन्द्रमिन्द्राय सिञ्चतेति द्यौतानमाहृते इति ॥ ६ ॥

अथैतस्य सर्व्वाङ्गहेतुतामाह ।

द्युतानो मारुतस्तेषां गृहपतिरासीत्त एतेन स्तोमेनायजन्त ते सर्व आर्ध्नुवन् यदेतत् साम भवत्यृध्या एव ॥ ७ ॥

मारुतो मरुतां सम्बन्धी द्युतानः तेषां देवानां व्रात्यानां गृहपतिरासीत् बहुयजमानके कर्म्मणि यूपाञ्जनर्त्तुयाज्यावचनादीनि केवलकर्त्तव्यानि यः करोति स गृहपतिरित्युच्यते एवं द्युतानं गृहपतिं कृत्वा ते देवा व्रात्याः द्युतानः गृहपतयः एतेन स्तोमेन षोड़शस्तोमकेन यज्ञेनायजन्त ततस्ते सर्व्वे आर्ध्नुवन् समृद्धा अभवन् यदेतत् द्युतानेन दृष्टं साम व्रात्यस्तोमे ब्रह्मसाम भवति तदेषां समृध्या एव सम्पद्यते ॥ ७ ॥

अथैतस्य शाखान्तरीयं निधनं निषिध्य अस्माभिरधीयमानं निधनमेव कार्य्यमिति प्रतिपादयन् स्तौति ।

यन्निरुक्तान्निधनमुपेयुर्गृहपतिरेवर्ध्नुयादपेतरान् प्रीताथ यदनिरुक्तमुपयन्ति सर्वानेवैतानृद्धौ भूतौ प्रतिष्ठापयति ॥ ८ ॥

अत्र सूत्रे शाखान्तरीयं पक्षमुक्ता स्वयमप्युक्तं इन्द्रेति द्यौताने निधनं निराकृतस्य प्रतिषेधो यथाम्नायनेवोपेयुरिति अयमर्थः निरुक्तं इन्द्रेति निष्कृष्यैकदेवताप्रतिपादकं निधनं शाखान्तरीयं यद्यदि उपेयुः प्राप्नुयुः प्रयुञ्जीरन् तथाच प्रधानभूतस्यैवेन्द्रस्य निष्कृष्य कथनात् एतेषाम्मध्ये प्रधानभूतो गृहपतिरेव ऋध्नुयात्

समृद्धोऽभवत् इतरे त्वपगतर्द्धयो भवेयुः अथानिरुक्तं निर्द्धारितदैवतं अध्ययनसिद्धं ओत्यहो २३४५ इत्येवं रूपं द्युतानस्य निधनं यत् यदुपयन्ति प्रयुञ्जते तर्हि उद्गाता सर्वानेवैतान् व्रात्यान् ऋद्धौ समृद्धौ भूतावैश्वर्य्ये च प्रतिष्ठापयति तस्यानिर्द्धारितदेवतात्वेन सर्व्वदेवतासाधारण्यात् सर्व्वेषां समृद्धिः ॥८॥

अथैतस्मिन् व्रात्ययज्ञे चतुर्षु स्तोत्रेषु षोडशः स्तोमः प्रयोक्तव्य इति तत् प्रशंसितुमाह।

गरगिरो वा एते ये ब्रह्माद्यञ्जन्यमन्नमदन्त्यदुरुक्तवाक्यन्दुरुक्तमाहुरदण्ड्यन्दण्डेन घ्नन्तश्चरन्त्यदीक्षिता दीक्षितवाचं वदन्ति षोडशो वा एतेषां स्तोमः पाप्मानन्निर्हन्तुमर्हति यदेते चत्वारः षोडशा भवन्ति तेन पाप्मनोऽधिनिर्मुच्यन्ते ॥ ९ ॥

एते वक्ष्यमाणा गरगिरो वै गरलस्य विषस्य भक्षयितारः ये व्रात्याः ब्रह्माद्यं ब्राह्मणभोज्यं जन्यञ्जनपदसम्बन्धि अन्नमदन्ति ब्राह्मणार्थं परिकल्पितमन्नं बलात्कारेण भुञ्जत इत्यर्थः येष अदुरुक्तवाक्यं शोभनार्थप्रतिपादकं वाक्यं दुरुक्तं दुष्टमाहुः तथा अदण्ड्यं दण्डानर्हं जनन्दण्डेन घ्नन्तो हिंसन्तश्चरन्ति तथा स्वयमदीक्षिताः अकृतदीक्षाः दीक्षितैः प्रयोज्यां वाचं वदन्ति एवं ये बहुविधान् विपरीताचारानाचरन्ति एते विषभक्षकाः नरकहेतोर्भूयसः पापसञ्चयस्य निषिध्यमानत्वादित्यर्थः तथा-

देतेषां व्रात्यानां पाप्मानं पापं निर्हन्तुं निर्दग्धुं षोड़शस्तोम एवार्हति तथाच यदेते चत्वारः षोड़शाः षोड़शस्तोमा भवन्ति अच्छावाकस्याज्यपृष्ठयोर्माध्यन्दिनार्भवयोश्च पवमानयोः तेन षोड़शस्तोमचतुष्टयेन पाप्मनः सकाशात् अधि उपरि निर्मुच्यन्ते प्रक्षीणपापाः शुद्धा भवन्तीत्यर्थः ॥ ९ ॥

अथाग्निष्टोमसाम्नः स्तोत्रीयामनूद्य स्तौति।

देवोवो द्रविणोदा इत्यग्निष्टोमसाम कार्य्यं देवतास्वेवैनान् प्रतिष्ठापयति ॥ १० ॥

देवो वो द्रविणोदा इत्यस्मिन् प्रगाथे यज्ञायज्ञीयमग्निष्टोम साम कार्य्यं तथाच देवशब्दस्य श्रूयमाणत्वात् देवतास्वेवैनान् व्रात्यान्शुद्धान् कृत्वा प्रतिष्ठापयति ॥ १० ॥

अथ शाखान्तरीयमतमुपन्यस्यति।

अथो खल्वाहुरदर्शि गातुवित्तम इत्येव सतोबृहतीषु कार्य्यं विषमइव वै व्रातः सर्व्वानेवैनान् सतोबृहतः करोति ॥ ११ ॥

अथो खल्विति पक्षान्तरपरिग्रहे अन्ये ब्रह्मवादिनः आहुः कथयन्ति किमित्यदर्शि गातुवित्तम इत्याद्यास्वेव सतोबृहतीषु प्रग्रथनैरपेक्षणस्वभावत एव बृहतीच्छन्दस्कासु ऋक्षु अग्निष्टोमसाम कार्य्यमिति उपपत्तिश्चाहुः व्रातो व्रात्यसमुदायः

विषम इव वै विविध आचार एव खलु तथाच नानाविधान् सर्वानेवैनान् सतोबृहत: स्वभावतो महत: करोति ॥ ११ ॥

अथैतन्मतं दूषयित्वा स्वपक्षन्निगमयति ।

तदाहु: शिथिलमिव वा एतत् छन्दश्चराचरं यत् सतोबृहती देवो वो द्रविणोदा इत्येव कार्य्यं ॥ १२ ॥

तत्तत्र विषये अन्ये पुनर्ब्रह्मवादिन आहु: यत् सतोबृहत्याख्यं छन्द: एतत् शिथिलमिव वै अदृढसेव यत एतच्चराचरं चरणशीलं स्यात्तु न भवति चरते: पदाद्यचि चरिचलिपतिवदीनामच्याप्रत्याभ्यासश्चेति द्विर्व्वचनमागागमश्च यस्मादेवं तस्माद्देवो वो द्रविणोदा इत्येतास्वेव कार्य्यं ॥ १२ ॥

अथैतासूक्तदोषवैलक्षण्यमाह ।

एषा वै प्रतिष्ठिता बृहती या पुन: पदा तद्यत्पदं पुनरारभते तस्मात्पुत्रो मातरमध्येति ॥ १३ ॥

या बृहती पुन:पदा सकृदाम्नातं पादं पुनरभ्यस्य या बृहती सम्पद्यते एषा पुन:पदा प्रतिष्ठिता बृहती तत्तथा सति यद्यस्मात्सकृदाम्नातं पदं पादं अविस्मारणेन पुन: पुनरारभते तस्मात् कारणात्पुत्र: स्तनन्धयो मातरमध्येति पुन: पुन: स्मरति इक्स्मरण इति धातु: ॥ १३ ॥

द्युतानो मारुतस्तेषां गृहपतिरासीदित्याम्नानात् गृहपतिप्रमुखावहवो व्रात्या अनेन यज्ञेरन्निति प्रतीयते तत्र गृह-

पतिना सम्पाद्यानि दक्षिणाद्रव्याणि दर्शयति।

उष्णीषञ्च प्रतोदश्च ज्याह्रोडश्च विपथश्च फलकास्तीर्णः कृष्णशं वासः कृष्णवलक्षे अजिने रजतो निष्कस्तद् गृहपतेः॥ १४॥

उष्णीषं शिरोवेष्टनं वस्त्रं अयःशलाकाग्रदण्डः प्रतोदः येन कर्षुकैर्बलीवर्द्दा निपीड्यन्तेऽह्रोडतिर्वात्यर्थः ज्याह्रोडा वाता यस्य चापस्य सज्याह्रोडः इषुरहितः केवलो धनुर्द्दण्ड इत्यर्थः तदुक्तं सूत्रकारेण धनुष्कणानिपुणा व्रात्याः प्रसेधमाना यन्ति स ज्याह्रोड इति तथा फलकास्तीर्णः फलकाभिरास्तीर्णो विस्तारितो रथः स च विपथः विविधं कुटिलं पथो गच्छतीति विविधगामिभ्यामश्वाश्वतराभ्यां युक्तः कार्य्य इत्यर्थः कृष्णशं कृष्णदशं कृष्णा दशा यस्य तादृशं वासः दकारलोपश्छान्दसः यद्वा लोमश इति मत्वर्थः शप्रत्ययः कार्ष्णायुक्तमित्यर्थः वलक्षः शुक्लवर्णः शुक्लकृष्णवर्णे अजिने आविके चर्मणी पार्श्वतस्तन्तुभिः स्यूते भवत इत्यर्थः रजतो रजतनिर्मितो निष्कोऽलङ्कारः भूषा एतान्युष्णीषादीनि द्रव्याणि गृहपतेः स्वभूतानि सम्पाद्यानि दक्षिणार्थं गृहपतिना आनेतव्यानीत्यर्थः तदुक्तं सूत्रकारेण एतत्सर्व्वं गृहपतिराहरेदिति अतः स्वगुरुभ्रातुरिव तद्गृहपतेः षष्ठ्या निर्दिष्टस्य संप्रदानशङ्का न कार्य्येत्यर्थः॥ १४॥

अथान्यैः सम्पादनीयानि द्रव्याणि दर्शयति।

वलूकान्तानि दामतूषाणीतरेषां द्वे द्वे दामनी द्वे द्वे उपानहौ द्विषंहितान्यजिनानि ॥ १५ ॥

वलूकेति लोहितवर्णस्याख्या लोहितवर्णान्तो येषां वाससां तानि तथोक्तानि तूषमिति वस्त्रस्य दशोच्यते दामतूषाणि रज्जुरूपदशानीत्यर्थः प्रतिवस्त्रं द्वे द्वे दामनी उभयोरपि प्रान्तयोः एकैकं दाम रज्जुर्यथा भवति तथा कर्त्तव्यमित्यर्थः तथा एकैकस्य व्रात्यस्य द्वे द्वे उपानहौ वर्मसदृशे पादाङ्गुष्ठवेष्टने चर्मणी भवत इत्यर्थः तदुक्तं सूत्रकारेण द्वे द्वे उपानहाविविधकृष्णाः कर्णिन्य इति शाण्डिल्यो याः काश्चेति धानञ्जप्य इति पूर्ववत् शुक्लकृष्णान्यजिनानि द्विषंहितानि एकैकस्य द्वे द्वे अजिने शुक्लकृष्णे पूर्ववत् सहिते भवत इत्यर्थः एतानि द्रव्याणि गृहपतिव्यतिरिक्तव्रात्यैः सम्पाद्यानि ॥ १५ ॥

अथैतस्य दानं व्रात्यतानिर्हरणहेतुरित्याह ।

एतद् वै व्रात्यधनं यस्मा एतद्ददति तस्मिन्नेव मृजाना यन्ति ॥ १६ ॥

एतदुष्णीषप्रतोदादिकं द्रव्यजातं खलु व्रात्येनाविनाभूतं धनं अतो यस्मै पुरुषाय एतद्धनं ददति प्रयच्छन्ति तस्मिन्नेव पुरुषे मृजानाः व्रात्यत्वापादकं पापन्निर्मृज्य शुद्धाः सन्तो गच्छन्ति त्रैविद्यवृत्तिं प्राप्नुवन्ति अस्य च व्रात्यधनस्य प्रतिग्रहीतृविशेषः सूत्रकारेणोक्तः व्रात्येभ्यो व्रात्यधनानि ये व्रात्यचर्य्याया अविरताः स्युर्ब्रह्मबन्धवे मागधदेशीयायेति ॥ १६ ॥

अथैतेषां प्रत्येकं त्रयस्त्रिंशत्सङ्ख्यागावोऽपि दक्षिणार्थं सम्पाद्या इत्याह ।

त्रयस्त्रिꣳशता त्रयस्त्रिꣳशता गृहपतिमभिसमायन्ति त्रयस्त्रिꣳशद्धि देवा आर्ध्नुवन् ऋध्या एव ॥ १७ ॥

त्रयस्त्रिंशता त्रयस्त्रिंशत्संख्याभिर्गोभिर्गृहपतिमभिसमायन्ति समागच्छन्ति सर्व्वेषां प्रत्येकं त्रयस्त्रिंशत्सम्पादनार्थं वीप्सा अतो गृहपतिरपि गवां त्रयस्त्रिंशतं सम्पादयेदित्यर्थः इमा गावोऽपि मागधदेशीयेभ्यो व्रात्येभ्यो देयाः यस्मा एतद्ददति तस्मिन्नेव मृजाना यन्तीति साधारणोक्तेः कुत एतत् त्रयस्त्रिंशत्संख्यायाः सम्पादनमिति तत्रोच्यते त्रयस्त्रिंशत्संख्याकाः खलु देवाः देवसम्बन्धिनो व्रात्या आर्ध्नुवन् अनेन व्रात्यस्तोमेन समृद्धा अभवन् अतस्तत्सम्बन्धद्वारा ऋध्यै समृद्ध्यर्थमेव त्रयस्त्रिंशता गोभिः समागमनमिति ॥ १७ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथाभिशस्तैर्निन्दितैरनुष्ठेयो व्रात्यस्तोमः प्रस्तूयते ।

अथैष षट्षोडशी ये नृशꣳसा निन्दिताः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् ॥ १ ॥

अथानन्तरं एष वक्ष्यमाणो यज्ञः षट्‌षोडशी षट्‌षोडशः स्तोमा यस्य स तथोक्तः नृशंसा निन्दिताः मनुष्यैरभिशंसनेन पापाध्यारोपेण गर्हिताः सन्तो ये पुरुषाः व्रात्यां व्रात्यत्वं प्राप्य प्रवसेयुः तएतेन षट्‌षोडशिना यजेरन् ॥ १ ॥

षट्‌षोडशित्वं पाप्मनो निर्हरणहेतुरिति प्रतिपिपादयिषया प्रथममेषां पापसद्भावमाह।

अभिपूर्व्वेण वा एते पाप्मना गृहीता ये नृशꣳसा निन्दिताः सन्तो व्रात्यां प्रवसन्ति यत् षट् षोडशानि स्तोत्राणि भवन्ति तेन पाप्मनोऽधि निर्मुच्यन्ते ॥२॥

अभिपूर्व्वेण क्रमेण स्थले ते पाप्मना पापेन गृहीताः ये नृशंसा निन्दिताः अभिशंसनेन गर्हिताः सन्तो व्रात्यां प्रवसन्ति तथा च यत् षट् स्तोत्राणि षोडशानि षोडशस्तोमानि भवन्ति तेन षोडशेन पाप्मनोऽधि पापान्निर्मुच्यन्ते उक्थसंस्थो ह्ययं व्रात्यस्तोमः तथा त्रिषु पवमानस्तोत्रेषु अच्छावाकस्याज्यपृष्ठ-उक्थेषु षट् स्तोत्रेषु षोडशस्तोमो भवति तदुक्तं कल्पकारेण षोडशाः पवमाना अच्छावाकसामानि चेति ॥ २ ॥

अथास्याग्निष्टोमसाम्नः स्तोमं विधाय स्तौति।

यदेकविꣳशोऽग्निष्टोमो भवति प्रतिष्ठा वा एक-विꣳशोमध्यत एव यज्ञस्य प्रतितिष्ठन्ति ॥ ३ ॥

उक्थसंस्थत्वादग्निष्टोमसाम्नो यज्ञस्य मध्यत्वं विज्ञमन्यत् ॥३॥

तथास्योक्थसंस्थां विधास्यंस्तौति ।

उक्थो भवति पशवो वा उक्थानि पशवो नृशंसमग्रं परिणयन्ति पशुभिरेवैनानग्रं परिणयति ॥ ४ ॥

पशवो हि गवादयो हि नृशंसनैरभिशस्यमानं पुरुषं अग्रं श्रेष्ठ्यं परिणयन्ति तत्पालनदानादिभिः पापं चीयते उक्थस्तोत्राणि च पशुसंस्तुतानि अतः पशुभिरेवैनान् व्रात्यान् अग्रं श्रेष्ठ्यं परिणयति प्रापयत्युद्गाता ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथ वयसा कनीयांसो ये व्रात्यास्तैरनुष्ठेयो यागो विधीयते ।

अथैष द्विषोडशो ये कनिष्ठाः सन्तो व्रात्यां प्रवसेयुस्तएतेन यजेरन् ॥ १ ॥

अथानन्तरं एष द्विषोडशी षोडशस्तोमके द्वे स्तोत्रे यस्य स तथोक्तः ये कनिष्ठाः युवतमाः सन्तो व्रात्यतां प्राप्य प्रवसेयुः बहिःकृताः प्रवासं कुर्य्युः त एतेन द्विषोडशिना व्रात्यस्तोमेन यजेरन् ॥ १ ॥

अथैतस्मिन् त्रिषु पवमानस्तोत्रेषु त्रिवृत्स्तोमः कार्य्य इति विधित्सुराह।

हीना वा एते हीयन्ते ये कनिष्ठाः सन्तो व्रात्यां प्रवसन्ति यत्त्रिवृतः पवमाना भवन्ति मुखं वै त्रिवृत् स्तोमानाम्मुखत एवैनान् यज्ञस्य परिणयति॥ २॥

वयसातिहीनाः खलु इमे हीयन्ते पुनरहीना हीना भवन्ति तथाच तेषां हीनत्वपरिहाराय त्रिवृतः पवमाना भवन्ति बहिष्पवमानादिषु त्रिषु पवमानस्तोत्रेषु त्रिवृत् स्तोमः कार्य्य इत्यर्थः स्तोमानाम्मध्ये त्रिवृत्स्तोमो मुखं वै मुख्यः प्रथमः यदेवं विधस्य त्रिवृतः पवमानेषु करणं तेन यज्ञस्य मुखतः सवनत्रय-प्रारम्भ एव एनान् परिणयति ब्राह्मणत्वं प्रापयति॥ २॥

अथास्याच्छावाकसम्बन्धिनोराज्यपृष्ठस्तोत्रयोः षोडशः स्तोमः कार्य्य इति स्तुतिमुखेन दर्शयति।

यद् वै षोडशे स्तोत्रे भवतस्तेन पाप्मनोऽधिनि-र्मुच्यन्ते॥ ३॥

सिद्धप्रायमेतत्॥ ३॥

अथाग्निष्टोमसाम्न एकविंशस्तोमं विधाय स्तौति।

एकविंशोऽग्निष्टोमो भवति प्रतिष्ठा वा एक-विंशोऽन्तत एव यज्ञस्य प्रतितिष्ठन्ति॥ ४॥

अग्निष्टोमसंस्थत्वादेतस्य व्रात्यस्तोमस्य अग्निष्टोमसाम्नोऽन्तत्वं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य
तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ ये स्थविरा व्रात्यास्तैरनुष्ठेयं व्रात्ययज्ञं दर्शयति ।

अथैष शमनीचामेढ्राणाꣳ स्तोमो ये ज्येष्ठाः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् ॥ १ ॥

अथानन्तरं एष वक्ष्यमाणो यज्ञः शमनीचामेढ्राणां स्तोमः शमेन यौवनोपरमेण नीचमनुन्नतं मेढ्रं येषां ते शमनीचामेढ्राः स्थाविर्य्याद्विनष्टवीर्य्या इत्यर्थः तेषां सम्बन्धी स्तोमः अतो ये ज्येष्ठाः वृद्धतमाः सन्तो व्रात्यतां प्राप्य प्रवसेयुरेतेन व्रात्यस्तोमेन यजेरन् ॥ १ ॥

अथास्योद्धृतनस्तोमतां विधत्ते ।

अग्रादग्रꣳ रोहन्त्यूर्द्ध्वाः स्तोमा यन्त्यनपभ्रꣳशाय ॥ २ ॥

अनपभ्रंशाय अनधःपतनाय अधिकसंख्याकं स्तोमं कृत्वा यदि न्यूनसंख्याकं स्तोमं प्रयुञ्जीरन् तदा भवेदधःपात नैवमूर्द्ध्व

स्तोमत्वमित्यर्थः तथाच एवं कुर्व्वाणो यजमानाः अग्रात् श्रैष्ठ्यात् अग्रं श्रैष्ठ्यं रोहन्ति आरूढा भवन्ति उत्तरोत्तरमुन्नतं पदं प्राप्नुवन्तीत्यर्थः एतञ्चोर्द्ध्वस्तोमत्वं कल्पकारेण दर्शितं द्वे त्रिवृती स्तोत्रे द्वे पञ्चदशसप्तदशे द्वे एकविंशचतुर्विंशे इत्यादिना एवञ्च पूर्व्वस्मात् स्तोत्रादुत्तरमुत्तरं स्तोत्रमधिकस्तोमकं भवतीत्युक्तं भवति ॥ २ ॥

अथैतस्य शमनीचामेढ्राणां स्तोमत्वं दर्शयन् ऊर्द्ध्वस्तोमत्वव्यतिरिक्तेन प्रकारान्तरेण स्तोमकल्पने दोषन्दर्शयति ।

एतेन वै शमनीचामेढ्रा अयजन्त तेषां कुषीतकः सामश्रवसो गृहपतिरासीत्तान् लुशाकपिः खार्गलिरनुव्याहरदवाकीर्षत कनीयाꣳसौ स्तोमावुपागुरिति तस्मात्कौषीतकीनान्नकश्चनातीव जिहीते यज्ञावकीर्णा हि ॥ ३ ॥

एतेन खलु स्तोमेन पुरा शमनीचामेढ्रा अपगतयौवनत्वेन निर्व्वीर्य्यप्रजननाः देवसम्बन्धिनो व्रात्या अयजन्त तस्मादेषः शमनीचामेढ्राणां स्तोम इत्याख्यायते तदानीन्तनानां व्रात्यानां समश्रवसः पुत्रः कुषीतको नाम ऋषिः गृहपतिर्मुख्यः आसीत् तान् कुषीतकगृहपतिसहितान् लुशाकपिर्नामा खार्गलिः खर्गलपुत्रो अनुव्याहरदशपत् ततस्ते अवाकीर्षत अवकीर्णिनः भ्रष्टाचारा अभवन् अनुव्याहरतोऽयमभिप्रायः एते कुषीतकगृह-

पतय: कनीयांसौ अल्पसंख्यावेव द्वौ स्तोमावुपागु: प्राप्नुवन्निति पूर्व्वदर्शितमुत्तरोत्तराधिकसंख्यं स्तोमं परित्यज्य न्यूनसंख्यस्तोमद्वयं प्रायुञ्जतेति तस्मादेतैरयथानुष्ठानात् यथार्थदर्शिना लुशाकपिना शाप: कृत इत्यर्थ: यस्मादेते कुषीतकमुख्या: शप्ता आसन् तस्मादेव कारणात् कौषीतकीनां कौषीतकशाखाध्येतॄणां वा मध्ये कश्चन कोऽपि पुरुष: नातीव जिहीते अतीव आश्रयो न गच्छति ओहाङ् गताविति धातु: हि यस्मात् एते यज्ञावकीर्णा अन्यथानुष्ठितेन यज्ञेन निमित्तेनावकीर्णा अवकीर्णिन: विभ्रष्टब्रह्मचर्य्या: तस्मादित्यर्थ: ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

अथ पञ्चभिरग्निष्टुतोविधिस्तत्र केचित् प्रथमेन खण्डेन द्वावग्निष्टुतौ विधीयेते अपरौ चतुर्भिश्चत्वार इति षडग्निष्टुत इति मन्यन्ते अपरे तु तदाक्षयेत् त्रिवृद्भवत्येकस्मादेवाङ्गात् पाप्मानमपहन्तीत्यादिना प्रथमस्याग्निष्टुतो निन्दापुर:सरं अन्यस्यैव विधानात् प्रथमस्याननुष्ठेयत्वात् पञ्चैवाग्निष्टुत इति वर्णयन्ति कल्पकारस्य तु चत्वारोऽग्निष्टुत इति मतं चतुर्णामेव स्तोमस्तोत्रीयाकल्पनात् एतत् पञ्चत्रयं सूत्रकारेणोक्तं षडग्निष्टुत: त्रिवृज्ज्योतिष्टोमस्याद्यौ स्वर्गं वारवन्तीयावित्यादिना

एतेषु त्रिषु पक्षेषु षडग्निष्टुत इति पक्षः साधीयान् यथा द्विती-
यादिषु खण्डेषु पृथक् पृथगग्निष्टुतो विधानं फलञ्च दृश्यते
तथाच निदानकारेणोक्तं ते इमे पञ्चानुवाकाश्चत्वारः कल्पाः
स एष प्रथमोऽनुवाकः सर्व्वेषां साष्टस्यादियुक्तं पुनरित्युक्तं
अपि वा प्रथमस्य द्वौ स्यातामिति अथ तेषु प्रथमस्य त्रिवृदग्नि-
ष्टुतो ब्रह्महत्यानिर्हरणार्थत्वं प्रतिपादयिष्यन् तदर्थं प्रथमं ताव-
दाख्यायिकामाह।

इन्द्रो वै त्रिशिरसं त्वाष्ट्रमहꣳस्तमश्लीला वाग-
भ्यवदत् सोऽग्निमुपाधावत् स एतदग्निस्तोत्रमपश्य-
त्तदात्मन्यधिविधाय तेनैनमयाजयत्तेनास्याश्लीलां
वाचमपाहन्॥ १॥

त्रिशिरसं त्रीणि शिरांसि यस्य तादृशं त्वाष्ट्रन्त्वष्टुः पुत्रं
विश्वरूपाख्यं देवानां पुरोहितं असुरहिताचरणे प्रयतमानं
इन्द्रः पुरा हतवान् ततस्तमिन्द्रं अश्लीला पापरूपा वागभ्यवदत्
हे ब्रह्मघ्न् ब्रह्महन्निति ततः स इन्द्रोऽग्निमुपाधावदुपागच्छत्
स चाग्निरेतदग्निस्तोत्रं अग्नेरेव स्तोत्रं नान्येषां देवानां
यस्मिन् तमग्निष्टुतमपश्यत् अदर्शत् तदग्निस्तोत्रमात्मन्यधि-
विधाय आत्मना धृतं कृत्वा तेनाग्निष्टुता एनमिन्द्रं अयाजयत्
तेन चेष्टेन यज्ञेन अस्येन्द्रस्य अश्लीलां ब्रह्मघ्नन्नित्येवंरूपां पापां
वाचं अपाहन् व्यनाशयन् ॥ १ ॥

अथैतद्वेदितुः फलमाह।

अपास्लीलां वाचꣳ हते य एवं वेद ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

अथैतमग्निष्टुतं विधत्ते ।

योऽपूतइव स्यादग्निष्टुता यजेताग्निर्नैवास्य पाप्मान-मपहत्य त्रिवृता तेजो ब्रह्मवर्चसं दधाति ॥ ३ ॥

यस्मादेवमुक्तप्रकारेण त्रिवृदग्निष्टुता यो यजमानः अपूतोऽशुद्ध इव स्यात् ब्रह्महत्यादिदोषाशङ्कितो भवेत् सोऽग्निष्टुता त्रिवृत्स्तोमकेन यजेत तथाच स्तूयमानेन क्रतुस्तयज्ञभाजाग्निना अस्यात्मनः पापं अपहत्य दग्ध्वा निष्पापेऽस्मिन् त्रिवृता स्तोमेन तेजो ब्रह्मवर्चसञ्च दधाति निदधाति स्थापयति अग्निना ब्राह्मणजात्या च सहोत्पन्नत्वात् त्रिवृतस्तोमस्योभयहेतुता एवं पूतत्वं ब्रह्मवर्चसञ्च कामयमानस्य त्रिवृदग्निष्टुद्विहितः ॥ ३ ॥

अथ चतुष्टोमाग्निष्टुतं विधातुं उक्ते कञ्चिद्दोषं दर्शयति ।

तदाहुर्य्यत्त्रिवृद्भवत्येकस्मादेवाङ्गात् पाप्मानमप-घ्नन्ति मुखादेवेति ॥ ४ ॥

तत्र अग्निष्टुद्विषये आहुश्चोदयन्ति ब्रह्मवादिनः यद्यदि त्रिवृदेक एव स्तोमो भवति तर्ह्येकस्मादेवाङ्गात् पाप्मानमपघ्नन्ति किं तदेकमङ्गमिति मुखादेवेति त्रिवृत्स्तोमस्य प्रजा-

पतेर्मुखादुत्पन्नत्वात् अग्निष्टुतः सर्व्वस्तोत्रेषु प्रयुज्यमानः स स्तोमः मुखादेव सकाशात् पापन्निवारयति नान्यस्मादवयवादिति ॥ ४ ॥

कतमस्तर्हि प्रशस्तस्तमाह ।

ज्योतिष्टोम एव कार्य्यः ॥ ५ ॥

त्रिवृत्पञ्चदशसप्तदशैकविंशाः स्तोमाः ज्योतिःशब्देनोच्यन्ते त्रिवृतादयश्चत्वारः स्तोमा यस्य तथाविधोऽग्निः कार्य्योऽनुष्ठेयः ॥ ५ ॥

एवमनुष्ठितः सर्व्वेभ्योऽवयवेभ्यः पाप्मनो निवारणकारणमित्याह ।

यत्त्रिवृद्भवति यदेवास्य मुखतोऽपूतं तत्तेनापहन्ति यत् पञ्चदशो यदेवास्योरस्तो बाह्वोरपूतं तत्तेनापहन्ति यत् सप्तदशो यदेवास्य मध्यतोऽपूतं तत्तेनापहन्ति यदेकविंशो यदेवास्य पदोरष्ठीवतोरपूतं तत्तेनापयन्ति ॥ ६ ॥

यत् यस्मात् अस्मिन्नग्निष्टुति त्रिवृत्स्तोमो भवति अस्य यजमानस्य मुखत आस्यदेशे यदपूतं अशुद्धिकरं पापं तदपूतं तत् त्रिवृत्स्तोमेनापहन्ति त्रिवृतः प्रजापतिमुखादुत्पत्तेर्म्मुखसम्बन्धः यद्यस्मादग्निष्टुति पञ्चदशस्तोमो भवति यदेवास्योरस्तः उरसि वक्षसि बाह्वोश्चापूतं पापं तत्तेन पञ्चदशेनापहन्ति स हि

प्रजापतेरुरसोबाहुभ्याञ्चोत्पन्नः यत् सप्तदशस्तोमो भवति यदेवास्य यजमानस्य मध्यतो देहमध्ये अपूतं तत्तेन सप्तदशेनापहन्ति मध्यतः सप्तदशन्निरमिमीतेति प्रजापतेर्मध्यदेशात्तस्योत्पत्तेः प्रतिपादनात् यदेकविंशस्तोमो भवति यदेवास्य यजमानस्य पदोः पादतलयोरष्ठीवतोरूर्व्वोश्चापूतं तेनैकविंशेन तदपूतमपहन्ति ॥ ६ ॥

अथास्मिन् वारवन्तीयमग्निष्टोमसामत्वेन विधत्ते।

वैश्वानरं वा एष प्रविशतीत्याहुर्य्योऽग्निष्टुता यजत इति वारवन्तीयमग्निष्टोमसाम कार्य्यन्तस्य यदपूतं तदग्निः क्षापयत्यथेतरः शुचिः पूत उदेति ॥७॥

यो यजमानोऽग्निष्टुता यजते एष वैश्वानरमग्निं प्रविशतीत्याहुर्ब्रह्मवादिनः तस्याग्निष्टुतः केवलाग्नेयत्वात् तस्यानुष्ठाताग्निमेव प्रविशतीत्युच्यते कः पुनरस्य प्रतिकारः तदाह वारवन्तीयमिति वारवन्तीयं स्वकीयास्वृक्षु अग्निष्टोमसामत्वेन कार्य्यं यतः अग्निप्रविष्टस्य यजमानस्य यदपूतमपूतत्वं अशुद्धिरस्ति तदग्निः क्षापयति दहति अथानन्तरं अपां सारभूतेन वारवन्तीयेन सिक्तत्वात् इतरो यजमानः शुचिः शुद्धः पापरहितः पूतः कर्म्मयोग्यश्च सन् उदेति उद्गच्छति प्रकाशते ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

पञ्चमः खण्डः।

अथ षष्ठः खण्डः ।

अथ तृतीयमग्निष्टुतं विधत्ते ।

त्रिवृदग्निष्टोमस्तस्य वायव्यास्वग्निष्टोमसाम ॥१॥

अग्निष्टोमसंस्थस्त्रिवृत्स्तोमकस्तृतीयोऽग्निष्टुत् तस्य वायव्यासृक्षु गीयमानं वारवन्तीयमग्निष्टोमसाम कार्य्यं उपत्वाजामयोगिर इत्याद्या वायव्या ऋचः कल्पकारोक्ताः उपत्वाजामयो गिर इति वायव्यासु वारवन्तीयमग्निष्टोमसामेति ॥ १ ॥

अथास्मिन्नधिकारिणमाह ।

ब्रह्मवर्च्चसकामो यजेत ॥ २ ॥

स्पष्टं ॥ २ ॥

अथैतस्य त्रिवृत्स्तोमत्वं वायव्यास्वग्निष्टोमसाम्नः करणञ्च स्तौति ।

तेजो वै त्रिवृद् ब्रह्मवर्च्चसं यद्वायव्यास्वग्निष्टोमसाम भवत्युपैवैनन्तद्धमति ॥ ३ ॥

त्रिवृतस्तेजोब्रह्मवर्च्चसरूपत्वमुक्तं तस्मात्तत्स्तोमद्वारेणास्य ब्रह्मवर्च्चसहेतुत्वं अपि च वायव्यासु वायुदेवताकासृक्षु यदग्निष्टोमसाम भवति तदेनं यजमानमुपधमत्येव यथा लोहकारो लोहतः कीटमपनेतुं अग्नौ प्रास्यत इति तत्सम्बन्धिना वायुना

धमति एवं वायव्यास्तु करणं यजमानस्य पापधमनाय भवतीत्यर्थः ॥ ३ ॥

एतदेवाह ।

यथा हिरण्यन्निष्टपेदेवमेनमग्निष्टुन्निष्टपति ॥ ४ ॥

यथा येन खलु प्रकारेण हिरण्यं स्वर्णकारो निष्टपेत् मालिन्यापनयनार्थं एवमयमग्निष्टुद्यागो यजमानन्निष्टपति निष्टप्तं पापहीनं करोतीत्यर्थः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

अथ पशुकामस्यान्यमग्निष्टुतं विधत्ते ।

एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो यजेत ॥ १ ॥

एतस्यैवाग्निष्टुतो रेवतीषु रेवतीर्न इत्याद्यास्वृक्षु वारवन्तीयमग्निष्टोमसाम कृत्वा अनेनाग्निष्टुता पशुकामो यजेत ॥ १ ॥

अथास्य पशुसाधनत्वमुपपादयति ।

अरत्कच्चो वा एष योऽपशुर्यथा वै जरत्कच्चे पशवो न रमन्त एवमेतस्मिन् पशवो न रमन्ते यो

ऽपशुर्य्यदा वै जरत्कक्षमग्निर्दहत्यथैनमभिवर्षत्यथा-
स्मिन्नोषधयो जायन्तेऽथ वै तस्मिन् पशवो रमन्ते ॥२॥

यो यजमानोऽपशुः पशुरहितः स जरत्कक्षो वै जीर्णतृण-गुल्मसदृशः तदेव सादृश्यं दर्शयति यथा खलु जरत्कक्षे जीर्णतृणेऽरण्ये पशवो न रमन्ते खाद्यस्य बालतृणस्याभावान्नावतिष्ठन्ते एवमेव एतस्मिन् पुरुषे पशवो न रमन्ते योऽपशुः पशुरहितः तस्माज्जरत्कक्षसदृशोऽयं यजमानः यदा खलु एनं जरत्कक्षमग्निर्दहति भस्मसात्करोति अथानन्तरमेनं दग्धं जरत्कक्षं पर्ज्जन्यो वर्षति अथानन्तरमस्मिन्नोषधयस्तृणादयो जायन्ते अथानन्तरमेव तस्मिन् स्थाने पशवो रमन्ते एवमेवाग्निष्टुता दग्धपापाः रेवतीषु गीयमानेन वारवन्तीयेन अपां रसात्मना संस्तुतेन संसिक्ते यजमाने पशवो रमन्त इत्यर्थः ॥ २ ॥

अथैतद्वेदनं प्रशंसति ।

रमन्तेऽस्मिन् पशवो य एवं वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

अपशोर्यजमानस्य जरत्कक्षसाम्यमुक्तं अथास्यापशुत्वदाहकः कोऽग्निः केन जलेन सिच्यत इति तदुभयमाह ।

यदेवास्यापशव्यन्तदग्निष्टुग्निर्दहति यदग्निष्टुन्निर्दहति तदद्भीरेवतीभिः शमयति ॥ ४ ॥

रेवतीभिश्च वर्षणात् कोमलत्वयुक्तो नूतनत्वाकश्च इव यजमानः पशूनामाश्रयो भवतीत्यर्थः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

यद्यग्निष्टोमादियज्ञं प्रारब्धवतो यजमानस्य कुतश्चि न्निमित्तात्समाप्त्यभावेन यज्ञो विच्छिन्नः स्यात् तदा यजमानो यज्ञाद्विभ्रष्टो भवेत् तस्य प्रायश्चित्तत्वेन ज्योतिष्टोमोऽग्निष्टुदनु-ष्ठेय इत्याह ।

ज्योतिष्टोमेनाग्निष्टुता यज्ञविभ्रष्टो यजेत ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

प्रारब्धेऽसमाप्यमाने च सोमयागे अनुष्ठेयानां प्रधानया-गानां ऐन्द्रवायवादीनां बहिष्पवमानादीनां स्तोत्राणाञ्च मध्ये यदि किञ्चित्प्रमादाद्विस्मृतं स्यात् तदाप्ययं प्रायश्चित्तत्वेनानुष्ठेय इत्याह ।

यस्मिन् वा यज्ञक्रतौ विभ्रंशेत ॥ २ ॥

अथ वा यस्मिन् यज्ञक्रतौ सोमयागे प्रधानैकदेशविस्मरणात् विभ्रंशेत अनुष्ठेयाद्विभ्रष्टो भवेत् तत्राप्यनेन यजमानो ज्योति रग्निष्टुता यजेतेति ॥ २ ॥

अथ केवलाग्नेयस्याग्निष्टुतोऽनुष्ठानं यज्ञविभ्रष्टस्योपपादयति ।

अग्निर्वा एतस्य हव्यमत्ति यो यज्ञे विभ्रꣳशते न देवता हव्यं गमयत्यग्निमेवैकधर्ध्नोति ॥ ३ ॥

एतस्य यजमानस्य हव्यं हविश्च पुरोडाशसोमादिकं अग्निरेवात्ति भक्षयति यष्टव्या अन्या इन्द्राद्या देवता हव्यं न गमयति यो यजमानो यज्ञेऽनुष्ठीयमाने विभ्रंशते विभ्रष्टो भवेत् एतस्येति सम्बन्धः तथा चाग्निष्टुता एकधा एकप्रकारेण अग्निमेवर्ध्नोति हविर्भिः समर्द्धयति एवमग्निष्टुति कृते सति पश्चादन्या देवता हवींषि प्रापयतीत्यर्थः ॥ ३ ॥

अथ विभ्रष्टस्य यज्ञस्यासमाधाने फलप्राप्त्यभावं प्रायश्चित्तेन समाधाने तत्सद्भावञ्च सदृष्टान्तं दर्शयति ।

यद्वै सꣳशीर्य्यतेऽथान्यन्निष्कुर्व्वन्ति न तेन तद्याति यदा वाव तन्निष्कुर्वन्त्यथ तद्याति येष्वेव स्तोमेषु विभ्रꣳशेत यस्मिन् यज्ञक्रतौ तैरेव यजेत येष्वेव स्तोमेषु विभ्रꣳशते यस्मिन् यज्ञक्रतौ तेष्वेव प्रतितिष्ठति ॥ ४ ॥

यद्वै यत् खलु रथादिकं वाहनं संशीर्य्यते संशीर्णं भग्नं भवेत् अथानन्तरं तस्मात् संशीर्णात् अन्यद्वाहनं निष्कुर्व्वन्ति संस्कुर्व्वन्ति तत्तदानीं तेन पूर्व्वगामिना संशीर्णेन वाहनेन न याति न गच्छति यदा खलु तदेव संशीर्णं निष्कुर्व्वन्ति समा-

दधते तत्तदा तेनैव याति गच्छति यस्मादेवं लोके तस्माद् यस्मिन् सोमयागे येष्वेव स्तोमेषु प्रयोज्येषु त्रिवृदादिषु विभ्रंशेत न्यूनाधिकसंख्यया स्वरूपविस्मरणादिना च विभ्रष्टो भवेत् तैरेव स्तोमैः साधनैः पुनर्यजेत तथाच विलुप्तानां प्रायश्चित्त-पूर्व्वकं पुनर्य्यागेन समाधानात् येष्वेव स्तोमेषु पूर्व्वं यजमानो विभ्रंशते यस्मिन् सोमयागे तत्र तेष्वेव स्तोमेषु पुनः प्रतिष्ठितो भवति सम्पूर्णावयवोऽस्य यज्ञः फलसाधनाय समर्थो भवतीत्यर्थः॥ ४॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

अष्टमः खण्डः।

अथ नवमः खण्डः।

अथान्यमग्निष्टुतमाह।

सप्तदशेनाग्निष्टुतान्नाद्यकामो यजेत॥ १॥

अत्तुमर्हमन्नं तत्कामयमानः सप्तदशेन सप्तदशस्तोमकेनाग्निष्टुता यजेत॥ १॥

अथैतस्यान्नसाधनत्वमुपपादयति।

अन्नं वै सप्तदशोऽग्निरन्नाद्यस्य प्रदाताग्निरेवास्मा अन्नाद्यं प्रयच्छति॥ २॥

सप्तदशस्तोमोऽन्नं वै अन्नमेव अन्नाधारात् प्रजापतेर्म्मध्य-

देहादुत्पत्तेः अग्निश्चान्नाद्यस्य अदनीयस्यान्नस्य आहुतिद्वारा प्रदाता तथा च स्मर्य्यते अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नन्ततः प्रजा इति एवञ्चाग्नेः सप्तदशस्य चाग्निष्टुतिं संहृत्य प्रयुक्तत्वात् अस्मै यजमानाय अग्निरेवान्नाद्यं प्रयच्छति ददाति ॥ २ ॥

अथैतद्वेदितुः फलमाह ।

अन्नादो भवति य एवं वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

अथोक्तसप्तदशस्तोमकत्वमनूद्य स्तौति ।

सर्व्वः सप्तदशो भवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ४ ॥

सर्वेषु स्तोत्रेषु योयः स्तोमः स सर्व्वः सप्तदशो भवति स च सप्तदशः प्रजापतिर्व्वै प्रजापतिरेव द्वादशमासाः पञ्चर्त्तवः स संवत्सरः संवत्सरः प्रजापतिरिति श्रुतेः संवत्सरावयवमासर्त्तुसङ्ख्यासाम्यात् सप्तदशस्य संवत्सरात्मकत्वं स च संवत्सरः प्राजापत्यात्मक इति सप्तदश एव प्रजापतिरिति व्यपदिश्यते तथा च सप्तदशस्तोमेनानेन प्रजापतिमेवाप्नोति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य
नवमः खण्डः ।

अथ दशमः खण्डः ।

अग्निष्टुतो यज्ञाः, पञ्च षट् वा एकाहा इति, अथ त्रयस्त्रिंशत एकाहाः प्रजापतेरपूर्व्वो वृहस्पतिसवः सर्व्वस्वार इति तत्र प्रथमं दर्शयति ।

त्रिवृदग्निष्टोमस्तस्यानिरुक्तं प्रातःसवनं ॥ १ ॥

त्रिवृत्स्तोमकोऽग्निष्टोमसंस्थोऽयमेकाहस्तस्य प्रातःसवनं सर्व्वमनिरुक्तं बहिष्पवमानादिषु प्रातःसवनेषु पञ्चसु स्तोत्रेषु गायत्रसामानिरुक्तं गेयमित्यर्थः उद्गाता स्वभक्तिमुद्गीथमुपद्रवञ्च मनसा प्रयुञ्जानः स्वभक्तिसदृशं ओङ्कारं कृत्वा तं वाचा ब्रूयादिति अनिरुक्त इत्यस्य लक्षणं तथा च सूत्रकारेणोक्तं मनसा तु स्वभक्तिमोङ्कारं तथा स्वरं वाचा गायेदिति ॥ १ ॥

अथैतदनिरुक्तं स्तोतुमाह ।

प्रजापतिः प्रजा असृजत ता अस्मात्सृष्टा अपाक्रामन् स एतदनिरुक्तं प्रातस्सवनमपश्यत्तेनासां मध्यव्यैत्ता एनमुपावर्त्तन्त पर्य्येनमाविशन् ॥ २ ॥

पुरा प्रजापतिः प्रजानामधिपतिः स्रष्टा प्रजा असृजत सृष्टवान् ताश्च सृष्टा अस्मात्प्रजापतिसकाशात् अपाक्रामन् अपगता आसन् ततः स प्रजापतिः एतदनिरुक्तं उक्तप्रकारेण प्रयुज्यं प्रातःसवनमपश्यत् तेन च प्रातःसवनेनासां प्रजानां मध्यदेव्यवैत् विशेषेणागच्छत् ताश्च प्रजाः एनं प्रजापतिमुपावर्त्त

उपागच्छन् उपागत्य च एनं पर्य्यविशन् परितो निषण्णा आसन् ॥ २ ॥

यस्मादेवं तस्मात् एतदनिरुक्तं प्रातःसवनं प्रशस्तमिति दर्शयन् अस्मिन्नधिकारिणमाह ।

ग्रामकामो यजेत यदेतदनिरुक्तं प्रातःसवनं भवति मध्यमेवासां व्यवैत्युपैनमावर्त्तन्ते पर्य्येनं विशन्ति ॥३॥

ग्रामकामो यजमानोऽनेनैकाहेन यजेत तस्य चैतत् प्रातःसवनं यद्यस्मादनिरुक्तं भवति तेन आसां प्रजानां मध्यमेव व्यवैति प्राप्नोति एनं यजमानं तास्तु प्रजा उपावर्त्तन्ते उपगच्छन्ति उपगत्य च एनं परितो निषीदन्ति ॥ ३ ॥

अथास्य संज्ञां प्रदर्श्य तद्वेदितुः फलमाह ।

स एष प्रजापतेरपूर्वो नास्मात् पूर्वो भवति य एवं वेद ॥ ४ ॥

स एष यज्ञः प्रजापतेरपूर्व्वोनाम प्रजापतेरनेनापूर्व्वता तस्मात् पूर्व्वभाविना पुरुषान्तरेण राहित्यं प्राप्तवानिति व्युत्पत्या प्रजापतेरपूर्व्व इत्यस्य संज्ञा जाता अतो यएतां संज्ञां वेद जानाति अस्मात् पूर्व्वः कोऽपि न भवति सर्व्वेषां स्वयं ज्येष्ठो भवतीत्यर्थः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथ बृहस्पतिसवाख्यमेकाहं प्रस्तौति ।

त्रिवृदग्निष्टोमः ॥ १ ॥

त्रिवृत्स्तोमकोऽग्निष्टोमसंस्थो बृहस्पतिसवाख्य एकाहः ॥१॥

अथास्य त्रयस्त्रिंशद्गावश्चतुस्त्रिंशएकोऽश्व इति दक्षिणा विधिस्तुस्तासां सवनत्रये विभज्य दानप्रकारमाह ।

तस्य प्रातस्सवने सन्नेषु नाराशंसेष्वेकादश दक्षिणाव्यादिशत्यश्वद्वादशा माध्यन्दिने ता उभयोरपाकरोत्येकादश तृतीयसवने ता वशायामपाकरोति ॥ २ ॥

तस्य सोमयागस्य प्रातःसवने नाराशंसेषु हुतशिष्टा भक्षिता आप्यायितास्चमसा नाराशंसाः तत्र प्रातःसवनमाध्यन्दिनसवने द्विनाराशंसे तृतीयसवनं त्वेकनाराशंसं तत्र प्रथमेषु नाराशंसेषु सन्नेषु सादितेषु सत्सु एकादशसङ्ख्या दक्षिणा गावो दिशति युष्मदर्थमेता गाव इति ऋत्विग्भ्यो निर्दिशेदित्यर्थः तथा माध्यन्दिनसवने सन्नेषु नाराशंसेषु अश्वद्वादशाः अश्वो द्वादशसङ्ख्यापूरको यासां ता अश्वद्वादशा एकादशदक्षिणा व्यादिशति उभयोः उभयविधाः प्रातःसवने माध्यन्दिनसवने च व्यादिष्टास्ताः गा अपाकरोति पृथक्करोति ऋत्विग्भ्यो दद्यादित्यर्थः एवञ्च प्रातःसवने व्यादेशमात्रमेव न तु दानमित्युक्तं भवति तथा

तृतीयसवने सन्नेषु नाराशंसेष्वेकादशदक्षिणा गाः व्यादिशति ऋत्विग्भ्यो युष्मदर्थं एतदिति निर्दिशेदित्यर्थः ता एकादशसंख्याका वशायां मैत्रावरुणीवशा ह्यनूबन्ध्या तस्यां वशायां कृतायां अपाकरोति पृथक्करोति ऋत्विग्भ्यो दद्यादित्यर्थः ॥ २ ॥

अथैताः संहृत्य विधाय स्तौति।

त्रयस्त्रिंशदेता दक्षिणा भवन्ति त्रयस्त्रिंशद्देवता देवता एवाप्नोत्यश्वश्चतुस्त्रिंशो दक्षिणानां प्रजापतिश्चतुस्त्रिंशो देवतानां प्रजापतिमेवाप्नोति ॥ ३ ॥

एतास्त्रयस्त्रिंशद्गावो अस्य क्रतोर्दक्षिणा भवन्ति त्रयस्त्रिंशत्संख्या हि देवताः अष्टौ वसव इत्याद्यास्तथा च दक्षिणार्थं त्रयस्त्रिंशत्संख्या देवता यजमानः प्राप्नोति तथा तासां दक्षिणानां चतुस्त्रिंशश्चतुस्त्रिंशत्संख्यापूरको अश्वो देयः देवतानां वस्वादीनां प्रजापतिश्चतुस्त्रिंशश्चतुस्त्रिंशत्संख्यापूरकः तथा च चतुस्त्रिंशेनाश्वेन चतुस्त्रिंशं प्रजापतिमेवाप्नोति ॥ ३ ॥

अथैतस्य बृहस्पतिसव इति संज्ञां विधाय तं निर्वक्तुमाह।

स एष बृहस्पतिसवो बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति स एतेनायजत स देवानां पुरोधामगच्छत् ॥ ४ ॥

स एष एकाहो बृहस्पतिसव इत्याख्यायते पुरा खलु बृह-

स्पतिरकामयत किमिति देवानामिन्द्रादीनां पुरोधां पौरोहित्यं गच्छेयं प्राप्नुयामिति एवं कामयित्वा सोऽनन्तरं एतेन यज्ञेनेष्टवान् सचैतस्य माहात्म्येन देवानां पुरोधां प्राप्नोत् तस्मादस्य बृहस्पतिसव इति संज्ञा जाता ॥ ४ ॥

अथैतद्वेदनफलमाह ।

गच्छति पुरोधां य एवं वेद ॥ ५ ॥

स्पष्टं ॥ ५ ॥

राज्ञा सह ब्राह्मणाः यं ब्राह्मणं धर्म्मस्थापकत्वेन वृणीरन् सस्थपतिरित्युच्यते तेन प्राप्तस्थापत्येन पुंसा नैमित्तिकत्वेनायमनुष्ठेय इत्याह ।

स एष स्थपतिसवो यꣳ स्थापत्यायाभिषिञ्चेरन् स एतेन यजेत ॥ ६ ॥

स एष यज्ञः स्थपतिसवः स्थपतिनानुष्ठेयः अतो यं ब्राह्मणं स्थापत्याय स्थपतित्वाय अभिषिञ्चेरन् राजपुरःसरा ब्राह्मणा वृणीरन् सोऽयमेतेन बृहस्पतिसवेन यजेत यथा लब्धहिरण्यस्य नैमित्तिकेष्टिः तद्वत्प्राप्तस्थापत्यस्यायं निमित्तको यज्ञश्चोद्यत इत्यर्थः ॥ ६ ॥

अथैतद्वेदनं प्रशंसति ।

गच्छति स्थापत्यं य एवं वेद ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

येषु सोमयागेषु यजमानोऽभिषिक्तोऽस्ति तेषां सव इत्याख्या अस्यापि बृहस्पतिसव इति सवशब्दाभिधेयत्वादभिषेकः कार्य्य इत्याह ।

कृष्णाजिनेऽध्यभिषिच्यत एतद् वै प्रत्यक्षं ब्रह्म-वर्च्चसं ब्रह्मवर्चस एवाध्यभिषिच्यते ॥ ८ ॥

कृष्णाजिनं कृष्णमृगत्वक् तस्यां समासीनो यजमानोऽभि-षेक्तव्यः एतत् खलु कृष्णाजिनं प्रत्यक्षं साक्षाद् ब्रह्मवर्च्चसं ऋक्-सामे हि पुरा देवेभ्यः कुतश्चिन्निमित्तादपक्रान्ते कृष्णमृगरूप-मास्थाय पर्य्यचरतां तथा च तैत्तिरीयके ऋक्सामे वै देवस्य इत्यादिना कृष्णाजिनस्य ब्रह्मवर्च्चसरूपत्वं विस्पष्टमाम्नातं तथा तत्रैव बृहस्पतिसववाक्यशेष एवमाम्नायते ब्रह्मणो वा एष ऋक्-सामयोरूपं यत् कृष्णाजिनमिति एवञ्च कृष्णाजिनस्य ब्रह्म-वर्च्चसरूपत्वात् ब्रह्मवर्चस एवोपविष्टोऽभिषिच्यते ॥ ८ ॥

अथाभिषेकसाधनद्रव्यं दर्शयति ।

आज्येनाभिषिच्यते तेज आज्यन्तेज आत्म-न्धत्ते ॥ ९ ॥

आज्येन घृतेनाभिषिच्यते तच्चाज्यं तेजस्तेजोरूपं आग्ने-यस्य तेजसः शारीरस्य वाह्निरूपत्वात् तथा च आत्मन् आत्मनि तेजोधत्ते यजमानो धारयति एवञ्च ब्रह्मवर्च्चसकाम-

स्तेजस्कामो वा अनेन यजेतेति अधिकारविधिरन्वेयः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

एकादशः खण्डः ।

अथ द्वादशः खण्ड ।

अथान्यं त्रिवृदग्निष्टुतासेकाहमाह ।

त्रिवृदग्निष्टोमः स सर्व्वस्वारो यः कामयेतानामयताम्̐ ल्लोकमियामिति स एतेन यजेत ॥ १ ॥

त्रिवृत्स्तोमकोऽग्निष्टोमसंस्थोऽपर एकाहः स च सर्व्वस्वारः स्वरनिधनान्येव सर्व्वाणि सामानि यस्य स तथोक्तः योऽयं यजमानः कामयेत किमिति अनामयता आमयरहितेनैव देहेन व्याध्यादिराहित्येन सुखेनावस्थितादेव देहान्निष्क्रम्य अहं स्वर्गं लोकं इयां प्राप्नुयामिति स यजमान एतेन यज्ञेन यजेत स्वर्गकामोऽस्मिन्नधिकारीत्यर्थः ॥ १ ॥

अथ स्तोमनिधनद्वारेणास्योत्पत्तिफलानुगुण्यं दर्शयति ।

प्राणो वै त्रिवृत्प्राणाः स्वरः प्राणानेवास्य बहिर्णिराद्धाति ताजक् प्रमीयते ॥ २ ॥

योऽयं त्रिवृत्स्तोमः स प्राणो वै प्राणात्मकः प्राणवायुर्मुखदेशे वर्त्तते त्रिवृच्च प्रजापतिमुखादुत्पन्न इति मुखसम्बन्धसाम्यात् ताच्छब्द्यं स्वरः स्वर्य्यमाणो यो यः सामान्तः सोऽपि

प्राणस्तुत: एवं प्राणात्मनोस्त्रिवृत्स्वरयो: सर्व्वस्तोत्रेषु प्रयोगात् अस्य यजमानस्य प्राणान्मुख्यप्राणसहितांश्चक्षुरादीन्द्रियात्मकान् बहिर्णिरादधाति शरीरान्निष्क्रम्य बहिरेव स्थापयति तथा च ताजक् तस्मिन्नेव काले प्रमीयते स यजमानोम्रियते ॥ २ ॥

अथैतौ स्तोमस्वरौ वियुज्य स्तौति ।

त्रिवृद् वै स्तोमानां क्षेपिष्ठो यत्त्रिवृद्भवत्याशीयः सङ्गच्छाता इत्यनन्तो वै स्वरोऽनन्तोऽसौ लोकोऽनन्तमेवैनꣳ स्वर्गं लोकं गमयति ॥ ३ ॥

स्तोमानाम्मध्ये त्रिवृत्स्तोम: खलु क्षेपिष्ठ: क्षेप्तृतम: वज्रो वै त्रिवृदित्यादि श्रुत्या वज्रात्मना संस्तुतत्वात् तथा च त्रिवृत्स्तोम: अस्मिन् यज्ञे सर्व्वस्तोत्रेषु भवति तत आशीय: आशुतरं अतिशीघ्रेण संगच्छातौ स्वर्गं लोकं प्राप्नोतु यजमान इत्येतदर्थं तथा स्वरोऽनन्तो वै अन्तरहित: अवसानरहित: असौ स्वर्गोलोक अनन्तोऽन्तरहित: एवञ्चानन्तेन स्वरेण अनन्तं स्वर्गं लोकमेव गमयति प्रापयति ॥ ३ ॥

अथास्मिन् यज्ञे स्तोत्रीया विधाय स्तौति ।

अभिवत्य: प्रवत्यो भवन्त्यस्मादेवैनं लोकात् स्वर्गं लोकं गमयन्ति ॥ ४ ॥

अभिवत्यो अभिशब्दयुक्ता: प्रवत्य: प्रशब्दयुक्ताश्च स्तोत्रीया भवेयु: ताश्च कल्पकारेण प्रसोमासो अधन्विषु: प्रस्वानासो-

रथाइवोपप्रयन्तो अध्वरं प्रवोमित्राय गायत अभिद्युम्नं बृहद्यश इत्याद्याः कृताः तौ चोपसर्गौ गमनप्रकर्षेण गमनाभिमुख्यं द्योतयतः तथा चास्मादेव भूलोकात् एनं यजमानं स्वर्गं लोकं गमयन्ति अभिवतीभिः प्रवतीभिश्च प्रापयन्ति ॥ ४ ॥

अथ यजमानस्य मरणार्थं सम्वेशनं विधत्ते ।

आर्भवपवमाने स्तूयमान औदुम्बर्य्या दक्षिणा प्रावृतो निपद्यते तदेव सङ्गच्छते ॥ ५ ॥

तृतीयसवन आर्भवपवमान उद्गातृभिः स्तूयमाने सदोमध्ये निखाताया औदुम्बर्य्याः दक्षिणा दक्षिणतः दक्षिणदेशे अहतेन वाससा प्रावृतः वेष्टितसर्व्वदेहः दक्षिणाशिरस्को निपद्यते शयीत तदानीमेव सङ्गच्छते म्रियते ॥ ५ ॥

अथैतस्य यागस्य व्यवहारार्थन्नाम दर्शयति ।

स एष शुनस्कर्णस्तोम एतेन वै शुनस्कर्णो बाष्किहोऽयजत तस्माच्छुनस्कर्णस्तोम इत्याख्यायते ॥ ६ ॥

स एष यागः शुनस्कर्णस्तोमसंज्ञकः एतदेव विवियते एतेन वा इत्यादिना एतेन खलु यागेन बाष्किहः बष्किहस्य पुत्रः शुनस्कर्णोनाम ऋषिः अयजत इष्टवान् तस्मात् शुनस्कर्णसम्बन्धात् अयं यागः शुनस्कर्णस्तोम इत्याख्यायते ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य
द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

अथ शाखान्तरोक्तानि सन्ति चातुर्म्मास्यानि वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाणि चत्वारि पर्व्वाणि, तानि च द्विविधानि ऐष्टिकानि सौमिकानि चेति, तत्र सौमिकानामतः परं विधिः, तत्र प्रथमस्य वैश्वदेवाख्यस्य पर्व्वणः स्थाने कर्त्तव्यं सोमयागन्दर्शयति ।

त्रिवृदग्निष्टोमो वैश्वदेवस्य लोकः ॥ १ ॥

त्रिवृत्स्तोमकोऽग्निष्टोमसंस्थः सोमयागः वैश्वदेवस्य वसन्तेऽनुष्ठेयस्य ऐष्टिकस्य वैश्वदेवाख्यस्य प्रथमपर्व्वणः स्थाने कर्त्तव्यः ॥ १ ॥

अथ तत्प्रतिपदृचं सवनीयानुबन्ध्यापशोर्दैवताविशेषं दर्शयति ।

आग्नेयी प्रतिपद् वैश्वदेवः पशुर्बार्हस्पत्यानूबन्ध्या ॥ २ ॥

आग्नेयी अग्निदेवत्या अग्न आयूंषि पवस इत्येषा बहिष्पवमानस्य प्रतिपत् प्रथमा स्तोत्रीया भवति योऽयमतिदेशतः प्राप्तः सवनीयः पशुः स वैश्वदेवः विश्वेभ्यो देवेभ्यः कार्य्यः योऽयमनूबन्ध्या वशा चोदकतः प्राप्ता सा बार्हस्पत्या बृहस्पतिदेवत्या कार्य्या ॥ २ ॥

अथ चोदकप्राप्तं किञ्चिन्निषेधयति ।

न यूपं मिन्वन्ति नोत्तरवेदिन्निवपन्ति॥ ३ ॥

न यूपम्मिन्वन्ति प्रक्षिपन्ति न खनेयुर्नोद्धर्त्तव्यो यूप इत्यर्थः तथा उत्तरवेदिमपि न निवपन्ति सापि चात्वालपांशुभिर्वेदिका-रूपेण न कार्य्येत्यर्थः ॥ ३ ॥

कथं तर्हि यूपाभावे पशुनियोजनमित्यत आह ।

परिधौ पशुन्नियुञ्जन्ति ॥ ४ ॥

पशुनियोजनक्षमं स्थूलं यज्ञीयकाष्ठं परिधित्वेन कृत्वा तस्मि-न्नञ्जनादिसंस्कृते पशुर्नियोक्तव्य इत्यर्थः ॥ ४ ॥

अथ दक्षिणापरिमाणं विधत्ते ।

पञ्चाशद्दक्षिणा ॥ ५ ॥

पञ्चाशत्सङ्ख्याका गावोऽस्मिन्नहनि दक्षिणात्वेन देया इत्यर्थः ॥ ५ ॥

अथ यजमानेनानुष्ठेयं व्रतं दर्शयति ।

अहतं वसानोऽवभृथादुदैति चतुरोमासो न मांऽ-समश्नाति न स्त्रियमुपैति ॥ ६ ॥

अहतमप्रहतं नूतनं वासोवसान आच्छादनमवभृथात् अव-भृथस्नानानन्तरं जलमध्यादुदैति उद्गच्छति तदनन्तरं चतुरो-मासो न मांसं चतुष्टयमासपर्य्यन्तं मांसाशनन्न कार्य्यं तथा स्त्रीसङ्गतिश्च वर्जनीया ॥ ६ ॥

अथ द्वितीयस्य वरुणप्रघासाख्यस्य पर्व्वणः स्थाने कर्त्तव्यं सोमयागमाह ।

ततश्चतुर्षु मासेषु वरुणप्रघासानां लोके द्विदिवः॥७

ततो वैश्वदेवस्थानिकात् त्रिवृदग्निष्टोमादनन्तरं मासचतुष्टये सम्पूर्णे वरुणप्रघासानां स्थाने द्विदिवः द्वयोर्दिवसयोरह्नोः समाहारः द्विरात्रः सोमयागोऽनुष्ठेय इत्यर्थः ॥ ७ ॥

तत्र प्रथमेऽहनि प्रतिपद्विशेषं सवनीयपशुदेवताञ्च दर्शयति ।

वारुणी प्रतिपन्मारुतः पशुः ॥ ८ ॥

वारुणी वरुणदेवत्या इमम्मे वरुणेत्येषा बहिष्पवमानस्य प्रथमा भवति योऽयञ्चोदकप्राप्तः सवनीयः पशुः स मारुतो मरुद्देवत्यः कार्य्यः ॥ ८ ॥

अथ द्वितीयेऽहनि प्रतिपत्पशुदेवते दर्शयति ।

कवती प्रतिपद्वारुणः पशुः ॥ ९ ॥

कया त्वन्न ऊत्येति कशब्दवती अन्यत् पूर्व्ववद्योज्यं ॥ ९ ॥

पर्व्वं हि वैश्वदेवस्थानिके त्रिवृदग्निष्टोमे अनूबन्ध्यस्य पशोर्दैवतान्तरं यूपराहित्यं उत्तरवेदिनिवपनराहित्यञ्च दृष्टं तद्वदत्रापि स्यादित्यादिशङ्कां निरसितुमाह ।

मैत्रावरुण्यनूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिं वपन्ति यूपे पशून् नियुञ्जन्ति ॥ १० ॥

अनूबन्ध्या यथा प्रकृतिवदेव मैत्रावरुणदेवत्या कार्य्या तथा प्रकृतिवदेव यूपकारणमुत्तरवेदिनिवपनं कार्य्यं अतो यूपसद्भावात् यूपे एव द्वयोरङ्गोः सवनीयपश्वू नियोक्तव्यौ न पूर्ववत् परिधौ ॥ १० ॥

अथ दक्षिणासंख्यां प्रागुक्तानि व्रतानि च एतदनुष्ठानानन्तरमपि कार्य्याणीति दर्शयति ।

शतं दक्षिणा अहतं वसानोऽवभृथादुदैति चतुरोमासो न माꣳसमश्नाति न स्त्रियमुपैति ॥ ११ ॥

शतसंख्यागावो दक्षिणाः प्रत्यक्षं पञ्चाशत् पञ्चाशदित्यर्थः अन्यत् पूर्ववद्योज्यं ॥ ११ ॥

अथ साकमेधाख्यस्य तृतीयस्य पर्व्वणः स्थानेऽनुष्ठेयं सोमयागमाह ।

ततश्चतुर्षु मासेषु साकमेधानां लोके त्रिरात्रः ॥१२॥

ततो वरुणप्रघासस्थाने द्विरात्रः अनन्तरं चतुर्षु मासेषु संपूर्णेषु अनुष्ठेयसाकमेधानां स्थाने त्रिरात्रः सोमयागः कार्य्यः ॥ १२ ॥

अथ तेषु त्रिष्वहःसु प्रतिपत्पशुदेवतादिकं दर्शयति ।

अनीकवती प्रतिपदाग्नेयः पशुर्म्मारुती प्रतिपदैन्द्राग्नः पशुर्वैश्वकर्म्मणी प्रतिपदेकादशिनोपशवः

सौर्य्यानूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिं वपन्ति यूपे पशून् नियुञ्जन्ति पञ्चाशच्छतं दक्षिणा ॥ १३ ॥

अनीकवती वायोरनीके अस्थिरन्निति अनीकशब्दप्रयुक्ता उपत्वा जामयोगिर इत्येषा त्रिरात्रस्य प्रथमेऽहनि बहिष्पवमानस्य प्रतिपत् प्रथमा स्तोत्रीया भवति सवनीयः पशुः प्रकृतिवदाग्नेयोऽग्निदेवत्यः कार्य्यः द्वितीयेऽहनि तु इन्द्रायेन्दोमरुत्वत इति मरुच्छब्दयुक्ता प्रतिपद्भवति तत्र सवनीयः पशुः ऐन्द्राग्नः इन्द्राग्निदेवताकः कार्य्यः तृतीयेऽहनि विश्वकर्मन् हविषा वावृधान इत्येषा वैश्वकर्मणी विश्वकर्मदेवत्या बहिष्पवमानस्य प्रतिपत् सवनीयपशोः स्थाने एकादशिनीपशवः कार्य्याः ते चाग्नेयः कृष्णग्रीवः सारस्वती मेषीत्यादिना तैत्तिरीयके समाम्नाताः अनूबन्ध्या वशा सौरी सूर्य्यदेवत्याः कार्य्याः अस्मिन् त्रिरात्रे पूर्ववद् यूपकरणं उत्तरवेदिनिवपनं कार्य्यं तथा यूपे एव प्रागनुक्रान्ताः पशवो नियोक्तव्याः अस्य च त्रिरात्रस्य पञ्चाशदधिकं शतङ्गावो दक्षिणा प्रत्यहं पञ्चाशत् पञ्चाशत् दक्षिणा इत्यर्थः ॥ १३ ॥

अथ पूर्ववद्यजमानस्य व्रतानि दर्शयति ।

अहतं वसानोऽवभृथादुदैति चतुरो मासो न मांसमश्नाति न स्त्रियमुपैति ॥ १४ ॥

पूर्ववद्योज्यं ॥ १४ ॥

अथ शुनासीरीयाख्यस्य चतुर्थपर्वणः स्थानेऽनुष्ठेयं सोमयागमाह।

ततश्चतुर्षु मासेषु शुनासीर्य्यस्य लोके ज्योतिष्टोमोऽग्निष्टोमः॥ १५॥

ततः साकमेधस्थानीयत्रिरात्रानुष्ठानानन्तरं चतुर्षु मासेषु सम्पूर्णेषु सुनासीरीयस्य पर्वणः स्थाने ज्योतिष्टोमोऽग्निष्टोमः सोमयागः कार्य्यः त्रिवृत्पञ्चदशसप्तदशैकविंशस्तोमकोऽग्निष्टोमसंस्थः प्रकृताग्निष्टोमसदृशोऽन्यः सोमयागः कार्य्य इत्यर्थः॥१५॥

अत्र पूर्ववत् प्रतिपत्पशुदेवतादिकं दर्शयति।

उपवती प्रतिपद्वायव्यः पशुराश्विन्यनूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिं वपन्ति यूपे पशून् नियुञ्जन्ति द्वादशꣳ शतं दक्षिणाः॥ १६॥

उपास्मै गायतानर इत्येषा उपवती उपशब्दयुक्ता प्रतिपद्भवति वायव्यो वायुदेवत्यः सवनीयः पशुः अश्विदेवत्या अनूबन्ध्यापशोर्द्वादशाधिकं शतङ्गावो दक्षिणाः शिष्टं पूर्व्ववत्॥ १६॥

अथैतेन चातुर्म्मास्येनेष्टवतः फलमाह।

अग्निः संवत्सरः सूर्य्यः परिवत्सरश्चन्द्रमा इदावत्सरो वायुरनुवत्सरोऽग्निꣳ संवत्सरं वैश्वदेवेनाप्नोति

सूर्य्यं परिवत्सरं वरुणप्रघासैश्चन्द्रमसमिदावत्सरꣳ साकमेधैर्वायुमनुवत्सरꣳ शुनासीर्य्येण ॥ १७ ॥

अयमर्थः प्रभवविभवइत्यारभ्य पञ्चशः पञ्चशो विभक्ता ये वत्सरा स्तेषां क्रमेण संवत्सरपरिवत्सरेदावत्सरानुवत्सरोदावत्सर-शब्दा वाचकाः, तथा चोक्तं चान्द्रायणैः प्रभवादीनां पञ्चके युगे संपरोदान्विदेत्येतच्छब्दपूर्वास्तु वत्सरा इति तत्र यः संवत्सरः प्रथमः सोऽग्निः अग्न्यात्मकः परिवत्सराख्यो द्वितीयः सूर्य्यात्मक इदावत्सरस्तृतीयश्चन्द्रात्मकः अनुवत्सराख्यश्चतुर्थो वाय्वात्मकः तथा चाग्न्यात्मकं संवत्सरं वैश्वदेवेन वैश्वदेवस्थाने सोमयागेनाप्नोति सूर्य्यात्मकं परिवत्सरं वरुणप्रघासैः वरुणप्रघासस्थानीयेन द्विरात्रेणाप्नोति चन्द्रात्मकमिदावत्सरं शुनासीर्य्येण तत्स्थानेऽनुष्ठेयेन सोमयागेनाप्नोति ॥ १७ ॥

अथ लोकत्रयप्राप्तिफलतया स्तौति।

हविर्य्यज्ञैर्वै देवा इमं लोकमभ्यजयन्नन्तरिक्षं पशुमद्भिः सामैरमुमिमानेवैतेन लोकानाप्नोत्येषु लोकेषु प्रतितिष्ठति य एवं वेद ॥ १८ ॥

यस्मात्त्रिविधाः चरुपुरोडाशादिलक्षणेनौषधेन हविषा साध्याः पशुसाध्याः सोमसाध्याश्चेति तत्र हविर्य्यज्ञैः केवलश्चरुपुरोडाशादिसाध्यैर्यज्ञैः पुरा देवा इमं भूलोकमभ्यजयन् अन्तरीक्षलोकं पशुमद्भिः पशुसाध्यैर्यागैः तथा सोमैः सोम-

यागैः अमुं स्वर्गलोकमभ्यजयन् एवञ्च उक्तत्रिविधयज्ञसङ्घात्मकत्वात् उक्तानाञ्चातुर्म्मास्यानान्तैरिमानेव पृथिव्यादिकान् त्रीन् लोकानाप्नोति एषु लोकेषु प्रतिष्ठितो भवति य एवं ब्राह्मणार्थं वेद जानाति ज्ञात्वाचानुतिष्ठतीत्यर्थः ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

त्रयोदशः खण्डः।

अथ चतुर्द्दशः खण्डः।

अथैषां चातुर्म्मास्यानामतिशयफलसाधनत्वं वक्तुमग्निहोत्रादिकर्म्मणां सातिशयफलत्वमाह।

यदाग्निहोत्रञ्जुहोत्यथ दशगृहमेधिन आप्नोत्येकया रात्र्या, यदा दशसंवत्सरानग्निहोत्रञ्जुहोत्यथ दर्शपूर्णमासयाजिनमाप्नोति, यदा दशसंवत्सरान् दर्शपूर्णमासाभ्यां यजतेऽथाग्निष्टोमयाजिनमाप्नोति ॥१॥

अथ खण्डसमाप्तेः पाठोऽज्ञातव्यः, यदा यस्मिन् काले अग्निहोत्रं जुहोति अग्निहोत्रहोमङ्करोति अथानन्तरं दशगृहमेधिनः गार्हस्थ्यकर्म्मानुष्ठायिनो ये ब्राह्मणास्तैर्दशसंख्याकैर्य्यत् सुकृतमुपार्ज्यते तदेकया रात्र्या एकस्मिन्दिनेऽनुष्ठितेनाग्निहोत्रेण प्राप्नोति लभते यदा दशसंवत्सरपर्य्यन्तं अग्निहोत्रं जुहोति अथानन्तरं दर्शपूर्णमासयाजिनं सकृद्दर्शपूर्णमा-

साभ्यामिष्टवतो यत् फलन्तत् प्राप्नोति यदा दशसंवत्सरपर्य्यन्तन्दर्शपूर्णमासाभ्यां यजते अथान्तरं अग्निष्टोमयाजिनं अग्निष्टोमेन सोमयागेनेष्टवतो यत् फलं तत् प्राप्नोति ॥ १ ॥

यदा दशभिरग्निष्टोमैर्य्यजतेऽथ सहस्रयाजिनमाप्नोति यदा दशभिः सहस्रैर्य्यजतेऽथायुतयाजिनमाप्नोति यदा दशभिरयुतैर्य्यजतेऽथ प्रयुतयाजिनमाप्नोति यदा दशभिः प्रयुतैर्य्यजतेऽथ नियुतयाजिनमाप्नोति यदा दशभिर्न्नियुतैर्य्यजतेऽथार्बुदयाजिनमाप्नोति यदा दशभिरर्बुदैर्य्यजतेऽथ न्यर्बुदयाजिनमाप्नोति यदा दशभिर्न्यर्बुदैर्य्यजतेऽथ निखर्व्वकयाजिनमाप्नोति यदा दशभिर्न्निखर्व्वकैर्य्यजतेऽथ बद्वयाजिनमाप्नोति यदा दशभिर्बद्वैर्य्यजतेऽथाक्षितयाजिनमाप्नोति यदा दशभिरक्षितैर्य्यजतेऽथ गौर्भवति यदा गौर्भवत्यथाग्निर्भवति यदाग्निर्भवत्यऽथ संवत्सरस्य गृहपतिमाप्नोति ॥ २ ॥

यदा खलु दशसंख्यैरग्निष्टोमैर्यजते अथानन्तरं सहस्रयाजिनं सहस्रदक्षिनक्रतुनेष्टवन्तं यजमानमाप्नोति यदा खलु दशसंख्याकैः सहस्रदक्षिणैर्य्यजते सहस्रः कथितः अयुतः कथितः अथानन्तरं अयुतयाजिनं अयुत दक्षिणेन पौण्डरी-

कादिनेष्टवन्तं यजमानमाप्नोति यदा पुनर्द्दशभिर्द्दशसंख्याकैरयुतदक्षिणैर्य्यजते अथानन्तरं प्रयुतयाजिनमाप्नोति दशगुणितमयुतं प्रयुतं एवं नियुतार्बुदादिषु उत्तरोत्तरं दशगुणिता सख्या द्रष्टव्या यदा दशभिः प्रयुतदक्षिणैः क्रतुभिर्य्यजते अथनियुतदक्षिणेनेष्टवन्तं प्राप्नोति यदा खलु दशसंख्याकैर्न्नियुतदक्षिणैर्यजते अथानन्तरं अर्बुददक्षिणेनेष्टवतः फलमाप्नोति यदा खलु दश संख्याकैरर्बुददक्षिणैर्य्यजतेऽथानन्तरं न्यर्बुदयाजिनं न्यर्बुददक्षिणेनेष्टवन्तमाप्नोति यदा पुनर्द्दशसंख्याकैर्न्यर्बुददक्षिणैर्य्यजते अथ निखर्व्वकयाजिनं निखर्व्वकदक्षिणेनेष्टवन्तं यजमानमाप्नोति यदा खलु दशभिर्न्निखर्व्वकसंख्यदक्षिणैर्य्यजते अथानन्तरं बद्वयाजिनं बद्वसंख्यदक्षिणेन यागेनेष्टवन्तमाप्नोति यदा दशभिर्बद्वसंख्याकदक्षिणैर्य्यजेते अथानन्तरं अक्षितयाजिनं स न क्षीणः सर्व्वेभ्योऽधिका संख्या यस्याः परं संख्यान्तरन्नास्ति अक्षितशब्देन सा संख्योच्यते अक्षितदक्षिणेन यज्ञेनेष्टवन्तं यजमानमाप्नोति तादृशैर्द्दशसंख्याकैरक्षितदक्षिणैर्य्यजते अथानन्तरं स यजमानो गौः आदित्यो भवति गमयति रसानागच्छत्यन्तरिक्ष इति वा गोशब्दव्युत्पत्तिः यदा चायङ्गौर्भवति अथानन्तरं अग्न्यात्मको भवति यदा चाग्निर्भवति अथानन्तरं संवत्सरसत्रस्य गृहपतिः गृहपतित्वमाप्नोति अग्निना वै तेन गृहपतिरेव भूयादिति हि ब्राह्मणान्तरं ॥ २ ॥

एवमग्निहोत्रादिकर्म्मणामुत्तरोत्तरं सातिशयफलसाधनत्वमुक्तं अथ प्रकृतानां वैश्वदेवादीनामक्षयफलसाधनत्वमाह ।

यदा संवत्सरस्य गृहपतिर्भवत्यथ वैश्वदेवस्य मात्रामाप्नोत्यतो वा इतरे परस्तरां परस्तरामेव सर्व्वे: ॥ ३ ॥

यदा यस्मिन् काले उक्तप्रकारेण संवत्सरसत्त्रस्य गृहपतिर्भवति अथानन्तरं वैश्वदेवस्य चातुर्म्मास्येषु प्रथमपर्व्वणोमात्रां एकदेशसदृशमाप्नोति संवत्सरसत्त्रमपि वैश्वदेवफलस्य एकादशसमं भवतीत्यर्थः तस्मान्निरतिशयवैश्वदेवस्य फलं इतरे सर्व्वे वरुणप्रघासादय अतो अस्माद्वैश्वदेवात्परस्तरां परस्तरामेव उत्तरोत्तरन्निरतिशयफलमित्यर्थः वैश्वदेवाद्वरुणप्रघासोऽधिकफलः ततोऽप्यधिकफलः साकमेधः ततोऽप्यधिकः शुनासीर्य्यः अमुमर्थं द्योतयितुं परस्तरां परस्तरामिति वीप्सा एवं चातुर्म्मास्यानामक्षय्यफलत्वमुक्तं तथा च श्रुत्यन्तरं अक्षय्यं वै चातुर्म्मास्ययाजिनः सुकृतं भवतीति ॥ ३ ॥

अथैतद्वेदितुः फलमाह ।

एतानेव लोकानाप्नोत्येतान् लोकाञ्जयति य एवं वेद ॥ ४ ॥

एवमुक्तं ब्राह्मणार्थं यो वेद जानाति स एतान् अग्निहोत्रादिफलत्वेनोक्तानिमान् लोकान् प्राप्नोति प्राप्य च तान् सर्वान् लोकान् जयति स्वायत्तान् करोति ।

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ४ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य चतुर्द्दशः खण्डः।

सप्तदशाध्यायः समाप्तिमगमत् ।

अष्टादशोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

अस्मिन्नष्टादशेऽध्याये उपहव्यस्ततः परं। ऋतपेये शुनाशीर्य्यवैश्यस्तोमोऽथ तीव्रसुत्। वाजपेयोराजसूय इति सप्त प्रकीर्त्तिताः। तत्र आदौ उपहव्यानामेकाहमाह।

सप्तदशोऽग्निष्टोमः॥ १॥

अयमेकाहः सर्वोऽपि सप्तदशस्तोमकोऽग्निष्टोमसंस्थः॥ १॥

अस्याह्नोऽनिरुक्तधर्मकत्वं प्रतिपादयितुमाख्यायिकामाह।

देवाश्च वा असुराश्च प्रजापतेर्द्वयाः पुत्रा आसꣳस्तेऽसुरा भूयाꣳसो बलीयाꣳस आसन् कनीयाꣳसो देवास्ते देवाः प्रजापतिमुपाधावन् स एतमुपहव्यमपश्यत्॥ २॥

पूर्वं प्रजापतेः पुत्राणां देवासुराणाम्मध्ये देवा बह्वन् प्रचुरतरान् जघन्यानसुनान्मत्वा स्वप्राबल्याय प्रजापतिमुपाधावन् स च विचिन्त्योपायं एतमुपहव्य,मपश्यत्॥ २॥

इदानीन्तमुपहव्यमनिरुक्तं प्रायुञ्जत इत्याह ।

स ऐक्षत यन्निरुक्तमाहरिष्याम्यसुरा मे यज्ञꣳ हनिष्यन्तीति सोऽनिरुक्तमाहरत् ॥ ३ ॥

आहरत् कार्त्स्न्येन प्रयोगः अनिरुक्तत्वं सूत्रवचनेनैव स्पष्टी क्रियते उपहव्ये देवतानामधेयानि परोक्षं ब्रूयुः स्वस्थाना-स्विति उवहव्यग्रहणमनिरुक्तोपलक्षणं अनिरुक्तेषु क्रतुषु स्वस्था-नस्थासु देवतासु तन्नामधेयं परोक्षं ब्रूयुः पर्य्यायेणेत्यर्थः परोक्ष-मेवानिरुक्तत्वमिति प्रत्यक्षमस्व्स्थानास्विति स्वस्थानात् स्थाना-न्तरङ्गतासु प्रत्यक्षमेव वचनं तत्र तावत् सर्वे पवमानाः सोमस्य स्वस्थानं तेषां सोमदेवत्वात् सर्वाणि पृष्ठानीन्द्रस्य स्वस्थानम-ग्नेरग्निष्टोमस्तोत्रमित्यादि द्रष्टव्यमिति देवशब्दं सर्वत्र वर्ज-येयुरिति सर्वेष्वपि स्तोत्रेषु देवशब्दं वर्जयेयुः देवं सोम इत्यादौ होता देवोमर्त्त्यमित्यस्येत्येते होता यज्ञे मर्त्त्यीयज्ञस्येति ब्रूयु-रिति प्रथमद्वितीययोराज्ययोर्देवमित्रशब्दस्थाने यज्ञमित्र-शब्दं ब्रूयुरित्यर्थः तत्र केनचित् पर्य्यायेण निर्द्देशे प्राप्ते नियम-माह इन्दुरिति सोममिति सुषाव सोममद्रिभिरित्यादौ सुषा-वेन्दुमिति ब्रूयुः अत्राग्नेरिन्द्रस्य च सोऽनिरुक्तमाहरदिति ब्राह्मणानुरोधेन प्रत्यक्षं नामाहरेत्ता एव स्तोत्रीयाः कल्पका-रेण क्लृप्ताः तेन तत्र प्रत्यक्षनामधेयाभावादेव तत्पर्य्यायेनोक्ताः उत्तमे तु स्तोत्रे यज्ञायज्ञा वा अग्नय इति प्रत्यक्षनामधेयं ब्राह्मणेनानुज्ञातं स उत्तमे स्तोत्रे देवानभिपर्य्यावर्त्ततेत्या-

दिना तेन न किञ्चिद्व्यसनमस्ति अतएवाग्निशब्दपर्य्याय: सूत्रकारेणोक्त: देवशब्दोऽपि तत्र प्रयोज्य एवेति ॥ ३ ॥

अथोपहव्यप्रयोगान्तरेण प्रजापतेर्द्दैवताभिमुख्यं दर्शयति ।

स उत्तमे स्तोत्रे देवो वो द्रविणोदा इति देवानभिपर्य्यावर्त्तत ॥ ४ ॥

उत्तमे स्तोत्रे अग्निष्टोमसामनी इत्यर्थ: ॥ ४ ॥

अस्तु पर्य्यावृत्ति: किं तत: स्यादित्यत आह ।

ततो देवा अभवन् परासुरा: ॥ ५ ॥

देवा: प्रबला आसन् असुरा: पराभवन्नित्यर्थ: ॥ ५ ॥

अथोक्तार्थवेदनं प्रशंसति ।

भवत्यात्मना परास्य भ्रातृव्यो भवति य एवं वेद ॥ ६ ॥

उत्तमस्तोत्राश्रयं पूर्व्वोदाहृतं ॥ ६ ॥

देवो व इति तृचमपोद्य प्राकृतं यज्ञायज्ञीयमेव कार्य्यमिति ब्रह्मवादिनां वचनमाह ।

अथो खल्वाहुर्य्यज्ञायज्ञावो अग्नय इत्येव कार्य्यं ॥ ७ ॥

अथोशब्द: पक्षान्तरद्योतनार्थ: आहु: ब्रूयु: ब्रह्मवादिन: ॥ ७ ॥

तत्रोपपत्तिरुच्यते।

अग्निर्वै सर्वा देवतास्तेन न देवतानां काञ्चनान्तरेति ॥ ८ ॥

ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुः अग्निः सर्व्वा देवता इति हि श्रुतिः अथ तद्देवताकमन्त्रकरणेन देवतानाम्मध्ये न कामपि देवतामन्तरितवान् भवति ॥ ८ ॥

अथोपहव्यशब्दस्य प्रवृत्तिनिमित्तं दर्शयितुमाह।

इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत् स प्रजापतिमुपाधावत्तस्मा एतमुपहव्यं प्रायच्छत्तं विश्वे देवा उपाह्वयन्त यदुपाह्वयन्त तस्मादुपहव्यः ॥ ९ ॥

पूर्व्वमिन्द्रः यतीन् ज्योतिष्टोमाद्यकृत्वा प्रकारान्तरेण वर्त्तमानान् ब्राह्मणान् सालावृकेयेभ्य आरण्यश्वभ्यः प्रायच्छत् तं ब्राह्मणहन्तारं इन्द्रं अश्लीला निन्दिता वाक् अभ्यवदत् सर्वे एनं निनिन्दुरित्यर्थः स इन्द्रस्तत् प्रमार्ष्टुं प्रजापतिमुपागच्छत्तस्मै एतमुपहव्यं एकाहं प्रायच्छत् स इन्द्रस्तमन्वतिष्ठदित्यर्थः तेन विश्वे देवा एनमिन्द्रमुपाह्वयन्त एहि निर्दिष्टस्त्वमसीत्यब्रुवन् यस्मादनेनोपाह्वयन्त अत उपाह्वानसाधनत्वादस्योपहव्यमिति नाम ॥ ९ ॥

अथेन्द्रस्याभिशंसनपरिहारप्रसङ्गेनात्राधिकारिणमाह।

अभिशस्यमानं याजयेत् ॥ १० ॥

अभिशस्यमानं अन्यैर्द्दोषारोपणेन निन्द्यमानं ॥ १० ॥

अभिशस्तायायमुपहव्य उक्त इत्याह ।

देवता वा एतं परिहृञ्जन्ति यमनृतमभिशंसन्ति देवता एवास्यान्नमादयन्ति ॥ ११ ॥

यं यजमानं अनृतमभिशंसन्ति जनाः एतं देवताः परिहृञ्जन्ति वर्ज्जयन्ति न तस्य हविराददत इत्यर्थः अत एतदनुष्ठानेन देवता एवास्य न्नमादयन्ति याजका एनं यजमानं देवताहविष्कं कारयन्तीत्यर्थः ॥ ११ ॥

न केवलं देवार्ह एवासौ किन्तु मनुष्यैरपि संव्यवहार्य्य इत्यत आह ।

तस्य पूतस्य स्वदितस्य मनुष्या अन्नमदन्ति ॥ १२॥

स्वदितस्य स्वशब्दितस्य अनिन्दित इति सर्व्वैर्व्यवहृतस्य अथवा भाव्यपेक्षायां निर्द्देशः स्वर्गप्राप्तियोग्यस्येत्यर्थः ॥ १२ ॥

अथात्राधिकार्य्यन्तरमाह ।

ग्रामकामो यजेत ॥ १३ ॥

स्पष्टोऽर्थः ॥ १३ ॥

उक्तकामनावतोऽयमुक्त इत्याह ।

मारुतो भवति मरुतो वै देवानां विशो विशमे-

वास्मा अनुनियुनक्त्यानपक्रामुकास्मादिड्भवति ॥ १४

यतोऽत्र मारुती भवति अतोऽयमुचित इत्यर्थः ग्रस्यमानस्य वानर इति मारुती, मरुतां ग्रामस्य च कः सम्बन्ध इति तत् समर्थनं मरुतो वा इत्यादि ॥ १४ ॥

अथाधिकार्य्यन्तरमाह ।

पशुकामो यजेत पौषी भवति ॥ १५ ॥

स्पष्टोऽर्थः ॥ १५ ॥

उत नो गोविदश्वविदिति पूषाः पशोश्च कः सम्बन्ध इति तदाह ।

पशवो वै पूषा पशूनेवावरुन्धे ॥ १६ ॥

पूषा पशून् प्रजनयतीति श्रुत्यन्तरं ॥ १६ ॥

अथान्त्यां वैश्वदेवीं प्रशंसति ।

वैश्वदेवी भवति विश्वे ह्येनन्देवा उपाह्वयन्त ॥ १७ ॥

यत एनमदुष्टमिन्द्रं विश्वे देवा उपाह्वयन्त अतस्तद्देवत्या युक्ता उपनः सूनवोगिर इत्येषा वैश्वदेवी ॥ १७ ॥

अथैतस्य होतुः पृष्ठे बृहत्सामतामाह ।

बृहत्सामा भवति ॥ १८ ॥

एकाहापेक्षया बृहत्सामेति पुंलिङ्गता ॥ १८ ॥

कथमेवमिति तत्राह ।

प्रजापतिर्ह्येनमिन्द्राय प्रायच्छत् ॥ १९ ॥

स्पष्टोऽर्थः ॥ १९ ॥

अथात्र दक्षिणायां विशेषमाह।

अश्वः श्यावो दक्षिणा ॥ २० ॥

श्यावाश्वो दक्षिणा ॥ २० ॥

कथमनिरुक्तस्याश्वस्यान्वय इति तत्राह।

स ह्यनिरुक्तः ॥ २१ ॥

सोऽश्वः प्रजापतिसम्बन्धित्वात्तस्य चानिरुक्तत्वादश्वोऽप्यनिरुक्तः ॥ २१ ॥

कस्मायमश्वस्तमाह।

स ब्रह्मणे देय. ॥ २२ ॥

स्पष्टोऽर्थः ॥ २२ ॥

सत्स्वन्येषु ऋत्विक्षु कथन्तस्येति तत्राह।

ब्रह्मा वा ऋत्विजामनिरुक्तः स्वेनैवैन तद्रूपेण समर्द्धयति ॥ २३ ॥

अध्वर्य्वादिवत् प्रतिनियतस्याव्योक्तव्यापाराभावादनिरुक्तत्वमस्य तत्तया सति ब्रह्मणेऽश्वदाने सत्येनमनिरुक्तत्वेकाहं स्वेन वानिरुक्तेन रूपेण समर्द्धयति ॥ २३ ॥

अथोक्तार्थं प्रशंसति।

यावद्ध वै कुमारे सद्योजात एनो नास्मिंस्तावच्च नैनो भवति य एवं वेद ॥ २४ ॥

सद्यस्तदानीमेव जाते उत्पन्नेऽस्मिन् कुमारे कारणाभावादेनः पापन्नास्ति तावत्तस्मिन्नेव काले एनो न भवति य उक्तमर्थमधिगच्छति तस्य उक्तार्थज्ञानानन्तरमेव निर्द्दोषो भवतीत्यर्थः अत एवस्मिन्द्रो हृषासुत एते अस्यग्रमिन्द्व उत नोगोषणिन्धियं शशमानस्य वानर इत्यादिकः कल्पो द्रष्टव्यः अत्र दक्षिणाविषये सूत्रकारैः आदिष्टा दक्षिणा ब्राह्मणेनेतरेभ्यस्तु किञ्चिद्दद्यादिति अश्वः श्यावो दक्षिणा तं ब्रह्मणे दद्यादित्यादिष्टा तत्र ब्रह्मव्यतिरिक्तेभ्योऽप्यानत्यर्थं किञ्चिद्दद्यादित्यर्थः अत्र श्यावदक्षिणाविचारो बाधलक्षणस्य तृतीयपादे चिन्तितः श्यावाश्वो ब्रह्मभागस्य बाधको निखिलस्य वा आद्यः प्रकाशवत् मैवन्धेनुः वत्सोऽपि नान्यगः अस्त्युपहव्यनामक एकाहविशेषस्तत्र श्रूयते अश्वः श्यावोरुक्मललाटो दक्षिणा स ब्रह्मणे देय इति प्रकाशन्यायेन ब्रह्मभागस्यैव बाधक इति पूर्व्वः पक्षः दक्षिणाशब्दसंयोगाद्धेनुन्यायेन कृत्स्नस्य बाधक उपरितमेन तु स ब्रह्मणे देय इति वाक्यान्तरेण तस्याश्वस्य ब्रह्मव्यतिरिक्तपुरुषान्तरसम्बन्धो बाध्यते तथा सति पुरुषान्तरस्यातिदिष्टोपदिष्टदक्षिणाद्वयबाधाल्लौकिकदानादिना केनचिदुपायेनानतिः सिध्यति ॥ २४ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथायमेकाहमाह ।

सप्तदशोऽग्निष्टोमः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अत्र दीक्षोपसदोर्विशेषमाह ।

तस्य द्वादश दीक्षोपसदः ॥ २ ॥

अथास्य सूत्रकार एवाह क्रतपेये तस्य द्वादश दीक्षोपसद इति अयमर्थः नव दीक्ष तिस्रस्योपसद इत्यभिप्रेत्य द्वादशेऽतिवादः कुतस्तिस्र एव साह्नस्योपसद इति प्रकृतौ वचनादिहापि चोदकतः प्राप्तत्वात् अथ वा षट् दीक्षाः षडुपसदः सम-विभागस्य श्रवणादिति भरद्वाजस्तु प्रत्येकं द्वादशेति व्याख्यात-वान् ॥ २ ॥

अथात्राधिकारिणमाह ।

स्वर्गकामो यजेत ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

कथं द्वादशदीक्षादिमत्यस्मिन् स्वर्गार्थिनः सम्बन्ध इति तत्राह ।

द्वादशमासाः संवत्सरः संवत्सरः स्वर्गो लोकः स्वर्गमेवैतेन लोकमाप्नोति ॥ ४ ॥

संवत्सरस्यादित्यात्मकत्वादादित्यस्य च स्वर्गस्थानत्वात् संवत्सरः स्वर्गोलोक इत्युच्यते ॥ ४ ॥

अस्य दीक्षादिवसे व्रतविशेषमाह ।

घृतव्रतो भवति ॥ ५ ॥

अत्र सूत्रकारः घृतव्रतो भवतीति यथोत्साहन्दीक्षा प्राश्नीयादिति अयमर्थः घृतव्रतो भवतीति ब्राह्मणं प्रकृतस्य पयोव्रतस्य प्रत्याम्नायोऽयन्तत्र दीक्षादिवसेषु यथाबलं घृतप्राशननियम इति ॥ ५ ॥

अथोक्तं घृतव्रतं प्रशंसति ।

देवव्रतं वै घृतन्देवव्रतेनैव देवता अप्येति ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथोपसद्दिवसे घृतप्राशने उत्तरोत्तराङ्गुलिपर्व्वणा कर्त्तव्यत्वं सस्तुतिकमाह ।

उत्तरेणोत्तरेण काण्डेनोपैत्युत्तर उत्तर एषां लोकानाञ्ज्यायान् स्वर्गस्य लोकस्य समष्ट्यै ॥ ७ ॥

एषां भूरादीनाम्मध्ये पूर्व्वापेक्षयोत्तरोत्तरतो ज्यायान प्रशस्यः अत्र सूत्रं उत्तरोत्तरेण काण्डेनोपैतीति पृथगुपसत्स्वङ्गुलिपर्व्वभिः प्रतिलोमैः प्राश्नीयादिति उत्तरेणोत्तरेण काण्डेनोपैतीति ब्राह्मणमुपसत्सु नियमविधायकं अङ्गुलेः उत्तमेन काण्डेन घृतमादाय प्रथमायामुपसदि तावन्मात्रं घृतं प्राश्नीयात्

ततो मध्यमेन ततः प्रथमेनेत्येवं प्रतिलोमैः पर्व्वभिः प्राश्नीयादित्यर्थः कुतः उत्तरोत्तर एषां लोकानाञ्ज्यायानिति वशेषात् प्रातिलोम्य एव पर्व्वणामुत्तरोत्तरभूयस्त्वादानुलोम्यवैपरीत्याच्चेति अत प्राशने अङ्गुलिपर्व्वविधानात् प्राकृतचमसानां निवृत्तिरिति, अथ मतान्तरमाह एकाङ्गुल्याः पृथक्पर्वभिः सर्वान् देशांश्चमसामिताः स्युस्तैरनुलोमैरिति शौच्चिवृक्षिःप्रतिलोमैः प्राश्नीयादिति शाण्डिल्य इति अयमर्थः प्राकृतचमसबाधो न कार्य्यः अबाधेनापि शास्त्रसम्भवात् कथं चमसस्यैव पृथक्परिमाणविधिरयं चमसप्रान्ताः सर्व्वत ऊर्द्ध्वप्रमाणेन पृथक्पृथगङ्गुलिकाण्डदघ्नाः स्युः तेनार्थाच्चमसत्रयं सम्पद्यते तत्र प्रथमाङ्गुलिकाण्डदघ्नचमसं घृतेन पूरयित्वा प्रथमोपसदि प्राश्नीयात् एवमुत्तरोत्तरकाण्डदघ्नौ चमसावुत्तरयोरुपसदोः कुतः उत्तरेणोत्तरेणेति वचनादानुलोम्यप्रतीतेरिति ॥ ७ ॥

अथास्य बृहत्साम सार्थवादं विधत्ते।

बृहत् सामा भवति बृहता वै देवाः स्वर्गं लोकमायन् स्वर्गमेवैतेन लोकमाप्नोति॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

ऋत्विजां सदःप्रसर्पणसमये विशेषमाह।

ऋतमुक्त्वा प्रसर्पन्त्यृतेनैवैनꣳ स्वर्गं लोकं गमयन्ति ॥ ९ ॥

एतत् प्रसर्पणवाक्यं शाखान्तरीयं ऋतं वदतो भक्षयन्तीति भक्षणवाक्यञ्च विषयीकृत्य ऋतवदनविषये सूत्रकार: ऋतमुक्त्वा प्रसर्पन्तीति प्रसृप्स्यन्त: सदो भक्षयिष्यन्तश्च देवसत्या निर्ब्रूयु-रियं भूमिरसावादित्य इतीति उदेता प्रातरादित्ये इति पीतवद् भक्षमन्त्रानूहेयुरित्यर्थ: अयमर्थ: सद:प्रसर्पणं सोमभक्षणञ्च करिष्यन्तो देवसत्या निर्ब्रूयुरियं भूमिरित्येकं सत्यमसावादित्य इत्यपरं उदेता उदेष्यतीत्यर्थ: वीर्यपेतानि देवताश्रितानि अन्यानि परमार्थभूतानीति भक्षणसमये ऋतवदने च धानञ्जय स्त्वन्यथा ब्रूते तथाच सूत्रं या देवतास्तमसैरिज्येरंस्तत्पीतवङ्क्ष मन्त्रान् ब्रूयुरिति शाण्डिल्यो विकारेण तु नाराशंसानामिति इन्द्रपीतस्येत्यन्तमुक्त्वा अग्निपीतस्य मित्रावरुणपीतस्येन्द्रियावत इत्यादिना या देवता इज्यन्ते ता एवोहेयुरित्यर्थ: ॥ ९ ॥

अथ ऋतपेयदक्षिणायां विशेषमाह ।

सोमचमसो दक्षिणा देवतयैव देवता अप्येति॥१०

सोमस्यापि देवतात्वात् इज्यमानदेवता तु फलत्वेन प्राप्तान् देवानप्येति प्राप्नोति ॥ १० ॥

अस्य चमसस्यौदुम्बरत्वं सार्थवादं विधत्ते ।

औदुम्बरो भवत्यूर्गुदुम्बर ऊर्ज्जमेवावरुन्धे ॥ ११ ॥

देवा ऊर्ज्जं व्यभजन्त तत उदुम्बर उदतिष्ठदिति श्रुते: औदुम्बरस्य ऊर्गूपत्वं सोमचमसो दक्षिणाविषये सूत्रकार: सोमचमसो दक्षिणेत्यभिषुत: स्यादिति क्रत्वर्थतयाभिषुतस्य सोम-

रसस्य पूर्णः सोमचमसः न तु लौकिकस्येत्यर्थः कुत इत्याह तस्मिन् हि चमसप्रमाणमिति शास्त्रीये सोमरसे झटिति चमस-प्रतीतिः स तु प्राकृतेभ्यो दशभ्योऽतिरिक्तः सम्पादनीय इत्यर्थः तम्माध्यन्दिने सवनमुखीयैः सहोन्नयेयुरिति सवनमुखीयानां दशचमसानामुन्नयनकाले तमप्युन्नयेयुरिति जुहुयुश्चास्य हुते देय इति हि ब्राह्मणमिति होमकाले तस्य चमसस्यैकदेशं जुहुयुः हुतोदेय इति शाखान्तरीयब्राह्मणादित्यर्थः तं दक्षि-णावेलायां पूर्व्वेणाहवनीयमनिर्हरन्तो वेदेर्दक्षिणेन सदोह-विर्द्धानानि हारयित्वा पूर्व्वया द्वारा सदः प्रविशेयुरिति वेदे-र्वहिरन्त इत्यर्थः ॥ ११ ॥

विहितश्चमसः कस्मै कीदृशाय देय इति बुभुत्सयामाह ।

सगोत्राय ब्रह्मणे देयः सोमपीथस्याविदोहाय॥१२

अविदोहाय अविनाशाय विपरीतफलप्रशमनत्वायेत्यर्थः अत्र दक्षिणाविषय एव सूत्रकारः संस्थितेऽहन्यृत्विग्भ्यः किञ्चि-द्दद्यादिति सोमचमस एव क्रतौ दक्षिणा तथाप्यृत्विगानामा-नत्यर्थं किञ्चिद्दद्यादित्यर्थः ॥ १२ ॥

अथ स्तोमे नियममाह ।

सर्वः सप्तदशो भवति ॥ १३ ॥

पवमानाज्यपृष्ठादिकाः सर्व्व इत्यर्थः ॥ १३ ॥

सप्तदशत्वं स्तौति ।

द्वादशमासाः पञ्चर्त्तवः स वै संवत्सरः संवत्सरः स्वर्गो लोकः स्वर्गमेवैतेन लोकमाप्नोति ॥ १४ ॥

एष सोमचमसो दक्षिणा ब्रह्मभागस्यैव बाधकः उत कृत्स्न-स्येति बाधाध्याये तृतीयपादे चिन्तितं किं सोमचमसो ब्रह्म-भागस्यैवाहोऽस्वुत कृत्स्नस्य पशूनां निन्दया सर्व्वप्रसक्तेर्ब्रह्मभागकृत् निन्द्येयं निषेधाय चमसः स्तूयते त्वसौ श्वावाश्ववत्सर्व्वोद्देयः पुरु-षान्तरबाधकः ऋतपेये स्तूयते सर्व्वस्य दक्षिणाद्रव्यस्यात्र पुनः प्रसञ्जनात् तथा हि ऋतं वै सोमोऽनृतं पशवो यः पशून् दद्या-त्सोऽनृतं कुर्य्यात् इति पशुरूपा दक्षिणा भागनिषेधाय निन्द्यन्ते तौ च निन्दानिषेधौ सर्व्वदेयप्रसक्तिं गमयतः तस्मान्न सर्व्वबाधक इति प्राप्ते ब्रूमः नात्र निषेधाय पशुनिन्दोच्यते किन्तु विधि-त्सितसोमचमसस्तुत्यर्थोऽयमर्थवादः तेन निन्दायाः सर्व्वप्रस-ञ्जकत्वन्नास्ति तस्मात् सर्व्वप्रसक्तिरूपाया अभ्यधिकाशङ्काया निराकृतत्वात् पूर्व्वाधिकरणेनात्र निर्णयो द्रष्टव्यः अथास्य कल्पः द्वितीयस्वरसाम्न आज्यबहिष्पवमानं बार्हदुक्थस्य लोक आष्टादंष्ट्रमौक्षस्य हाविष्मतं अश्वस्य सुज्ञानं उद्धरत्युक्थानि समानमितरच्चैकाहिकेनेति ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणेऽष्टादशाध्यायस्य

द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथान्यं सप्तदशस्तोमकमग्निष्टोमसंस्थमेकाहमाह ।

सप्तदशोऽग्निष्टोमः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

तत्र दीक्षणीयप्रायणीयातिथ्योपसदाद्यनुष्ठेयमुख्यपदार्थेषु द्वादशमानप्रभृत्युत्तरोत्तरद्वैगुण्यदक्षिणा माध्यन्दिनपवमाने होतुर्दाते रुक्मस्रग्रूपदक्षिणाश्चाह ।

तस्य दीक्षणीयायामिष्टौ द्वादशमानꣳ हिरण्यं ददाति चतुर्विꣳशतिमानं प्रायणीयायां द्वे चतुर्विꣳशतिमाने आतिथ्यायां चत्वारि चतुर्विꣳशतिमानानि प्रातः प्रथमायामुपसद्यष्टौ चतुर्विꣳशतिमानान्यपराह्णे प्रथमायामुपसदि षोडशचतुर्विꣳशतिमानानि प्रातर्मध्यमायामुपसदि द्वात्रिꣳशतं चतुर्विꣳशतिमानान्यपराह्णे मध्यमायामुपसदि चतुःषष्टिं चतुर्विꣳशतिमानानि प्रातरुत्तमायामुपसद्यष्टाविꣳशतिशतं चतुर्विꣳशतिमानान्यपराह्ण उत्तमायामुपसदि द्वे अष्टाविꣳशतिशतमाने अग्नीषोमीयस्य पशोर्वपायां चत्वार्यष्टाविꣳशतिशतमानानि प्रातःपशोर्वपायामष्टावष्टाविꣳशतिशतमानानि प्रातः

सवने सन्नेषु नाराशꣳसेषु षोडशाष्टाविꣳशतिशत-मानानि माध्यन्दिने सवनेऽनडुच्छतञ्च रुक्मो होतुः स्रगुद्गातुर्द्वाविꣳशतमष्टाविꣳशतिशतमानानि तृतीयसवने सन्नेषु नाराशꣳसेषु चतुःषष्टिमष्टाविꣳशतिशतमानान्युदयनीयायामिष्टावष्टाविꣳशतिशतमष्टाविꣳशतिशतमानानि वशाया वपायां ॥ २ ॥

वशा अनुबन्ध्या अत्रोपसदन्ते अष्टावष्टाविंशतिशतं चतुर्विंशतिमानानीत्युक्तं ब्राह्मणे तावत्पर्य्यन्तं चतुर्विंशतिमानमारभ्योत्तरोत्तरं द्वे चतुर्विंशतिमाने इत्यादिद्वैगुण्यनिर्देशः स्पष्टः तत ऊर्द्ध्वं अग्नीषोमीयप्रभृति द्वे अष्टाविंशतिशतमाने चत्वार्य्यष्टाविंशतिशतमानानीत्येवं द्विगुणाभ्यासः क्रतः तत्र मानशब्दश्चतुर्विंशतिमानं लक्षणयाह यथाभामेत्येकदेशोक्तावपि सत्यभामा गम्यते तद्वत् द्वे अष्टाविंशतिशतमाने इत्यादौ तत्संख्याविशिष्टानि चतुर्विंशतिमानान्येव देयानीत्यर्थः कुत एतत् पूर्व्वेषु स्थानेषु द्विगुणाभ्यासस्य प्रक्रान्तत्वात् यथाश्रुतमानमात्रग्रहणे कनीयस्त्वप्रसङ्गाच्च तेनाग्नीषोमीयप्रभृतिषु मानशब्दश्चतुर्विंशतिमानलक्षणार्थ इति सिद्धं अनडुच्छतस्य रुक्मेण सह समुच्चयः अधिकदानरूपायाः रुक्मस्रजार्थमाह सूत्रकारः रुक्मोहोतुरिति निष्कोनामालङ्कारस्तं दद्यात् स्रगुद्गातुरिति हिरण्मयी स्यादिति तत्र दीक्षणीयादौ द्वादश-

मानमित्यादिदक्षिणादानं दक्षिणायामेव कालोत्कर्षाद्वेद्यश्चै व न पृथगिति वेदितव्यं ॥ २ ॥

अथोक्तार्थज्ञानपूर्व्वकानुष्ठानवत: फलमाह ।

एष वा अनडुहो लोकमाप्नोति य एवं वेद ॥३॥

अत्र वेदनमुपलक्षणं एवं ज्ञात्वा योऽनुतिष्ठति स इत्यर्थ: अनडुह इति जात्यपेक्षयैकत्वं लोकशब्द: समूहवाची अनडुहां समूहं प्राप्नोति अनडुहो लोकप्राप्त्यर्थमादित्यलोकप्राप्त्यर्थमिति वा सङ्कल्प इत्यापस्तम्बस्मृतिव्याचक्षाणेन फलत्वेनानडुहोलोकस्य निर्द्दिष्टत्वात् केवलं वेदितु: फलश्रवणेऽपि तत्पूर्व्वकानुष्ठातुरेव फलत्वकल्पनं यद्वा श्रुतत्वात् ज्ञातुरेव तत्फलं भवेत् किमु वक्तव्यमनुष्ठातुरिति कैमुतिकेन सिध्यति ॥ ३ ॥

अथ फलान्तरमाह ।

एष वै ज्योतिष्मन्तं पुण्यं लोकञ्जयति य एवं विद्वानेतेन यजते ॥ ४ ॥

ज्योतिष्मन्तमादित्यलोकमित्यर्थ: अथास्य कल्प: एते असृग्रमिन्दव उक्ते शुष्मास ईरत इति पुरस्तात्पर्य्यासस्य तृचपञ्चर्चे स्वामु श्येतं समानमितरत्प्रथमेन साहस्रेणेति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ वैश्यस्तोमाख्यमग्निष्टोमसंस्थमेकाहमाह ।

सप्तदशोऽग्निष्टोमः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

तत्र सवनत्रयगतेषु सोमेषु श्रीणने विशेषमाह ।

तस्य प्रातःसवनीयान् सोमान् प्रतिदुह्रा श्रीणाति शृतेन मध्यन्दिने दध्ना तृतीयसवने ॥ २ ॥

अस्यार्थमाह द्राह्यायणः वैश्यस्तोमे सद्योदुग्धेन पयसा सोममभिश्रं कुर्य्युः प्रातःसवने शृतेन मध्यन्दिने दध्ना तृतीयसवन इति सद्योदुग्धं पयःप्रतिधुगित्युक्तं शृतं पक्वं पयइत्यर्थः ॥ २ ॥

अत्राधिकारिणमाह ।

पशुकामो यजेत ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथ सवनभेदेनोक्तां श्रपणद्रव्यव्यवस्थां पक्षान्तराशङ्कानिराकरणेन स्थापयति ।

यत् सर्वाणि सवनान्याशीर्व्वन्ति भवन्त्यनुसवनमेवैनं पशुभिः समर्द्धयति प्रजा त्वस्य मीलितेव भवति शुक्रिये हि सवने पयसा श्रीणाति ॥ ४ ॥

यद्यदि त्रीण्यपि सवनानि दध्याशीर्युक्तानि भवन्ति तदा अस्य यजमानस्य प्रतिसवनं पशुसमृद्धिः कृता भवति किन्तु अस्य प्रजा मीलितेव सङ्कुचितेव भवति ततः शुक्रिये हि सवने प्रातर्मध्यन्दिने तु पयसा श्रीणाति तत उक्तदोषो न भवति। यद्वा इमं वाक्यं केवलदोषपरतया व्याख्येयं अस्मिन् पक्षे आशीःपदेन श्रपणसाधनं पयोदधि वोच्यते यदि सर्व्वाणि सवनानि उक्तप्रतिधुगादिद्रव्याशीर्व्वन्ति भवन्ति तर्हि यजमानस्य पशुसमृद्धिः स्यादेव किन्तु प्रजाहानिर्भवति तत्र हेतुरुच्यते हि यस्मात् शुक्रिये शुक्रः ऋजीषाभावेनागतसारः सोमः एतर्हि एतद्वती दीप्तिः प्रातर्मध्यन्दिने अपि सवने अयं पयसा श्रीणाति सोमं अतो युक्तं प्रजामीलनं तृतीयसवने ऋजीषत्वादाशीःश्रपणं युक्तं स्वतएव दीप्तायाः सवनयोराशीःश्रपणेन सोमस्य स्वाभाविकदीप्तेः सङ्कुचितत्वादित्यभिप्रायः ॥ ४ ॥

अथोक्तश्रपणत्वेन पशव्यत्वाद्वैश्यस्यात्राधिकार इत्याह ।

वैश्यं याजयेत् ॥ ५ ॥

स्पष्टं ॥ ५ ॥

अत्र वैश्यस्यान्वयमाह ।

एतद्वै वैश्यस्य समृद्धं यत्पशवः पशुभिरेवैनꣳ समर्द्धयति ॥ ६ ॥

समृद्धं समृद्धिरित्यर्थः ॥ ६ ॥

अत ऋतुः पृष्ठे विशेषमाह ।

तस्य कण्वरथन्तरं पृष्ठं ॥ ७ ॥

अभित्वा शूरेत्यत्र कण्वरथन्तरं ॥ ७ ॥

अथ ब्राह्मणाच्छंसिपृष्ठे विशेषमाह ।

सदो विशीयं ब्रह्मसाम ॥ ८ ॥

आनो विश्वास्वित्यत्र सदोविशीयं ॥ ८ ॥

उक्तद्वययोगं प्रशंसति ।

पशवो वै कण्वरथन्तरं पशवः सदोविशीयमभि-पूर्व्वमेवास्मिन् पशून् दधाति ॥ ९ ॥

स्पष्टं ॥ ९ ॥

अथात्र बहिष्पवमानाज्यादेः सर्व्वत्रापि सप्तदशस्तोमत्व-माह ।

सर्व्वः सप्तदशो भवति ॥ १० ॥

स्पष्टं ॥ १० ॥

अथ साप्तदश्यं प्रशंसति ।

द्वादशमासाः पञ्चर्त्तवः स वै संवत्सरः संवत्सरं पशवोऽनुप्रजायन्ते तानेवाप्नावरुन्धे ॥ ११ ॥

अथास्य कल्पः पवमानस्य विश्वविद्विद्युतत्यारुपैति एते अमृग्र-

मिन्द्रयस्तन्वान्नृणानि बिभ्रतं पवमानस्य ते कवे विश्वेभिरग्ने अग्निभिरिमं वयं हवामह इन्द्रं वो विश्वतस्परि ताकवे ययोरिदमभित्वा शूरनोनुम इति कण्वरथन्तरं पृष्ठमानो विश्वासु हव्यमिति यदोविशीयं ब्रह्मसाम अनुषेकर्च्चयोः सफपौष्कले परित्यं हर्य्यतं हरिमित्यनुष्टुप् पवित्रन्त इति काबमन्त्यमुक्थान्युक्थानि समानमितरमायुषैकाह्निके वेति ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य
चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ तीव्रसोमाख्यं सप्तदशस्तोमकमुक्थसंस्थमेकाहमाह ।

सप्तदश उक्थ्यः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अथ सोमातिपवितस्यात्राधिकार इति वक्तुमाह ।

इन्द्रो वृत्रमहन् स विष्वङ्वीर्य्येण व्यार्च्छत्तस्मै देवाः प्रायश्चित्तिमैच्छंस्तस्मै किञ्चनाधिनोत्तन्तीव्रसोम एवाधिनोत् ॥ २ ॥

पूर्व्वं वृत्रं हतवत इन्द्रस्य सर्वतोवीर्य्येऽपगते सति देवाः पुनः

प्राप्तुपायं विचिन्त्य बहून्यज्ञान् प्रायुञ्जत किञ्चनाधिनोत् न प्रीणयन् तं तीव्रसोमस्त्वधिनोत् ॥ २ ॥

एवं प्रशस्येदानीं सोमातिपवितस्यात्राधिकार इत्याह ।

सोमातिपवितं याजयेत् ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

तत्कुत इति तत्राह ।

छिद्र इव वा एष यꣳ सोमोऽतिपवते यत्तीव्रसोमेन यजते पिहित्या एवाछिद्रतायै ॥ ४ ॥

यं यजमानं सोमोऽतिपवते एष छिद्रमिव वै असम्पूर्ण एव खलु यत्तीव्रसोमेन यजते तत्पिहित्या एव सोमातिपवनविरोधायैव सोऽस्याच्छिद्रतायै सम्पूर्णसामर्थ्यायैव तीव्रश्चासौ सोमश्चेति तीव्रसोम तीव्रसोमत्वं शतमाशिरं दुहन्ति तीव्रयन्त्येवैनमित्यादिना स्पष्टीकरिष्यते सोमातिपवितस्य लक्षणं सूत्रकारो मतभेदेन बहुधा दर्शयति तीव्रसुति सोमातिपवितं याजयेदिति यद्दृष्ट्वा पापीयान् स्यात् स सोमातिपवित इति शाण्डिल्य इति यं सोमोऽतिपवते स सोमातिपवितः सोमयागोत्तरकालः सोऽनष्टश्रीकः स एवमुक्तः इति यः सोमं पीत्वा छर्द्दयेत विरिच्येत वेति धानञ्जय्य इतीति वमनं विरेको वा अतिपवनमित्यर्थः ज्येष्ठेवाऽनिष्ठिनि कनीयसी छिनीतीति अथवा यः कनीयसि भ्रातरि इष्टवति सति स्वयं सोमेन नेष्टवान् स सोमातिपवितः ॥ ४ ॥

अथाधिकार्य्यान्तरमाह ।

राजानमपरुद्धं याजयेत् ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

अस्मिन्नधिकारनिमित्तमतिपवनं योजयति ।

विड्वा एतमतिपवते यो राजावरुध्यते यत्तीव्र-सोमेन यजते पिह्नित्या एवाच्छिद्रतायै ॥ ६ ॥

यो राजावरुध्यते राष्ट्रेण परित्यज्यते एनं राजानं विट् प्रजा खल्वतिपवते अत्यन्तं परित्यजति शिष्टं पूर्ववत् ॥ ६ ॥

पुनरन्यमधिकारिणमाह ।

ग्रामकामो यजेत ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

उक्तक्रतावस्यानुकूल्यमाह ।

ग्रामो वा एतमतिपवते योऽलङ्ग्रामाय सन् ग्राममन्न विन्दते यत्तीव्रसोमेन यजते पिह्नित्या एवाच्छिद्रतायै ॥ ८ ॥

जनसमूहो ग्रामः शिष्टमुक्तप्रायं ॥ ८ ॥

पुनरप्यधिकार्य्यन्तरमाह ।

प्रजाकामो यजेत प्रजा वा एतमतिपवते योऽलं

प्रजायाः सन् प्रजान्न विन्दते यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

पुनरप्यधिकार्य्यन्तरमाह ।

पशुकामो यजेत पशवो वा एतमतिपवन्ते योऽलं पशुभ्यः सन् पशून्न विन्दते यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥ १० ॥

स्पष्टोऽर्थः ॥ १० ॥

पुनरप्यधिकार्य्यन्तरमाह ।

आमयाविनं याजयेत् प्राणा वा एतमतिपवन्ते य आमयावी यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥ ११ ॥

स्पष्टोऽर्थः ॥ ११ ॥

सोमस्य तीव्रप्रकारमाह ।

शतमाशिरं दुहन्ति तीव्रयन्त्येवैनं ॥ १२ ॥

अस्यार्थमाह सूत्रकारः शतमाशिरं दुहन्तीति धेनुशतन्दोहयित्वा त्रैधं विभज्य सोममिश्रं कुर्य्युर्य्यथा वैश्वसोम इति सोममिश्रार्थं दध्यादिकमाशिरमित्युच्यते स्पष्टमन्यत् ॥ १२ ॥

अत्र क्रतौ प्राकृतदक्षिणामापाद्याशीरर्थं शतं दक्षिणेत्याह ।

तस्मा उ एव दक्षिणाः ॥ १३ ॥

तस्तस्य क्रतोः उशब्दोऽवधारणे तथैवकारः अतो अवधारण-द्वयेनोक्तव्यतिरिक्तदक्षिणा निवर्त्यते तस्य क्रतोः तदेव धेनुशतं दक्षिणास्तास्ता उ एव दक्षिणा इति स्याहेति स्पष्टं ॥ १३ ॥

प्रकारान्तरेण सोमस्य तीव्रत्वमाह।

अभ्यभिसोमानुन्नयन्ति तीव्र एनन्धिनवदित्यु-भावध्वर्य्यू सर्व्वं चमसाध्वर्य्यवोऽच्छावाकाय प्रतिगृणन्ति तीव्रयन्त्येवैनं ॥ १४ ॥

अस्यार्थं सूत्रकार एवमाह अभ्यभिसोमानुन्नयन्तीति याश्च-मसानवजिघ्रेयुस्तेष्वेवाभ्युन्नयेयुरिति यास्त्वमसानवजिघ्रेयुस्तान् परित्यज्यैव तेषामुपर्य्युत्तरयागेभ्यः सोमानुन्नयेयुः अवजिघ्र-तोऽपि भक्षित एवेति मत्वा न त्याज्य इत्यर्थः ॥ १४ ॥

पुनः प्रकारान्तरेण तीव्रत्वमाह।

तद्भक्षयन्त ऋत्विजश्चमसानवजिघ्रन्ति तीव्र-यन्त्येवैनं तस्मानच्छावाकस्य स्तोत्रे भक्षन्ति तीव्रय-न्त्येवैनं ॥ १५ ॥

अस्यार्थं सूत्रकार एवाह तत्र भक्षाहृताश्चमसानवजिघ्रेयु-रिति तत्र तीव्रसुति भक्षणस्याहृताधर्म्मेणावघ्राणं कुर्य्युः कुत इत्याह अभक्षयन्त ऋत्विजश्चमसानवजिघ्रन्तीत्याहेति अभक्ष-

यन्तोऽवजिघ्रेयुरिति भक्षणप्रत्याम्नायत्वेनावघ्राणविधानात् तद्‌-म्नायपत्तिरिति अथ प्रातस् सोमग्रेषानाज्यस्तोत्रेषु भक्षयन्ति तदपि सोमस्य तीव्रत्वकरणमित्याह तत्तानच्छावाकस्य स्तोत्रे भक्षयन्ति तीव्रयन्त्येवैनन्तदिति अत्र सूत्रं तानच्छावाकस्तोत्रेण स्तुत्वा भक्षयन्तीति स्यात्सैवं सर्वेषु सवनेष्विति ॥ १५ ॥

अथ सवनान्तेष्वेव यद्भक्षणमुक्तं तद्‌तद्व्यतिरेकेण निन्दासंकीर्त्तनेन द्रढयति।

तद्यत् सवनानि व्यवभक्षयेयुरपक्रामुका यजमानाच्छ्रीः स्यात् सकृत्सकृत्सवनानामन्ततो भक्षयन्ति सवनानामसंभेदाय ॥ १६ ॥

यद्यपि सवनानि सवनगतान् हुतशिष्टान् ग्रहचमसगतान् सोमान् व्यवभक्षयेयुः विभज्य विभज्य तत्तद्धोमावसाने भक्षयेयुः सवनत्रयेष्वपि मध्ये मध्ये विच्छेदेन यद्यविच्छेदादस्याच्छ्रीरपक्रमणशीला स्यात् तदकृत्वा सवनान्तेष्वेव यदि सकृत् सकृद्भक्षयेयुः तत्सवनेषु त्रिष्वपि मध्ये अवच्छेदाय भवति ॥ १६ ॥

होतुःपृष्ठस्य रथन्तरत्वमाह।

रथन्तरꣳ साम भवति ॥ १७ ॥

स्पष्टोऽर्थः ॥ १७ ॥

अथ सोमस्यातिपवितावेव रथन्तरं युक्तमिति प्रशंसति।

इयं वै रथन्तरमस्यां वा एष न प्रतितिष्ठति यो न प्रतितिष्ठत्यस्यामेवैनं प्रतिष्ठापयति ॥ १८ ॥

स्पष्टं ॥ १८ ॥

अथ ब्राह्मणाच्छंसिपृष्ठं आयन्तीयं विधत्ते ।

आयन्तीयं ब्रह्मसाम भवत्येतदेवास्मिञ्छ्रीणाति ॥ १९ ॥

अस्मिन् सोमातिपवितादौ एतदेव आयन्तीयं सामैव श्रीणाति मिश्रयत्यपगतं तेजःप्रभृतिकं अस्य श्रीणनसामर्थ्यमिन्द्रो वृत्रमहन् स विश्वं वीर्य्येण व्यभ्रंशत स एतच्छ्रायन्तीयमपश्यत्तेनात्मानं समश्रीणादित्युक्तं सिद्धं ॥ १९ ॥

अथार्भवपवमाने अनुष्टुभि तृचे अन्त्यस्य यज्ञायज्ञीयस्यापकर्षमाह ।

यज्ञायज्ञीयमनुष्टुभि भवति ॥ २० ॥

स्पष्टोऽर्थः ॥ २० ॥

एतत् प्रशंसति ।

वागनुष्टुप् वाचोरसो यज्ञायज्ञीयं वाच्येवास्य रसं दधाति ॥ २१ ॥

वाचोऽनुष्टुप्त्वमितरेषां छन्दसामनुष्टुभ्यनुप्रवेशात् सिद्धं देवा वै ब्रह्म व्यभजन्त तस्य यो रसोऽत्यरिच्यत तत् यज्ञायज्ञीय-

मभवदिति श्रुतेः वाग्रसत्वमस्य वागात्मकयज्ञायज्ञीयस्य रसं सारमनुष्टुवात्मिकायां वाच्येव दधाति तथा कुर्व्वन्नुद्गाता ॥२१॥

अस्याग्निष्टोमसामनि यज्ञायज्ञीयस्थानीयं सामान्तरमाह।

विशोविशीयमग्निष्टोमसाम भवत्येतद्वैवास्मिन् सर्वं प्रतिष्ठापयति ॥ २२ ॥

विशोविशीयमग्निष्टोमं कुर्व्वन्नुद्गाता अग्निष्टोमस्य सर्व्वसोमान्तत्वात् एतत्सर्व्वमेव सकलसोमसाध्यं कृत्स्नफलमेवास्मिन् सोमातिपवितादौ प्रतिष्ठापयति स्थापयति ॥ २२ ॥

अथ तृतीयोक्थे उद्वंशीयमनूद्य प्रशंसति।

उद्वꣳशीयमुक्थानामन्ततो भवति सर्वेषां वा एतत्पृष्ठानाꣳ रूपꣳ सर्वेष्वेव रूपेषु प्रतितिष्ठति ॥२३॥

सर्व्वाणि वैरूपाण्युद्वंशीयं गायन्ति त्वा गायन्निति रथन्तरस्य रूपमित्यादिना सर्व्वपृष्ठत्वरूपत्वप्रतिपादनात् सर्व्वपृष्ठत्वरूपत्वमस्य ॥ २३ ॥

अस्य तीव्रसोमस्य उक्थसंस्थतां सार्थवादमाह।

उक्थो भवति पशवो वा उक्थानि पशुष्वेव प्रतितिष्ठति ॥ २४ ॥

अथास्य कल्पः एते असृग्रमिन्दवस्तन्वा तृष्णा विभ्रतमिति पुरस्तात्पर्य्यासस्य तृचं पश्चार्द्धे आयन्तीयं ब्रह्मसाम

संहितस्य लोके मौक्षं पौष्कलस्य लोके श्रुद्धं श्यावाश्वस्य यज्ञा-
यज्ञीयं यज्ञायज्ञीयस्थर्त्तु विशोविशीयमग्निष्टोमसाम समान-
मितरमायुषैकाह्निकेनेति ॥ २४ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य
पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

वाजपेयाख्यमेकाहमाह।

सप्तदश उक्था षोडशिमान् सप्तदशी ॥ १ ॥

अयं सप्तदशस्तोमकः उक्थसंस्थः सचोक्थ्यः षोडशिमान् षोडशिस्तोत्रयुक्तः एवं सति स षोडशिक उक्थ्यः षोडश-स्तोत्रवान् अतिरिक्तोक्थ्येन सह सप्तदशी सप्तदशस्तोत्रवान् कर्त्तव्यः ॥ १ ॥

अथास्य प्रतिस्तोत्रं सप्तदशस्तोमत्वं स्तोत्राणां साप्तदश्यञ्च प्राजापत्यात्मना प्रतिपादयति।

यावान्वै प्रजापतिरूर्द्धस्तावांस्तिर्य्यङ् ॥ २ ॥

यावत्प्रमाणः प्रजापतिरूर्द्धः उपर्य्युपर्य्युच्छ्रितः तावान् तावत्-प्रमाणेव तिर्य्यङ् अत उच्छ्रितेन स्तोत्रसप्तदशकेन आयत्यात्मक-त्वेन तिर्य्यग्भूतेन सप्तदशेन स्तोमेन चोपेतो वाजपेयः प्राजा-पत्यात्मकः उभयत्रायामविस्तारसाम्यात् ॥ २ ॥

प्रजापतेरायामविस्तारसाम्यं लोकसाम्येन समर्थ्यते।

यावन्त इमे लोका ऊर्द्धास्तावन्तस्तीर्य्यञ्चः ॥३॥

यथेमे दृश्यमाना भूरादयो लोका यावन्तः यावत्प्रमाणाः ऊर्द्धाः स्युस्तावन्तस्तिर्य्यञ्चः तद्वत् प्रजापतिरपीति ॥ ३ ॥

अस्त्वेवं किमत इत्यत आह।

वाजपेययाजी वाव प्रजापतिमाप्नोति ॥ ४ ॥

वाजपेयस्योक्तप्रकारेण प्रजापतिसाम्यादनुष्ठातापि प्रजापतिमेवाप्नोति ॥ ४ ॥

प्राजापत्यस्तोममेव विभज्य दर्शयति।

यत् सप्तदश स्तोत्राणि तेनोर्द्धमाप्नोति यत्सर्वः सप्तदशस्तेन तिर्य्यञ्चं ॥ ५ ॥

स्तोत्राणामेकत्र्यादिक्रमेणोपर्य्युपर्य्यनुष्ठानात् प्रजापतेरूर्द्धाकारप्राप्तिः सप्तदशस्तोमस्यावृत्तिसाध्यत्वेन तिर्य्यक्त्वात् प्रजापतेस्तिर्य्यग्रूपावाप्तिः ॥ ५ ॥

अस्य सवनानां वैचित्र्यं प्रशंसितुमनुभाषते।

तस्य नानावीर्य्याणि सवनानि ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

कथन्नानावीर्य्यत्वमिति तद्दर्शयति।

अनिरुक्तं प्रातःसवनं वाजवन् माध्यन्दिनꣳ सव-नञ्चित्रवत् तृतीयसवनं ॥ ७ ॥

प्रातःसवनस्य गायत्रत्वात् तस्य च कल्पेनानिरुक्तगानात् प्रातःसवनमनिरुक्तं माध्यन्दिनसवने होतुः पृष्ठे रथन्तरविधानात् अत मघवन्निन्द्र वाजिन इति वाजशब्दश्रवणात् माध्यन्दिनस्य वाजवत्त्वं तृतीयसवनत्वं तृतीयसवने अग्निष्टोमसाम्नि वारवन्तीये त्वन्नश्चित्रउत्येति चित्रशब्दश्रवणात् चित्रवत्त्वं ॥७॥

अस्तु नानावीर्य्यत्वं किन्तत इत्यत आह ।

यदनिरुक्तम् प्रातःसवनम्भवत्यनिरुक्तो वै प्रजापतिः प्रजापतिमेवाप्नोति यद्वाजवन् माध्यन्दिनꣳ सवनमन्नं वै वाजोऽन्नाद्यस्यावरुध्यै यच्चित्रवत् तृतीयसवनꣳ स्वर्गस्य लोकस्य समष्ट्यै ॥ ८ ॥

स्वर्गस्यापि चित्याद्यपेक्षया तृतीयत्वात् तृतीयसवनं स्वर्गः स च नानाविधभोगसाधनत्वाच्चित्रः अतश्चित्रवत् तृतीयसवनानुष्ठानं स्वर्गस्य संप्राप्त्यै कल्पते स्पष्टमन्यत् ॥ ८ ॥

अथोक्तस्य प्रातःसवनस्यानिरुक्तत्वं क्रतुस्वयज्ञस्यानिरुक्तस्यानीयमिति प्रशंसति ।

वियोनिर्व्वाजपेयइत्याहुः प्राजापत्यस्य निरुक्तामामेति यदनिरुक्तं प्रातःसवनन्तेन सयोनिः ॥ ६ ॥

यस्मात् वाजपेयः पूर्व्वोक्तरीत्या प्राजापत्योऽपि निरुक्तसाम अस्य सामानि निरुक्तानि अतोऽनिरुक्तप्रजापतिरूपस्य वाजपेयस्य साम्नामनिरुक्तत्वाभावात् वाजपेयो वियोनिर्विलक्षणा अय इत्याङ्करभिज्ञाः तत्रेदमुत्तरं यत् प्रातःसवनमनिरुक्तं अतोऽयं सयोनिः प्राजापत्यानुकूलः प्रातःसवनस्य प्राथम्येन मुख्यत्वात्तदनिरुक्तकरणेन सर्व्वो यज्ञोऽनिरुक्तः कृतो भवतीत्यभिप्रायः ॥ ६ ॥

अथास्य होतुः पृष्ठस्य रथन्तरत्वं विदधाति ।

रथन्तरꣳ साम भवत्याशीय उज्जित्यै ॥ १० ॥

इयं वै रथन्तरमिति श्रुतेः रथन्तरकरणं अस्य लोकस्याशीय आशुतरं चिप्रतरं उज्जित्यै भवति ॥ १० ॥

अथ विहितरथन्तरत्वमेव तद्गानकालाभिषेकस्तुतिद्वारा प्रशंसति ।

इयं वै रथन्तरमस्यामेवाध्यभिषिच्यते ॥ ११ ॥

अस्यां पृथिव्यामधीश्वरभावेनाभिषिच्यते अतः पृथिवीस्थानीयं रथन्तरं प्रसिद्धमित्यर्थः अर्थात्तत्राभिषेकः कर्त्तव्यमित्युक्तं भवति यस्मिन्नासीनोऽभिषिच्येत तत्सरुक्मं होत्रे दद्यात् अभिषिक्तश्च यामासन्दीमास्थितस्तामुद्गात्रे तथा च सूत्रं ब्रह्मवर्म्मसरुक्मं होत्रे यस्मिन्नासीनोऽभिषिच्येतेति तथोद्गात्र इति प्रकृत्यासन्दी च स्तरणं यामभिषिक्त आरोहेदिति ॥ ११ ॥

अथाभिषेकप्रसङ्गाद्वाजपेययाजिनः किञ्चिद्व्रतमाह ।

तस्माद्वाजपेययाज्यप्रत्यवरोहीति ॥ १२ ॥

तस्मादधिकमपि नान्दोलिकादिभ्योऽवरोहेदित्यर्थः अपूर्व्व-त्वाद्विधिरियं ॥ १२ ॥

तस्मादित्युक्तं विवृणोति ।

अस्याᳫं हि सोऽध्यभिषिच्यते ॥ १३ ॥

यथाऽभिषिक्तो राजा राजान्तरन्न प्रत्यवरोहति अथासावप्यनेनाभिषिक्तत्वादित्यर्थः एतद्व्रतं यावज्जीविकमित्येके यावत् प्रत्यवरोहणीययागमित्यपरे प्रत्यवरोहणीयश्च ज्योतिष्टोम इत्यार्षेयकल्पेनोक्तं बृहस्पतिसवः प्रत्यवरोहणीय इति बह्वृचाः वाजपेययाजिनो व्रतान्याह सूत्रकारः तस्य व्रतानि चतवृत्तिं वर्त्तयेदिति तामेव दर्शयति प्रत्यवरोहणाभिवादने जघन्यवर्ज्यां समानशय्यतामिति वर्ज्जयेदवाजपेययाजिभिरिति आत्मन उत्कृष्टेरप्यवाजपेययाजिभिः सह प्रत्यवरोहणादिकं न कुर्य्यात् पृष्ठतोऽनुगमनं जघन्यवर्ज्यां स्पष्टमन्यत् ॥ १३ ॥

अथ ब्राह्मणाच्छंसिपृष्ठे विशेषमाह ।

अभीवर्त्तो ब्रह्मसाम भवति ब्रह्मणो वा एष ऋषभ ऋषभतामेवैनं गमयति ॥ १४ ॥

ऋषभः श्रेष्ठः स्पष्टमन्यत् ॥ १४ ॥

अथाग्निष्टोमसामगीतं यज्ञायज्ञीयमाभेवेऽपकर्षति ।

यज्ञायज्ञीयमनुष्टुभि भवति वागनुष्टुब् वाचोरसो यज्ञायज्ञीयं वाच्येवास्य रसं दधाति ॥ १५ ॥

गतमिदं ॥ १५ ॥

अथाग्निष्टोमसाम्नि किं सामेति तद्दर्शयति ।

वारवन्तीयमग्निष्टोमसाम भवतीन्द्रियस्य वीर्य्यस्य परिगृहीत्यै ॥ १६ ॥

इन्द्रियस्येत्यस्य व्याख्यानं वीर्य्यस्येति त्वन्नश्चित उत्येति वारवन्तीयमग्निष्टोमसाम कार्य्यमग्निर्वा इदं वैश्वानरो दह न्नैदित्यत्र रक्षाहेतुत्वेन श्रुतत्वात् सुज्ञानमन्यत् ॥ १६ ॥

अथान्त्यस्योक्थस्योद्वंशीयतां सार्थवादमाह ।

उद्वंशीयमुक्थानामन्ततो भवति सर्वेषां वा एतत् पृष्ठानां रूपं सर्वेष्वेव रूपेषु प्रतितिष्ठति ॥ १७ ॥

एतदपि पूर्व्वखण्डे गतं ॥ १७ ॥

अथास्य षोडशिसामाह ।

गौरीवितं षोडशिसाम भवति ॥ १८ ॥

स्पष्टोऽर्थः ॥ १८ ॥

एतत् स्तौति।

अतिरिक्तं गौरीवितमतिरिक्तः षोडश्यतिरिक्त-एवातिरिक्तं दधाति॥१९॥

देवा वै वाचं व्यभजन्त तस्या योरसोऽत्यरिच्यत तद्गौरीवितमभवदिति श्रुतेरतिरिक्तं गौरीवितं षोडशी च नाह्नो न रात्रेरिति श्रुतेरतिरिक्तः अतस्तयोः सम्बन्धः समृद्धिहेतुः॥१९॥

अथोक्तयोरुद्वंशीयगौरीवितयोरुभयोरपि स्वारत्वाज्जामित्वमाशङ्कते।

तदाहुर्ज्जामि वा एतद्यज्ञे क्रियते यदुद्वꣳशीयाद् गौरीवितेन स्तुवते स्वारात् स्वारेणेति॥२०॥

स्पष्टं॥२०॥

तस्य परिहारमाह।

न जाम्यस्ति सवनꣳ सन्तिष्ठते॥२१॥

उक्थस्य समाप्तेर्न्न जामि॥२१॥

परिहारान्तरमाह।

उक्थꣳ शस्यते वषट्कारोऽन्तरा तेनाजामि॥२२

स्तुतमनुशंसतीति वचनादुक्थस्तोत्रानन्तरमुक्थं शस्यते उक्थ्यग्रहहोमे वषट्कारः सोऽन्तरा मध्ये भवति तेनापि न जामिदोषः॥२२॥

अथान्यत: परिहरति।

अपच्छिदिव वा एतद्यज्ञकाण्डं यत् षोडशी तेनाजामि ॥ २३ ॥

यज्ञपर्व्वापच्छिदिव वै अपच्छिन्नमिव खलु अयमेवापच्छेदो यज्ञोक्थानामभाव: होतॄणाम हि षोडशी नात: परं होतृकाणां सामानि सन्ति अत: क्षुद्रमिदं सर्व्वं विजातीयानां हि क्रतं करणे जामिता स्यात् ॥ २३ ॥

अथ षोडशिन ऊर्द्ध्वं वाजपेयस्तोत्रं सप्तदशं भवति तच्च क्लृप्तयज्ञकाण्डेष्वनन्तर्भूतं अतएव यज्ञारण्येऽखिले स्थाने सन्तिष्ठत इति दोषमाशङ्कते।

यज्ञारण्ये सन्तिष्ठत इत्याहुरत्युक्थान्येत्यति-षोडशिनन्न रात्रिं प्राप्नोतीति ॥ २४ ॥

उक्थानि षोडशिनञ्चातिक्रम्य एतीति रात्रिपर्य्यायान्न प्राप्नोतीति अतो यज्ञारण्ये सन्तिष्ठते इति समाप्यते इतिशब्दो-वचनसमाप्तिद्योतनार्थ: ॥ २४ ॥

उक्तदोषं परिहरति।

विष्णो: शिपिविष्टवतीषु बृहदुत्तमं भवति ॥ २५ ॥

स्पष्टोऽर्थ: ॥ २५ ॥

कथमनेन परिहृतो भवतीति तदाह।

एषा वै प्रजापतेः पशुष्ठा तनूर्यच्छिपिविष्टः प्राणो बृहत् प्राण एव पशुषु प्रतितिष्ठति ॥ २६ ॥

यज्ञो विष्णुः पशवः शिपिरिति श्रुत्यन्तरात् विष्णोः प्रजापतित्वात् शिपिविष्ट इति यत् एषा प्रजापतेर्यज्ञात्मकस्य विष्णोः पशुष्ठा तनूः किञ्च प्राणबृहत्साम्नोरुभयोरपि बृहत्त्वात् बृहत्साम प्राणः अतः वाजपेयस्तोत्रेण यज्ञसमापकः प्राणे पशुषु च यज्ञं प्रतिष्ठापयति ॥ २६ ॥

अथ पृथक् बृहत्साम्ना समाप्तिद्वारापि परिहरति ।

बृहता स्तुवन्ति बृहदमुं लोकमाप्तुमर्हति तमेवाप्नोति ॥ २७ ॥

असौ बृहदिति श्रुतेः बृहत्साम स्वर्गं लोकमाप्तुमर्हति अतस्तेन समापयितापि स्वर्गमेवाप्नोति अत ऐहिकपशुलाभादामुष्मिकस्वर्गलाभाच्च यज्ञारण्यसंस्थापनदोषोऽस्ति ॥ २७ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

उक्तो वाजपेयः, अथास्योक्तानामनुक्तानाञ्च केषाञ्चिदङ्गानां विधिपूर्व्विका स्तुतिः क्रियते, तत्रादौ वाजपेयशब्दनिर्व्वचनप्रदर्शनप्रसङ्गेनास्याधिकारिणं दर्शयति ।

प्रजापतिरकामयत वाजमाप्नुयाꣳ स्वर्गं लोकमिति स एतं वाजपेयमपश्यद्वाजपेयो वा एष वाजमेवैतेन स्वर्गं घलोकमाप्नोति॥ १ ॥

पूर्व्वं पेयद्रव्यात्मकवाजाख्यं स्वर्गं कामयमानः प्रजापतिः तत्साधनत्वेन वाजपेयमनुष्ठाय तल्लाभवान् एष यज्ञोवाजपेयः खलु वाजोऽन्नं पेयद्रव्यात्मकं यस्मिन् स वाजपेयः सुराग्रहस्यात्र सम्भवात्तदाप्तिहेतुत्वाच्च वाजपेयः अत एतदनुष्ठातापि तत्फलमाप्नोति वाजपेयशब्दो गुणविधायकः कर्म्म वेति विचार्य्य प्रमाणाध्याये नामधेयपादएतत्समानार्थं वाजपेयेन स्वाराज्यकामो यजेतेत्येतद्वाक्यं विषयीकृत्य गुणविधित्वं पूर्व्वपक्षीकृत्याग्निहोत्रशब्दवत् कर्मनामधेयमिति सिद्धान्तितं ॥ १ ॥

अथास्य प्रातःसवनगतस्तोत्रीयाणां शुक्रवत्यत्वमनूद्य प्रशंसति।

शुक्रवत्यो ज्योतिष्मत्यः प्रातःसवने भवन्ति तेजो ब्रह्मवर्चसन्ताभिरवरुन्धे॥ २॥

सोमाः शुक्रा गवाशिर इति शुक्रवत्यः ताएव ज्योतिष्मत्यः ताभिः स्तोत्रीयाभिस्तेजोविशेषं ब्रह्मवर्चसमवरुन्धेऽनुष्ठाता पूर्व्वतावििहितवत्वाच्छुक्रवत्यः कर्त्तव्या इति विधिः ॥ २ ॥

अथ माध्यन्दिने विहितवाक्त्वमनूद्य प्रशंसति।

वाजवत्यो मध्यन्दिने भवन्ति स्वर्गस्य लोकस्य समष्ट्यै ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अन्नवत्यो गणवत्यः पशुमत्यस्तृतीयसवने भवन्ति भूमानन्ताभिरवरुन्धे ॥ ४ ॥

पुरोजितीव इत्यन्नवान्धःशब्दादन्नवत्यः भरन्तो वस्यव एभिर्वर्द्धास इन्दुभिः गायन्ति त्वा गायत्रिण इति बहुकीर्त्तनैर्गणवत्यः गोपातिरश्वसा असीति गोमत्यः ताभिस्तृतीयसवनगताभिर्भूमानं बहुभावं यजमानः अवरुन्धे एतदन्नादेरुपलक्षणं ॥ ४ ॥

अथास्य पवमानादीनां सर्व्वेषां सप्तदशस्तोममनूद्य प्रशंसति ।

सर्वः सप्तदशो भवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ५ ॥

ओं आवयेति चतुरक्षरमतिक्रम्य एष वै सप्तदशः प्रजापतिरिति श्रुतेः तस्य सप्तदशत्वं ॥ ५ ॥

अथ ऋत्विजां हिरण्यमालित्वमाह ।

हिरण्यस्रज ऋत्विजो भवन्ति महस एव तद्रूपं क्रियते ॥ ६ ॥

ऋत्विजामपि हिरण्यस्रक्त्वं महसो महत्त्वस्य रूपं क्रियते ॥ ६ ॥

केनाभिप्रायेण क्रियते तदाह।

एषमेऽमुष्मिन् लोके प्रकाशोऽसदिति॥ ७॥

एष मे मह्यं अमुष्मिन् लोके महसोरूपकरणात् प्रकाशो ऽसद्भूयादिति बुद्ध्या देवसन्निधौ प्रकाशं करोति॥ ७॥

तत् पुनर्हेममालित्वं हिरण्यद्वारा प्रशंसति।

ज्योतिर्वै हिरण्यञ्ज्योतिरेवास्मिन् दधाति॥८॥

स्पष्टं॥ ८॥

अथात्र सर्व्वेषामाजिधावनं तत्र यजमानस्यैतज्जयश्च विधाय प्रशंसति।

आजिन्धावन्ति यजमानमुज्जापयन्ति स्वर्गमेवै-नन्तल्लोकमुज्जापयन्ति॥ ९॥

सुगमं, आजिधावनसाधनं रथमुद्गात्रे दद्यात् तथाच सूत्रं येन रथेनाजिन्धावेत्तमुद्गात्रे दद्यादिति॥ ९॥

अथ स्वर्गप्रतिनिधिरूढं काष्ठाग्रे रथचक्रादिना कृतं तत्र यजमानारोहणमाह।

नाकꣳ रोहति स्वर्गमेव तल्लोकꣳ रोहति॥१०॥

स्पष्टं॥ १०॥

अथास्य नाकस्याजीवत्प्रदेशकृतारोहणमाह।

सरजसे रोहति मनुष्यलोकाद्देवैनमन्तर्दधति ॥ ११

स्पष्टं ॥ ११ ॥

अथ रथचक्रावस्थितस्य ब्रह्मणो वाजिनां सामगानमाह ।

वाजिनाᳫं साम ब्रह्मा रथचक्रेऽभिगायति वाजो वै स्वर्गो लोकः स्वर्गमेवैनन्तल्लोकमुज्जापयति ॥ १२ ॥

ब्रह्माणं प्रति गानमुक्तं वाजिनां साम आर्षेयकल्पे उक्तं वाजिनाञ्चेव सामादित्यानांच्च पवित्रं आविर्मर्य्या इति अनुद्दित्वा सुतं इदमपि वाजिनां साम ॥ १२ ॥

शिपिविष्टवतीषु बृहद्गानं प्रशंसति ।

विष्णोः शिपिविष्टवतीषु बृहदुत्तमं भवति स्वर्गमेव तल्लोकᳫं रूढ्वा ब्रध्नस्य विष्टपमभ्यतिक्रामति ॥१३॥

किमित्ते विष्णो इति शिपिविष्टवतीषु बृहदुत्तमं षोडशिनः परं भवति अयं तमस्य रजसः पराक इति विष्णोर्द्दिव उपरि निवासस्य श्रूयमाणत्वात् स्वर्गं लोकं रूढ्वा ब्रध्नस्यादित्यस्य विष्णुरूपस्य विष्टपं स्थानं अभि उद्दिश्याभिक्रामति अथास्य कल्पः पूर्व्वस्य बहिष्पवमानं व्रात्यानि लौग्याज्यानि वैश्वजितमुत्तरं बार्हदुक्थस्य लोके देवस्थानं रथन्तरं पृष्ठमभीवर्त्तो ब्रह्मसामम्मौक्षस्य लोके स्वाशिरामर्कः श्यावाश्वस्य यज्ञायज्ञीयस्त्वम्मश्चित्र उत्येति वारवन्तीयमग्निष्टोमसाम समानमितरं गवैकाह्निकेन गौरीवितं षोडशिसाम विष्णोः शिपिविष्टवतीषु बृहत्स्मे सप्त-

दृशा इति पूर्व्वस्य तीव्रसुतस्येत्यर्थः महाव्रतसम्बन्धीन्यन्यानि त्रीणि होतादेवो अमर्त्यः तानः शक्तं पार्थिवस्येत्यादुक्तानि॥१३॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

अथ राजसूयोऽभिधीयते, तत्स्वरूपं बौधायनापस्तम्बाभ्यां आध्वर्य्यवं सूत्रद्वयाभ्यामुदीरितं, तत्र बौधायनः राजसूयेन यक्ष्यमाणो भवति पुरस्तात् फाल्गुन्ये पूर्णमास्यै चैत्र्यां वा पूर्ण मास्यां आमावस्येन हविषेष्ट्वा दीक्षते तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः सन्तिष्ठते एष प्रायणीयोऽग्निष्टोमः सहस्र दक्षिण उदवसानीयान्त इति । आपस्तम्बोऽपि राजा स्वर्गकामो राजसूयेन यजेत शतसहस्रं दक्षिणोऽग्निष्टोमपञ्चापवर्गः प्रथम- मह्नः पञ्चसहस्राणि पवित्रे ददाति त्रिंशतमभिषेचनीये त्रिंशतं दशपेये केशवपनीये विंशतिः व्युष्टिद्विरात्रे पञ्चक्षत्रस्य धृताविति। आश्वलायनोऽपि सूत्रं सूत्रयन्नित्थमाह, अथ राजसूयाः पुर- स्तात् फाल्गुन्याः पौर्णमास्याः पवित्रेणाग्निष्टोमेनाभ्यारोहणी- येन यजेत पौर्णमास्यां चातुर्मास्यानि प्रयुङ्क्ते इति। ब्राह्मणभाष्य- कृद्भिरपि पूर्वाचार्य्यैरित्थं संगृहीतं, वक्ष्यते राजयज्ञोऽयं राज- सूयाह्वयोऽस्य च। प्रयोगसंग्रहः पूर्व्वं फाल्गुन्याः सोममाहरेत्। अग्निष्टोमः पवित्राख्यः सोऽभ्यारोहणसाधनः। फाल्गुन्यां पूर्ण-

मासान्तु चातुर्मास्यान्युपक्रमेत्। तानि संवत्सरे कृत्वा द्वौ सोमौ तत आहरेत्। आद्योऽभिषेचनीयः स्याद्दशपेयस्ततःपरं। पश्चि-ष्टयस्तु बहवः कर्त्तव्यास्तु तदा तदा। स्यात्केशवपनीयस्य सोऽति-रात्रस्ततः परं। व्युष्टिद्विरात्रः कर्त्तव्यस्तत्राग्निष्टोम आदिमं। अह: स्यादतिरात्रोऽन्त्यं चत्रस्य धृतिरन्तिमः। अग्निष्टोमो भवेदित्थं राजसूयाह्वयः क्रतुः। सोमेष्टिपशुबन्धानां समाहारो भवत्ययं। तत्रेष्टिपशुबन्धेषु सतः साम्नामनन्वयाः। सामा एव प्रकीर्त्यन्ते इत्येते अनुगम्यतामिति, तत्रादौ पवित्राख्यमग्नि-ष्टोमं विधत्ते।

अग्निष्टोमं प्रथममाहरति यज्ञमुखं वा अग्नि-ष्टोमो यज्ञमुखमेवारभ्य सवमाक्रमते॥ १॥

द्वादशस्तोत्रयुक्तोयोऽग्निष्टोमस्तमेतं राजसूयोपक्रमे सम्पा-दयेत् सोमयागानाम्मध्ये ज्योतिष्टोम आद्यः एष वाव प्रथमो यज्ञोयज्ञानां यत् ज्योतिष्टोम इति श्रुतेः तस्य ज्योतिष्टोमस्य सम्बन्धिन्यो याः सप्तसंस्थाः सन्ति तासाम्मध्येऽग्निष्टोमसंस्थायाः प्रकृतत्वेन यज्ञमुखत्वं तस्मादादावग्निष्टोमेऽनुष्ठिते सति यज्ञस्य राजसूयाख्यस्य महाक्रतोर्मुखमेवारभ्य सवमाक्रमते महाक्रतु-मनुतिष्ठति सूयतेऽभिषिच्यते यजमानो यस्मिन् महाक्रतौ सोऽय-मभिषेकयुक्तो महाक्रतुः सव इत्युच्यते यथोक्तविधिं तैत्तिरीया अप्येवमामनन्ति अग्निष्टोममग्रमाहरति यज्ञमुखं वा अग्नि-ष्टोमः यज्ञमुखमेवारभ्य सवमाक्रमत इति॥ १॥

राजसूयगतेषु सप्तसु सोमयागेषु प्रथमो विहितः द्वितीयं विधत्ते।

अथैषोऽभिषेचनीयः॥ २॥

अथशब्दोनानन्तर्य्यार्थः चातुर्मास्यादिभिर्व्यवहितत्वेनाग्निष्टोमाभिषेचनीययोरानन्तर्य्यस्य दुःसम्पादनीयत्वात् अधिकारार्थस्तु भवेत् एष वक्तुमिष्टोऽभिषेचनीयोऽधिकृतः प्रारब्ध इत्यर्थः॥ २॥

वहिष्पवमानमाध्यन्दिनपवमानार्भवपवमानाख्येषु त्रिषु स्तोत्रेषु स्तोमविशेषं विधत्ते।

तस्य द्वात्रिंशाः पवमाना द्वात्रिंशदक्षरानुष्टुब्वागनुष्टुब्वावती वाक्येव सूयते॥ ३॥

प्रसिद्धैवानुष्टुभोऽक्षरसंख्या सा वानुष्टुब्वाग्रूपा वाग्देवतायाः प्रियत्वात् तज्ञाविसम्वादेन सर्ववेदेषु तथा व्यवहारात् अवगम्यते ततोद्वात्रिंशस्तोमे पवमानेषु प्रयुक्ते सति संख्याद्वारायं यजमानः कृत्स्नमन्त्ररूपया वाचाऽभिषिक्तो भवति यद्यपि त्रिवृत्यध्याहारयोरयं स्तोमोनाम्नातः तथापि शाखान्तरानुसारि सूत्रकाराद्युपदेशादवगन्तव्यः तैत्तिरीयास्तु स्तोमान्तरमामनन्ति अथैषोऽभिषेचनीयश्चतुस्त्रिंशः पवमानो भवति त्रयस्त्रिंशद्वै देवताः एतावाप्नोति प्रजापतेश्चतुस्त्रिंशस्तमेवाप्नोति॥ ३॥

अथ ब्रह्मवादिभिर्य्यो दोष उद्भाव्यते तं दर्शयति।

तदाहुः सञ्शर इव वा एष छन्दसां यद्विषमा-

स्तोमा अयथापूर्वमिति ॥ ४ ॥

अभिषेचनीयस्योक्थसंस्थारूपत्वात्तत्र पञ्चदशस्तोत्राणि तेषु प्रथमषष्ठैकादशानि सवनत्रयगतानि पवमानस्तोत्राणि तेष्वधिकसंख्योपेतोद्वात्रिंशस्तोमः प्रयुज्यते तेभ्यः उपरितनेषु सवनत्रयगतेषु स्तोत्रेषु पञ्चदशसप्तदशैकविंशस्तोमा न्यूनसंख्योपेताः प्रयुज्यन्ते तदेतदयथापूर्वं भवेत् अल्पेनोपक्रम्याधिक्येन समाप्तौ तु यथापूर्वं भवति तच्चात्र नास्ति तदेतद्वैषम्यन्तच्च प्रयुज्यमानमन्त्रगतच्छन्दसामवक्राशरूपत्वात् संशरइव सम्यग्वधइव भवति ॥ ४ ॥

तमेतन्दोषं ब्रह्मवादी कश्चिदभिज्ञः समाधत्ते ।

यत्समाः पवमानास्तेनास्‌ंशरस्तेन यथापूर्वं ॥५॥

यदा पवमानस्तोत्राण्यन्यस्तोत्राणि चैकीकृत्य परीक्ष्यन्ते तदानीं अर्वाचीनसंख्या उपरितनत्वे सत्ययथापूर्वत्वरूपेण स्तोमवैषम्येन छन्दोवधः शङ्कते पृथक् परीक्षायान्तु नासौ शङ्कास्ति न तावत् परस्तोत्रेषु अयथापूर्वत्वमस्ति पञ्चदशसप्तदशैकविंशानामनुक्रमेणैवानुष्ठितत्वात् नापि पवमानेष्वसौ शङ्का यद्यस्मात् कारणात् पवमानास्त्रयोऽपि द्वात्रिंशस्तोमवत्त्वात् समाप्तेन कारणेन वैषम्यप्रयुक्तः संशरोनास्ति तेनोभयविधेषु स्तोत्रेषु यथापूर्वत्वमेव ननु वै परीत्यं अतोक्तदोषोद्भावनतत्परिहारः तैत्तिरीया अप्येवमामनन्ति संशरएषः स्तोमानामयथापूर्वं यद्विषमाः स्तोमाः एतावान्वै यज्ञः यावत् पवमानाः अन्तः-

श्लेष्मा वा अन्यत् यत्समा: पवमानास्ते संश्लेषेण यथापूर्वमिति त्रय: पवमाना इति यावानस्ति एतानेव मुख्यो यज्ञभाग: अन्यत्तु सर्वमन्त:श्लेष्माणं वै यज्ञमवधे: सम्बन्धमित्येतावदेव यस्मात् पवमानसाम्येन सर्वोदोष: परिहृत इत्यर्थ: ॥ ५ ॥

अभिषेचनीयस्योक्थसंस्थारूपत्वं विधत्ते ।

आत्मना वा अग्निष्टोमेनर्ध्नोत्यात्मना पुण्योभवत्यथ यदुक्थानि पशवो वा उक्थानि विडुक्थानि यदुक्थानि भवन्त्यनुसन्तत्या एव ॥ ६ ॥

अभिषेचनीयस्य य: पूर्वभागोऽग्निष्टोमाख्यो द्वादशस्तोत्रयुक्त: सोऽयं सर्वेषां सोमयागानां प्रकृतित्वादात्मा देहस्थानीय: तेनैवेह लोके यजमान: समृद्धो भवति परलोके पुण्यफलोपेतो भवति अथ द्वादशस्तोत्रानन्तरं यदुक्थानि यानि त्रीण्युक्थाख्यस्तोत्राणि सन्ति तान्युक्थानि यज्ञशरीरस्थानीयादग्निष्टोमात् प्रसृतत्वेन गवाश्वादिपशुस्थानीयानि तथा विट्प्रजापुत्रभृत्यादिप्रजास्थानीयानि च अतस्तानि स्तोत्राणि पशूनां प्रजाया अविच्छेदायैव तस्मादभिषेचनीय उक्थसंस्थ इत्यभिप्राय: शाखान्तरे चायमर्थो विस्पष्टमाम्नायते आत्मनैवाग्निष्टोमेनर्ध्नोति आत्मना पुण्यो भवति प्रजा वा उक्थानि पशव उक्थानि यदुक्थो भवत्यनुसन्तत्यै इति ॥ ६ ॥

बहिष्पवमानस्यादावतिदेशप्राप्तप्राकृतमन्त्रबन्धनाय मन्त्रान्तरं विधत्ते ।

वायो शुक्रो अयामित इति वायव्या प्रतिपद्भवति वाग्वै वायुर्वाचमेवास्य यज्ञमुखे युनक्ति तयाभिषिच्यते सर्वस्या एव वाचः सूयते सर्वा एनं वाचो राजेति वदन्ति ॥ ७ ॥

वायो शुक्र इत्यादि पादस्तृचस्य प्रतीकभूतः सोऽयं तृचो बहिष्पवमानस्य प्रतिपत्प्रारम्भसाधनं प्रतिपद्यते प्रारभ्यते अनया तृचरूपया चेति व्युत्पत्तेर्वायुर्देवता यस्याः प्रतिपदः सा वायव्या कौष्ठेन वायुना वागुच्चार्यत इति वायोर्वाग्रूपत्वोपचारः तथा सति वायव्यमन्त्रेण प्रारभमाण उद्गाता यजमानस्य यज्ञारम्भे वाग्देवतामेव संयोजयति तत्संयोजने तया वाग्देवतया अभिन्नभिषेचनीयक्रतावभिषिक्तो भवति तद्देवतानुग्रहात् सर्वप्राण्युच्चारितायाः सर्वस्याः मन्त्ररूपाया वाचः सम्बन्धी सन्नेवायं सूयतेऽभिषिच्यते अयमर्थः प्रत्यक्ष एव यतः सर्वप्राणिमुखोद्गताः सर्वा वाचः एनं राजेत्येव व्यवहरन्ति शाखान्तरे त्वन्य एव तृचो वायुदेवताक एवमाम्नायते उपत्वाजामयोगिर इति प्रतिपद्भवतीति वाग्वै वायुर्वाच एवैषोऽभिषेकः सर्व्वासामेव प्रजानां सूयते सर्व्वा एनं प्रजा राजेति वदन्ति ॥ ७ ॥

वायो शुक्र इत्येतस्मात् तृचादूर्द्ध्वं सम्भार्य्याख्या एकैकश आम्नाता ऋचो विधत्ते ।

सम्भार्य्या भवन्ति पृष्ठान्येव ताभिर्य्युनक्ति यज्ञा-

नादेवत्यास्तेन युनक्ति वीर्य्यं वै पृष्ठानि वीर्य्य एवा-ध्यभिषिच्यते ॥ ८ ॥

संभ्रियन्ते स्वयमेकैकाः सत्यस्तृचस्थाने सम्यक्प्रयुज्यन्ते ताः सम्भार्य्याः उपत्वाजामयोगिर इत्याद्या अग्न आयूंषीत्यन्ताः षट्संख्याका ऋचस्ताभिः षड्भिर्ऋग्भिरनुष्ठिताभिरयमुद्गाता पृष्ठस्तोत्रसामान्ये च योजितवान् भवति षट्संख्यासामान्यात् बृहद्रथन्तरवैरूपवैराजशाक्वररैवताख्यानि षट् पृष्ठसामानि यद्यनेन कारणेन सम्भार्य्या नानादेवताकाः पृष्ठानि च तथा विदधाति एतेन कारणेन पृष्ठत्वयोजनं सम्भवति पृष्ठानाञ्च सामर्थ्यहेतुत्वात् वीर्य्यत्वं अतः सम्भार्य्यापाठेन यजमानो वीर्य्येऽधिश्रित्याभिषिच्यते ॥ ८ ॥

ब्रह्मवादिनां दोषोद्भावनं दर्शयति।

यन्ति वा एते यज्ञमुखादित्याहुर्य्ये सम्भार्य्याः कुर्व्वत इति ॥ ९ ॥

य उद्गातारः सम्भार्य्याः स्तोत्रमध्येऽकुर्व्वत एते यज्ञमुखरूपाद् बहिष्पवमानाद्यन्ति विभ्रष्टा भवन्ति एकैकामृचमाश्रित्य तृचपरित्यागएव भ्रंशः इतिशब्दो दोषसमाप्त्यर्थः ॥ ९ ॥

तं दोषं परिहरति।

यत्प्रवत्स्व वाचो अग्रिय इति तेन यज्ञमुखान्न-यन्ति ॥ १० ॥

यद्येन कारणेन सम्भार्य्याभ्य ऊर्द्धं पवस्वेत्येतं तृचं पठन्ति तेन कारणेन यज्ञमुखादृभ्रंशोनास्ति तस्मादयं तृचः पठ्यत इत्यर्थः एतौ दोषपरिहारौ शाखान्तरेऽप्युक्तौ यन्ति वा एते यज्ञ-मुखात् ये सम्भार्य्या अब्रुवन् यदाह पवस्व वाचो अग्रिय इति तेनैव यज्ञमुखान्नयन्तीति ॥ १० ॥

अन्यं तृचं विधत्ते ।

दविद्युतत्यारुचेति छन्दसाᳬ रूपं छन्दाᳬस्येवास्य यज्ञमुखे युनक्ति तैरभिषिच्यते ॥ ११ ॥

दवीत्यस्य मन्त्रस्य छन्दोरूपत्वं षष्ठाध्यायस्य नवमखण्डे एव पठितं दविद्युतत्यारुचेति वै गायत्र्या रूपं परिष्टोभन्त्येति त्रिष्टुभः क्रपेत्यनुष्टुभः सोमाः शुक्रागवाशिर इति जगत्याः सर्वेषां वा एषां छन्दसां रूपमिति स्पष्टमन्यत् ॥ ११ ॥

तृचान्तरं विधत्ते ।

एतमुत्यं दशक्षिप इत्यादित्या आदित्या वा इमाः प्रजास्तासामेव मध्यतः सूयते ॥ १२ ॥

तासु ऋक्षु सनोभगाय पूष्णे पवस्वेत्येवमादित्यनाम्नः श्रव-णादादित्या आदित्यदेवताका एताः तथा प्रजा अप्यदिते-रुत्पन्नत्वादादित्याः तत आदित्यदेवताकस्य तृचस्य पाठादा-दित्यरूपाणां प्रजानाम्मध्ये एवाभिषिच्यते एतदपि शाखान्त-रेऽभिहितं एतमुत्यं दशक्षिप इत्याह आदित्या वै प्रजाः प्रजानामेवैतेन सूयत इति ॥ १२ ॥

तृचान्तरं विधत्ते ।

पवस्वेन्दो वृषासुत इति वृषण्वत्यो भवन्ति त्रिष्टुभोरूपं वीर्य्यं वै त्रिष्टुप् वीर्य्य एवाध्यभिषिच्यते ॥१३॥

वृषन्शब्दस्य विद्यमानत्वादेता ऋचो वृषण्वत्यः यद्यप्येता गायत्र्यः तथापि वीर्य्यसम्पादकत्वात् फलतस्त्रिष्टुभोरूपं भवन्ति त्रिष्टुभश्चेन्द्रियवीर्य्यहेतुत्वं सर्ववेदप्रसिद्धं ॥ १३ ॥

पञ्चर्चं सूक्तं विधत्ते ।

उत्ते शुष्मास ईरत इत्युद्वत्यो भवन्त्युद्वद्वा अनुष्टुभो रूपमानुष्टुभो राजन्यस्तस्मादुद्वत्यो भवन्ति ॥ १४ ॥

आदावुच्छब्दश्रवणात्ता उद्वत्यः अनुष्टुभ्यप्यन्यत्र क्वचिदुत्शब्दः श्रुतः उद्यन्नद्य मित्रमह इति तत्सामान्यादेतासामनुष्टुप्रूपत्वं अनुष्टुप् छन्दसां प्रतिष्ठेति श्रुतेः यथा छन्दसां मध्येऽनुष्टुभ उत्तमत्वं तथा राज्ञः सर्वपालकत्वेनोत्तमत्वादानुष्टुभत्वं तस्मादनुष्टुप्द्वारकात् सम्बन्धाद्राजयज्ञ उद्वत्यः कार्य्याः शाखान्तरेऽप्येतदाम्नातं उद्वतीर्भवन्ति उद्वद्वा अनुष्टुभो रूपमानुष्टुभो राजन्यस्तस्मादुद्वत्यो भवन्तीति ॥ १४ ॥

तृचान्तरं विधत्ते ।

पवमानस्य ते कव इति प्राणानां क्लृप्त्यै ॥१५॥

मन्त्रे पवमानस्येति शुद्धिहेतुत्वं प्रतीयते प्राणाश्च शरीरे

शुद्धिहेतव: तदभावे शरीरस्याशुचिता अनेन साम्येनायं तृच: शरीरे प्राणानां सम्पादनाय भवति ॥ १५ ॥

तृचान्तरं विधत्ते।

अधत्त्वपापरिष्कृत इत्यनुष्टुप् प्रथमानुष्टुबुत्तमा वाग्वा अनुष्टुब् वाचैव प्रयन्ति वाचमभ्युद्यन्ति ॥ १६ ॥

अधत्त्वपेत्यस्मिन् तृचे क्रियमाणे वहिष्पवमानस्यादावन्ते चानुष्टुप् सम्पद्यते वायो शुक्रोइत्यादि अधत्त्वपेत्यन्त: तयो-रुभयोरनुष्टुबेव छन्द: वाचोऽनुष्टुप्त्वं पूर्व्वमेव प्रतिपादितं तस्मा-दाद्यन्तयोरीदृशौ तृचौ कुर्वाणा उद्गातारो वाचैव प्रयन्ति वाच-मभिलक्ष्य उद्यन्ति समापयन्तीत्यर्थ: अयमर्थ: शाखान्तरेऽप्या-म्नात: अनुष्टुप् प्रथमा भवति अनुष्टुबुत्तमा वाग्वा अनुष्टुब्वाचैव प्रयन्ति वाचोद्यन्तीति ॥ १६ ॥

तावेतौ तृचौ प्रकारान्तरेण प्रशंसति।

छिन्नमिव वा एतद्यदेकर्चौ यदेतावानुष्टुभौ तृचावभितो भवतो बहव: पुरएतारो भवन्ति बहव: पश्चापिन: ॥ १७ ॥

वहिष्पवमानस्य मध्ये सम्भाव्यौ एकर्चौ इति यदस्ति एत-देतेन स्तोत्रं विच्छिन्नमिव भवत्येव पूर्वोत्तरभाविनां तृचानां मध्ये व्यवधानात् तद्विच्छेदपरिहारार्थं स्तोत्रस्याभित आद्यन्त-योरेतावनुष्टुभौ तृचौ यदि भवत: तदा विच्छेददोषस्य परिहृत-

त्वाद्यजमानस्य पुरएतारः पुरस्तोगन्तारः सेवका बहवः सम्पद्यन्ते पश्चायिनः पृष्ठतः आप्नुवन्तो भृत्या बहवोऽपि भवन्ति ॥१७

अन्तिमं तृचं प्रकारान्तरेण प्रशंसति ।

सौर्य्यानुष्टुबुत्तमा भवति स्वर्गस्य लोकस्य समष्ट्यै ॥ १८ ॥

उत्तमा अधत्तपेत्येषा सौरी सूर्य्यदेवताका सूर्य्यस्य स्वर्गे तिष्ठति तस्मादयं तृचः स्वर्गप्राप्त्यै सम्पद्यते तद्दृचि विवस्वतोधियेति श्रुतत्वादिति शाखान्तरेऽप्येतदुक्तं सूर्य्यस्यानुष्टुबुत्तमा भवतीत्यादिना ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अभिषेचनीये वक्तव्या विशेषा उक्ताः अथ दशपेये वक्तव्यान् विशेषान् विधातुं तद्विधिस्तावकमर्थवादमाह ।

वरुणस्य वै सुषुवाणस्य भर्गोऽपाक्रामत्स त्रेधापतद्भृगुस्तृतीयमभवच्छ्रायन्तीयं तृतीयमपस्तृतीयं प्राविशत् ॥ १ ॥

सुषुवाणस्याभिषेचनीयस्य क्रतावभिषिक्तस्य वरुणस्य भर्गः इन्द्रियसामर्थ्यं तस्माद्वरुणादपगतं त्रेधापतितमभूत् तस्य प्रति-

तस्य भर्गस्य यत्तृतीयमंशरूपं तद्भृगुनामकः ऋषिरभवत् अत एव भृगोर्वरुणपुत्रत्वमन्यत्र श्रूयते भृगुर्वै वारुणिः वरुणं पितर-मुपससारेति अन्यत्तृतीयमंशस्वरूपं आयन्तीयनामकं सामा-भवत् आयन्तइव सूर्य्यमित्यस्यामृच्युत्पन्नं साम आयन्तीयं अतः-परं तृतीयमंशरूपमपः प्राविशत् ॥ १ ॥

अथ विवक्षितान् विशेषान् विधत्ते ।

यद्भार्गवो होता भवति तेनैव तदिन्द्रियं वीर्य्य-माप्त्वावरुन्धे यत् आयन्तीयं ब्रह्मसाम भवति तेनैव तदिन्द्रियं वीर्य्यमाप्त्वावरुन्धे यत् पुष्करस्रजं प्रति-मुञ्चते तेनैव तदिन्द्रियं वीर्य्यमाप्त्वावरुन्धे ॥ २ ॥

भृगुगोत्रसमुत्पन्नः पुरुषो दशपेयक्रतौ होता भवेदिति यद्-स्ति तेनैव भृगुगोत्रसम्बन्धेनैव तत्पतितं वरुणस्येन्द्रियं तत्साम-र्थ्यञ्च प्राप्य अवरुन्धे स्वाधीनं कुरुते ब्रह्माणमभिलक्ष्य गातव्यं साम ब्रह्मसाम तच्चात्र आयन्तीयं भवेत् पुष्करस्रजं तामरस-पुष्पाणां मालां यजमानः प्रतिमुञ्चत एतेन त्रितयेन ह्यस्यम-पीन्द्रियसामर्थ्यं अवरुद्धं भवति अत्राध्वर्य्युब्राह्मणमेवमाम्ना-यते जामि वा एतत् कुर्व्वन्ति यत्सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरीकस्रजं प्रयच्छन्त्यजामितायाः अङ्गिरसः स्वर्गं लोकं यन्तः अप्सु दीक्षातपसी प्रावेशयन् तत् पुण्डरीकम-भवत् यत्पुण्डरीकस्रजं प्रयच्छति साक्षादेव दीक्षातपसी अव-

बन्ध इति अध्वर्य्युसूत्रमप्येवं पठ्यते दीक्षायास्थाने द्वादश-पुण्डरीकां स्रजं प्रतिमुञ्चत इति ॥ २ ॥

तस्याः स्रजः कालविशेषं विधत्ते ।

दशमो भवति ॥ ३ ॥

अभिषेचनीयादुत्तरमारभ्य दशसु दिनेषु क्रमेण दशसं-ख्याकानि संसृप्संज्ञकानि हवींषि दशसु दिनेष्वनुष्ठेयानि तस्मिन् दशमेऽहन्यपराह्णे पुष्करस्रजःप्रतिमोकः ततः स्रगेषा दिनगताया दशसंख्यायाः पूरकत्वात् दशमीत्युच्यते उक्तं हि सूत्रकृता तद्दीक्षित एव दशाहे ततो दशपेयेन यजेतेति ॥ ३ ॥

अपरं विशेषं विधत्ते ।

दश चमसा दश चमसाध्वर्य्यवो दशदश चमसमभि-यन्त्यादशमात् पुरुषादन्वाख्याय प्रसर्पन्ति दशसम्द्धो ह्येष यज्ञ एनं वाव ते तद्यज्ञमन्वैच्छन्य एतेन यजत एतदेवेन्द्रियं वीर्य्यमाप्त्वास्मिन् दधाति ॥ ४ ॥

यजमानचमसव्यतिरिक्ताः दशसङ्ख्याका अत्र सोमचमसाः स्युस्तेषाञ्च सोमचमसानां हर्त्तारो दशसंख्याकाश्चमसाध्वर्य्यवो भवन्ति एकैकं यञ्चमसं दशदशब्राह्मणाः पानार्थमभियन्ति तत्रैकैकः पुरुषः स्वकीयान् पित्रादीन् दशपुरुषपर्य्यन्तानन्वाख्याय पानार्थं प्रसर्पेत् तदुक्तं सूत्रकृता ते दशमात्दैशपितॄनित्यन्वा-ख्याय प्रसर्पेयुरिति अध्वर्य्युसूत्रमपि श्वोभूते पात्रसादनकाले

दशचमसानधिकान् प्रयुनक्ति तानुन्नयनकाले उन्नयति भक्षण-
काले दशदशैकस्मिंश्च सोमे ब्राह्मणाः सोमपाः सोमं भक्षयन्त्या-
दशमात् पुरुषादविच्छिन्नसोमपीथा इति तैत्तिरीयब्राह्मण-
मपि दशपेयो भवति शतं ब्राह्मणाः पिबन्तीति तदीयमनुब्रा-
ह्मणमप्येवमाम्नातं दशपेयो भवति अन्नाद्यस्यावरुध्यै शतब्रा-
ह्मणाः पिबन्ति शतायुः पुरुषः शतेन्द्रिय आयुषा एवेन्द्रिये प्रति-
तिष्ठतीति हि यस्मादेष दशपेयाख्यो यज्ञोदशसमृद्धः दशभिश्च-
मसैर्युक्तत्वात् समृद्धो भवति तत्तस्मात् कारणात्ते समृद्धिकामा
एतमेव यज्ञमन्वैच्छन् अन्विष्यादनुष्ठितवन्त इत्यर्थः यः पुमाने-
तेन दशपेयेन यजते अस्मिन् यजमाने स उद्गाता एतदेव लोक-
प्रसिद्धं चक्षुरादीन्द्रियं तद्गतवीर्य्यञ्च प्राप्य स्थापयति ॥ ४ ॥

विशेषान्तरं विधत्ते ।

सर्वः सप्तदशो भवति द्वादशमासाः पञ्चर्त्तवः स वै संवत्सरः संवत्सरादेवेन्द्रियं वीर्य्यमाप्त्वावरुन्धे॥ ५ ॥

अस्मिन्दशपेयक्रतौ यानि स्तोत्राणि सन्ति तेषु सर्व्वेषु
स्तोत्रेषु सर्वोऽपि स्तोमः सप्तदशाख्यो भवेत् कार्त्तिकाद्याः द्वाद-
शमासा वसन्ताद्याः पञ्चर्त्तवः हेमन्तशिशिरयोः समासेनेति
श्रुत्यन्तराद्दतुषु पञ्चसंख्या स वै स एव द्वादशमासात्मकः पञ्चर्त्तु-
रूपः सप्तदशसंख्योपेतः संवत्सरो भवति अतः संख्यासाम्येना-
स्मात् संवत्सररूपात् सप्तदशस्तोमादेव इन्द्रियञ्च तद्गतवीर्य्यं प्राप्य
स्वाधीनं करोति ॥ ५ ॥

पूर्वोक्तां यजमानेन स्वकण्ठे प्रतियुक्तां पुष्करस्रजमर्थवादेन स्तौति ।

इन्द्रो वृत्रमहंस्तस्येयं चित्राण्युपैद्रूपाण्यसौ नक्षत्राणामवकाशेन पुण्डरीकञ्जायते यत् पुष्करस्रजं प्रतिमुञ्चते वृत्रस्यैव तद्रूपं क्षत्रम् प्रतिमुञ्चते ॥ ६ ॥

त्वाष्ट्रनामकेन केनचिद्विशिष्टब्राह्मणेनोत्पादित इन्द्रस्य शत्रुः कश्चिद्वृत्रनामकः तं कदाचिदिन्द्रो हतवान् यस्य हतस्य वृत्रस्य शरीरगतानि यानि नीलपीतस्थूलसूक्ष्माद्यवयवरूपाणि सन्ति इयं पृथिवी तानि सर्वाणि रूपाणि उपैत् प्राप्नोत् असौ द्यौर्नक्षत्राणां सम्बधीनि दृश्यमानानि वृत्रस्य चित्ररूपाण्याप्नोत् अवकाशेन द्यावापृथिव्योर्मध्यगतेनान्तरीक्षेण वृत्ररूपात्मकमेव पुण्डरीकं जायते एवं सति यद्यदा यजमानः पुष्करस्रजं प्रतिमुञ्चते तदानीं वृत्रस्यैव सम्बन्धि तत्सर्वं रूपं क्षत्रियजातिर्य्यजमानः प्रतिमुञ्चते ॥ ६ ॥

तस्यां स्रजि पुष्कराणां संख्यां विधत्ते ।

द्वादशपुष्करा भवति द्वादश मासाः संवत्सरः संवत्सरेऽन्तर्भूतञ्च भव्यञ्च भूतेन चैवैनं भव्येन च समर्द्धयति ॥ ७ ॥

द्वादशभिः पुष्करैः स्रगियन्निष्पाद्या तथा सति संवत्सरगतया माससंख्यया साम्यं भवति संवत्सरमध्ये वर्त्तमानादस्मा-

द्दिवसात् अतीतकालसम्बन्धि भविष्यकालसम्बन्धि च वस्तुजातञ्च भूतेन तेन चोभयेन वस्तुजातेन यजमानं समृद्धं करोति ॥७॥

अथ सर्वेषामृत्विजां सम्बन्धीनि द्रव्याणि विधित्सुरादौ सुवर्णमयीं स्रजं विधत्ते ।

स्रगुद्गातुस्सौर्य्य उद्गाता न वै तस्मै व्यौच्छदथो-व्येवास्मै वासयति ॥ ८ ॥

सौवर्णी स्रगुद्गातुर्देया यथा सूर्यः सर्वञ्जगद्व्यनक्ति तथा सामवेदार्थं सर्वमुद्गाता व्यनक्ति तस्मात्सौर्य्य उद्गाता सौवर्ण-स्रजोधारणात्पूर्वं तस्मादुद्गाते न वै व्यौच्छत् प्रकाशाभावादुषः-कालो नाभूत् अथ सौवर्णस्रजधारणानन्तरं अस्मा उद्गाते विवासयत्येव प्रकाशसद्भावादुषःकालं सूर्य्यो विशेषेणास्मा-उद्गाते सम्पादयत्येव ॥ ८ ॥

सुवर्णफलकरूपं रुक्मनामकमाभरणं विधत्ते ।

रुक्मोहोतुराग्नेयो होतायो अमुमेवास्मा आ-दित्यमुन्नयति ॥ ९ ॥

होतुरुपरिधारणयोग्यो रुक्मो भवेत् अग्निर्वै देवानां हो-तेति श्रुत्यन्तरादाग्नेयोहोता भवति अतः प्रकाशरूपो रुक्मस्तस्य योग्यः अथो अपि च अस्मै होत्रर्थममुमेव रुक्मरूपमादित्यमुन्न-यति ऊर्द्ध्वदेशं प्रापयति ॥ ९ ॥

अथ द्रव्यान्तरं विधत्ते ।

प्राकाशावध्वर्य्योर्य्यमाविव ह्यध्वर्य्यू अथो चक्षुषी एवास्मिन् दधाति ॥ १० ॥

प्राकाशौ आभरणविशेषाविति केचित् सौवर्णदर्पणावित्यन्ये अध्वर्य्युप्रतिप्रस्थातारौ तावुभौ भवेतां एकस्मिन्नुदरे युगपदुत्पन्नौ भ्रातरौ यमौ तद्वदेता उभावध्वर्य्युविशेषौ तस्मात्तयोः साम्येन प्राकाशदानं युक्तं प्राकाशयोर्दानेनास्मिन् यजमाने प्रतिग्रहीतरि वा दृष्टिपाटवं भवति ॥ १० ॥

अश्वदानं विधत्ते।

अश्वः प्रस्तोतुः प्राजापत्योऽश्वः प्राजापत्यः प्रस्तोताथो प्रेव ह्यश्वः प्रोथति प्रेव प्रस्तोता स्तौति ॥११॥

प्रजापतिसम्बन्धिचक्षुर्जन्यत्वादश्वः प्राजापत्यः तथा च श्रुत्यन्तरं प्रजापतेरक्ष्यश्वयत्तत्परापतत्तदश्वोऽभवदिति प्रस्तोता प्रथमतो गायति प्रजापतिश्च प्रथमतः सृजति ततः प्रस्तोता प्राजापत्यः अथो अपि च भूमौ विलुठन्नश्वः सहसाभ्युत्थाय प्रेव प्रकर्षेणैव प्रोथयति प्रशब्दं गात्रचालनं करोति प्रस्तोतापि प्रकर्षेणैव स्तुतिं करोति तत्तस्याश्वो योग्यः ॥ ११ ॥

धेनुदानं विधत्ते।

धेनुः प्रतिहर्त्तुः पय एवास्मिन् दधाति ॥ १२ ॥

धेनोर्हि क्षीरसम्पादनं प्रसिद्धं ॥ १२ ॥

वन्ध्यायागोर्दानं विधत्ते।

वशा मैत्रावरुणस्य वशम्मा नयादिति ॥ १३ ॥

मां यजमानं प्रति समस्तं वस्तुजातं वशं स्वाधीनं नयात् नयतु इत्यनेनाभिप्रायेण वन्ध्यादेया देयवस्तुफलयोर्वशशब्द-साम्यं द्रष्टव्यं ॥ १३ ॥

ऋषभो ब्राह्मणाच्छंसिनो वीर्य्यं वा ऋषभो वीर्य्यमेवास्मिन् दधाति ॥ १४ ॥

सेचनसमर्थः पुङ्गव ऋषभः तस्य शक्त्याधिक्येन वीर्य्यरूपत्वं ॥१४

वस्त्रदानं विधत्ते ।

वासः पोतुः पवित्रत्वाय ॥ १५ ॥

वस्त्रेण हि जलादीनि पूयन्त इति तस्य पवित्रत्वं ॥ १५ ॥

स्थूलशाटीदानं विधत्ते ।

वरासी नेष्टुरनुलम्बेव ह्येषा होत्रा ॥ १६ ॥

कार्प्पासापेक्षया हीना इत्कलचा निर्म्मिता सेयम्वरासी प्रस्थितयाज्या प्रभृतिषु प्रयोगविशेषेषु नेष्टुरनुलम्बेव पश्चालम्बन इव भाषते हि यस्मादेषा वरासी होत्रा होतुर्नेष्टुः सम्बन्धिनी अत सूत्रकारः वासः पोतुरिति कार्प्पासं स्याद्वरासी नेष्टुरिति क्षौमी स्यादिति ॥ १६ ॥

स्थूलस्य यवपूर्णस्य शकटस्य दानं विधत्ते ।

स्थूरियवाचितमच्छावाकस्य स्थूरिरिव ह्येषा

होत्रायोनिर्व्वरुणत्वायैव यवा न वै तर्हि सदस्यां दक्षिणा अभ्यभवन्नथो अस्य त एव तेनाभीष्टाः प्रीता भवन्ति ॥ १७ ॥

होता होमहेतोरच्छावाकस्य सम्बन्धिनी एषा शकटप्रतिग्रहक्रिया स्थूरिरिव हि पूर्व्वोक्तवस्त्रप्रतिग्रहाद्यपेक्षया स्थूलेव दृश्यते हि शकटस्य प्रौढत्वात् अथोऽपिच शकटस्थिता यवाः निर्व्वरुणत्वाय वरुणकृतबाधपरिहाराय सम्पद्यन्ते कथमिति चेत्तदुच्यते तर्हि तस्मिन् काले दशपेयक्रतुप्रवृत्तेः पुरा तत्तेयवाः अस्यामच्छावाकाय प्रतिग्रहक्रियायां दक्षिणा अभिलक्ष्य न वै अभवन् क्रत्वन्तरेषु यवानां दक्षिणायोग्यत्वन्नासीदित्यर्थः अथो अनन्तरमेतत् क्रत्वनुष्ठानवेलायामस्य यजमानस्य तएव यवाः तेन दानेन अभीष्टाः अभिगताः इष गताविति धातुः प्रीताः वरुणस्य प्रीतिहेतवो भवन्ति यवानां वरुणप्रियत्वं मन्त्रब्राह्मणयोरवगम्यते यवोसि धान्यराजस्त्वं वारुणोमधुसंयुतः इति मन्त्रः वारुणं यवमयञ्चरुमिति ब्राह्मणं तस्माद्यवदानेन वरुणकृतोपद्रवपरिहारोयुक्तः ॥ १७ ॥

बलीवर्द्दानं विधत्ते ।

अनड्वानग्नीधोयुक्तेः ॥ १८ ॥

अनड्वान् बलीवर्दो यः शकटं वहति अग्नीधइत्येव नामक

ऋत्विगपि यच्च वहति अतः साद्दश्यादनस्य युक्त्यै योगायान-डुद्दोदानं ॥ १८ ॥

अजदानं विधत्ते ।

अजः सुब्रह्मण्यायै ॥ १९ ॥

सुब्रह्मण्यायै सुब्रह्मण्यस्य छागोयोग्यः ॥ १९ ॥

स्त्रीपुरुषयोगयोर्गवोदानं विधत्ते ।

वश्मतर्य्युन्नेतुः साण्डः स्त्रिवत्सो ग्रावस्तुतोमिथुनत्वाय ॥ २० ॥

अत्यन्ततरुणीगौर्वत्सतरी साण्डोलम्बमानाण्डयुक्तः त्रिवत्सः संवत्सरत्रयवयोयुक्तः ॥ २० ॥

गर्भिणीनां गवां दानं विधत्ते ।

द्वादशपष्ठौह्यो गर्भिण्यो ब्रह्मणो द्वादशमासाः संवत्सरः संवत्सर एव प्रतितिष्ठत्यथ यद्गर्भिण्यो वाग्वै धेनुर्म्मन्त्रो गर्भो वाच्येवास्य मन्त्रं दधात्यामन्त्रणीयो भवत्यथ यद्धेनुभव्या द्वादश पयांसि तान्येवास्मिन् दधाति तस्मादाज्ञः पयस्वी राजा पुण्य इति ॥ २१ ॥

पष्ठौह्यः प्रथमगर्भोपेता तस्यैवार्थस्य वैराज्याय गर्भिण्य इत्यनुवादः द्वादशसंख्यया द्वादशेऽपि संवत्सरे यजमानः प्रति-

तिष्ठति अथानन्तरं यद्दु यदपि गर्भिणीत्वमस्ति तद्दते यजमानस्य प्रतिगृहीतुर्वा वाचि मन्त्रं स्थापयति धेनोर्वाग्रूपत्वाद्गर्भस्य मन्त्ररूपत्वात् आमन्त्रणीयः पूजार्थं सर्वैरन्वेषणीयो भवति अथानन्तरं यद्धेनुभव्यान्या एताधेनुश्रेष्ठाः द्वादशसंख्याकाः सन्ति ताभिर्द्वादशविधानि तान्येव पयांसि तत्तन्मांसभेदादीषद्भिन्नरसानि क्षीराण्येव यजमाने सम्पादितानि भवन्ति तस्मादेवम्बिधफलोपेतत्वाद्यजमानं प्रति लौकिका एवमाहुः राजसूययाजी राजा पयस्वी प्रशस्तपयाः पुण्यः पावन इति तदेतद्दानजातं शाखान्तरेष्वाम्नातं प्राकाशावध्वर्य्यवे ददाति स्रजमुद्गात्रे रुक्मं होत्रेऽश्वं प्रस्तोतृप्रतिहर्तृभ्यां द्वादश पष्ठौह्यो ब्रह्मणे वशां मैत्रावरुणाय ऋषभं ब्राह्मणाच्छंसिने वाससी नेष्टृपोतृभ्यां स्थूरियवाचितमच्छावाकाया-नडाहमग्नीध इति ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

नवमः खण्डः।

अथ दशमः खण्डः।

उक्तावभिषेचनीयदशपेयौ, तत ऊर्द्धं केशवपनीयः, कर्त्तव्यः पचस्तस्मिन्नेव, केशवपनीयेन यजेतेति अभिषेचनीयदशपेयकेशवपनीयानां केचिद्धर्म्मा अस्मिन् खण्डे सूयन्ते, तत्राभिषेचनीया-

गतानां सम्भार्य्याणां साम्नाञ्च स्तुतिं वक्तुमादौ तावद्दोषमुपन्यस्यति ।

यो वै सवादेति नैनꣳ सव उपनमत्यथ यः सामभ्य एति पापीयान् सुषुवाणो भवति ॥ १ ॥

सवशब्दोऽभिषेकं तद्युक्तं क्रतुं व्याचष्टे सवनमभिषेचनं सवः सूयते अभिषिच्यते यत्र स सव इति द्वेधा व्युत्पन्नत्वात् योवै पुमान् स 'वादेति अभिषेकादपगच्छति एनमभिषेकरहितं पुमांसं सवोऽभिषेकयुक्तः क्रतुर्नोपनयति न प्राप्नोति पूर्व्वविपरीत्येन सत्यभिषेके यद्यपि सामभ्योऽपगच्छति तदा सुषुवाणोऽभिषेकं कुर्व्वन्नपि सामराहित्येन शास्त्रीयात् न्यूनभावादसौ पापीयान् भवति ॥ १ ॥

उपन्यस्तदोषं परिहर्त्तुं पूर्व्वोक्तं सम्भार्य्याणां विधिमनुवदति ।

सम्भार्य्या भवन्ति पृष्ठान्येव ताभिर्य्युनक्ति ॥ २ ॥

पूर्व्ववद्व्याख्येयं ॥ २ ॥

सम्भार्य्याणां पृष्ठरूपत्वे सम्पादिते सति पृष्ठस्तोत्रेषु सामसद्भावात् सामान्यपि सम्पादितानि स्युरित्येतदाह ।

एतानि वाव सामानि यत् पृष्ठानि ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

दोषपरिहारं दर्शयति ।

यत् संभार्य्या भवन्ति तदेव सामभ्यो नैति ॥ ४ ॥

सम्भार्य्याणामनुष्ठानं यदस्ति तदेव तेनैवायं सामभ्यो नापगच्छति साम्नां सम्पादितत्वात् ततः शास्त्रीयएवाभिषेक इत्यर्थः ॥ ४ ॥

सामविशेषं प्रशंसति।

यानि देवराज्ञा सामानि तैरमुष्मिन् लोक ऋध्नोति यानि मनुष्यराज्ञान्तैरस्मिन्नुभयोरनयोर्लोकयोर्ऋध्नोति देवलोके च मनुष्यलोके च ॥ ५ ॥

देवेषु मध्ये ये राजसूयेनेष्टवन्तस्ते देवराजानः तैर्य्यानि दृष्टानि तानि देवराज्ञां सामानि सैन्धुक्षितं दैर्घश्रवसम्मार्यं काक्षीवतमित्यादीनि तैः स्वर्गसमृद्धिर्भवति मनुष्येष् मध्ये ये राजसूयेनेष्टवन्तः क्षत्रियर्षयस्ते मनुष्यराजानस्तैर्दृष्टानि मनुष्यराज्ञां सामानि दैवोदासं बाभ्रवं वैतहव्यमित्यादीनि तैर्म्मनुष्यलोके समृद्धिः उभयोरित्यादिरुक्तस्यैवोपसंहारः यो वै सवादेतीत्यादिकं शाखान्तरेऽप्येवमेवाम्नातं ॥ ५ ॥

साम्नां संख्यां तदुपयुक्तमुपोद्घातमाह।

साम त्रिष्टुभ्यध्यभिषिच्यते वीर्य्यं वै सामत्रिष्टुप् वीर्यं एवाध्यभिषिच्यते ॥ ६ ॥

सामरूपा त्रिष्टुप् सामत्रिष्टुप् तत्राधिश्रितो राजाभिषि

च्यते सामत्रिष्टुभः प्रयोगे सत्यभिषिञ्चेदित्यर्थः त्रिष्टुभो वीर्य्यत्वं सर्व्ववेदप्रसिद्धं अतो वीर्य्य एवाभिषिक्तो भवति ॥ ६ ॥

संख्यासामान्येन साम्नां त्रिष्टुप्त्वोपचारं दर्शयति ।

एकादश राजसामानि भवन्त्येकादशाक्षरा त्रिष्टु-बोजोवीर्य्यं त्रिष्टुबोजस्येव वीर्य्येऽध्यभिषिच्यते ॥ ७ ॥

वीर्य्यशब्दस्यैवौजइति व्याख्यानं स्पष्टमन्यत् ॥ ७ ॥

अभिषेचनीये त्रिवृत्स्तोमराहित्यं प्रशंसति ।

यत् त्रिवृतमभिषेचनीये कुर्य्युर्ब्रह्म क्षत्रायापि दध्युर्य्यत्त्रिवृतमुद्धरन्ति ब्रह्म तत् क्षत्रादुद्धरन्ति तस्मा-द्भरतां प्रतिदण्डा ब्राह्मणा नहि तं त्रिवृतमभिषेच-नीये कुर्वन्ति ॥ ८ ॥

यद्यपि त्रिवृत्स्तोममुद्गातारोऽभिषेचनीये क्रतौ कुर्य्युः तदानीं क्षत्राय राज्ञोत्कर्षार्थं ब्रह्म ब्राह्मणजातिं अपि दध्युः आच्छा-दयेयुः त्रिवृत्स्तोमो ब्राह्मणजातिस्वरूपः तयोः प्रजापतिमुख-जत्वसाम्यात् तथा सति राजक्रतौ प्रधानभूते त्रिवृत्स्तोमस्या-ङ्गत्वेन ब्राह्मणजातेरवज्ञा स्यात् यद्यपि त्रिवृत्स्तोममभिषेच-नीयादुद्धरन्ति तत्र न प्रयुञ्जते तत्तेन प्रयोगाभावेन ब्रह्म ब्राह्मणजातिं क्षत्रादुद्धरन्ति क्षत्रियजातावनन्तर्भाव्य तदवज्ञां परिहरन्ति यस्माद्ब्राह्मणजातेर्नीचत्वं परिहृतं तस्माल्लोके भरतां भरणं कुर्व्वतां क्षत्रियाणां प्रतिदण्डा भवन्ति धनापहा-

रादिना राजभिर्दण्ड्यमाना निन्दाशापादिना राजसु प्रतिकूल-दण्डयुक्ता भवन्ति न खलु तेभ्यो बिभ्यति हि यस्मात्कारणात्ते ब्राह्मणा अभिषेचनीये त्रिवृत्स्तोमन्न कुर्व्वन्ति तस्माद्भयराहित्य-मुपपन्नं ॥ ८ ॥

त्रिषु क्रतुषु स्तोमव्यवस्थां दर्शयति ।

एकविंशोऽभिषेचनीयस्योत्तमः सप्तदशो दश-पेय एकविंशः केशवपनीयस्य प्रथमः क्षत्रं वा एक-विंशो विट् सप्तदशः क्षत्रेणैवास्मै विशमुभयतः परिगृह्णात्यनपक्रामुकास्माद्विट् भवति ॥ ९ ॥

अभिषेचनीयस्य द्वात्रिंशाः पवमानाः पञ्चदशान्याज्यानि सप्तदशानि पृष्ठान्येकविंशोऽग्निष्टोमः सोकथः एवं सत्येकविंश-स्तोम उत्तमो भवति दशपेयेतु स्तोमाः सर्व्वेऽपि सप्तदशा एव केशवपनीये त्वेकविंशं प्रातःसवनं सप्तदशं माध्यन्दिनं सवनं पञ्चदशं तृतीयसवनं सोकथं सरात्रिकं त्रिवृत्सन्धिकं एवं सत्येक-विंशः प्रथमो भवति सोऽयमेकविंशस्तोमः क्षत्रं वै वीर्य्याधिक्येन क्षत्रियजातिस्वरूप एव सप्तदशस्तोमस्तु विट्स्वरूपा क्षत्रियेण रक्षणीयायाः प्रजायाः स्वरूपं तत्र पूर्व्वोत्तरभाविनोरभिषेच-नीयकेशवपनीययोः क्रमेणावसान उपक्रमे चैकविंशस्तोमोयोऽस्ति यश्च मध्यभाविनि दशपेये सप्तदशस्तोमोऽस्ति तेषामेकविंशद्वय-सप्तविंशस्तोमानुष्ठानेनास्मै यजमानार्थं मध्यवर्त्तिनीं सप्तदश-स्तोमरूपां विशं प्रजां उभयतः पूर्व्वोत्तरक्रत्वोरवस्थितेनैक-

विंशस्तोमरूपेण बालेणैव परिस्टह्णाति परिपालयतीत्यर्थः तथा सति विट् प्रजा अस्माद्यजमानादनपक्रामुका कदाचिदप्यपक्रमशीला न भवति ॥ ९ ॥

इदानीं केशवपनं विधत्ते ।

यद्वै राजसूयेनाभिषिच्यते तत् स्वर्गं लोकमारोहति स यदिमं लोकन्नोपावरोहेदति जनं वा गच्छेदुद्वा माद्येद्यदेषोऽर्व्वाचीनः स्तोमः केशवपनीयो भवत्यस्य लोकस्यानुख्यानाय यथा शाखायाः शाखामालम्भमुपावरोहेदेवमेतेनेमं लोकमुपावरोहति प्रतिष्ठायै ॥ १० ॥

यद्वै यस्मिन्नेव काले यजमानो राजसूयगतेनाभिषेचनीयक्रतोरभिषेकेण युक्तो भवति तत्तस्मिन्नेव काले स्वर्गं लोकमारोहति प्राप्तइव भवति स यजमानो यद्यदि भूलोकं प्रति स्वर्गादवरोहणन्न कुर्य्यात् तदानीञ्जनं वातिगच्छेत् स्वकीयं बन्धुवर्गम्परित्यज्य यत्र क्वापि पलायिता वा भवेत् उन्माद्येद्वा बन्धुवर्गे स्थित एव सन् भ्रान्तिं वा प्राप्नुयात् तस्मात् स दोषः परिहर्त्तव्यः कथं परिहार इति चेत् तदुच्यते यद्यदि एषोऽनन्तरं करिष्यमाणः केशवपनीयः क्रतुरर्व्वाचीनः स्तोमो भवति एकविंशमारभ्य त्रिवृति समाप्यमानत्वादर्व्वाचीनस्तोमत्वं एतदीयानुष्ठानं स्वर्गात् प्रत्यवरोहणमिव वर्त्तत इति भूलोकस्यानुख्यानाय अत्यन्तं परित्याग उख्यानन्तद्राहित्यार्थम्भवति

यथा लोके वृक्षमारूढ़ोपरितनवर्त्तिन्याः शाखायाः काञ्चिदधोवर्त्तिनीं शाखामालम्बमाधारं कृत्वा अथ वा यामुत्क्रान्तोऽयं शब्दः आलम्ब्यालम्ब्य भूमावुपावरोहेत् एवमेतेन केशवपनीयेन प्रतिकूलस्तोमयुक्तेन भूलोकमुपारूढो भवति अतोऽयं केशवपनीयः प्रतिष्ठार्थं सम्पद्यते ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य
दशमः खण्डः।

अथ एकादशः खण्डः।

अथ पूर्व्वोक्तक्रतुगतसामविशेषस्तुतिर्व्युष्टिद्विरात्रविधिश्चोच्यते, तत्रादौ आयन्तीयं साम स्तौति।

इन्द्रोवृत्रमहन् स विष्वङ्वीर्य्येण व्यार्च्छत स एतच्छ्रायन्तीयमपश्यत्तेनात्मानꣳ समश्रीणादिन्द्रियेण वा एष वीर्य्येण व्यृध्यते यो राजसूयेनाभिषिच्यते वृत्रꣳ हि हन्ति यच्छ्रायन्तीयं ब्रह्मसाम भवति पुनरेवात्मानꣳ सꣳश्रीणाति ॥ १ ॥

इन्द्रः त्वाष्ट्रं वृत्रं हत्वा भ्रष्टवीर्य्यमात्मानं श्रायन्तीयेन साम्ना समश्रीणात् समस्करोत् सर्व्वतोभ्रष्टं वीर्य्यं समाहितवान् तद्दृष्टोऽपि राजसूययाजी पुमानिन्द्रियगतसामर्थ्येन वियुज्यते

हि यस्मात् कारणात् वृत्रस्वरूपभूतं पापं हन्ति तस्माद्वीर्य्य-वियोगः सम्भावितः यदि ब्राह्मणमुद्दिश्य श्रायन्तीयनामकं साम भवेत् तदानीं पुनरेवात्मानं राजसूययाजी संश्रीणाति समादधाति इन्द्रियवीर्य्यसमृद्धिं लभत इत्यर्थः ॥ १ ॥

यज्ञायज्ञीयं साम स्तौति ।

यज्ञायज्ञीयमनुष्टुभि भवति वाचा वा एष व्यृध्यते यो राजसूयेनाभिषिच्यते वृत्रꣳ हि हन्ति वागनुष्टुब्वाचो रसो यज्ञायज्ञीयं वाच्येवास्य रसं दधाति ॥२॥

अनुष्टुभि पुरोजितीव इत्यस्यामृचि यज्ञायज्ञीयाख्यं साम गातव्यं कुत इति चेत्तदुच्यते राजसूयेनाभिषिक्तः पुमान्मन्त्ररूपया वाचा वियुज्यते वृत्रवधस्य सद्भावात्तस्य पापस्यायं परिहारः अनुष्टुभो वाग्विशेषत्वाद्वाग्रूपत्वं तस्या वाचो यज्ञायज्ञीयाख्यं साम रसः सारं तेनाधिकफलजननात् तस्मादेतत्सामगानेनास्य यजमानस्य वाचि सारं स्थापयत्येव ॥ २ ॥

वारवन्तीयं साम प्रशंसति ।

वारवन्तीयमग्निष्टोम साम भवतीन्द्रियेण वा एष वीर्य्येण व्यृध्यते यो राजसूयेनाभिषिच्यते वृत्रꣳ हि हन्ति यद्वारवन्तीयमग्निष्टोम साम भवतीन्द्रियस्य वीर्य्यस्य परिगृहीत्यै ॥ ३ ॥

अश्वन्नत्वा वारवन्तमित्यस्यामृच्युत्पन्नं साम वारवन्तीयं तत्सामगानेन वियुक्तस्येन्द्रियसामर्थ्यस्य परिग्रहो भवति ॥ ३ ॥

सामस्तुतिमुपसंहरति ।

अश्वयन्वाव आयन्तीयेनावारयन्त वारवन्तीयेनेन्द्रियस्य वा एषा वीर्य्यस्य परिगृहीतिः ॥ ४ ॥

आयन्तीयसाम्ना नष्टं वीर्य्यं पुनरश्वयन् प्राप्नुवन् वीर्य्यवियोगं वारवन्तीयसाम्ना निवारितवन्तः तस्मादेषा सामद्वयस्यानुष्ठितिरेवेन्द्रियसामर्थ्यस्य परिगृहीतिर्भवति एतदेवाभिप्रेत्य शाखान्तरे शब्दद्वयनिर्व्वचनं कृतं यदश्वयन् तच्चायन्तीयस्य आयन्तीयत्वं यद्वारयन् तद्वारवन्तीयस्य वारवन्तीयत्वमिति ॥ ४ ॥

अथ व्युष्टिद्विरात्रं विधत्ते ।

*** अप्रतिष्ठितो वा एष यो राजसूयेनाभिषिच्यते यदा वा एतेन द्विरात्रेण यजतेऽथैव प्रतिष्ठा ॥ ५ ॥**

अभिषेकेण केवलं पाप्मानं हन्ति न पुनः प्रतिष्ठां लभते कदास्य प्रतिष्ठेति चेत् उच्यते यदा वै यस्मिन्नेव काले एतेन पुरतोवक्ष्यमाणेन द्विरात्राख्येन क्रतुना यजते अथैव तदानीमेव प्रतिष्ठा भवति यथा पादद्वयेन पुरुषस्य प्रतिष्ठा तथा द्विरात्रेणेत्यर्थः ॥ ५ ॥

तामेतां प्रतिष्ठामुपपादयति ।

यावन्ति संवत्सरस्याहोरात्राणि तावत्य एताः स्तोत्रीयाः संवत्सरएव प्रतितिष्ठति ॥ ६ ॥

एकसंवत्सरस्य षष्ट्यधिकशतत्रयमहानि रात्रयश्च तावत्यस्त-दुभयम्मिलित्वा विंशत्यधिकसप्तशतानि भवन्ति द्विरात्रक्रतौ स्तोत्रीया ऋचोऽपि संख्यया तावत्यएव सम्पद्यन्ते अतः संवत्सरसाम्यात् द्विरात्रानुष्ठानेन संवत्सररूपे काले प्रतितिष्ठत्येव स्तोत्रीयाणामृचां संख्या कथमिति चेत् सेयं द्विरात्रकल्पे पर्य्यालोच्य प्रथमेऽहन्यग्निष्टोमरूपे यानि द्वादशस्तोत्राणि द्वितीयेऽहन्यतिरात्ररूपे यान्येकोनत्रिंशस्तोत्राणि तेषु सर्व्वेषु विहितान् स्तोमविशेषानालोच्य द्रष्टव्या, शाखान्तरेऽप्ययमर्थः सर्व्वोऽप्येवमेवाम्नातः अप्रतिष्ठितो वा एष इत्याहुः यो राजसूयेन यजत इति यद्वा वा एतेन द्विरात्रेण यजतेऽथैव प्रतिष्ठा अथ संवत्सरमाप्नोति यावन्ति संवत्सरस्याहोरात्राणि तावत्य एताः स्तोत्रीयाः अहोरात्रेष्वेव प्रतितिष्ठतीति ॥ ६ ॥

द्विरात्रावयवाहर्विशेषौ विधत्ते ।

अग्निष्टोमः पूर्वमहरतिरात्र उत्तरन्नानैवाहोरात्रयोः प्रतितिष्ठति ॥ ७ ॥

एकेनाह्ना निष्पाद्यः सोमयागोऽहःशब्देनोपलक्ष्यते तत्र प्रथममहरग्निष्टोमरूपं उत्तरन्त्वहरतिरात्ररूपं एतयोर्द्विविधयोरह्नोरनुष्ठितत्वादहनि रात्रौ च तत्तदुचितभागेन विविधप्रतिष्ठोपपद्यते ॥ ७ ॥

अथ द्विरात्रस्य विकल्पेन त्रीन् कालान् विधत्ते ।

अमावास्यायां पूर्व्वमहरुद्दृष्ट उत्तरन्नानैवार्द्धमासयोः प्रतितिष्ठति पौर्णमास्यां पूर्व्वमहर्व्व्यष्टकायामुत्तरन्नानैवमासोः प्रतितिष्ठति तदाहुर्य्यं एव समानपक्षे पुण्याह्नी स्यातां तयोरेव कार्य्यं समृद्ध्यै ॥८॥

उद्दृष्टशब्देन शुक्लप्रतिपदुच्यते उत्तरोत्तरोत्कर्षेण चन्द्रदर्शनस्य तत्रोपक्रमात् अमावास्यायामग्निष्टोमः अनन्तरभाविन्यां शुक्लप्रतिपद्यतिरात्रः सोऽयमेककालः अत्र पौर्णमासस्तोमास इत्यमुं पक्षमाश्रित्याभिधीयमानत्वादमावास्याशुक्लप्रतिपदोर्भिन्नयोरर्द्धमासयोर्व्वर्त्तमानौ द्वौ दिवसौ तयोरनुष्ठायार्द्धमासद्वये प्रतितिष्ठति व्यष्टका कृष्णप्रतिपत् तदाह सूत्रकारः व्यष्टकायामुत्तरमिति तामिस्रप्रथमास्तिस्रो व्यष्टका इति पौर्णमासी कृष्णप्रतिपदादौ तन्मासगतौ दिवसौ तयोरनुष्ठाय मासद्वये प्रतितिष्ठति सोऽयं द्वितीयः कालः तत्र व्यूष्टिद्विरात्रविषये किञ्चिद्ब्रह्मवादिनः आहुः एकस्मिन्नेव शुक्लपक्षे ये द्वे निरन्तरे ज्योतिःशास्त्रप्रसिद्धे पुण्यदिने स्यातान्तयोरेव द्विरात्राख्यं कर्म्म कार्य्यं एकस्य कर्म्मणः एकस्मिन्नेव मास एकस्मिन्नेव पक्षेऽनुष्ठानमुचितं ततस्तत्समृद्ध्यै सम्पद्यते सोऽयं तृतीयः कालः ॥ ८ ॥

अथास्मिन् कर्म्मणि शङ्कितदोषपरिहाराय सामद्वयं विधातुमादौ दोषमङ्गाशुङ्कावयति ।

अपशव्यो द्विरात्र इत्याहुर्द्वे ह्येते छन्दसी गायत्रञ्च त्रैष्टुभञ्च जगतीमन्तर्यन्तीति न तेन जगती कृता यत्तृतीयसवने क्रियते॥ ६॥

अहर्गणेषु प्रथममहर्गायत्रं द्वितीयं त्रैष्टुभं तृतीयञ्जागतमिति स्थितिः तथाच तैत्तिरीयाः सप्तमकाण्डे गायत्रो वा ऐन्द्रवायव इति अस्मिन्ननुवाके समामनन्ति गायत्रं प्रायणीयमहस्त्रैष्टुभं द्वितीयमहर्जागतं तृतीयमहरिति एवञ्च सति द्विरात्रक्रतौ तृतीयस्याह्नोऽसम्भवाद्दिनद्वये गायत्रञ्च त्रैष्टुभञ्चेति एते द्वे एव छन्दसी सम्पन्ने जगतीमन्तर्यन्तीति अन्तरितां परित्यक्तां कुर्व्वन्ति सा च जगती पशुसाधनभूता अतएव शाखान्तरे सोमहरणविषय उपाख्याने जगत्याः पशव्यत्वमामनन्ति सा पशुभिश्च दीक्षया चागच्छत् तस्माज्जगतीच्छन्दस्का वशव्यतामेति ईदृश्या जगत्या राहित्येन द्विरात्रोऽयमपशव्य इत्येवं दोषं ब्रह्मवादिन आहुः, ननु तृतीयसवने जगती विद्यते आर्भवात्यस्य जागतत्वादिति चेत् मैवं यद्यप्यत्र एकदेशे तृतीयसवने जगती क्रियते तथापि तावन्मात्रेण कृत्स्नेऽप्यहनि जगती कृता न भवेत् तृतीयस्याह्न एव कात्स्न्र्येन जागतत्वं तच्चाहर्द्विरात्रे नास्ति तस्माज्जगत्या अन्तरायस्तदवस्थ एव॥ ६॥

अस्य दोषस्य परिहारं दर्शयति।

यदा वा एषाहीनस्याहर्भजते साह्नस्य वा सवन-

मथैव जगती कृता चैयोकमुत्तरस्याह्नो ब्रह्मसाम भवति वैखानसमच्छावाकसाम यच्छुक्रिये सवने क्रियेते तेनैव जगती कृता तेन पशव्यः॥ १०॥

यदा वै यस्मिन्नेव काले एषा जगती अहीनसंज्ञकस्य द्विरात्रादेः सम्बन्धि कृत्स्नमहर्भजते तदानीमहनि जगती कृतेति वक्तुं शक्यते नान्यथा एकेनाह्ना सह वर्त्तत इति साह्न एकाहः तस्य वा प्रातःसवनमाध्यन्दिनसवनयोरन्यतरत्सवनं जगती भजते तदापि जगती कृतेति वक्तुं शक्यते साह्नत्वन्तु द्विरात्रस्य नास्ति तस्मात् केनचित् प्रतिनिधिना जगतीकरणं सम्पादनीयं कोऽसौ प्रतिनिधिरिति चेत् उच्यते द्विरात्रगतस्योत्तरस्याह्नो ब्रह्मसाम त्रैशोकं भवति ब्रह्माणमुद्दिश्य गीयमानं ब्रह्मसाम त्रिशाः शतना इत्यस्यां जगत्यामुत्पन्नं साम त्रैशोकं तथैवाच्छावाकमुद्दिश्य गीयमानमच्छावाकसाम वैखानसनामकं भवति न किष्टं कर्म्मणानशदित्यस्यां बृहत्यामुत्पन्नं साम वैखानसं सा च बृहती प्रथमपादव्यतिरिक्तेषु पादेषु चतुर्णामक्षराणामभ्यासाज्जगती सम्पद्यते एते उभे सामनी यदि शुक्रिये सवने ऋजीषव्यतिरिक्तैः सोमांशुभिरभिनिष्पन्ने शुक्रशब्दवाच्यसोमरसोपेते माध्यन्दिने सवने क्रियेते तेनैव सामद्वयकरणेन द्विरात्रे जगती कृता स्यात् तेन जगतीकरणेन द्विरात्रः पशव्यो भवति सोऽयं दोषपरिहारः॥ १०॥

अथास्य द्विरात्रस्य संज्ञानुगुणं फलं दर्शयति।

व्युष्टिर्वा एष द्विरात्रो व्येवास्मै वासयति ॥ ११ ॥

अस्य द्विरात्रस्य व्युष्टिरिति संज्ञा ततोऽस्मै यजमानायायं द्विरात्रः स्वकीयसंज्ञानुसारेण विवासयति तमसः पाप्मनोऽपनयनेन प्रकाशं करोति व्युष्टिद्विरात्रादूर्द्धं चत्रस्य धृतिरग्निष्टोमः कार्य्यः तत्र सूत्रं तस्मिन्नेव पूर्व्वपक्षे चत्रस्य धृतिना यजेतेति ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ११ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य एकादशः खण्डः।

अष्टादशाध्यायः समाप्तिमगमत्।

ऊनविंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा योवेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

उक्ता राजसूयसम्बन्धिनः सर्व्वे यज्ञाः पवित्राख्याग्निष्टोमाभिषेचनीयदशपेयकेशवपनीयव्युष्टिद्विरात्रक्षत्रस्य धृत्यादयः ।

एकोनविंशे इन्द्रानां क्रतूनामुपदर्शिताः ।
इन्द्राश्च केचिद्देवानां न इन्द्राः सकला अपि ॥

अत्र निदानं अथैते इन्द्रा इत्याचक्षते न ते सर्व्वे इन्द्राः इन्द्रमिश्रास्तु भवन्ति यौ यावेषां समानकर्तृत्वमुपक्रतौ तौ इन्द्रौ भवत इति, आदौ तावद्राडित्येव नामकं क्रतुमाह ।

अथैषराट् ॥ १ ॥

उच्यत इति शेषः, राज्यहेतुत्वाद्राडित्येतत्तस्य नाम भवति ॥ १

तस्य फलमाह ।

योराज्य आशंसमानोराज्यन्न प्राप्नुयात् स एतेन यजेत राजैवैनं राजानं करोति तन्तु वैरा-

जेति वदेयुर्य्यꣳ राजा राजानꣳ कुर्य्याद्राजैवैनꣳ राजानꣳ करोति ॥ २ ॥

यः पुमान् राज्ये विषयभूते सन्यासं समानाभिलाषं कुर्व्वन् केनचित् प्रतिबन्धेन राज्यन्न प्राप्नुयात् स पुमान् राज्यप्राप्त्यर्थमेतेन राट्शब्दाभिधेन क्रतुना यजेत तदानीं राजैव क्षत्वन्तराणां राजभूत एवायं क्रतुरेनं राजानं करोति यद्वा राजैव राडित्येतन्नामकेन क्रतुनैवैनमृत्विक्संघः राजानं करोति यं क्रतुना राजानं कुर्य्यात् तमेवैनमविवादेन सर्व्वजना विवदेयुः इतरेष्वपि राज्यं कुर्व्वत्स्वपि राजत्वव्यवहारं न कुर्व्वन्ति तेषामेतदीयभृत्यत्वात् युक्तश्चैतत् क्रतुनैव राजत्वस्य प्राप्तत्वात् ॥ २ ॥

इतरक्रतुभ्योऽस्मिन् राजि क्रतौ को विशेष इत्याशङ्क्याह।

छन्दोऽन्ये यज्ञाः सम्पद्यन्ते स्तोमभेषवीर्य्यं वै स्तोमावीर्य्य एवाध्यभिषिच्यते ॥ ३ ॥

अन्ये यज्ञाः सहस्रादयः छन्दोमातं बृहत्यादिकं प्राप्नुवन्ति एष तु राट् छन्दसां सङ्घं प्राप्नोति सङ्घस्य चैकैकस्मादधिकं वीर्य्यं प्रसिद्धं ॥ ३ ॥

अस्य राजः क्रतोः स्तोमप्राप्तिं दर्शयति।

अष्टावेकविꣳशाः सꣳस्तुतो भवत्यष्टौ वै वीराराष्ट्रꣳ समुद्यच्छन्ति राजभ्राता च राजपुत्रश्च पुरोहितश्च महिषी च सूतश्च ग्रामणी च क्षत्ता च संग्र-

ग्रहीता चैते वै वीरा राष्ट्रꣳ समुद्यच्छन्त्येतेष्वेवाध्यभि-
षिच्यते ॥ ४ ॥

एकविंशतिसंख्याकाभिः स्तोत्रीयाभिर्निष्पन्नाः स्तोमा एक-
विंशाः ते चाष्टसंख्याका अस्मिन्राजि विद्यन्ते तैरष्टभीराट्
सम्यक् स्तुतो भवति तथा हि त्रयः पवमानाः सप्तदशस्तोमोपेता-
स्तैकपञ्चाशत्स्तोत्रीया भवन्ति ५१ आज्यस्तोत्राणि चत्वारि
त्रिवृत् स्तोमयुक्तानि त्रिवृत्स्तोमस्य चैकस्य नवस्तोत्रीयात्वस्मा-
द्राज्येषु षट्त्रिंशत्संख्याकाः स्तोत्रीया भवन्ति ३६ चत्वारि पृष्ठ-
स्तोत्राणि पञ्चदशस्तोमयुक्तानि तस्य स्तोमस्य चैकस्य पञ्चदश-
स्तोत्रीयाः तस्मात् तत्पृष्ठेषु षष्टिसंख्याकाः स्तोत्रीया भवन्ति ६०
ताः सर्वा मिलित्वा सप्तचत्वारिंशदधिकं शतं स्तोत्रीयाः सम्प-
द्यन्ते १४७ तास्त्वैकविंशतिसंख्यया विच्छेदिताः सप्तसंख्याकाः
एकविंशस्तोमाः सम्पद्यन्ते चरमस्तोत्रे स्वतएवैकविंशः स्तोमो
विहितः एवमस्मिन्राजि सर्वे पृष्ठसंख्याका एकविंशस्तोमा
भवन्ति यथा वीराः पुरुषाः अष्टसंख्याका राष्ट्रं सम्यक् निर्व-
हन्ति एवमेते ऽष्टसंख्याका एकविंशस्तोमा राडित्येतन्नामकं
क्रतुं सम्यक् निर्वहन्ति राजभ्रात्रादयस्तेऽष्टौ वीरपुरुषाः तत्र
भ्रातृपुत्रपुरोहितमहिष्यादयस्त्वारः प्रसिद्धाः सूतो रथपालः
ग्रामणी ग्रामेषु योगक्षेमविचारकः क्षत्ता याष्टीको द्वारपालः
संग्रहीता भाण्डागारस्य पालकः एतेषां राष्ट्रनिर्वाहकत्वं प्रसिद्धं
अष्टसंख्याकैरेकविंशस्तोमैर्युक्तं राजक्रतुमनुतिष्ठन् तेष्वष्टसु
वीरपुरुषेष्वभिषिक्तो भवति ॥ ४ ॥

एकविंशस्तोमप्रयुक्तं फलमाह ।

क्षत्रं वा एकविꣳशः प्रतिष्ठा क्षत्रस्यैवास्य प्रकाशो भवति प्रतितिष्ठति य एवं वेद ॥ ५ ॥

योऽयमेकविंशस्तोमः सोऽयं प्रतिष्ठा प्रकृतस्य क्रतोः समाप्तिस्थानं अतोऽयमन्येषु स्तोमेषु क्षत्रं वै क्षत्रियजातिवत् स्तोमः राजएव तस्माद्यथा लोके क्षत्रस्य विप्रवैश्यजातिषु प्रकाशः शौर्य्यप्रसिद्धिरधिका एवमेवास्यैकविंशस्तोमस्यान्येषु त्रिवृदादिषु स्तोमेषु प्रकाशः प्रतिष्ठात्वप्रसिद्धिरस्ति यः पुमानेवं वेद सोऽयं धनधान्यादिभिः प्रतिष्ठां लभते ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

विराट्संज्ञकं क्रत्वन्तरं विधत्ते ।

अथैष विराडन्नाद्यकामो यजेत ॥ १ ॥

राट्संज्ञस्य क्रतोः कथनादनन्तरमेष वक्ष्यमाणविशेषो विराट्संज्ञकः क्रतुरुच्यते दशाक्षरोपेतेन विराट्छन्दसा सह संख्यासाम्यादेष क्रतुर्विराट्संज्ञकः तच्च साम्यमुत्तरत्र स्पष्टीभविष्यति तस्मिन् अन्नाद्यकामोऽधिकारी नतु सोमयागेषु प्रकृति-

भूतस्य ज्योतिष्टोमस्यापि संख्यासाम्याद्विराट्छन्दोरूपत्वमस्ति तथाच तैत्तिरीया आमनन्ति विराजमभिसम्पद्यते तस्मात्तज्ज्योतिरुच्यते इति एवमन्येष्वपि यज्ञेषु विराट्सम्पत्तिस्तत्र तत्र श्रूयते नच तेषां यज्ञानां विराडिति संज्ञास्ति ॥ १ ॥

अस्य तु यज्ञस्य तेभ्योऽन्यः कोविशेषोविद्यते येन विराडिति संज्ञा स्यादित्याशङ्क्याह।

परोक्षमन्ये यज्ञाविराजꣳ सम्पद्यन्ते प्रत्यक्षमेष-विराजꣳ सम्पन्नः ॥ २ ॥

ज्योतिष्टोमे द्वादशस्तोत्राणि तेष्वाद्यस्य बहिष्पवमानस्तोत्रस्य त्रिवृदाख्यस्तोमो भवति तस्मिंश्च स्तोमे नव स्तोत्रीयाः सन्ति चत्वार्य्याज्यस्तोत्राणि माध्यन्दिनपवमानस्तोत्रमेकं तेषु पञ्चसु प्रत्येकं पञ्चदशस्तोमार्थमावर्त्यमानेषु पञ्चसप्ततिस्तोत्रीया भवन्ति चत्वारि पृष्ठस्तोत्राणि आर्भवपवमानस्तोत्रमेकं तेषु प्रत्येकं सप्तदशस्तोमार्थमावर्त्यमानेषु पञ्चाशीतिसंख्याः स्तोत्रीया भवन्ति एकस्मिन् यज्ञायज्ञीयस्तोत्रे एकविंशस्तोमार्थमावर्त्यमाने सत्येकविंशसंख्याकाः स्तोत्रीया भवन्ति ताः सर्व्वा मिलित्वा नवत्यधिकं शतं सम्पद्यते तासु दशभिर्दशभिरेकैकसङ्घे सम्पादिते सति दशसंख्यया विराट्छन्दःसारूप्यं भवेत् तस्य साम्यं बुद्धिविशेषेण सम्पादनीयत्वात् परोक्षं अस्मिंस्तु क्रतौ प्रतिस्तोत्रमाम्नातानामेव दशात्मत्र स्तोत्रीयाणां व्यवस्थितत्वाद्विराट्सम्पत्तिः प्रत्यक्षा सोऽयमन्येभ्यो यज्ञेभ्योऽस्य विशेषः ॥ २ ॥

एतद्वेदनं प्रशंसति ।

प्रत्यक्षमेतेनान्नाद्यमवरुन्धेऽन्नादो भवति य एवं वेद ॥ ३ ॥

एतेन स्ततःसिद्धायाः विराट्सम्पत्तेर्वेदनेन प्रत्यक्षं यथा भवति तथास्मिन्नेव जन्मनि फलं भवति ॥ ३ ॥

प्रत्यक्षविराट्सम्पत्त्यर्थं प्रतिस्तोत्रं दशसंख्यां विधत्ते ।

सर्वोदशदशी भवति दशाक्षरा विराड् वैराजमन्नमन्नाद्यस्यावरुध्यै ॥ ४ ॥

तत्तदीयेषु स्तोत्रेषु योयः स्तोमो विद्यते स सर्वोदशदशी भवति प्रतिस्तोत्रं विवक्षितत्वाद्दशदशतिः सा प्रयुज्यते तादृशी दशसंख्या यस्मिन् सर्वस्मिन् स्तोमे विद्यते स सर्वोदशदशीत्युच्यते स प्रकारः सूत्रे द्रष्टव्यः विराडाख्ये छन्दसि दशाक्षरत्वं प्रसिद्धं तेन छन्दसा साध्यत्वादन्नं वैराजं तस्मादियं संख्या भक्षितु योग्यस्यान्नस्य प्राप्त्यै भवति ॥ ४ ॥

तामेतां दशसंख्यां समभागेन विभज्य प्रशंसति ।

ताउ पञ्च पञ्च भवन्ति पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञ एव पशुषु प्रतितिष्ठति ॥ ५ ॥

दशत्वसंख्यायां साम्येन विभक्तायां पञ्चकद्वयं भवतीत्यभिप्रेत्य ता उ ता एव स्तोत्रीयाः पञ्चपञ्चेत्युच्यते पङ्क्तिछन्दसः पञ्च-

पादोपेतत्वाद्यजमानपञ्चमैश्चतुर्भिर्ऋत्विग्भिरुपेतत्वात् पशूनाञ्च पुच्छसहितैश्चतुर्भिः पादैरुपेतत्वात्संख्यया पङ्क्तिसम्बन्धे सति तादृशे यज्ञे तादृशेषु पशुषु चायं यजमानः प्रतितिष्ठति अस्मिन् क्रतावन्नाद्यकामोऽधिकारी वर्णितः ॥ ५ ॥

इदानीं प्रतिष्ठाकाममधिकारिणमाह ।

एतेनैव प्रतिष्ठाकामो यजेत दशभिर्वा इदं पुरुषः प्रतिष्ठितोऽस्यामेव प्रतितिष्ठति ॥ ६ ॥

इदमस्मत्प्रत्यक्षं यथा भवति दशभिरेवाङ्गुलीभिः प्रतिष्ठितः पुरुषोऽस्मिन्नेव लोके धनधान्यादिभिः प्रतिष्ठितो भवति ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

औपशदाख्यं क्रतुं विधत्ते ।

अथैष औपशदः ॥ १ ॥

शशिर्हिंसार्थे वर्त्तते उपसंप्राप्तस्य प्रजोत्पत्तिप्रतिबन्धस्य विनाश उपशदः स यस्मिन् क्रतावस्ति सोऽयमौपशदः ॥ १ ॥

तस्य प्रजोत्पत्तिप्रतिबन्धविनाशात्तेन प्रजोत्पादनलक्षणं फलं दर्शयति।

गन्धर्व्वाप्सरसाᳪ स्तोमः प्रजाकामो यजेत गन्धर्व्वाप्सरसो वै मनुष्यस्य प्रजाया वा प्रजस्ताया वेशते तेषामत्र सोमपीथस्तान् स्वेन भागधेयेन प्रीणाति तऽस्मै तृप्ताः प्रीताः प्रजां प्रयच्छन्ति ॥ २ ॥

ये गन्धर्व्वा देवानां गायका याश्चाप्सरसो देवानान्नर्त्तक्यस्तेषां तासाञ्च स्तोमो यज्ञोऽयमौपशदाख्यः कृतः तेन स्वार्थेन दृष्टत्वात्तद्रूपत्वोपचारः एतेन क्रतुना प्रजाकामो यजेत अन्तरिक्षायतना गन्धर्व्वाप्सरस एव मनुष्यसम्बन्धिन्या उत्पाद्यायाः पुत्रपौत्रादिरूपायाः प्रजाया ईशते स्वामित्वेन वर्त्तते या च मनुष्याणामप्रजस्ता प्रजोत्पादनसामर्थ्यरहितं तस्यापीशते वा शब्दौ समुच्चयार्थौ तेषां तेषां गन्धर्व्वाप्सरसरूपाणां देवानामत्रास्मिन्नौपशदाख्ये क्रतौ सोमपीथः सोमपानं भवति ते हि तद्दृष्टे क्रतौ सोमं पिबन्ति तयोर्यजमानस्तान् देवान् स्वोचितेन भागेन तोषिते च देवाः सोमपाने तृप्ताः प्रीतिमापन्नाः प्रपिबन्ति वा तस्मै यजमानाय पुत्रपौत्रादिरूपां प्रजां प्रयच्छन्ति ॥ २ ॥

तस्मिन् क्रतौ किञ्चिद्विशेषं विधत्ते।

एकैका स्तोत्रीयोपजायते प्रजामेवास्मा उपजनयति ॥३॥

विकृतरूपेऽस्मिन् क्रतौ यानि द्वादशस्तोत्राणि अतिदेशेन प्रकृतितः प्राप्तानि तेषु सर्वेषु स्तोत्रेषु एकैका नूतनस्तोत्रीया कर्त्तव्या सा चोपजाता स्तोत्रीया प्रजामेव यजमानार्थमुत्पादयति ॥ ३ ॥

विशेषान्तरं विधत्ते ।

ककुभं प्राचीमुदूहति पुरुषो वै ककुब्गर्भ एव स मध्यतो धीयते ॥ ४ ॥

माध्यन्दिने पवमाने स्वतः प्राप्ताया गायत्र्याः प्राचीमुपरिवर्त्तिनीं पवस्व मधुमत्तमइत्येतां ककुभमुदूहति प्रयुञ्जीत ककुभः पुरुषोत्पादकत्वेन पुरुषरूपत्वात् स एव पुरुषरूपात्मकः ककुप्रूपो गर्भो मध्यतो माध्यन्दिनसवनाख्ये क्रतुरुदरस्थानीये मध्यभागे स्थाप्यते ॥ ४ ॥

अन्यं विशेषं विधत्ते ।

अथ यदेषा द्विपदा ककुभो लोके क्रियते गर्भमेव तद्धितं प्रजनयति ॥ ५ ॥

तृतीयसवने आर्भवपवमाने स्वतः प्राप्तायाः पादत्रयोपेतायाः ककुभो लोके स्थाने द्विपदा क्रियते परिप्रधन्वेत्येषा द्विपदा ककुप् कर्त्तव्या तद्धि ककुप्करणं गर्भएव परिपक्वरूपो भवति तच्च गर्भमनेन द्विपदाकरणेन प्रजनयत्युत्पादयति ॥ ५ ॥

तस्यां द्विपदां ककुभि श्यावनं नाम साम विधत्ते ।

च्यावनं भवति प्रजातिर्वै च्यावनं ॥६॥

पक्वो हि गर्भः उदरात् च्यवते बहिःपतति अतश्च्यावनाख्यं साम प्रसवहेतुत्वात् प्रजापतिः प्रजोत्पादनरूपं भवति ॥ ६ ॥

एतद्वेदनं प्रशंसति ।

प्रजायते बहुर्भवति य एवं वेद ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

पुरा स्वयमेकोऽपि प्रकर्षेण पुत्रादिस्वरूपेण जातः तत् स्वयं बहुविधो भवतीति प्रकाश्य सामद्वयं विधत्ते ।

वसिष्ठस्य जनित्रे भवतो वसिष्ठो वा एते पुत्रहतः सामनी अपश्यत् स प्रजया पशुभिः प्राजायत यदेते सामनी भवतः प्रजात्यै ॥ ८ ॥

जनित्रनामके द्वे सामनी वसिष्ठसम्बन्धिनी विद्येते ते उभे अत्र भवतः प्रयोक्तव्ये इत्यर्थः नौधसस्यर्क्षु जनित्रमेकं ब्रह्मसाम भवति पुरोजिती वो अन्धस इत्यस्मिन्नार्भवे द्वितीयं जनित्रं इत्येते द्वे वसिष्ठस्य सम्बन्धिनी पुरा कदाचित् पुत्रहतो मृतपुत्रो वै वसिष्ठो वै प्रजार्थी यत् तत्साधनभूते एते द्वे सामनी अपश्यत्ततः स वसिष्ठः ताभ्यां सामभ्यां प्रजापशुयुक्तः प्रकृष्टोऽभवत् अन्यस्याप्येते सामनी प्रजोत्पादनाय सम्पद्येते ॥ ८ ॥

अथ स्तोत्रीयाणां संख्यां प्रशंसति ।

द्वे संस्तुतानां विराजमतिरिच्येते द्वे स्त्रिया ऊने प्रजननाय प्रजननमेव तत्क्रियते प्रजात्यै ॥ ६ ॥

प्रकृतौ द्वादशसु स्तोत्रेषु नवत्यधिकं स्तोत्रीयाणां शतमिति पूर्व्वमेव परिगणितं अत्र तु ततोऽप्यधिका द्वादशस्तोत्रीया एवं सति प्रकृतिगताः स्तोत्रीयाः प्रत्येकं दशसंख्यया विभक्ताः संख्या-साम्यादेकोनविंशतिसंख्याका विराजः सम्पद्यन्ते अधिकास्वपि द्वादशसु स्तोत्रीयासु दशसंख्यया विराडेका सम्पन्ना ततोऽत्र संस्तुतानां स्तोत्रीयाणाम्मध्ये द्वे स्तोत्रीये विराट्रूपत्वमतिक्र-म्याधिके सम्पन्ने ते च द्वे पुरुषावयवभूताण्डलिङ्गस्थानीये लोके-ऽपि स्त्रियास्ते द्वे अण्डलिङ्गे ऊने तद्योनत्वं प्रजननाय प्रजो त्पादनाय अन्यथा ताभ्यां पिहिते छिद्रे कथं प्रजोत्पद्यते तस्मात्त-स्तेनातिरिक्तकरणेन प्रजोत्पादनमेव कृतं भवति ततोऽयमतिरेकः प्रजात्यै भवति ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

पुनःस्तोमाख्यं क्रतुं विधत्ते ।

अथैष पुनःस्तोमः ॥ १ ॥

स्तोमोपलक्षितात्सोमयागात् केनापि निमित्तेन प्रच्युतस्य पुनरप्यधिकारं सम्पादयतीत्यसौ क्रतुः पुनःस्तोमनामकः ॥१॥

तत्राधिकारिणं दर्शयति ।

यो बहु प्रतिगृह्य गरगोरिव मन्येत स एतेन यजेत ॥ २ ॥

यागस्योपनीयस्य वापरहितन्यायजितोपनीयो वा प्रकारान्तरेण वा यो निषिद्धं द्रव्यं बहु प्रतिगृह्य नरकाङ्गीतो विषभक्षीव नष्टोऽस्मीति यश्चिन्तयति स एतेन पुनःस्तोमेन यजेत अत्र सवनत्रयस्तोमप्रकारः कल्पे दर्शितः ॥ २ ॥

द्वादशस्माध्यन्दिनं सवनं त्रिवृता अभित इति माध्यन्दिनसवनगतेषु द्वादशस्तोत्रीयासु येयमेकादशी स्तोत्रीया तस्याः फलं दर्शयति ।

यैकादशी यदेव पूर्ववयसे बहु प्रतिगृह्णाति यद्गरं गिरति यदनन्नमत्ति प्रातःसवनाय तन्निर्हरति ॥ ३ ॥

येयं स्तोममध्य एकादशी स्तोत्रीयाऽस्ति स तत्सर्वं दोषजातं निर्हरति नितरां नाशयति किमर्थं प्रातःसवनानुष्ठाने मुख्याधिकारसिध्यर्थं किं किं नाशयतीति चेत् तदुच्यते पूर्ववयसे पूर्वस्मिन्वयसि स्वकीयस्यायुषः पूर्वभागे यदेव निषिद्धं द्रव्यं बहु प्रतिगृह्णाति तथा क्षेत्रादिविषयविवादेषु कोपेन मर्त्तुं गरं विषं गिरति भक्षयति यदस्ति नातिद्विषमन्नमत्तीति यदस्ति तत्सर्वं नाशयति ॥ ३ ॥

उत्तरस्याः द्वादश्याः स्तोत्रीयायाः फलमाह ।

अथ या द्वादशी यदेवोत्तरवयसे बहु प्रतिगृह्णाति

यद्गरं गिरति यदनन्नमत्ति तृतीयसवनाय तन्निर्हरति ॥ ४ ॥

पूर्ववद्व्याख्येयं ॥ ४ ॥

यास्तु दशसङ्ख्याकाः स्तोत्रीया अवशिष्टास्तासां फलमाह ।

वैराजो वै पुरुषः स मध्यतोऽशुद्धो मध्यत एवैनं पाप्मनो मुञ्चति ॥ ५ ॥

पुरुषस्य हस्ताङ्गुलीषु पादाङ्गुलीषु च विराट्छन्दसाश्च दशसङ्ख्यासद्भावाद्वैराजत्वञ्च स पुरुषो मध्यमे वयस्यशुद्धः पूर्वोत्तरयोर्व्वयसोरुक्तप्रकारेण प्रतिग्रहाद्यशुद्धिपरिहारेऽपि मध्यगताशुद्धेरपि परिहृतत्वात् एनं शुद्धिरहितं पुरुषमयं दशसंख्यासङ्घोयुक्तः स्तोत्रीयसङ्घो मध्यमे वयसि पापान्मोचयति ॥ ५ ॥

अथ सामद्वयं विधत्ते ।

शुद्धाशुद्धीये भवतः ॥ ६ ॥

नौधसस्यर्चु पदेत्यनेन निधनेनोपेतं यच्छुद्धाशुद्धीयन्नामक साम तद्ब्रह्मसाम भवेत् ऊर्द्ध्विडेत्यनेन निधनेनोपेतं यदपरं शुद्धाशुद्धीयन्नामकं साम तत् स्वकीयास्वृक्षु भवेत् तदेतदुभयं कल्पकारेणोक्तं ॥ ६ ॥

नौधसस्यर्चु शुद्धाशुद्धीयं ब्रह्मसाम पदनिधनमिति तथा शुद्धीयं स्वासु यदैडमिति सामद्वयं प्रशंसितुमाख्यायिकामाह ।

इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत्सोऽशुद्धोऽमन्यत स एते शुद्धाशुद्धीये अपश्यत्ताभ्यामशुध्यत् ॥ ७ ॥

केचन यतयः सर्व्वकर्म्मसंन्यासं कृत्वा कदाचिदपि स्वमुखे वेदान्तशब्दोच्चारणरहिताः काष्ठदण्डमात्रधारिणो विवेकज्ञानरहिता यत्र तत्रान्नं भक्षयन्तो नरकयोग्या वर्त्तन्ते तथा चान्यत् स्मृयते ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते । काष्ठदण्डो धृतो येन संन्यासी ज्ञानवर्ज्जितः । स याति नरकान् घोरान् महारौरवसंज्ञकानिति । सालावृका अरण्यश्वानः तेषामपत्यभूता बालकाः श्वानः सालावृकेयास्तेभ्यस्तान्यतीनिन्द्रोमारणार्थं प्रायच्छत् ते च यतयो वेदान्तशब्दरहिता इत्येतदर्थमिन्द्रवाक्यरूपेण कौशीतकिनस्सामनन्ति अत्यन्मुखान् यतीन् सालावृकेयेभ्यः प्रायच्छदिति तथादत्तवन्तं तमिन्द्रं अश्लीला निन्दारूपा काचिद्वागभ्यवदत् इन्द्रो ब्रह्महत्यां कृतवानित्येवं निन्दा लोके सर्वत्र प्रसृता ततः स इन्द्रः स्वयमशुद्धोऽस्मीत्यमन्यत सोऽशुद्धिपरिहारोपायं वेदेष्वपि स्थिते शुद्धाशुद्धीयनामके द्वे सामनी अपश्यत् ताभ्यां सामभ्यां सर्व्वः शुद्धोभूतः ॥ ७ ॥

प्रकारान्तरेण सामद्वयं प्रशंसति ।

यदेव बहु प्रतिगृह्णाति यदनन्नमत्ति यदशुद्धोमन्यते तदेताभ्याꣳ शुध्यति ॥ ८ ॥

प्रतिग्रहे वा निषिद्धान्नभक्षणे वा निमित्तान्तरेण वा यद् शुद्ध्यापादकं पापमस्ति तत्सर्वमेताभ्यां शुध्यति विनश्यति ॥ ८ ॥

अन्यत् सामद्वयं विधत्ते ।

गौषूक्तञ्चाश्वसूक्तञ्च भवतः ॥ ६ ॥

स्वादिष्ठयेत्यत्र गौषूक्तनामकं साम भवति इन्द्रमच्छेत्यत्राश्वसूक्तनामकं साम भवति ॥ ६ ॥

तदेतत्सामद्वयं प्रशंसितुमाख्यायिकामाह ।

गौषूक्तिश्चाश्वसूक्तिश्च बहु प्रतिगृह्य गरगिरावमन्येतां तावेते सामनी अपश्यतां ताभ्यां गरन्निरमातां यदेव बहु प्रति गृह्णाति यद्गरं गिरति यदनन्नमत्ति तदेताभ्यां निर्हते ॥ १० ॥

गोषूक्तस्यापत्यं गौषूक्तिः अश्वसूक्तस्यापत्यमाश्वसूक्तिः तावुभौ बहु प्रतिग्रहरूपं विषं भक्षितवन्तावावामिति तत्परिहारोपायं वेदेष्वन्विष्यैते उभे सामनी दृष्ट्वा ताभ्यां सामभ्यां प्रतिग्रहरूपं निरमातां निःशेषेण नाशयतीत्यर्थः ॥ १० ॥

पुनःस्तोमाख्यक्रतोरुक्थस्यारूपं विधत्ते ।

पञ्चदशस्तोत्राणि भवन्त्योजो वीर्य्यं पञ्चदशः पाप्मनएवैनं मुक्त्वौजसा वीर्य्येण समर्द्धयति ॥ ११ ॥

यद्यस्मिन् पुनःस्तोमे माध्यन्दिनसवनस्य द्वादशस्तोमोपेतत्वात्प्रातःसवनतृतीयसवनयोश्च त्रिवृत्स्तोमोपेतत्वान्नास्त्यत्र पञ्चदशस्तोमस्य प्रसङ्गः तथापि स्तोत्रगतसंख्यया तं स्तोमं सम्पाद्य वीर्य्यरूपेण प्रशंसा क्रियते पञ्चदशस्तोमस्य प्रजापतिबाहुभ्यामुत्पन्नत्वात् क्षत्रियवीर्य्यहेतुत्वं वीर्य्यस्यैव व्याख्यानमोजइति तेन वीर्य्येण यजमानं पाप्मनो मोचयित्वा सेयं स्तोत्रसंख्या धनधान्यादिसमृद्धं करोति ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

चतुष्टोमाख्यं क्रतुं विधत्ते।

अथैष चतुष्टोमः ॥ १ ॥

पूर्वस्मात्पूर्वस्मादुत्तर उत्तर स्तोमश्चतसृभिश्चतसृभिः स्तोत्रीयाभिरस्मिन् क्रतौ अधिको भवति अतोऽयं क्रतुश्चतुष्टोमः ॥ १ ॥

अत्राधिकारिणमाह।

पशुकामो यजेत ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

प्रथमस्तोत्रगतां स्तोमसंख्यां प्रशंसति।

यच्चतसृभिर्बहिष्पवमानं भवति चतुष्पादाः पशवः पशूनेवावरुन्धे ॥ ३ ॥

अयं पूषा रयिर्भग इत्येतास्तिस्रोऽनुष्टुभस्तास्वक्षरसंख्याः चतस्रो गायत्रीः सम्पाद्य ताभिर्निष्पन्ने बहिष्पवमाने स्तोत्रे चतुःसंख्यया पशुप्राप्तिरुच्यते ॥ ३ ॥

आज्यः स्तोत्रगतां स्तोमे पूर्वस्मादधिकत्वेन वर्द्धमानया चतुःसंख्यया सम्पन्नामष्टसंख्यां प्रशंसति ।

यदष्टाभिराज्यान्यष्टाशफाः पशवः शफशस्तत् पशूनाप्नोति ॥ ४ ॥

अष्टाभिः स्तोत्रीयाभिराज्यानि निष्पाद्यन्त इति यदस्ति तेन पशूनाप्नोति पशुषु शफानामष्टत्वात् शफशः शफद्वारा साम्यसम्भवात् ॥ ४ ॥

तत ऊर्द्ध्वं चतुःसंख्यया वर्द्धमानां स्तोमसंख्यां प्रशंसति ।

यत् द्वादशो माध्यन्दिनः पवमानो द्वादशमासाः संवत्सरः संवत्सरं पशवोऽनु प्रजायन्ते तानेवावरुन्धे ॥ ५ ॥

संवत्सरमनु प्रतिसंवत्सरं गवादिपशूनां वत्सोत्पादकत्वं प्रसिद्धं ॥ ५ ॥

ततोऽपि चतुःसंख्ययाधिकं स्तोमान्तरं प्रशंसति ।

यत् षोडशानि द्दष्ठानि षोडशकलाः पशवः कला-शस्तत्पशूनाप्नोति ॥ ६ ॥

गोमहिष्यादीनां पशूनां शिरो ग्रीवा मध्यदेहः पुच्छमिति चत्वार्यङ्गानि चत्वारः पादाः अष्टौ शफाः इत्येवं षोडशसंख्याका अवयवाः कला इत्युच्यन्ते चत्वारः कलाद्वारा संख्यासामान्यात् षोडशस्तोमः पशुप्राप्तिर्भवति ॥ ६ ॥

ततोऽपि चतुःसंख्ययाधिकं स्तोमान्तरं प्रशंसति ।

यद्विंश आर्भवः पाङ्क्तत्वमेषां तदाप्नोति ॥७॥

आर्भवपवमाने विंशः स्तोम इति यदस्ति तत्तेनैवैषां पशूनां यत् पाङ्क्तत्वमस्ति तदाप्नोति विंशतिसंख्यावयवेषु चतुर्षु भागेषु प्रत्येकं पञ्चसंख्योपेतत्वात् पाङ्क्तत्वमस्ति पशूनां पाङ्क्तत्वं पुरैवोक्तं अतः तत्प्राप्तिर्युक्ता ॥ ७ ॥

ततोऽपि चतुःसंख्याधिकं स्तोमान्तरं प्रशंसति ।

यच्चतुर्विंशोऽग्निष्टोमश्चतुर्विंशत्यक्षरा गायत्री तेजो ब्रह्मवर्चसं गायत्री तेज एव ब्रह्मवर्चसमव-रुन्धे ॥ ८ ॥

अग्निष्टोमो द्वादशस्तोत्रस्य स्पष्टमन्यत् ॥ ८ ॥

चतुर्विंशसंख्या द्वारा स्तोमस्य यद्गायत्रीत्वं तत्प्रकारान्तरेण प्रशंसति ।

प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायत ॥ ९ ॥

रेचकपूरककुम्भकैः प्राणस्त्रिधा भिद्यते गायत्री च त्रिभिः पादैरुपेता तस्माद्गायत्री प्राणबलेन हि गर्भाधानकाले वीर्य्यमाधीयते तस्मात्प्राणः प्रजननं तथाविधप्राणरूपाया गायत्र्याः प्रजोत्पादकत्वं यजमानस्य भवति ॥ ९ ॥

तदेतदुक्तमग्निष्टोमसाम प्रकारान्तरेण प्रशंसति ।

एकꣳ साम बहूनि छन्दाꣳसि तस्मादेको बहून् पोषान् पुष्यति ॥ १० ॥

अत्र वारवन्तीयाख्यमेकमग्निष्टोमसाम तस्य वारवन्तीयस्याधारभूतान्युग्गतानि छन्दांसि बहूनि भवन्ति तद्यथा यज्ञायज्ञीयस्यर्चः साकमश्वस्यर्चो हारिवर्णस्यर्चः सैरवस्यर्च इति तस्मात्कारणाद्वारवन्तीयसामस्थानीय एकः पुरुषो बहून् पोषान् पुत्रपौत्रादिरूपान् पोषणीयान् प्राणिनो बहून् पुष्यति ॥१०॥

पुनरपि प्रकारान्तरेण प्रशंसति ।

आत्मा वा अग्निष्टोमः पशवश्छन्दाꣳस्यात्मन्येव तत्पशून् प्रतिष्ठापयति नोक्थ्यो नाग्निष्टोमो न हि ग्राम्याः पशवो नारण्याः ॥ ११ ॥

योऽयमग्निष्टोमान्तो द्वादशस्तोत्रयुक्तः क्रतुभागः सोऽयं सर्वेषु

सोमयागेष्वनुष्ठितत्वादात्मा सोमयागदेहः यान्यतिरिक्तान्युक्थ-स्तोत्रगतानि छन्दांसि तानि पशवो गवादिपशुस्थानीयानि तत्तेनोक्थछन्दोऽनुष्ठानेन पशून् प्रतिष्ठापयति सोमयुक्तस्त्रतुष्टोमः क्रतुर्न तावदुक्थ इति वक्तुं शक्यते अग्निष्टोमसाम्ना समापयितृत्वात् नाप्यग्निष्टोम इति वक्तुं शक्यते उक्थस्तोत्रीयाणाम-त्रानुष्ठानात् पशवोऽपि गोमहिष्यादयो न तावद्ग्राम्या इति वक्तुं शक्या अहन्यरण्ये सञ्चरमाणत्वात् तथारण्या इति वक्तुं न शक्यते रात्रौ ग्रामे तन्निवासदर्शनात् तस्मादीदृशानां पशूनामीदृशेन क्रतुना प्राप्तिर्युक्तेत्यर्थः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

द्वितीयं चतुष्टोममाह ।

अथ यस्य चत्वारि स्तोत्राणि चतसृभिश्चत्वार्यष्टाभिश्चत्वारि द्वादशभिश्चत्वारि षोडशभिस्सगाम्नातित्वदति ॥ १ ॥

पूर्वोक्तस्त्रतुष्टोमोऽग्निष्टोमरूपत्वात् द्वादशस्तोत्ररूपेतः तत्रैकेन प्रकारेणोत्तरोत्तरं चतुःसंख्या वृद्धिर्युक्ता अयं चतुष्टोमः षोडशभीरूपत्वात् षोडशभिः स्तोत्ररूपेतः अत्रान्येन प्रकारेणो-

त्तरोत्तरं चतुःसंख्याधिकमुच्यते तथा बहिष्पवमानस्तोत्रीयाण्याज्यानि चेत्येतानि चत्वारि स्तोत्राणि चतसृभिः स्तोत्रीयाभिर्निष्पाद्यन्ते अच्छावाकाख्यं माध्यन्दिनपवमानौ द्वौ पृष्ठश्चेत्येतानि चत्वारि स्तोत्राणि अष्टस्तोत्रीयाभिर्निष्पाद्यन्ते उत्तरे द्वे पृष्ठे आर्भवपवमानाग्निष्टोमसाम चेत्येतानि चत्वारि स्तोत्राणि द्वादशभिः स्तोत्रीयाभिर्निष्पाद्यन्ते एवं त्रीण्युक्थानि षोडशिसाम चेत्येतानि चत्वारि स्तोत्राणि षोडशभिः स्तोत्रीयाभिर्निष्पाद्यन्ते एवं स्तोमेषु चतुःसंख्यावृद्धियुक्तत्वाच्चतुष्टोम इत्युच्यते यस्य चतुष्टोमाख्यस्य क्रतोरीदृशी चतुःसंख्यावृत्तिः सगान्नातिवदति ज्योतिर्गौरायुरित्युक्थेषु क्रतुषु यो गोनामकः क्रतुस्तमतिक्रम्य अधिकं न भवति तत्समफल इत्यर्थः यद्वा गां गोजातिं नातिवदति गोप्राप्तिफलं प्रयच्छतीत्यर्थः तस्मादनेन पशुकामो यजेतेत्युक्तं भवति एतदेव निदानेऽभिहितं पशुकामयज्ञ एवोत्तर इति ॥१॥

स्तोत्रगतां षोडषसंख्यां प्रशंसति ।

षोडशकला: पशव: कलाशस्तत्पशूनाप्नोति ॥२॥

पूर्ववद्व्याख्येयं ॥ २ ॥

अग्निष्टोमसाम्न उपरितनानि प्रशंसति ।

उक्थ: षोडशिमान् भवति पशवो वा उकथानि वज्रः षोडशी वज्रेणैवास्मै पशून् परिगृह्णात्यनपक्रामुका अस्मात्पशवो भवन्ति नोक्थ्योनातिरात्रो न हि ग्राम्या: पशवो नारण्या: ॥३॥

त्रिभिरुक्थस्तोत्रैरुपेतत्वादयं क्रतुः उक्थः षोडशिस्तोत्रेणो-पेतत्वात् षोडशिमान् उक्थानां पशुप्राप्तिहेतुत्वात्पशुरूपत्वं षोडशिनः पशुविरोधिचौरव्याघ्रादिनिवारकत्वाद्वज्रत्वं तत्रो-क्थे परिगृहीताः पशवश्चौराद्यपहरणाद्वज्रेण रक्षिताः सन्तः कदाचिदप्यस्माद्यजमानादनपक्रामुका भवन्ति अयं क्रतुरुक्थ-संस्थो न भवति उक्थस्तोत्रयोरसमाप्तित्वात् अतिरात्रोऽपि न भवति षोडशिनि च समाप्य रात्रिपर्य्यायाणां सन्धेश्चाप्रयोगात् न हि ग्राम्या इति पूर्ववद्व्याख्येयं ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

षष्ठः खण्डः।

अथ सप्तमः खण्डः।

उद्भिद्वलभिन्नामकौ द्वौ क्रतू विवक्षुस्तत्प्रशंसार्थमाख्यायिका-माह।

असुराणां वै बलस्तमसा प्रावृतोऽश्मापिधान-आसीत्तस्मिन् गव्यं वस्वन्तरासीत्तं देवानाशक्नुवन् भेत्तुं ते बृहस्पतिमब्रुवन्निमान्न उत्सृजेति स उद्भिदैव बलं व्यच्यावयद्वलभिदाभिनत्तानुत्सेधेनैवोदसृजन्नि-षेधेन पर्य्यगृह्णात् ॥ १ ॥

असुराणामेव मध्ये बलनामकः कश्चिदसुरो यथा देवैर्ज्ञातुं

न शक्यते तथान्धकारेण प्रावृतः परितोऽश्मापिधानः प्राकाररूपेण स्थापितैः पाषाणैराच्छादितः कस्मिंश्चिद्बिलेऽतिष्ठत् तस्मिन्बिले अन्तर्मध्ये गव्यं गोसमूहरूपं वसुश्चासीत् देवानां सम्बन्धि गोजातमपहृत्य बिले गोपितत्वात् तं बलनामानमसुरं भेत्तुं शस्त्रैर्विदारितुं देवाः अशक्ता नाभवन् ततो बृहस्पतिं प्रार्थितवन्तः हे बृहस्पते अस्मदर्थं इमान् पशूनुत्सृज विलान्निःसारयेति ततः बृहस्पतिरुद्भिद्याममनुष्ठाय तत्साममर्थ्येनैव बलनामासुरं विलाद्वियुज्य प्रच्यावितवान् बलभिन्नामानं क्रतुमनुष्ठाय तत्सामर्थ्येन बलनामानमसुरं अभिनत् शस्त्रैर्विदारयन् तान् विलस्थितानपि पशूनुत्सेधाख्येन साम्ना एवोदसृजत् बिलात् उद्गतानकरोत् ततो निषेधेन साम्ना पशूनां पलायनं निषेधेन पर्य्यगृह्णात् परितः स्वाधीनानकरोत् ॥ १ ॥

तयोः क्रत्वोरधिकारिणमाह ।

पशुकामो यजेत ॥ २ ॥

उद्भिद्बलभिद्भ्यामिति शेषः सहानुष्ठानं सूत्रकारो दर्शयति उद्भिद्बलभिद्भ्यामविप्रयोगेण यजेतेति ॥ २ ॥

पशुफलप्राप्त्यर्थमुभयोरुपयोगमाह ।

यदुद्भिदा यजते बलमेवास्मै विच्यावयति यद्बलभिदा बलमेवास्मै भिनत्ति ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

अस्मै पशुलाभाय सामद्वयं विधत्ते।

उत्सेधनिषेधौ ब्रह्मसामनी भवत उत्सेधेनैवास्मै पशूनुत्सिध्य निषेधेन परिगृह्णाति ॥ ४ ॥

पिबासु तस्य रसिन इत्यस्यामृचि उत्सेधनिषेधाख्ये द्वे सामनी तयोरुत्सेध उद्भिदि ब्रह्मसाम निषेधो बलभिदि ब्रह्मसाम तत्र उत्सेधेन पशुप्राप्तिप्रतिबन्धकात्पशूनुत्सिध्य निःसार्य्य निषेधेन पलायनं निषिध्य स्वाधीनान् करोतीति ॥४॥

अस्मै यजमानार्थं अन्यत्सामद्वयं विधत्ते।

यत्त इन्द्रमवर्द्धयदिति ब्रह्मण आज्यꣳ रूपेण समृद्धम् ॥ ५ ॥

पूर्वोक्तावुत्सेधनिषेधौ माध्यन्दिनसवने ब्रह्मसाम यत्त इन्द्रमित्यस्यामृचि सम्पन्नं साम तयोः क्रत्वोः प्रातःसवने ब्रह्मणां प्रति प्रयोक्तव्यमाज्यस्तोत्रं तस्यामृचीन्द्रो यद्भिनद्बलमिति बलभेदनलिङ्गसद्भावादिदमाज्यस्तोत्रमनुकूलेन रूपेण समृद्धं ॥५॥

अथ कश्चित्सङ्ख्याविशेषमुपायेन सम्पाद्य तमुपजीव्य प्रशंसति।

सप्तसप्तदशौ भवतो यत्सप्तभिः स्तुवन्ति सप्त ग्राम्याः पशवः पशूनेवावरुन्धे सप्तपदा शक्करी पशवः शक्करी पशूनेवावरुन्धेऽथ यत्सप्तदशभिः प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ६ ॥

अत्रैवं कल्पे दर्शितं एकविंशं वहिष्पवमानं तिसृभिर्होतुराज्यं सप्तसप्तदशमिति अत्रैकविंशतिसंख्या त्रिसंख्या च मिलित्वा चतुर्विंशतिः सम्पद्यत इति संख्या सम्पद्यते तस्माच्च विच्छेदविशेषेणैका सप्तसंख्या अपरा तु शप्तदशसंख्या तयोर्मध्ये सप्तसंख्या यासां स्तोत्रीयाणां सङ्घे विद्यते सोऽयं सप्ती अवशिष्टः सप्तदशः तत्र सप्तिना संघेन संख्यासाम्याद्गवादीन् पशून् प्राप्नोति तथा शक्करीछन्दसः सप्तभिः पादैरुपेतत्वात् पशुसाधनत्वाच्च सप्तसंख्यया पशुप्राप्तिः अथावशिष्टाभिः सप्तदशभिः स्तुवन्तीति यदस्ति तेन प्रजापतिं प्राप्नोति प्रजापतेः सप्तदशाक्षररूपत्वं तैत्तिरीया आमनन्ति ओश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहे इति पञ्चाक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदशः प्रजापतिरिति ॥६॥

पुनरपि संख्याद्वयं मिलित्वा प्रशंसति।

गायत्रीᳬ सम्पद्यते तेजो ब्रह्मवर्चसं गायत्री तेज एव ब्रह्मवर्चसमवरुन्धे प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते ॥ ७ ॥

या सप्तसंख्यास्ति या चान्या सप्तदशसंख्या ते उभे मिलित्वा चतुर्विंशतित्वेन गायत्रीं प्राप्नुतः तेजो ब्रह्मवर्चसमित्यादि पूर्ववद्व्याख्येयं ॥७॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

सप्तमः खण्डः।

अथ अष्टमः खण्डः ।

अपचित्याख्यं क्रतुं विधत्ते ।

अथैषोऽपचितिरपचितिकामो यजेतापचित्यैवा-स्मा अपचितिं विन्दति ॥ १ ॥

अपचितिः पूजा तद्धेतुत्वात्क्रतुरप्यपचितिनामकः अपचित्यैव अपचितिना क्रतुना अस्मै यजमानार्थमुद्गाता पूजां लभते ॥ १ ॥

तत्र बहिष्पवमानमाध्यन्दिनपवमानयोः स्तोमविशेषं विधत्ते ।

तस्य चतुर्विꣳशौ पवमानौ चतुर्विꣳशत्यक्षरा गायत्री तेजो ब्रह्मवर्चसं गायत्री तेजसैवास्मै ब्रह्मवर्चसेनापचितिं विन्दति ॥ २ ॥

स्पष्टोऽर्थः ॥२॥

पृष्ठस्तोत्रे सामद्वयं विधत्ते ।

उभे बृहद्रथन्तरे भवत उभाभ्यामेवास्मै बृहद्रथन्तराभ्यामपचितिं विन्दति ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३॥

अपरं सामद्वयं विधत्ते ।

भर्गयशसी भवतो भर्गेणैवास्मै भर्गो दधाति यशसा यशः ॥ ४ ॥

पुरोजिती वो अन्धस इत्यस्यामृचि यथा श्यावाश्वान्धी-गवे सामनी तथा भर्गाख्यं साम त्वमिन्द्र यशसा असीत्यस्यामृचि यशो नामकं साम भवति . तत्र भर्गाख्येनैव साम्ना यस्मै यजमानार्थं भर्गो दधाति तेजः सम्पादयति यशोनामकेन साम्ना कीर्त्तिं सम्पादयति ॥४

अत्र विद्यमानान् स्तोमान् प्रशंसति ।

उभये स्तोमा युग्मन्तश्चायुजश्चोभयैरेवास्मै स्तोमैरपचितिं विन्दति ॥ ५ ॥

युग्मन्तोयुग्मसंख्यया समसंख्ययोपेताः चतुर्विंशस्तोमाः यद्यप्येक एव चतुर्विंशस्तथापि जात्यभिप्रायेण बहुवचनं अयुजो विषमसङ्ख्योपेताः त्रिवृत्पञ्चदशादयः स्पष्टमन्यत् ॥५॥

अत्र ब्रह्मवादिनामाक्षेपं दर्शयति ।

तदाहुर्विलोमानस्तोमा ईश्वरा यजमानं विच्छेतोर्व्युच्छ्यतियन्तीति ॥ ६ ॥

त्रिवृदादिक्रमेण ह्यनुष्ठाने सत्यानुलोम्यं स्यात् अत्र चतुर्विंशमारभ्य तत ऊर्द्धं अर्वाचीनानां पञ्चदशादीनामनुष्ठानाद्विलोमत्वं प्रातिलोम्येन प्रवृत्ताः स्तोमा यजमानं विच्छेतोर्विच्छेपयितुमीश्वराः समर्थाः हि यस्मादेते स्तोमा व्यतियन्ति विपरीतक्रमाः सन्तः स्वोचितं क्रममतिलङ्घ्य प्रवर्त्तन्ते इतिशब्दो ब्रह्मवाद्याक्षेपसमाप्त्यर्थः ॥ ६ ॥

समाधानं विधत्ते ।

एकविꣳशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविꣳ-
शोऽन्ततएव यज्ञस्य प्रतितिष्ठति ॥ ७ ॥

स्पष्टोऽर्थः ॥७॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

द्वितीयमपचितिनामकं क्रतुं विधत्ते ।

अथैष सर्वस्तोमोऽपचितिरपचितिकामो यजेत
सर्वैरेवास्मै स्तोमैरपचितिं विन्दति ॥ १ ॥

अतीतयोर्द्वितीयतृतीययोरध्याययोर्निरूपितास्त्रिवृदादि-
स्तोमा येऽष्टाचत्वारिंशान्ताः स्तोमास्ते सर्वेऽप्यत्र विद्यन्ते अतोऽयं
सर्वस्तोमः तैः सर्वैरुद्गाता यजमानार्थं पूजां लभते ॥१॥

स्तोमगतस्तोत्रीयाणां सङ्ख्यामुपजीव्य प्रशंसति ।

विराजꣳ सम्पद्यत एष वा अपचितोयोऽन्नादोऽन्नं
विराडन्नाद्यमेवास्मिन्दधाति ॥ २ ॥

अयमपचितिक्रतुर्द्दशसंख्यया स्तोत्रीयासु विच्छेदितासु
संख्यासामान्याद्विराट्छन्दोरूपत्वं सम्पद्यते तथा हि त्रिवृद्-

बहिष्पवमानं पञ्चदशं होतुराज्यं सप्तदशे द्वे आज्ये एकविंश-मच्छावाकस्याज्यं त्रिणवो माध्यंदिनः पवमानः त्रीणि पृष्ठानि चतुर्विंशं चतुश्चत्वारिंशमष्टाचत्वारिंशरूपाणि चतुर्थं पृष्ठन्तु चतुर्विंशं आर्भवस्त्रयस्त्रिंशमग्निष्टोम एकविंशः अत्र स्थिताः सर्वाः स्तोत्रीयास्त्रीणि शतानि भवन्ति ३०० ततश्च दशकत्वेन विच्छिन्नाः सत्यस्त्रयस्त्रिंशद्विराजः सम्पद्यन्ते विराजश्चान्नरूपत्वं अन्नहेतुत्वात् लोके यः पुमानन्नादो भवति सोऽपचितो राडिति रोगरहितत्वात् पूजितो भवति तस्मादुद्गातास्मिन् यजमाने विराट्रूपेणान्नाद्यं सम्पादयति ॥२॥

द्वे सामयुगसे द्विविधांश्च स्तोमान् विधाय प्रशंसति ।

उभे बृहद्रथन्तरे भवतो भर्गयशसी भवत उभये स्तोमाश्छन्दोमाश्च पृष्ठाश्चोभयैरेवास्मै स्तोमैरप-चितिं विन्दति ॥ ३ ॥

चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशाःस्तोमा गायत्रीत्रिष्टुप्-जगत्याख्यैश्छन्दोभिर्गीयन्ते संख्ययोपमीयन्त इति छन्दोमाः त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाख्यास्तोमाः षडहे पृष्ठस्तोत्रसम्बन्धाः पृष्ठा इत्युच्यन्ते तैश्चतुर्भिः सामभिर्नवभिः स्तोमैश्च यजमानाय पूजां लभते ॥३॥

पुनरपि स्तोमान् प्रशंसति ।

तस्य छन्दोमाः पृष्ठानि पशवो वै छन्दोमा अन्नं

पृष्ठान्यभिपूर्वमेवास्मिन्नन्नाद्यं पशून्दधाति यच्छन्दो
मवाऽस्तेन द्वादशाहयाजिनमाप्नोति ॥ ४ ॥

तस्यापचिते: क्रतोर्य्यैच्छन्दोमा विद्यन्ते यानि च त्रिवृदा-
दीनि पृष्ठानि तेषाम्मध्ये छन्दोमानां पशुसाधनत्वात् पशुत्वं
पृष्ठान्नहेतुत्वादन्नत्वं एवं सत्यन्नस्य प्रथममपेक्षितत्वादभिपूर्व-
मनुक्रमेणैवान्नमुत्कृष्टं सम्पाद्य तत: पशून् सम्पादयति किञ्च द्वाद-
शाहे छन्दोमसद्भावात् द्वादशाहयाजिनं प्राप्नोति तस्य यत् फलं
तदस्यापि भवतीत्यर्थ: ॥ ४ ॥

अत्र ब्रह्मवादिनामाक्षेपं दर्शयति ।

तदाहुर्नानालोका: स्तोमाश्छन्दोमाश्च पृष्ठानि च
यदेकस्मिन् यज्ञक्रतौ समवरुध्यन्त ईश्वरा यजमानो-
ऽप्रतिष्ठातोरिति ॥५॥

उक्ता: स्तोमा लोका भिन्नाश्रयान त्वेकक्रतुवर्त्तिन: तथा
सति यद्येकस्मिन्नेव क्रतौ स्वीक्रियेरन् यदा यजमानोऽप्रतिष्ठातो-
रप्रतिष्ठातुमीश्वरो भवति प्रतिष्ठान्न लभत इत्यर्थ: ॥५॥

उक्ताक्षेपं परिहरति ।

एकविंशोऽग्निष्टोमो भवति प्रतिष्ठा वा एक-
विंश: प्रतिष्ठामेव तदभ्यायन्ति ॥ ६ ॥

तत्तेनैकविंशानुष्ठानेन यजमानस्य प्रतिष्ठामभिलक्ष्य सर्वे स्तोमा आयन्ति गच्छन्ति ॥६॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य नवमः खण्डः ।

अथ दशमः खण्डः ।

पक्ष्याख्यं क्रतुं विधत्ते ।

पक्षो वा एष स्तोमः ॥ १ ॥

स्तोमशब्देन तद्वान् क्रतुरुपलक्ष्यते स च पक्षिसादृश्यात् पक्षिनामकः तस्य पूर्वभागे त्रिवृदादित्रयस्त्रिंशान्तः स्तोमसङ्घः एकः पक्षः उत्तरभागे त्रयस्त्रिंशादित्रिवृदन्तः स्तोमसङ्घोऽपरः पक्षः ॥ १ ॥

अस्य क्रतोः पक्षिनामानुकूलं सामविशेषं दर्शयति ।

पक्ष्येषनिधीयते ॥ २ ॥

सुपर्णेन दृष्टः सौपर्णाख्यः सामविशेषो नाम तस्य साम्यात् पक्षीत्युच्यते सोऽस्मिन् क्रतौ निधीयते तथा च कल्पेऽभिहितं स्वारस्र सौपर्णमग्नेस्त्र व्रतं योजयात् पूर्वमिति सामविशेषस्य क्रतोश्चोभयोरपि पक्षित्वात् सम्बन्धो युक्त इत्यर्थः ॥ २ ॥

तमेव सम्बन्धमन्वयव्यतिरेकाभ्यामुपपादयति ।

न वा अपक्षः पक्षिणमाप्नोत्यथ यदेष पक्षी पक्षिणि निधीयते तस्मात्पक्षिणः पक्षैः पतन्ति ॥३॥

लोके पक्षरहितो मनुष्यः पशुर्वा कश्चिदप्याकाशे गच्छन्तं पक्षिणमाप्तुं नैव शक्नोति अथ तद्विपर्य्ययेणान्वय उच्यते अपक्षिणि पक्षरहिते साम्नि सौपर्णनामवशादेषसामविशेषः पक्षी पक्षवान् भवति तथा भूत्वा क्रतौ निधीयते यद्यस्मादेवं तस्माल्लोके पक्षिणः पक्षैराकाशे पतन्ति यद्वा क्रतौ च पक्षिणि पक्षरहिते पक्षसाहित्यसिद्ध्यर्थमेव पक्षिपक्षकल्पना युक्ता सामविशेषो निधीयत इति क्रतोः पक्षित्वं सम्पन्नं यस्मादेवं तस्माल्लोके पक्षिणो वायसादयः पक्षैराकाशे पतन्ति ॥३॥

एतद्वेदनं प्रशंसति ।

पक्षो ज्योतिष्मान् पुण्यान् लोकान् सञ्चरति य एवं वेद ॥४॥

अस्य क्रतोर्वेदिता पक्षो स्वयं पक्षवानिव भूत्वाऽग्निसम्बन्धिनः क्रतोर्वेदनेन ज्योतिष्मान् भूत्वा स्वर्गादीनुत्तमलोकान् माप्नोति ॥ ४ ॥

अस्य क्रतोः स्तोमान् विधत्ते ।

त्रिवृतावभितो भवतस्तेजो ब्रह्मवर्चसं त्रिवृत्तेज एव ब्रह्मवर्चसमवरुन्धे ॥५॥

अभितः क्रतोराद्यन्तयोर्बहिष्पवमानाग्निष्टोमाख्ययोः प्रथम-

द्वादशयोस्त्रिवृत्स्तोमौ कर्त्तव्यौ तस्य च स्तोमस्य शरीरकान्ति-श्रुताध्ययनसम्पत्तिहेतुत्वात्तेजस्त्वं ब्रह्मवर्चसत्वञ्च अतस्तेनोभय-प्राप्तित्वाद्वीर्य्यत्वं ॥ ५ ॥

द्वितीयैकादशयोः स्तोत्रयोर्विशेषं विधत्ते।

अथ पञ्चदशौ वीर्य्यं वै पञ्चदशो वीर्य्यमेवाव-रुन्धे ॥६॥

आज्यादयः ॥ ६ ॥

तृतीयदशमयोः स्तोमविशेषं विधत्ते।

अथ सप्तदशौ पशवो वै सप्तदशः पशूनेवाव-रुन्धे ॥ ७ ॥

स्तोमस्य पशुप्राप्तिसाधनत्वात् पशुत्वं ॥ ७ ॥

चतुर्थनवमयोः स्तोत्रयोः स्तोमविशेषं विधत्ते।

अथैकविंशौ प्रतिष्ठा वा एकविंशो मध्यतएव यज्ञस्य प्रतितिष्ठति ॥८॥

उक्थस्तोत्रयोर्य्यज्ञमध्यवर्त्तित्वात् यजमानोऽपि यज्ञमध्य एव प्रतितिष्ठति तदनुष्ठानेन स्थिरो भवति ॥ ८ ॥

पञ्चमाष्टमयोः स्तोत्रयोः स्तोमविशेषं विधत्ते।

अथ त्रिणवाविमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रतितिष्ठति ॥९॥

त्रिणवस्तोमेन त्रयाणां भागानां लोकत्रयप्राप्तिहेतुत्वात्तद्रूपत्वं ॥९॥

षष्ठसप्तमयोः स्तोमविशेषं विधत्ते ।

अथ त्रयस्त्रिꣳशौ वर्ष्म वै त्रयस्त्रिꣳशः ॥१०॥

उक्तेषु स्तोत्रेषु त्रयस्त्रिꣳशस्य प्रौढत्वादयं यज्ञस्य वर्ष्म शरीरमेव इतरे त्ववयवसदृशाः ॥ १० ॥

एतद्वेदनं प्रशंसति ।

वर्ष्म स्वानां भवति य एवं वेद ॥ ११ ॥

स्वानां ज्ञातीनां वर्ष्म शरीरमिव मुख्यो भवति ॥११॥

उक्तौ त्रयस्त्रिꣳशौ प्रशंसति ।

एष वाव ब्रध्नस्य विष्टपो यदेतौ त्रयस्त्रिꣳशौ मध्यतः सन्धीयेते तेन ब्रध्नस्य विष्टपमारोहति ॥१२॥

क्रतोर्मध्यभागे क्रतुषु षष्ठसप्तमयोः स्तोत्रयोः त्रयस्त्रिंशाख्यौ स्तोमौ सन्धीयेते अनुष्ठीयेते इति यदस्ति एष एवानुष्ठानप्रकारो ब्रध्नस्यादित्यस्य विष्टपः स्थानविशेषः ब्रध्नशब्दार्थोऽन्यत्र श्रूयते असौ वा आदित्यो ब्रध्न इति आदित्यस्य च मध्यदेशवर्त्तित्वं मध्याह्नकाले प्रत्यक्षं अतस्तेन त्रयस्त्रिंशानुष्ठानादादित्यस्य स्थानमारोहति ॥ १२ ॥

प्रकारान्तरेण स्तोमान् प्रशंसति ।

मध्यतो वा अग्निर्वरिष्ठस्तस्मादेते स्तोमा मध्यतो वरिष्ठाः क्रियन्ते ॥१३॥

अग्निर्हि ज्वलनात् पूर्व्वोत्तरयोरल्पत्वान्न श्रेष्ठः ज्वलनदशायां प्रौढत्वात् श्रेष्ठः अग्निसम्बन्धिश्चायं क्रतुः अस्य च वक्ष्यमाणक्रतोश्च सूत्रकारेणाग्नेः स्तोमाविति संज्ञाया उक्तत्वात् ऐकाह्विकेन व्रतेनोक्त उपायोऽग्नेः स्तोमयोरिति हि सूत्रं अतोऽग्निसादृश्यादस्य क्रतोर्मध्यप्रौढाः स्तोमाः क्रियन्ते ॥ १३ ॥

मध्यवर्त्तिनः स्तोमान् प्रशस्याद्यन्तौ स्तोमौ प्रशंसति ।

त्रिवृता प्रैति त्रिवृतोदेति प्राणो वै त्रिवृत्प्राणेनैव प्रैति प्राणमभ्युदेति ॥ १४ ॥

प्राणस्य रेचकपूरककुम्भकरूपेण वा प्राणापानव्यानवृत्तिरूपेण वा त्रिवृत्त्वं अयञ्च क्रतुस्त्रिवृता प्रैति समाप्यते त्रिवृतोदेति प्रारभ्यते तद्वदेव लोकेऽपि जीवत्पुरुषः प्राणेनैव देहान्निर्गतेन प्रैति म्रियते प्राणमेवाभिलक्ष्य तद्युक्तः सन् उदेत्युत्पद्यते ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य दशमः खण्डः ।

अथ एकादशः खण्डः ।

सूत्रकारेणाग्नेः स्तोमाविति नाम्ना यौ क्रतू विकृती तयोर्मध्ये पक्षिनामकः प्रथमः क्रतुरुक्तः ज्योतिर्नामकं क्रतुं विधत्ते ।

अथैष ज्योतिः ॥१॥

स्पष्टोऽर्थः ॥ १ ॥

स्तोमान्विधत्ते ।

तस्य त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि चतुर्विंशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

तत्राद्यौ द्वौ स्तोमौ प्रशंसति ।

प्राणो वै त्रिवृदात्मा पञ्चदशः ॥३॥

पूर्वोक्तरीत्या प्राणस्य त्रिवृत्त्वं आत्मा देहः स च पञ्चदशभिरवयवैरुपेतः श्रुत्यन्तरे सप्त शीर्षण्याः द्वाववाञ्चौ नाभिर्दशमीत्युक्तत्वात् दश प्राणाः द्वौ हस्तौ द्वौ पादौ मध्यभागश्चेत्येते पञ्चावयवाः अतः सङ्ख्यासाम्यात् पञ्चदशस्तोमस्य देहरूपत्वं तस्मादेताभ्यां स्तोमाभ्यां देहे प्राणः स्थिरो भवतीत्यर्थः ॥ ३ ॥

उत्तरौ द्वौ स्तोमौ प्रशंसति ।

मुखं गायत्र्यन्नꣳ सप्तदशो मुखत एव तदन्नं धत्ते ॥४॥

चतुर्विंशस्तोमस्य संख्यासाम्याद्गायत्रीत्वं छन्दसाम्मध्ये प्रथमत्वाद्गायत्र्या मुखं सप्तदशस्तोमस्य प्रजापतिशरीरमध्यगतादन्न-

धारणस्थानादुदरादुत्पन्नत्वादन्नरूपत्वं तत्तेन स्तोमद्वयेन मुखेऽन्नं धत्त एव कदाचिदपि दरिद्रो न भवतीत्यर्थः ॥ ४ ॥

वेदनं प्रशंसति ।

अन्नमत्त्यन्नादो भवति य एवं वेद ॥५॥

अन्नादो रोगरहितः ॥ ५ ॥

माध्यन्दिनपवमानस्तोमप्रशंसां प्रपञ्चयति ।

माध्यन्दिनेन वै पवमानेन देवाः स्वर्गं लोकमायन्यदेष चतुर्विंशो माध्यन्दिनः पवमानो भवति स्वर्गस्य लोकस्याक्रान्त्यै चतुर्विंशत्यक्षरा गायत्री तेजो ब्रह्मवर्चसं गायत्री तेज एव ब्रह्मवर्चसमवरुन्धे प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते ॥ ६ ॥

व्याख्यातप्रायमेतत् अत्रार्भवपवमानाग्निष्टोमसाम्नोर्विशेषानभिधानात्तदुभयं प्रकृताविवानुष्ठेयं ॥ ६ ॥

सर्व्वान् स्तोमान् मेलयित्वा प्रशंसति ।

उभये स्तोमा युग्मन्तस्त्रायुजस्त्र तन्मिथुनं तस्मान्मिथुनात् प्रजायते ॥७॥

एकस्मिन्नपि चतुर्विंशस्तोमे युग्मत्वजात्यभिप्रायेण मान्यत्वाभिप्रायेण वा युग्मन्त इति बहुवचनं अथ वात्र वचनव्यत्ययः

स्त्रीपुरुषवदुभयविधत्वेन स्तोमानां मिथुनत्वं ॥ ७ ॥

पूर्व्वत्र सौपर्णाख्यसामसम्बन्धात् पक्षित्वमुक्तं अत्रापि तद्वे-
दाभिप्रेत्य प्रशंसति।

पक्षि वा एतच्छन्दः पक्षी ज्योतिष्मान् पुण्यान् लोकान् सञ्चरति य एवं वेद ॥८॥

छन्दःशब्देनात्र तदाश्रितं सौपर्णाख्यं साम विवक्षितं माध्य-
न्दिने यस्त्रिवृत्त्रिंशस्तोमोऽस्ति सोऽयमितरौ पवमानगतौ ॥ ८ ॥

त्रिवृत्पञ्चदशस्तोमावपेक्ष्य प्रौढ इत्यभिप्रेत्य प्रशंसति।

मध्यतो वा अग्निर्वरिष्ठस्तस्मादेते स्तोमा मध्यतो वरिष्ठाः क्रियन्ते ॥९॥

अत्रापि स्तोमा इति वचनव्यत्ययः अन्यत् पूर्व्ववत् ॥ ९ ॥

अत्रैकाया: स्तोत्रीयायाः प्रकृतिगतायाश्च आधिक्यात्तां प्रशं-
सति।

एका संस्तुतानां विराजमतिरिच्यत एकाकिन-मेवैनमन्नाद्यस्याध्यक्षं करोति ॥१०॥

संस्तुतानां स्तोत्रीयाणां दशसंख्याविच्छेदेन प्रकृताविव वि-
राजं प्राप्तानां मध्ये एका स्तोत्रीया विराजमतिरिच्यते तद्यथा
प्रकृतौ तावन्नवत्यधिकं शतं स्तोत्रीयाः याः सन्ति तास्वेकोनविं-
शतिसंख्या विराजः अत्रापि तद्वत्प्राप्तौ सत्यां मैत्रावरुणस्याज्य-

पृष्ठयोः पञ्चदशसप्तदशावपोह्य त्रिहत्त्वतुर्व्विंशौ कर्त्तव्यौ तथा च निदानेऽभिहितं त्रिहत्त्वतुर्व्विंशावाज्यपृष्ठेषु सम्पत्तृचेन कुर्म्म इति एकातिरिच्यत इति श्रुतेरर्थसम्पादनवशेनेत्यर्थः एकयातिरक्तया स्तोत्रीयया यजमानमेव कृत्स्नस्यान्नाद्यस्याध्यक्षं स्वामिनमुद्गाता करोति ॥ १० ॥

अस्य क्रतोरग्निसम्बन्धिरूपत्वेन ज्योतिर्नामास्ति तत्प्रशंसति।

ज्योतिर्वा एषोऽग्निष्टोमो ज्योतिष्मन्तं पुण्यं लोकञ्जयति य एवं विद्वानेतेन यजते ॥११॥

स्पष्टोऽर्थः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

एकादशः खण्डः।

अथ द्वादशः खण्डः।

ऋषभाख्यं क्रतुं विधत्ते।

अथैष ऋषभः ॥१॥

स्पष्टोऽर्थः ॥ १ ॥

तदेतन्नाम प्रशंसति।

ऋषभो वा एष स्तोमानामृषभतां गच्छति य एवं वेद ॥२॥

एष: क्रतु: सोमानामितरक्रतूनाम्मध्ये ऋषभतां श्रेष्ठतां प्रापयितुमर्हति ॥ २ ॥

तत्र अधिकारिणमाह ।

राजन्यं याजयेद्दृषभो वै पशूनामधिपतीराजन्यो मनुष्याणां यो वा अस्ति सोऽधिपति: ॥ ३ ॥

ऋषभो वत्सोत्पादनसमर्थ: पुङ्गव: स यथा पशूनामधिपतिस्तद्वद्दृषभाख्यो यज्ञ: क्रत्वन्तराणामधिपतिरित्यभिप्राय: राजन्यस्याप्यधिपतित्वोक्ते: यज्ञेन सम्बन्धो युक्त: ॥ ३ ॥

उत्तमवर्णं विप्रं परित्यज्य राजन्ये कुत: पक्षपात इत्यतआह ।

अधिपति: समानानां भवति य एवं वेद ॥ ४ ॥

स्पष्टं ॥ ४ ॥

सामविशेषं विधत्ते ।

तस्य सदोविशीयं माध्यन्दिने पवमाने भवति विशमेवास्मै सवनाभ्यां परिगृह्णात्यनपक्रामुकास्माद्विड्भवति ॥ ५ ॥

पुनान: सोमधारयेत्यस्यामृचि सदोविशीयकन्नाम साम भवति नाम्नि विशीयशब्दस्य श्रुतत्वात्तन्नामकसामोपेतो माध्यन्दिनपवमानो विरूपतां विशमस्मै यजमानाय पार्श्वद्वय-

वर्त्तिभ्यां प्रातःसवनतृतीयसवनाभ्यां स्वाधीनां करोति सा च विड्स्मान्नापक्रामति ॥ ५ ॥

अन्यत्साम विधत्ते ।

समन्तं भवति समन्तामेवास्मै विशं करोत्यन-पक्रामुकास्माद्विड्भवति ॥ ६ ॥

वृषान ऊध इत्यस्यां विष्टारपङ्क्तौ समन्तनामकं साम विशं प्रतिजनरूपां प्रजां समन्तां परितोऽवस्थितां करोति ॥ ६ ॥

अपरं सामद्वयं विधत्ते ।

उभे बृहद्रथन्तरे भवत इयं वै रथन्तरं द्यौर्बृ-हद्देवास्माल्लोकाद्गायत्येवामुस्मादुभयोरनयोर्लोकयोः प्रतितिष्ठति ॥ ७ ॥

पृष्ठस्तोत्रे रथन्तरं साम कुर्यात् बृहत्साम त्वनुष्टुभीति वक्ष्यते अनयोः साम्नोरधरोत्तरसाम्नां भूर्लोकद्युलोकरूपत्वं एवम-स्माल्लोकात् भूर्लोकनिमित्तमेव रथन्तरं गायति तद्वदत्रापि योज्यं ॥ ७ ॥

बृहत्सामाश्रयं विधत्ते ।

अनुष्टुभि बृहद्भवत्यन्तो वा अनुष्टुप् छन्दसामन्तो बृहत्साम्नामन्तो राजन्यो मनुष्याणामन्त एव तदन्तं

प्रतिष्ठापयति तस्माद्यो राजन्यानाᳲ ह्रीयते न स पुनरग्रं पर्य्येति ॥ ८ ॥

इहानुष्टुभि बृहत्साम भवति अनुष्टुप्बृहतोरन्तरत्वसाम्यात् उक्थे षोडशिनश्च सवनछन्दःसामान्तेऽनुष्टुप् क्रियते वाजपेयस्यान्ते बृहत्साम क्रियते ऐश्वर्य्यवतां मनुष्याणाम्मध्ये राजन्यान्तः ऐश्वर्य्यसमाप्तिस्थानं अतस्तमन्तं राजन्यं तत्तेनानुष्टुभि बृहतः करणेनान्त एवोभयविधे प्रतिष्ठापयति यस्माद्राजन्यस्य ऐश्वर्य्यस्य सीमा तस्माद्राजन्यानाम्मध्ये यः पुमान् ह्रीयते ऐश्वर्य्याद्भ्रष्टो भवति स पुनः कदाचिदपि अग्रं राज्ञाम्मध्ये श्रेष्ठत्वं न प्राप्नोति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

द्वादशः खण्डः।

अथ त्रयोदशः खण्डः।

गोसवाख्यं क्रतुं विधत्ते।

यो वै वाजपेयः स राजसूयो यो राजसूयः स वरुणसवोऽथैष गोसवः स्वाराज्यो यज्ञः ॥ १ ॥

यएव वाजपेयः पूर्व्वाध्यायोक्तः सएव राजसूयः तयोरुभयोः स्वाराज्यप्राप्तिहेतुत्वसाम्यात् तथैव राजसूयवरुणसवयोरैक्यं योऽयं सूयतेऽभिषूयते सोमो यस्मिन्निति सवः सोमयागः स च पश्चाद्वरुणकर्त्तृकः वरुणस्य वै सुषुवाणस्येति श्रुतत्वात् अथानन्त-

रमेष पुरतो वक्ष्यते गोसवाख्यो यज्ञः सोऽपि यज्ञः स्वाराज्याय वाजपेयराजसूयवरुणसवा इव स्वाराज्यफलोपेतः १ ॥

एतद्वेदनं प्रशंसति ।

स्वाराज्यं गच्छति य एवं वेद ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

स्वाराज्यशब्दस्यार्थमाह ।

प्रजापतिर्हि स्वाराज्यं परमेष्ठी स्वाराज्यं ॥ ३ ॥

प्रजापतिर्हिरण्यगर्भो न तु कश्यपादिर्विवक्षितः तदेव विशदीकर्त्तुं परमेष्ठीत्युक्तं तदीयमैश्वर्य्यं स्वाराज्यमिति ॥ ३ ॥

तयोरभेदोपचारवेदनं प्रशंसति ।

परमेष्ठितां गच्छति य एवं वेद ॥४॥

स्पष्टं ॥ ४ ॥

पृष्ठस्तोत्रे सामद्वयं तद्वेदनप्रशंसाञ्च दर्शयति ।

उभे बृहद्रथन्तरे भवतस्तद्धि स्वाराज्यꣳ स्वाराज्यं गच्छति य एवं वेद ॥५॥

सामद्वयस्य स्वाराज्यहेतुः तथा तद्रूपत्वोपचारः ॥ ५ ॥

दक्षिणाविशेषं तद्वेदनप्रशंसाञ्च दर्शयति ।

अयुतं दक्षिणास्तद्धि स्वाराज्यꣳ स्वाराज्यं गच्छति य एवं वेद ॥६॥

अयुतं सहस्रदशकं तत्संख्याका गावोऽत्र दक्षिणाः ॥६॥

अभिषेकसाधनं द्रव्यं तद्वेदनप्रशंसाञ्च दर्शयति।

प्रतिदुहाभिषिच्यते तद्धि स्वाराज्यꣳ स्वाराज्यं गच्छति य एवं वेद ॥७॥

सद्योदुग्धं पयः प्रतिधुगित्युच्यते तेन प्रतिदुहा पयसाऽत्राभिषेकः ॥ ७ ॥

तस्य कालं तद्वेदनप्रशंसाञ्च दर्शयति।

बृहतः स्तोत्रं प्रत्यभिषिच्यते तद्धि स्वाराज्यꣳ स्वाराज्यं गच्छति य एवं वेद ॥८॥

पृष्ठेषु साम्नः सम्बन्धि यत् स्तोत्रमस्ति तत्प्रति ततः पूर्व्वं तद्योग्यत्वायेत्यर्थः ॥ ८ ॥

अभिषेकस्य देशविशेषं विधत्ते।

अनुद्धृते दक्षिणत आहवनीयस्याभिषिच्यतेऽस्यामेवानन्तर्हितेऽध्यभिषिच्यते ॥९॥

आहवनीयस्य दक्षिणभागे भूमावनुद्धृते कम्बलपीठादिभिरनन्तर्हिते देशेऽभिषेकः तथा सति क्षत्रस्यायामपि भूमावन्तर्हितैरपि शत्रुभिरनवबद्धे देशेऽभिषिक्तो भवति ॥ ९ ॥

• स्तोमविशेषं विधत्ते।

सर्वः षट्त्रिꣳशस्तेन गोसवः ॥१०॥

अस्य क्रतोः स्तोत्रेषु यः स्तोमोऽस्ति सर्व्वोऽपि षट्त्रिंशएव कर्त्तव्यः षट्त्रिंशदक्षरा बृहती बार्हताः पशव इति श्रुत्यन्तरात् संख्याद्वारा पशुसम्बन्धोऽस्ति तेन सम्बन्धेनायं क्रतुः गोसवना-मको भवति तैत्तिरीया अपि तथैवामनन्ति पशुस्तोमो वा एष तेन गोसव इति अन्यदपि सर्व्वैः संग्टह्याम्नातं एष गोसवः षट्त्रिंशउक्थ्यो बृहत्साम पवमाने कण्वरथन्तरं भवति यो वै वाजपेयः स सम्राट्सवः यो राजसूयः स वरुणसवः प्रजा पतिः स्वाराज्यं परमेष्ठीति उभे बृहद्रथन्तरे भवतः तद्धि स्वा-राज्यमयुतं दक्षिणास्तद्धि स्वाराज्यं प्रतिदुह्याभिषिच्यते तद्धि स्वाराज्यं अनुब्रूते दक्षिणत आहवनीयस्य बृहतः स्तोत्रं प्रत्य-भिषिञ्चतीति ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
त्रयोदशः खण्डः।

अथ चतुर्द्दशः खण्डः।

मरुत्स्तोमाख्यं क्रतुं विधत्ते।

अथैष मरुत्स्तोम एतेन वै मरुतोऽपरिमितां पुष्टिमपुष्यन्नपरिमितां पुष्टिं पुष्यति य एवं वेद ॥१॥

मरुद्भिर्दृष्टत्वाच्चायम्मरुत्स्तोमः अपरिमितामतिबहुलां धनधान्यादिपुष्टिमकुर्व्वन्॥ १॥

स्तोमेषु किञ्चिद्विशेषं विधत्ते।

यद्गणशः स्तोमास्तेन मरुत्स्तोमो गणशो हि मरुतः॥ २॥

गणशः सङ्घरूपेणात्र स्तोमाः प्रवर्त्तन्ते त्रिवृतां सङ्घः पञ्चदशानां सङ्घः सप्तदशानां सङ्घ एकविंशानां सङ्घ इति तत्समष्टित्रिरेकोनपञ्चाशत् ४९ मरुतो विभक्ता अपि गणरूपेणैव वर्त्तन्ते सप्तगणा वै मरुत इति श्रुत्यन्तरात् यद्यस्मान्मरुत इव स्तोमा अत्र गणशो वर्त्तन्ते तेनायं क्रतुर्मरुत्स्तोमनामकः॥ २॥

अत्र यजमानसङ्घस्याधिकारित्वमाह।

एतेनैव त्रीन् याजयेत्॥ ३॥

अनेकं त्र्येकमित्यर्थः तथा सूत्रं सखायो भ्रातरो वा ये सम्पादयेयुस्ते मरुत्स्तोमेन यजेरन्निति॥ ३॥

प्रथमं स्तोमसङ्घं विधत्ते।

यत् त्रीणि त्रिवृन्ति स्तोत्राणि भवन्ति नाना ब्रह्मवर्चसे प्रतितिष्ठन्ति॥ ४॥

बहुविधप्रास्तरूपे ब्रह्मवर्च्चसे यजमानास्त्रयः प्रतितिष्ठन्ति॥ ४॥

द्वितीयं स्तोमसङ्घं विधत्ते।

यत् त्रीणि पञ्चदशानि नाना वीर्य्ये॥ ५॥

ब्रह्मण आज्यमच्छावाकस्याज्यं माध्यन्दिनः पवमान इत्येतानि पञ्चदशस्तोमोपेतानि तत्साध्यञ्च वीर्य्यं शारीरं वाचिकं मानसञ्चेति नानाविधं तस्मिन् प्रतितिष्ठतीति॥ ५॥

तृतीयं स्तोमसङ्घं विधत्ते।

यत् त्रीणि सप्तदशानि नाना पशुषु॥ ६॥

होतुः पृष्ठं मैत्रावरुणस्य पृष्ठं ब्रह्मणः पृष्ठमित्येतानि त्रीणि सप्तदशस्तोमोपेतानि साध्याः पशवो गवाश्वमहिष्यादिरूपेण नानाविधाः॥ ६॥

चतुर्थं स्तोमसङ्घं विधत्ते।

यत् त्रीण्येकविंशानि नाना प्रतितिष्ठन्ति॥ ७॥

अच्छावाक आर्भवः पवमानोऽग्निष्टोमसामेत्येतानि त्रीण्येकविंशस्तोमोपेतानि तत्साध्याः प्रतिष्ठिताः धनधान्यपुत्रभृत्यादिरूपेण नानाविधाः॥ ७॥

वेदनं प्रशंसति।

प्रतितिष्ठति य एवं वेद॥ ८॥

स्पष्टं॥ ८॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य चतुर्दशः खण्डः।

अथ पञ्चदशः खण्डः।

कुलायाख्यं क्रतुं विधत्ते।

अथैष इन्द्राग्न्योः कुलायः प्रजाकामो वा पशुकामो वा यजेत प्रजा वै कुलायं पशवः कुलायं गृहाः कुलायं कुलायमेव भवति ॥ १ ॥

इन्द्राग्निभ्यां दृष्टत्वात्तदीयोऽयं क्रतुः स च कुलायप्राप्तिहेतुः प्रजापशुगृहाणां निवासनिमित्तत्वात् कुलायत्वं ॥ १ ॥

अत्र सङ्घस्याधिकारमाह।

एतेनैव द्वौ याजयेत् ॥ २ ॥

द्वावेव न त्वेकमित्यर्थः ॥ २ ॥

अथ स्तोमसङ्घान्विधत्ते।

यत् षट् त्रिवृन्ति स्तोत्राणि भवन्ति नाना ब्रह्मवर्चसे प्रतितिष्ठतो यत् द्वे पञ्चदशे नानावीर्य्ये यत् द्वे सप्तदशे नाना पशुषु यत् द्वे एकविंशे नाना प्रतितिष्ठतः प्रतितिष्ठति य एवं वेद ॥ ३ ॥

पूर्व्ववद्व्याख्येयं ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य पञ्चदशः खण्डः।

अथ षोडशः खण्डः ।

इन्द्रस्तोमाख्यं क्रतुं विधत्ते ।

अथैष पञ्चदश इन्द्रस्तोम उक्थ्यः ॥ १ ॥

सोऽयं क्रतुः सर्व्वेष्वपि स्तोत्रेषु पञ्चदशस्तोमयुक्तः उक्थस्तोत्रैरुपेतत्वादुक्थसंस्थारूपस्येष्टत्वादिन्द्रस्तोमउक्थ्य इति नामकः स्तोमः क्रतुः ॥ १ ॥

तद्वेदनं प्रशंसति ।

एतेन वा इन्द्रोऽत्यन्या देवता अभवदत्यन्याः प्रजा भवति य एवं वेद ॥ २ ॥

एतेनैव क्रतुना इन्द्रः स्वयमन्या अग्निवरुणाद्या देवता अत्यभवत् अतिक्रम्य समर्थोऽभवत् वेदितुरपि तथैव फलं ॥ २ ॥

तत्राधिकारिणमाह ।

राजन्यं याजयेत् ॥ ३ ॥

इन्द्रस्य क्षत्रियाभिमानिदेवतात्वात्तदीये यज्ञे क्षत्रियस्याधिकारः ॥ ३ ॥

सर्व्वेषु स्तोत्रेषु विहितं पञ्चदशस्तोममनूद्य प्रशंसति ।

सर्व्वः पञ्चदशो भवत्योजो वीर्य्यं पञ्चदश ओजसैवैनं वीर्य्येण समर्द्धयति ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

ऋग्विशेषान्विधत्ते ।

ऐन्द्रीषु भवन्तीन्द्रियेणैवैनं वीर्य्येण समर्द्धयति ॥ ५ ॥

इन्द्रो देवता यासामृचां ता ऐन्द्र्यः तास्व द्विविधाः प्रत्यक्षाः परोक्षाश्च इन्द्रायेन्दो मरुत्वत इत्याद्यास्विन्द्रशब्दश्रवणात् एताः प्रत्यक्षा ऐन्द्र्यः वृषा सोम द्युमां असीत्याद्यासु वृषत्वलिङ्गेन ऐन्द्रत्वानुमानादेव ऐन्द्र्यः तासु सर्वासु पञ्चदशस्तोमे सति इन्द्रियेण वीर्य्यसमृद्धिर्भवति ॥५॥

उकथसंस्थारूपत्वं प्रशंसति ।

उकथ्यो भवति पशवो वा उक्थानि विडुक्थानि विशमेवास्मै पशूननुनियुनक्त्यनपक्रामुकास्माद्विड् भवति ॥ ६ ॥

उकथस्तोत्राणां पशुसाधनत्वेन पशुत्वं बहुत्वसाम्येन प्रजारूपत्वं अस्मै यजमानाय प्रजां पशूननुकूलान् कृत्वा सम्पादयति सा च पुत्त्रादिप्रजा कदाचिदप्यस्मान्नापक्रामति ॥६॥

स्तोत्रगतां स्तोमगताञ्च पञ्चदशसंख्यां प्रशंसति ।

पञ्चदशस्तोत्राणि पञ्चदशानि भवन्त्योजो वीर्य्यं पञ्चदशोऽभिपूर्वमेवास्मिन्नोजो वीर्य्यन्दधाति ॥७॥

अस्मिन् यजमाने अभिपूर्वं शरीरं वाङ्मनश्चेत् तेनानुपूर्व्येण प्रबलं सामर्थ्यं तेषु सम्पादयति ॥७॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

षोडशः खण्डः।

अथ सप्तदशः खण्डः।

इन्द्राग्निस्तोमनामकं क्रतुं विधत्ते।

अथैष इन्द्राग्न्योः स्तोम एतेन वा इन्द्राग्नी अत्यन्या देवता अभवतामत्यन्याः प्रजा भवति य एवं वेद ॥ १ ॥

पूर्ववद्व्याख्येयं ॥१॥

सर्वेषु स्तोत्रेषु पर्य्यायेण स्तोमद्वयं विधत्ते।

त्रिवृत् पञ्चदशो भवति ॥ २ ॥

प्रथमतृतीयपञ्चमसप्तमनवमैकादशस्तोत्रेषु त्रिवृत्स्तोमः द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशस्तोत्रेषु पञ्चदशस्तोमो भवति एतदेवाभिप्रेत्य कल्पेऽभिहितं त्रिवृत्पञ्चदशौ स्तोमौ विपर्य्यासमिति ॥२॥

उक्तं स्तोमद्वयं तद्वेदनञ्च प्रशंसति।

ब्रह्म वै त्रिवृत् क्षत्रं पञ्चदशो ब्रह्मण इव चास्य

क्षत्रस्येव च प्रकाशो भवति य एवं वेद ॥ ३ ॥

त्रिवृत् स्तोमस्य ब्राह्मणस्य च प्रजापतिमुखजन्यत्वसाम्यात् एकत्वोपचारः पञ्चदशस्तोमस्य क्षत्रियस्य सोऽयं प्रसिद्धिः तथा वेदितुः प्रसिद्धिरियं भवति ॥३॥

तत्रोभयोरप्यधिकारमाह ।

राजा च पुरोहितश्च यजेयातां ॥ ४ ॥

स्पष्टोऽर्थः ॥४॥

अत्रोभयोर्ब्रह्मक्षत्रिययोराभिरूप्यकथने सम्पत्तिरियमिति चेत् तदुच्यते ।

गायत्रीश्च जगतीश्च सम्पद्यते ॥ ५ ॥

षट् त्रिवृन्ति स्तोत्राणि तैः चतुःपञ्चाशत् स्तोत्रीया षट् पञ्चदशानि स्तोत्राणि तैर्भवन्ति स्तोत्रीयाः वर्गद्वयं मिलित्वा चतुश्चत्वारिंशदधिकं शतं स्तोत्रीया भवन्ति तासु चतुर्विंशति विभज्यमानाः षट् गायत्र्यो भवन्ति द्वाभ्यां गायत्रीभ्यामेका जगतीति तिस्रो जगत्यः तथा चोपग्रन्थेऽभिहितं उद्भिद्बलभित् ऐन्द्राग्नीषु चतुश्चत्वारिंशदधिकं शततः षट् गायत्र्यस्तिस्रो जगत्य इति ॥५॥

उभयविधसम्प्रयुक्तं फलं दर्शयति ।

तेजो ब्रह्मवर्चसं गायत्र्या ब्राह्मणोऽवरुन्धे विशं राजा जगत्या प्रविशति ॥ ६ ॥

गायत्रीसम्पत्तिनिमित्तं ब्राह्मणस्य तेजोब्रह्मवर्चसप्राप्तिफलं जगतीसम्पत्तिनिमित्तं राज्ञः प्रजाप्राप्तिफलं ॥६॥

अस्मिन् क्रतावन्यमप्यधिकारिणमाह ।

पुरोधाकामो यजेत ॥७॥

पुरोधा राजपौरोहित्यं ॥७॥

तमेतमधिकारिणं तद्वेदनञ्च प्रशंसति ।

बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति स एतेनायजत स देवानां पुरोधामगच्छद्गच्छति पुरोधां य एवं वेद ॥८॥

स्पष्टोऽर्थः ॥८॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

विघनाख्यं क्रतुं विधत्ते ।

अथैष विघनः ॥१॥

स्पष्टोऽर्थः ॥१॥

एतस्य नाम्नो निमित्तं सूचयति ।

इन्द्रोऽकामयत पाप्मानं भ्रातृव्यं विहन्यामिति

स एतं विघनमपश्यत्तेन पाप्मानं भ्रातृव्यं व्यहन् वि-पाप्मानं भ्रातृव्यं हते य एवं वेद ॥२॥

पुरा कदाचिदिन्द्रं राजानं मरुदादिगणदेवताः प्रजा उद्दण्डा भूत्वा नापूजयन् तदानीं पूजाप्रतिबन्धहेतुं पापरूपं शत्रुमेतेन क्रतुना विशेषेण हतवान् अतो विहननहेतुत्वादस्य विघननामकत्वं सोऽयमर्थस्तैत्तिरीयैर्विशदीकृत्याम्नायते इन्द्रं वैश्वानरो मरुतेनोपाचयेत् सोऽनुपचय्यमान एनं विघनमपश्यत् तमाहरत् तेनायजत् तेनैवासान्तं संस्तम्भं व्यहन् यद्व्यहन् तद्विघनस्य विघनत्वं विपाप्मानं भ्रातृव्यं हते य एतेन यजते य उ चैनमेवं वेदेति ॥ २ ॥

अस्मिन् क्रतौ विधित्सितान् स्तोमविशेषान् क्रमेण प्रशंसति।

यत् त्रिवृद्भवति प्राणाꣳस्तेनावरुन्धे यत् द्वादशः संवत्सरं तेन यत् पञ्चदशो वीर्य्यं तेन यत् सप्तदशो ऽन्नाद्यं तेन यदेकविंशः प्रतिष्ठा तेन यन्नवदशः प्रजननं तेन यच्चतुर्व्विंशो ब्रह्मवर्चसं तेन यत्त्रिणवो वज्रं भ्रातृव्याय प्रहरति ॥३॥

प्राणापानव्यानरूपेण प्राणानां त्रित्वात् त्रिवृता तत्प्राप्तियुक्ता संवत्सरस्य द्वादशमासात्मकत्वात् द्वादशस्तोमेन संवत्सरप्राप्तिः वीर्य्यहेतुना पञ्चदशेन वीर्य्यप्राप्तिः अन्नाद्यहेतुना सप्त-

द्दशेनाम्नाद्यप्राप्तिः प्रतिष्ठाहेतुनैकविंशेन प्रतिष्ठाप्राप्तिः अस्मि-न्नेकविंशस्तोमे द्वयोः स्तोत्रीययोरुपरितनयोः सत्योस्ताभ्यां न्यूने नवदशाख्यः स्तोमः सम्पद्यते तेन च न्यूनेन च प्रजोत्पत्तिर्लभ्यते तथाच श्रुत्यन्तरं न्यूनाद्धि प्रजापतिः प्रजा असृजतेति चतुर्विंश-स्तोमस्य गायत्रीसाम्यात्तेन ब्रह्मवर्चसप्राप्तिः त्रिणवस्तोमस्य खड्गधारासमानत्वात् बहुधारोपेतवज्रत्वोपचारः तेन च वज्रेण वैरी प्रह्रियते ॥ ३ ॥

अस्मिन् क्रतावधिकारिणमाह।

पशुकामो यजेत बृहतीꣳ सम्पद्यते पशवो वै बृह-ती पशूनेवावरुन्धे ॥ ४ ॥

अयं क्रतुः स्तोत्रीयासङ्ख्यायां पर्य्यालोच्यमानायां बृहती सम्पद्यते कथमिति चेत् उच्यते द्वाभ्यां त्रिवृद्भ्यामष्टादशस्तो-त्रीया द्वाभ्यां द्वादशाभ्यां चतुर्विंशतिः द्वाभ्यां पञ्चदशसप्तदशाभ्यां द्वात्रिंशत् द्वाभ्यां एकविंशनवदशाभ्यां चत्वारिंशत् द्वाभ्यां चतु-र्विंशाभ्यामष्टाचत्वारिंशत् द्वाभ्यां त्रिणवाभ्यां चतुःपञ्चाशत् इत्येवं द्वे शते षोडशाधिके स्तोत्रीयाणां भवतः तासु षट्त्रिंश-दक्षरा बृहत्यः षट्सम्पद्यन्ते पशवश्च बृहतीसम्बन्धाश्छन्दसां पशुविषये मात्सर्य्ये सति मर्य्यादाधानं प्रतिज्ञाय बृहती विजयं प्राप्य पशून् स्वकीयानकरोत् तस्मात् बृहतीसम्पत्ति-द्वारा पशुप्राप्तिर्युक्ता ॥ ४ ॥

बृहतीगतषट्संख्याद्वारापि पशुप्राप्तिमाह।

षडेता बृहत्यो भवन्ति षडृतवः संवत्सरः संवत्सरं पशवोऽनु प्रजायन्ते तानेवाप्नावरुन्धे ॥ ५ ॥

षट्संख्यानामृतूनां संवत्सरवर्त्तित्वात्प्रतिसंवत्सरं गवादिपशूनां वत्सोत्पादनाच्च तद्द्वारा पशुप्राप्तिश्च स्वाधीनताकरणञ्च सम्भवत्येव ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य अष्टादशः खण्डः।

अथ ऊनविंशः खण्डः।

द्वितीयं विघनाख्यं क्रतुं विधत्ते।

इन्द्रमदेव्यो माया असचन्त स प्रजापतिमुपाधावत्तस्मा एतं विघनं प्रायच्छत्तेन सर्वा मृधो व्यहत यद्व्यहत तद्विघनस्य विघनत्वं ॥ १ ॥

अदेवा असुरास्तेषां सम्बन्धिन्यो यास्ता अदेव्यः माया वञ्चना असुरैः प्रयुक्ता इन्द्रमसचन्त इन्द्रेण संयुक्ता अभवन् सचेन्द्रोमायापरिहारोपायार्थं प्रजापतिं सेवित्वा विघनाख्यं क्रतुं लब्ध्वा तेन क्रतुना सर्वा मृधः सर्वाञ्छत्रून् व्यहत विशेषेण हतवान् यस्मात् व्यहत अनेन व्युत्पत्त्या क्रतोर्विघननामकत्वं सम्पन्नं ॥ १ ॥

वेदनपूर्वकयोर्यजमानयोः फलसमानमाह।

सर्वान्स्पृधो विहते य एवं विद्वान्विघनेन यजते यमेवं विद्वान्विघनेन याजयति ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

यथात्र शत्रुविघातः फलं तथा पशुषु प्रतिष्ठाप्यस्य फलमित्याह ।

पशुकामो यजेत पशवो वै बृहती पशुष्वेव प्रतितिष्ठति ॥ ३ ॥

अत्रापि पूर्व्ववत् स्तोत्रेषु बृहतीसम्पत्त्या पशुप्रतिष्ठामुपपादयेत् स्तोत्रेषु स्तोत्रस्तोमविशेषप्रवृत्तिप्रकारः कल्पे दर्शितः द्वे त्रिवृती स्तोत्रे द्वे द्वादशे द्वे पञ्चदशसप्तदशे द्वे चतुर्व्विंशे द्वे त्रिणवे इति पूर्व्वोत्तरयोः स्तोमक्लृप्तिसाम्येऽपि ऋक्विशेषसामविशेषाभ्यामवान्तरभेदः कल्पादिषु द्रष्टव्यः एकैकस्य स्तोमस्य स्तोत्रद्वये प्रवृत्तिस्तैत्तिरीयब्राह्मणेऽपि सूचिता तस्य द्वे द्वादशे स्तोत्रे भवतः द्वे चतुर्व्विंशे इति अस्मिन्नध्याये विहितानां क्रतूनां आनुपूर्व्वीं संगृह्य पूर्व्वाचार्य्यैरेवमुक्तं ।

राट् विराजाख्यौपशदः पुनः स्तोमस्ततः परः ।
प्रोक्तौ चतुष्टोमौ तु चतुष्टोमः प्रथमस्तयोः ।
उत्तरस्तु चतुष्टोम उद्भिद्बलभिदौ ततः ।
अथापचितिपच्याख्यौ ज्योतिराख्यस्ततःपरः ।
ऋषभो गोसवः पश्चान्मरुत् स्तोमस्ततः परः ।

कुलाय इन्द्रस्तोमः स्यादिन्द्राग्निस्तोम इत्यपि ।
विघनौ द्वाविहाध्याये यागा एकोनविंशतिः ।
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ३ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य एकोनविंशः खण्डः ।

एकोनविंशोऽध्यायः समाप्तिमगमत् ।

अथ विंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥
विंशाद्यैस्त्रिभिरध्यायैरहीनानां प्रकल्पनं ।
द्व्यहः प्रभृतयोऽहीना द्वादशाहान्तिमाः सवाः ॥
अहान्ता अतिरात्रान्ता द्वितीयेऽह्नि समापनात् ।
त्रयोदशातिरात्रास्तु विंशाध्याये प्रकल्पिताः ॥
द्व्यहास्त्रयस्तथा गर्गत्रिरात्रस्यापि किञ्चन ।
ज्योतिष्टोमोऽतिरात्रोऽथ सर्व्वस्तोम उदीरितः ॥
आप्तोर्य्यामस्तृतीयोऽत्र नवसप्तदशस्ततः ।
पञ्चमो विषुवान् स्तोमो गोष्टोमश्च ततः परः ॥
आयुष्टोमस्ततः पश्चादभिजिद्विश्वजित्ततः ।
चत्वारस्त्रिवृदाद्या येऽत्यतिरात्रास्त्रयोदश ।
द्व्यहेष्वङ्गिरसः पूर्व्वमुक्तश्चैतरथस्ततः ।
ततः कपिवनो गर्गत्रिरात्रं किञ्चिदीर्य्यते ॥

आदौ तावत् ज्योतिष्टोमस्यातिरात्रस्य स्तोमक्लृप्तिमाह ।

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्च-

दशोमाध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविꣳशोऽग्निष्टोमः सोक्थः पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

अत्राग्निष्टोमान्तेषु स्तोमेषु प्रकृतवदेव स्तोमक्लृप्तिः त्रिषूक्थस्तोत्रेष्वपि अग्निष्टोमवदेकविंशः स्तोमः त्रिषु पर्य्यायेषु यानि द्वादशस्तोत्राणि तैर्युक्ता रात्रिः पञ्चदशस्तोमोपेता सन्धिस्तोत्रे त्रिवृत् स्तोमः एतैर्युक्ते ज्योतिष्टोमेऽवान्तरभेदः ॥ १ ॥

ततस्त्वमतिरात्रं विधत्ते।

ज्योतिष्टोमेनातिरात्रेणर्द्धिकामो यजेताभिक्रमो वा एष स्तोमानामभिक्रान्त्या अभिक्रान्ते ह्यि यज्ञस्यर्द्धोति ॥ २ ॥

एषोऽतिरात्रः स्तोमानां यज्ञानां मध्ये अभिक्रमो वै अभितः क्रमणस्य फलप्राप्तेर्हेतुस्तस्मादेतदनुष्ठानमभिक्रान्त्यै फलप्राप्त्यै भवति तस्मादनुष्ठाताऽभिक्रान्तेन फलप्राप्तियुक्तेन यज्ञस्यानुष्ठानेन ऋध्नोति सर्व्वसमृद्धिं प्राप्नोति ॥ २ ॥

अस्य क्रतोरवयवद्वारकांस्त्रीन् प्रकारान् प्रशंसति।

एषोऽग्निष्टोम एष उक्थ एषोऽतिरात्रोऽग्निष्टोमेन वै देवा इमं लोकमभ्यजयन्नुक्थैरन्तरिक्षꣳरात्राम् लोकमजयन्नहोरात्राभ्याममुमभ्यवर्त्तन्त ॥ ३ ॥

आद्यो द्वादशस्तोत्रगतो योऽग्निष्टोमरूपस्तेन भूर्लोकजयः मध्यम उक्थस्तोत्रभागः उक्थ्यक्रतुरूपस्तेनान्तरिक्षलोकजयः तृतीयोऽतिरात्रस्तोत्रभागोऽतिरात्रस्तेन स्वर्गलोकजयः एवमनुष्ठातारोऽहोरात्राभ्यां लोकत्रयमभिप्राप्यावस्थिताः ॥ ३ ॥

सन्धिस्तोत्रं प्रशंसति।

पराच्योवा अन्या व्युच्छन्ति प्रतीच्योऽन्या एषा वाव प्रतीची व्युच्छति याश्विनेन व्युच्छति प्रतीचीरेवास्मा उषसोविवासयति ॥ ४ ॥

अन्याः काश्चिदुषसः सूर्य्योदयप्राचीनकालावस्थाः पराच्यः पुनरागमनरहितेन पराङ्मुखत्वेन युक्ता वर्त्तन्ते पुनरावृत्तेरादित्यादायुःक्षयहेतवो भवन्ति ताभ्योऽन्याः काश्चिदुषसः प्रतीच्यः पुनरावृत्तिरूपेण प्रत्यङ्मुखत्वेन युक्ता आयुषः क्षयन्न कुर्व्वन्ति तादृगुषा कति चेत् उच्यते येयमुषा आश्विनशस्त्रेन सह व्युच्छति विशेषेणाविर्भवति एषा वाव एषा वोषा प्रतीची संमुखे त्युच्यते तस्मादाश्विनशस्त्रेण दिनद्वयसन्धिवर्त्तिना सर्वा उषसो यजमानार्थं प्रतीचीरेव प्रत्यङ्मुखा एव कृत्वा विवासयति प्रकटी करोति ॥ ४ ॥

अत्र स्तोत्रीयाणां सङ्ख्यां प्रशंसति।

द्वे सꣳस्तुतानां विराजमतिरिच्येते एषा वै स्तनवती विराड् यं काममकामयते तमेतां दुग्धे ॥ ५ ॥

अस्मिन् क्रतौ संस्तुतानां स्तोत्रीयाणां मध्ये स्तोत्रीये विराजमतिक्रम्य वर्त्तेते तद्यथा द्वादशस्तोत्रेषु प्रकृतिवन्नवत्यधिकशतमित्येकोनविंशतिविराजस्त्रिषूक्थस्तोत्रेष्वेकविंशस्तोमे सति त्रिषष्ठिस्तोत्रीयाः तत्र षड्विराजस्त्रिस्त्रस्तोत्रीया अतिरिच्यन्ते द्वादशस्तोत्रेषु पञ्चदशस्तोमे सति अशीत्यधिकं शतं स्तोत्रीयास्तत्राष्टादशविराजः सन्धिस्तोत्रे त्रिवृत्स्तोमे सति नव स्तोत्रीयाः तत्र पूर्व्वोक्तानां तिसृणाम्मध्ये एकया स्तोत्रीयया सह विराट् भवति ततो द्वे स्तोत्रीये अवशिष्येते तेन विराड्रूपाया योषितस्तत्स्थानीयाः तस्मादेषा विराट् स्तनवती सम्पन्ना एतां विराजं कामधेनुसदृशीं यजमानस्यापेक्षितं सर्व्वं कामं दुग्ध ॥ ५ ॥

बहिष्पवमानस्य सन्धिस्तोत्रगतौ स्तोमौ प्रशंसति ।

त्रिवृता प्रैति त्रिवृतोदेति प्राणोवै त्रिवृत्प्राणेनैव प्रैति प्राणमभ्युदेति ॥ ६ ॥

त्रिवृत्स्तोमेनेमं क्रतुं प्रैति प्रारभते उदेति समापयति प्राणवृत्तित्रयसाम्ये त्रिवृता प्राणमेव प्रारम्भसमाप्ती सम्पद्येते ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

सर्व्वस्तोमाख्यस्यातिरात्रस्य स्तोमक्लृप्तिं दर्शयति ।

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविंशानि पृष्ठानि त्रिणव आर्भवस्त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोह्युक्थानि त्रिणवं प्रथमं द्वे एकविंशे सषोडशिके पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

अत्र तान्युक्थानि प्रत्यवरोहीणि विपरीतक्रमोपेतानि स एव क्रमस्त्रिणवमित्यादिना स्पष्टीक्रियते त्रिषु प्रथमं स्तोत्रमधिकसंख्यायुक्तेन त्रिणवस्तोमेनोपेतं उत्तरे द्वे स्तोत्रे न्यूनसंख्यायुक्तेनैकविंशस्तोमेनोपेते ते च द्वे स्तोत्रे सषोडशिके अतः षोडशिस्तोत्रेऽप्येकविंशस्तोमः पूर्वोक्तक्रतुः षोडशिरहितः अयं त्वतिरात्रः सषोडशिकः स्पष्टमन्यत् ॥ १ ॥

अत्राधिकारिणमाह ॥

सर्वस्तोमेनातिरात्रेण बुभूषन्यजेत सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयति ॥ २ ॥

यः पुमानैश्वर्यमिच्छति सोऽत्राधिकारी अयञ्च क्रतुरैहिकस्यामुष्मिकस्य प्रापणीयस्य सर्वस्य प्राप्त्यै समर्थः तथा जेतव्यस्य च सर्वस्य शत्रुसमूहस्य जयाय पर्य्याप्तः तस्मादेतेन क्रतुना प्राप्तव्यं सर्वमपि प्राप्नोति जेतव्यं सर्वं जयति ॥ २ ॥

अस्मिन् क्रतौ विद्यमानान् स्तोमान् विद्यमानानि छन्दांसि च प्रशंसति ।

यत्त्रिवृद्बहिष्पवमानं भवति तत्त्रिवृतꣳ स्तोममाप्नोति गायत्रीं छन्दो यत् पञ्चदशान्याज्यानि तत् पञ्चदशꣳ स्तोममाप्नोति त्रिष्टुभं छन्दो यत्सप्तदशो माध्यन्दिनः पवमानस्तत्सप्तदशꣳ स्तोममाप्नोति जगतीं छन्दो यदेकविꣳशानि पृष्ठानि तदेकविꣳशꣳ स्तोममाप्नोत्यनुष्टुभं छन्दो यत्त्रिणव आर्भवस्तत्त्रिणवꣳ स्तोममाप्नोति पङ्क्तिं छन्दो यत्त्रयस्त्रिꣳशोऽग्निष्टोमस्तत्त्रयस्त्रिꣳशꣳ स्तोममाप्नोति विराजं छन्दो यदुष्णिक्ककुभौ क्रियेते तदुष्णिक्ककुभावाप्नोति यद्बृहतीषु मन्थिना स्तुवन्ति तद्बृहतीमाप्नोति यदाश्विनꣳ शस्यते तत्सर्वमेवैतेनाप्नोति सर्वञ्जयति ॥३॥

पृष्ठे षडहे षट्सु दिनेषु क्रमेण त्रिवृत्पञ्चदशसप्तदशैकविंशतित्रिणवत्रयस्त्रिंशाख्याः सर्वे स्तोमा विद्यन्ते यथा गायत्र्यादीनि छन्दांसि भवन्ति गायत्रं प्रथममहस्त्रैष्टुभं द्वितीयञ्जागतं तृतीयमानुष्टुभं चतुर्थं पाङ्क्तं पञ्चमं सर्व्वछन्दस्कं षष्ठं तथा चातिरात्रबहिष्पवमानादिस्तोत्रैस्तद्गतत्रिवृदादिस्तोमाभिमानिदेवताः स्तोमसहभाविगायत्र्यादिछन्दोऽभिमानिदेवताश्च प्राप्नोति अत्र सर्व्वछन्दःसमष्टिरूपत्वेन विराजोऽभिप्रेत्य तत् प्राप्तिरुच्यते विशेषेण राजमानत्वात्तद्रूपत्वोपचारः ॥ ३ ॥

अथास्मिन् सर्वस्तोमेऽतिरात्रे पञ्चैकादशिनीं विधत्ते ।

प्राञ्चं वै त्रयस्त्रिᳪंशो यज्ञं प्रभुजति तमध्वर्य्युरे-कादशिन्या पुरस्तात्प्रत्युद्यच्छत्येकादश रशना एका-दश पशव एकाश यूपा भवन्ति तत्त्रयस्त्रिᳪंशे त्रय-स्त्रिᳪंशं प्रतिष्ठापयति ॥ ४ ॥

योऽयं त्रयस्त्रिंशः स्तोमः सोऽन्त्यं सर्वेषां स्तोमानां समाप्ति-स्थानीयः त्रयस्त्रिंशो वै स्तोमानां प्रतिष्ठेति श्रुतेः स चास्य क्रतोर्म्मध्येऽग्निष्टोमसाम्नि प्रयुक्तः सन् प्राञ्चमृजुत्वेन गच्छन्त-मेतं यज्ञं प्रभुजति प्रकर्षेण कुटिलं यज्ञं अध्वर्युः पुरस्तात् प्रातःकाले कृतया पश्वेकादशिन्या प्रत्युद्यच्छति पुनः कौटिल्य-परिहारेणोद्यतं करोति एकोत्तराणां दशानां समाहार एकादशिनी यूपस्तम्भवेष्टनहेतवो रज्जवो रशनास्तासां रशना-नाञ्च प्रत्येकमेकादशसंख्योपेतत्वान्मिलित्वा त्रयस्त्रिंशत् संख्या सम्पद्यते तथाश्मिंस्त्रयस्त्रिंशत्सङ्घे यज्ञकौटिल्यकारिणं त्रय-स्त्रिंशस्तोमं प्रतिष्ठापयति ॥ ४ ॥

उक्तक्रत्वनुष्ठायितद्वेदिनोः समानफलमाह ।

तया समुद्यतया रात्र्या यं यङ्कामं कामयते तं त-मभ्यश्नुते यं यङ्कामं कामयते तं तमभ्यश्नुते य एवं वेद ॥ ५ ॥

समुद्यतया सम्यगनुष्ठितेनानेनातिरात्रक्रतुना स्पष्टमन्यत् ॥ ५

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

आप्तोर्य्यामाख्यं क्रतुं विवक्षुस्तत्र स्तोमक्लृप्तिं दर्शयति ।

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविꣳशꣳ होतुः पृष्ठं छन्दोमा इतराणि त्रिणव आर्भवस्त्रयस्त्रिꣳशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथममथैकविꣳशमथ सप्तदशमेकविꣳशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिस्त्रिवृत् प्रथममतिरिक्तस्तोत्रमथ पञ्चदशमथ सप्तदशमथैकविꣳशं ॥ १ ॥

इयञ्च स्तोमक्लृप्तिः पूर्व्वाचार्य्यैरित्थं संगृहीता, आद्यस्तु त्रिवृतः पञ्चदशस्तोत्रचतुष्टयं। ततः सप्तदशञ्चैकविंशं तस्मात्परस्त्रयः। छन्दोमास्त्रिणवश्चापि त्रयस्त्रिंशं ततः परं। त्रिणवश्चैकविंशश्च तथा सप्तदशः परः। एकविंशं पञ्चदशस्तोत्रेषु द्वादशस्त्रयः। द्वयोस्त्रिवृत् ततः पञ्चदशः सप्तदशस्ततः। एकविंश इति प्रोक्तमाप्तोर्य्यामे प्रकल्पनमिति पूर्व्वस्मिन् सर्व्वस्तोमातिरात्रे एतस्मिन्नाप्तोर्य्यामे च त्रयाणां प्रत्यवरोहीये साम्नि सत्यपि तत्र तृतीयस्तोत्रस्यैकविंशस्तोमः अत्र तु सप्तदश इति विशेषः सर्व्वेष्वपि चत्वार्य्यतिरिक्तानि ततोऽत्र त्रयस्त्रिंशस्तोत्राणि ॥ १ ॥

यथोक्तकल्पनोपेतस्य क्रतोराप्तोर्य्यामनामनिर्व्वचनस्यानुकूलामाख्यायिकामाह ।

प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टा अपाक्रामꣳस्तानग्निष्टोमेन नाप्नोत्तानुक्थैर्नाप्नोत्तान् षोडशिना नाप्नोत्तान्रात्र्या नाप्नोत्तान् सन्धिना नाप्नोत्तानाश्विनेन नाप्नोत्तानग्निमब्रवीदिमान्म ईप्सेति तानग्निस्त्रिवृता स्तोमेन जराबोधीयेन साम्ना नाप्नोत्तानिन्द्रमब्रवीदिमान्म ईप्सेति तानिन्द्रः पञ्चदशेन स्तोमेन सत्रासाहीयेन साम्ना नाप्नोत्तान् विश्वान् देवानब्रवीदिमान्म ईप्सतेति तान्विश्वे देवाः सप्तदशेन स्तोमेन मार्गीयवेण साम्ना नाप्नुवꣳस्तान्विष्णुमब्रवीदिमान्म ईप्सेति तान् विष्णुरेकविꣳशेन स्तोमेनाप्नोद्वारवन्तीयेनावारयतेदं विष्णुर्विचक्रम इति व्यक्रमत ॥२

अग्निष्टोमस्तोत्रादिकैराश्विनशस्त्रान्तैः प्रयोगविशेषैः पशुप्राप्त्यभावात्प्रजापतिरग्निमब्रवीत् हे अग्ने तानिमान् पशून् केनाप्युपायेन त्वमस्मदर्थमीप्स प्राप्तुमिच्छ एवमुक्तः स अग्निः जराबोधतद्विविड्ढीत्येतस्यामुत्पन्नं जराबोधीयनामकं साम त्रिवृत् स्तोमयुक्तं प्रयुज्य पशून्न प्राप्नोत् तथैवेन्द्रो विश्वे देवाश्च नाप्नुवन् त्वमुवः सत्रासाहमित्यस्यामुत्पन्नं साम सत्रासाहीयं तद्वोगायेत्यस्यामुत्पन्नं साम मार्गीयवं अश्वन्नत्वा इत्यस्यामुत्पन्नं साम वारवन्तीयं तेनैकविंशस्तोमयुक्तेन विष्णुः पशून् प्राप्यापक्रमणान्निवारितवान् प्राप्तौ स्तोमसाधननिवारणे साम

साधनं इदं विष्णुरित्येतया स्तोत्रीयया यथोचितसामोपेतया विष्णुर्व्यक्रमत विशेषेण पशूनामन्तः प्रविवेश ॥ २ ॥

उक्तक्रतावधिकारिणमाह ।

यस्मात्प्रेव पशवोऽभ्रंशेरन् स एतेन यजेत ॥३॥

पशवो गवाश्वादयो यस्मात् पुरुषात् प्रभ्रेवात्यन्तप्रकर्षेणैव भ्रष्टा अभवन् स एतेन क्रतुनेष्ट्वा भ्रंशान्निवार्य्य पशुसमृद्धिं प्राप्नुयादिति ॥ ३ ॥

अस्य क्रतोः सर्व्वकामप्राप्तिहेतुत्वमाह ।

एतेन वै देवा जैत्वानि जित्वा यं यं काममकामयन्त तं तमाप्नुवन्यं कामङ्कामयते तमेतेनाप्नोति ॥ ४

जैत्वानि जेतव्यान्यसुरसैन्यानि देववदन्योऽपि कामितं फलमाप्नोति ॥ ४ ॥

क्रतुनाम्नो निर्व्वचनं दर्शयति ।

तदप्तोर्य्याम्णोऽप्तोर्य्यामत्वं ॥ ५ ॥

तत्तस्मादेतेन सर्व्वमाप्नोतीति व्युत्पत्तेः सञ्ज्ञावादित्यर्थः तैत्तिरीयास्तु प्रजापतिः पशूनसृजतेत्याख्यातं सर्व्वेमाम्नायन्ते निर्व्वचनमेवमामनन्ति यदाप्नोत् तदाप्तोर्यामत्वमिति यामनशब्दो

यामशब्दस्य नियमनार्थः अयं क्रतुराप्तव्यानां फलानां नियामक इत्यर्थः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

नवसप्तदशाख्येऽतिरात्रक्रतौ स्तोमकॢप्तिमाह।

त्रिवृद्बहिष्पवमानं पञ्चदशꣳ होतुराज्यन्नव सप्तदशानि स्तोत्राण्येकविꣳशोऽग्निष्टोमः सोक्थः पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

अत्र मैत्रावरुणस्याज्यमारभ्यार्भवपवमानपर्य्यन्तं नवसंख्याकानि स्तोत्राणि सप्तदशस्तोमोपेतानि अतएवायं क्रतुर्नवसप्तदशाख्यः ॥ १ ॥

तस्मिन्नधिकारिणमाह।

नवसप्तदशेनातिरात्रेण प्रजाकामो यजेत नव वै प्राणाः प्रजापतिः सप्तदशः प्राणेभ्य एव तदधि प्रजापतेः प्रजाः प्रजायन्ते ॥ २ ॥

नवच्छिद्रवर्त्तित्वान्नवसङ्ख्याकाः प्राणाः द्वादशमासपञ्चर्त्तु

द्वादशसंवत्सरसप्तदशावयवोपेत: स एव कालात्मक: प्रजापति-स्तेन नवसप्तदशाख्यक्रत्वनुष्ठानेन प्राणेभ्य एव निमित्तभूतेभ्य: प्रजापते: कालात्मकादधि बाहुल्येन पुत्रपौत्रादिरूपा: प्रजा उत्पद्यन्ते ॥ २ ॥

कस्याश्चित् स्तोत्रीयाया: स्थाने विशेषं विधत्ते।

ककुभं प्राचीमुदूहति पुरुषो वै ककुब्गर्भो वा एष मध्यतो धीयते ॥ ३ ॥

तृतीयसवने योऽयमार्भव: पवमानस्तत्र पवस्व मधुमत्तम इति या ककुबस्ति तां प्राचीमुदूहति स्वस्थानादुद्धृत्य तत: पूर्वभाविनां माध्यन्दिनसवनगतां कृत्वा प्रयुञ्जीत ककुभ: पुत्रोत्पत्तिहेतुत्वात् पुरुषत्वं स च ककुप् रूप: पुरुषो वै गर्भ एव भूत्वा यज्ञस्योदरस्थाने माध्यन्दिनसवनेऽवस्थाप्यते ॥ ३ ॥

ककुप्छन्दस्यायामुक्तायामृचि साकमश्वनामकं सामविशेषं विधत्ते।

तस्या उ साकमश्वं ॥ ४ ॥

भवतीति शेष: ॥ ४ ॥

तत्साम प्रशंसति।

प्रजापति: प्रजा असृजत तान् प्राजायन्त स एतत् सामापश्यत्ता अश्वो भूत्वाभ्यजिघ्रत्ता: प्राजायन्त प्रजननं वा एतत् साम ॥ ५ ॥

प्रजापतिना सृष्टाः प्रजाः पुत्रपौत्रादिप्रकर्षेन प्राप्ताः प्रजापतिरिदं साम दृष्ट्वा तेन साम्नाऽयमश्वो भूत्वा ताः प्रजास्तेनेष्ट्वा अभ्यजिघ्रत् सर्व्वत आघ्राणान्तराकृतवान् तेन प्रतिबन्धापाये सति ताः प्रजाः प्रकर्षेण पुत्रपौत्रादिरूपेणाभिवृद्धिं प्राप्ताः तस्मात् साकमश्वनामकं साम प्रजोत्पत्तिसाधनं भवत्येव अश्वरूपेण प्रजापतिना वर्त्तत इति साम्नः साकमश्वनाम सम्पन्नं ॥ ५ ॥

एतद्वेदनं प्रशंसति।

प्रजायते बह्वुर्भवति य एवं वेद ॥ ६ ॥

पुत्रपौत्रादिरूपेण प्रजननाद्बहुभावः ॥ ६ ॥

परिप्रधन्वेत्येतां द्विपदामृचं विधत्ते।

द्विपदां ककुभो लोके करोति गर्भमेव तद्धितं मध्यतः प्रजनयति ॥ ७ ॥

आर्भवपवमानाद्या ककुब्भूता तस्माल्लोके स्थाने द्विपदां कुर्य्यात् तत्तेन द्विपदायाः करणेन यज्ञस्य मध्यतो हितमुदरे स्थापितं पुरुषरूपं गर्भमुत्पादयत्येव ॥ ७ ॥

अस्य क्रतोरतिरात्रत्वं प्रशंसति।

अतिरात्रो भवत्यहोरात्रे वा अनुप्रजाः प्रजायन्तेऽहोरात्रे एवानुप्रजया पशुभिः प्रजायते॥ ८ ॥

रात्रिमप्यतीत्य परदिनपर्य्यन्तं वर्त्तत इत्ययं क्रतुरतिरात्रः लोके हि जायमानाः प्रजाः अह्नश्च रात्रिश्चानुसृत्यैवोत्पद्यन्ते उभयातिरिक्तस्य कालस्याभावात् कालद्वयव्यापिक्रतोरनुष्ठाने सत्यहनि रात्रौ च सर्व्वदा पशुप्रजासमृद्धो भवति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

विषुवदतिरात्राख्यक्रतोः स्तोमक्लृप्तिमाह ।

त्रिवृद् बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविंशोऽग्निष्टोमः सप्तदशान्युक्थानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अस्मिन् क्रतावधिकारिणमाह ।

विषुवतातिरात्रेण ज्येष्ठं ज्यैष्ठिनेयं याजयेद्विषुवान् वा एष स्तोमानां विषुवानेव भवति ॥ २ ॥

विष्लृव्याप्ताविति धातोरुत्पन्नो विषुशब्दः सत्यन्तः मध्यवर्त्तिनमेकविंशमग्निष्टोममाचष्टे तस्यैकविंशस्योभयत आरोहावरोह-

रूपाभ्यामवस्थितैः स्तोमैर्व्याप्तत्वात् पूर्व्वत्र त्रिवृत्पञ्चदशाना-मनुक्रमादारोहः उत्तरत्र सप्तदशत्रिवृतान्तं व्युत्क्रमेणावस्था-नादवरोहः एवमुभयतो व्याप्तत्वाद्विषुनामकएकविंशोयस्मिन् क्रतावस्ति सोऽयं विषुवान् यस्या योषितो ज्येष्ठो भ्राता विद्यते सा ज्यैष्ठिनी तस्याः पुत्रो ज्यैष्ठिनेयः यः पुमान् भ्रातॄणां मध्ये ज्येष्ठः सोऽत्राधिकारी एष क्रतुः स्तोमानां यज्ञानां मध्ये पूर्व्वोक्तरीत्या विषुवानेव तदनुष्ठातापि विषुवानेव भवति अत्र पुरस्तात् पश्चाच्च बहुभिः सेवकैः व्याप्तः प्रभुः पुरुषो विषुरित्यु-च्यते तादृशस्य पुरुषस्य स्वामी विषुवान् प्रभुपुरुषैः सेव्यो भवती-त्यर्थः ॥ २ ॥

मध्यवर्त्तिनमेकविंशस्तोमं प्रशंसति ।

यदेक एकविꣳशो भवत्येकविꣳशो वा इतोऽसा-वादित्यो द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविꣳश आदित्यस्यैवेनम्मात्रां गम-यति ॥ ३ ॥

त्रिवृदादयः स्तोमाः आरोहावरोहाभ्यामावर्त्तितत्वात् प्रत्येकं द्वित्वमापन्नाः एकविंशस्त्वनावर्त्तितएकएवादित्यवद्वर्त्ति-ष्ठत इति यदस्ति तेनैनं यजमानं आदित्यस्यैव मात्रां गमयति यावानादित्यस्य महिमास्ति तावन्तं महिमानमाप्नोति कथमादि-त्यवदवस्थानमिति चेत् संख्यासाम्यादिति ब्रूमः मासर्त्तुलोका-

दित्यरूपेणावस्थिते जगति तदवयवेषु मासादिकमेण परिगणि-तेष्वादित्य एकविंशो भवति ॥ ३ ॥

तदिदं संख्यासाम्यं आदित्यस्य महिमानं दर्शयति ।

एष वा उदेति न वा एनमन्यत् ज्योतिषां ज्योतिः प्रत्युदेति ॥ ४ ॥

एष एवादित्योऽन्धकारं निवर्त्तयन् प्रतिदिनं प्राच्यां दिश्युदयं गच्छति ज्योतिषामग्निचन्द्रनक्षत्रादीनां मध्ये यत्किमप्यन्यदादित्यव्यतिरिक्तं ज्योतिरेनं प्रत्येतस्यादित्य प्रतिनिधिरूपेण न वा उदेति सर्व्वथा नोदेति ॥ ४ ॥

ईदृगादित्यमहिम्नो वेदनं प्रशंसति ।

नैनमन्यः स्वेषु प्रत्युदेति य एवं वेद ॥ ५ ॥

एनं वेदितारं स्वेषु ज्ञातिषु मध्ये कोऽन्यः पुरुषो न प्रत्युदेति प्रतिकूलो भूत्वा नोद्गच्छति किन्तु सर्व्वोऽप्येनमनुवर्त्तत एव ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

गोष्टोमातिरात्राख्यस्य क्रतोः स्तोमक्लृप्तिमधिकारिणं चाह ।

पञ्चदशं बहिष्पवमानं त्रिवृन्त्याज्यानि सप्तदशं माध्यन्दिनꣳ सवनमेकविꣳशं तृतीयसवनꣳ सोक्थं पञ्चदशी रात्रिस्त्रिवृत्सन्धिर्गोष्टोमेनातिरात्रेण भ्रातृव्यवान्यजेत गवा वै देवा असुरानेभ्यो लोकेभ्योनुदन्त रात्रयानपजय्यमजयन्नेभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्य रात्र्यानपजय्यञ्जयति ॥ १ ॥

अस्य क्रतोरहनि प्रयुज्यमानो गोष्टोमभागोऽत्र गोशब्देनाभिधीयते तेन गोष्टोमेनासुरापनोदनं सम्पन्नं यदप्यनपजय्यञ्जेतुमशक्यमसुरसम्बन्धिनगरधनादिकमस्ति तत्सर्वं रात्रौ प्रयुज्यमानेनातिरात्रभागेन जितं देवानामिवानुष्ठातुरप्यभिसिध्यति ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य षष्ठः खण्डः।

अथ सप्तमः खण्डः।

आयुष्टोमातिरात्राख्यस्य क्रतोः स्तोमक्लृप्तिमधिकारिणं पूर्वोत्तरभागयोर्विभज्य फलञ्चाह।

त्रिवृत् बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशम्माध्यन्दिनꣳ सवनमेकविꣳशं तृतीयसवनं सोक्थं

पञ्चदशी रात्रिस्त्रिवृत्सन्धिरायुष्टोमेनातिरात्रेण स्वर्गकामो यजेतोर्ध्वाः स्तोमायन्त्यनपभ्रꣳशाय यदतिरात्रो भवत्यहोरात्राभ्यामेव स्वर्गं लोकमेति ॥ १ ॥

पूर्वभागेन त्रिवृदाद्या एकविंशान्ताः स्तोमा ऊर्ध्वा अनुक्रमेण प्रवृत्ता इति नास्त्यपभ्रंशः उत्तरभागेन सहाहोरात्रानुष्ठानं स्वर्गसाधनं ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य सप्तमः खण्डः।

अथ अष्टमः खण्डः।

अभिजिदतिरात्राख्यस्य क्रतोः स्तोमक्लृप्तिमधिकारिणं भागत्रयफलञ्चाह।

त्रिवृत् बहिष्पवमानं पञ्चदशꣳ होतुराज्यꣳ सप्तदशम्मैत्रावरुणस्य पञ्चदशं ब्राह्मणाच्छꣳसिनः सप्तदशमच्छावाकस्यैकविंशो माध्यन्दिनः पवमानः सप्तदशं होतुःपृष्ठमेकविꣳशम्मैत्रावरुणस्य त्रिणवं ब्राह्मणाच्छꣳसिन एकविꣳशमच्छावाकस्य त्रिणव आर्भवस्त्रयस्त्रिꣳशोऽग्निष्टोमः प्रत्यवरोह्युक्थानि त्रिणवं प्रथमं द्वे एकविंशे सषोडशिके पञ्चदशी

रात्रिस्त्रिवृत्सन्धिरभिजितातिरात्रेण भ्रातृव्यवान्य-जेताभिजिता वै देवा असुरानिमान् लोकानभ्य-जयन्नाग्रानपजय्यमजयन्नभिजितैव भ्रातृव्यमिमान् लोकानभिजित्य रात्र्याऽनपजय्यञ्जयति ॥१॥

इमान् लोकान् पृथिव्यन्तरिक्षद्युलोकानभिलक्ष्यासुरानजयन् लोकेभ्योऽसुरान्निःसारितवन्तः स्पष्टमन्यत् ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

विश्वजिदतिरात्राख्यस्य क्रतोः स्तोमक्लृप्तिमधिकारिणाह ।

त्रिवृद्बहिष्पवमानं पञ्चदशꣳ होतुराज्यꣳ सप्तदशम्मैत्रावरुणस्यैकविꣳशं ब्राह्मणाच्छꣳसिनः पञ्चदशमच्छावाकस्य सप्तदशो माध्यन्दिनः पवमान एकविꣳशं होतुः पृष्ठं त्रिणवम्मैत्रावरुणस्य सप्तदशं ब्राह्मणाच्छꣳसिन एकविꣳशमच्छावाकस्य त्रिणव आर्भवस्त्रयस्त्रिꣳशोऽग्निष्टोमः प्रत्यवरोही ण्युक्थानि त्रिणवं प्रथमं द्वे एकविꣳशे सषोडशिके पञ्चदशी

रात्रिः त्रिवृत्सन्धिर्विश्वजितातिरात्रेण पशुकामो यजेत ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अनेन पशुप्राप्तिः कथमित्याशङ्क्य शस्त्रद्वारेणेत्यभिप्रायेणाह ।

रेतोहि नाभानेदिष्ठीयं पशवो वालखिल्या यन्नाभानेदिष्ठीयं पूर्वꣳशंसत उत्तरा वालखिल्या रेतस्तत्पशवः प्रजायन्ते रूपाणि विकरोति यद्वार्षाकपमृतुषु प्रतितिष्ठति यदेवयामरुत् ॥ २ ॥

विश्वजितस्तृतीयसवने शंसिनां मध्ये होता नाभानेदिष्ठीयं शंसति इदमित्थारौद्रं गूर्त्तवचा इत्येतत् सूक्तं नाभानेदिष्ठीयं नाभानेदिष्ठेन मुनिना दृष्टत्वान्मैत्रावरुणस्तु अभि प्र वः सुराधसमित्याद्याः वालखिल्याख्या ऋचः शंसति तत्र नाभानेदिष्ठीयं रेतोरूपं तल्लिङ्गस्य श्रूयमाणत्वात्तथा हि काचिदृगेवं पठ्यते मनामग्रेतो अहतुर्व्वियन्ता सानौ निषिक्तं सुकृतस्य योनौ पिता यत् स्वां दुहितरमधिष्कन् क्ष्मया रेतः सञ्जग्मानो निषिञ्चदिति वालखिल्यास्तु पशुरूपाः तासां बृहतीछन्दस्त्वात् बार्हताः पशव इति श्रुत्यन्तरे श्रवणात् अतो नाभानेदिष्ठीयेन रेतसि सिक्ते सति तस्माद्रेतसो वालखिल्याभिः साध्याः पशवः प्रजायन्ते ब्राह्मणाच्छंसी तु विहितोरसा चतेति सूक्तं शंसति तत्र वार्षा-

कपं वृषाकपिना दृष्टत्वात् तेन वार्षाकपेन पशुषु गोमहिषाश्व धेनुबलीवर्द्दरूपादिरूपाणि विकरोति विशेषेण सम्पादयति अच्छावाकस्तु प्रवोमहेमतयोर्यं तु विषाव इत्येतत् सूक्तं शंसति तच्च सूक्तमेव यामकन्नामकं केनचिदेव यामकृता मुनिना दृष्टत्वात् यदिदं सूक्तमस्ति तेन वमन्ताद्यृतुषु प्रतितिष्ठति ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

नवमः खण्डः।

अथ दशमः खण्डः।

अथैकस्तोमकाश्चतुरोऽतिरात्राः सन्ति तेषु त्रिवृदतिरात्रः प्रथमः पञ्चदशातिरात्रो द्वितीयः सप्तदशातिरात्रस्तृतीय एकविंशातिरात्रश्चतुर्थः तानेतान् चतुरोऽतिरात्रान् तत्तदधिकारिणस्तत्फलानि च क्रमेणाह।

त्रिवृतातिरात्रेण ब्रह्मवर्च्चसकामो यजेत तेजो वै त्रिवृत् ब्रह्मवर्च्चसं तेजएव ब्रह्मवर्च्चसमवरुन्धे तेजसि ब्रह्मवर्च्चसे प्रतितिष्ठति पञ्चदशेनातिरात्रेण वीर्य्यकामो यजेतौजो वीर्य्यं पञ्चदश ओजएव वीर्य्यमवरुन्धओजसि वीर्य्ये प्रतितिष्ठति सप्तदशेनातिरात्रेणान्नाद्यकामो यजेतान्नं वै सप्तदशोऽन्नाद्यमेवावरुन्ध एकविंशेनातिराचेण प्रतिष्ठाकामो यजेत प्रतिष्ठा

वा एकविꣳशो यदतिरात्रो भवत्यहोरात्रयोरेव प्रतितिष्ठति ॥ १ ॥

अत्र त्रिवृदादीनां ब्रह्मवर्चसादिफलहेतुत्वं यच्छ्रुतं तत् पूर्व्वमसकृदुपपादितं स्पष्टमन्यत् ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

दशमः खण्डः ।

अथ एकादशः खण्डः ।

उक्तास्त्रयोदशप्रकारा अतिरात्राः अथाहीनेषु द्विरात्रा व- क्तव्यास्तेष्वङ्गिरसां द्विरात्रं विधत्ते ।

ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहः सर्वस्तोमोऽतिरात्र उत्तरं ॥ १ ॥

पूर्वस्मिन्नहनि प्रकृतितो विशेषो नास्ति ॥ १ ॥

उत्तरस्याह्नः स्तोमक्लृप्तिमाह ।

तस्य चतुर्विꣳशं बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविꣳशानि पृष्ठानि त्रिणव आर्भवस्त्रयस्त्रिꣳशोऽग्निष्टोमः प्रत्यवरोहोऽप्युक्थानि त्रिणवं प्रथममथैकविꣳशमथ

सप्तदशमेकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत् सन्धिः ॥ २ ॥

अस्याध्यायस्य द्वितीयखण्डे यः सर्वस्तोमोऽतिरात्र उक्तः तस्मिंस्त्रिवृद्बहिष्पवमानं अत्र चतुर्विंशं तथा तृतीयमुक्थं तत्रै-कविंशं अत्र तु सप्तदशमिति विशेषः ॥ २ ॥

अनयोरह्नोः क्रमेण सामद्वयविधिमभिप्रेत्योपाख्यानमाह।

अङ्गिरसः स्वर्गं लोकमायꣳस्तेषाꣳ हविष्माꣳश्च हविष्कृच्चाङ्गिरसा त्वहीयेतान्तावागच्छतां यतोऽङ्गि-रसः स्वर्गं लोकमायꣳस्तावतप्येतां तावेते सामनी अपश्यतां ताभ्यां द्विरात्रमतन्वातां तेन स्वर्गं लोक-मैतां ॥ ३ ॥

अङ्गिरसो नामका ऋषयः सत्रमनुष्ठाय तेन सत्रेण स्वर्गं लोकं प्राप्नुवन् तथा च तैत्तिरीया आमनन्ति अङ्गिरसो वै सत्र-मासत ते स्वर्गं लोकमायन्निति तेषामङ्गिरसां मध्ये हविष्मान्ना-मक एक ऋषिः हविष्कृन्नामकोऽपरस्तावुभावहीयेतां तयोरुभयोः सत्रानुष्ठानं स्वर्गप्राप्तिश्च नासीत् इतरेऽङ्गिरसो यतो यस्मा-द्देशात् स्वर्गं प्राप्नुवन् स देशः स्वर्गप्राप्तिहेतुरिति मन्वानावुभौ तं देशमागतौ तावेतौ स्वर्गप्राप्त्यभावे सति तत्प्राप्तिसाधनमि-च्छन्तौ तपोऽकुरुतां तेन च तपोबलेन स्वर्गप्राप्तिके सामनी अपश्यतां ताभ्यां सामभ्यां द्विरात्रनामकं क्रतुमतन्वातां विस्त-

रेखानुष्ठितवन्तौ तयोः साम्नोर्मध्ये हविष्कृन्नामकं साम प्रथमेऽह्नि स्वादिष्ठयेत्यस्यां गेयं अथ द्वितीयं हविष्मन्नामकं यत्साम तदेतत् द्वितीयेऽहन्यस्य प्रत्नामनुद्युतमित्यस्यामधि गातव्यं उक्तसामोपेतेन द्विरात्रेण तावुभौ स्वर्गं लोकं प्राप्नुतां तस्मात् द्विरात्रक्रतौ सामद्वयं गायेदित्यभिप्रायः ॥ ३ ॥

उक्तक्रतावधिकारिणमाह ।

यः पौण्योहीन इव स्यात् स एतेन यजेताप्नोति पूर्वेषां प्रहामाप्नुता ँ ह्ि तावङ्गिरसः ॥ ४ ॥

श्रौतस्मार्त्तेषु पुण्येषु कर्म्मसु साधुः पौण्यस्तादृशोऽपि सन्यः पुमान् हीन इव स्यात् पुण्यात्मनां सर्वैः पूज्यानां पुरुषाणां मध्ये हीन इव पूजारहित इव भवेत् स पुमानेतेन द्विरात्रेण यजेत इष्ट्वा पूर्वेषां पूज्यानाम्मध्ये प्रहां प्रकृष्टगतिं प्राप्नोति ओहाङ्गता-विति धातोरयं शब्दः हि यस्मात् कारणात् अङ्गिरसः वचन-व्यत्ययेनान्वयः अङ्गिरसां स्वर्गं प्राप्तानां गतिं द्विरात्रेणानेन तावुभौ हविष्मद्धविष्कृतौ प्राप्नुतां तस्मादेतेनात्तमगतिर्युक्ता ॥४॥

अस्य क्रतोः फलान्तरमाह ।

प्रजाकामो यजेत द्वितीयं ह्येतद्यत्प्रजा ॥ ५ ॥

पुत्रपौत्रादिरूपाः प्रजा यदस्ति तदेतत् स्वापेक्षया द्वितीयं तस्मादनेन द्वितीयपरातिरात्रयुक्तेन क्रतुना प्रजासिद्धिरु-पपन्ना ॥ ५ ॥

पुनः फलान्तरमाह।

स्वर्गकामो यजेत द्वितीयाद्धि लोकात्परोलोकोऽभि-प्रक्रम्यो दुराधो द्विरात्र इत्याहुर्यदग्निष्टोमः पूर्वम-हर्भवत्युक्थ्यमन्तर्य्यन्ति यद्युक्थोऽग्निष्टोमं॥ ६॥

भूर्लोकः प्रथमः अन्तरिक्षलोको द्वितीयस्तस्मात्पर ऊर्द्ध-भावी स्वर्गोलोकोऽभिप्रक्रम्याभिलक्ष्य प्रकर्षेण गन्तव्यः हि यस्मा-देवं तस्मात् लोकद्वयस्थानीयेन द्विरात्रेण तृतीयलोकस्थानी-यस्य स्वर्गस्य प्राप्तिर्युज्यते ब्रह्मवादिनां द्विरात्रक्रतुरस्तीति सोऽयं दुराधः दुःखेनाराधनीय इति ब्रह्मवादिन आहुः कथमिति चेत् तदुच्यते उत्तरमहस्तावदतिरात्र इति स्थितं पूर्व्वमहः किमग्निष्टोमान्तः स्यादुक्थ्यो वा अग्निष्टोमश्चेदुक्थ्यमन्तर्य्यन्ति परित्यजन्ति उक्थ्यश्चेदग्निष्टोमं परित्यजन्ति सोऽयं दुःखो दुःखपरिहार इत्यभिप्रायः॥ ६॥

तस्याक्षेपस्य परिहारमाह।

यज्ज्योतिरुक्थ्यः पूर्वमहर्भवति नाग्निष्टोमम-न्तर्यन्ति नोक्थानि॥ ७॥

तिष्ठतु तावत्पूर्व्वस्मादग्निष्टोमत्वपक्षः यद्यदि पूर्व्वमहरुक्थो ज्योतिरुक्थ्यः संस्थारूपो ज्योतिष्टोमो भवति तदानीं पञ्च-दशस्तोत्रयुक्ते तस्मिन् द्वादशस्तोत्रयुक्तं अग्निष्टोमं न अन्त-र्य्यन्ति न परित्यजन्ति उत्तराणि च त्रीण्युक्थस्तोत्राणि न परित्यजन्ति तस्मान्नोक्थदोषोऽस्ति॥ ७॥

ननु वक्ष्यमाणे द्विरात्रे चैत्ररथं पूर्वस्याह्न उक्थ्यत्वादयं दोषपरिहारः सुत्याङ्गिरसे तु द्विरात्रे कथं दोषपरिहार इत्याशङ्क्याह ।

तदाहुरेषा वाव यज्ञस्य मात्रा यदग्निष्टोमो यदग्निष्टोमः पूर्वमहर्भवति यज्ञस्य मात्रान्नातिक्रामत्यथोत्तरस्याह्न उक्थेभ्योऽधिरात्रिमुपयन्ति तेनोक्थान्यनन्तरितानि ॥ ८ ॥

तत्तस्य चोदितदोषस्याभिज्ञा ये ब्रह्मवादिनः परिहारमाहुः कथमिति चेत्तदुच्यते अग्निष्टोम इति यदस्ति एषा वाव यज्ञस्य मात्रा सर्व्वस्य सोमयागस्य तावत्येव स्वरूपपरिमितिः अग्निष्टोमस्य सर्व्व सोमयागप्रकृतित्वेन सर्व्वस्वरूपस्योपपत्तेः एवं सति यद्यग्निष्टोमस्य पूर्व्वमहर्भवेत् तदानीं सर्व्वस्य यज्ञस्य मात्रां स्वरूपपरिमाणमनुष्ठाता नातिक्रामति नोल्लङ्घयति अथानन्तरमुत्तरस्याह्नः उक्थेभ्योऽधिरात्रिमुपयन्ति रात्रिसंस्थामनुतिष्ठन्ति तस्मादुक्थानामप्यतिक्रमो नास्ति इत्यमग्निष्टोमत्वपक्षेऽपि दोषपरिहारः ॥ ८ ॥

उत्तरेऽहनि प्रथमस्तोमं प्रशंसति ।

चतुर्व्विंशं बहिष्पवमानं भवत्युत्तरस्याह्नश्चतुर्विंशत्यक्षरा गायत्री प्रजननं गायत्री प्रजात्यै ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

सर्वान् स्तोमान् प्रशंसति ।

उभये स्तोमा युग्मन्तस्मायुजस्च तन्मिथुनं तस्मा-न्मिथुनात्प्रजायते ॥ १० ॥

चतुस्त्रिंशस्य समसंख्योपेतत्वाद्युग्मत्वं बहुवचनं पूजार्थं स्पष्टमन्यत् ॥ १० ॥

अस्यातिरात्रस्य त्रिवृदादित्रयस्त्रिंशान्तं निखिलस्तोमयुक्तत्वं प्रशंसति ।

सर्वस्तोमोऽतिरात्रो भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयति ॥ ११ ॥

अतिरात्रस्य सर्वस्तोमयुक्तत्वं यदस्ति तदेतत् सर्वस्य प्राप-णीयस्य प्राप्त्यर्थं अपरं व्याख्यातं ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

आङ्गिरसं द्विरात्रमुक्त्वा चैत्ररथं द्विरात्रमाह ।

अथ यस्य ज्योतिरुक्थ्यः पूर्वमहर्भवत्यायुरति-रात्र उत्तरं ॥ १ ॥

पूर्वस्मिन् द्विरात्रे अग्निष्टोमः पूर्वमहः अस्मिन् द्विरात्र-

उक्थ्यसंस्थो ज्योतिष्टोम उत्तरमहर्य्यस्य द्विरात्रस्य एकमहः-क्लृप्तिः तं द्विरात्रमनुतिष्ठेदिति शेषः ॥ १ ॥

अस्य द्विरात्रस्य स्तोत्रीयसंख्यामुपजीव्य प्रजोत्पत्तिहेतुत्वं दर्शयति ।

तिस्रः पूर्वस्याह्नो विराजमतिरिच्यन्ते द्वाभ्यामुत्तरमहर्विराज ऊनमूनातिरिक्तं वा अनुप्रजाः प्रजायन्ते ॥ २ ॥

अत्र यदेतत् पूर्व्वमहरुक्थसंस्थज्योतिष्टोमरूपं तस्य सम्बन्धिनीषु स्तोत्रीयासु दशसंख्यया विच्छिद्य विराट् रूपत्वेन विद्यमानेषु तिस्रः स्तोत्रीया विराट्रूपत्वमतीत्य वर्त्तन्ते ते अग्निष्टोमभागे तावन्नवत्यधिकं शतं अत एकोनविंशतिविराजः सम्पद्यन्ते त्रिषूक्थस्तोत्रेष्वेकविंशस्तोमयुक्तेषु षष्टिस्तोत्रीयाः तासु षड्भ्यो विराड्भ्य उपरि तिस्रः स्तोत्रीया अतिरिक्ता भवन्ति तथा द्वितीयेऽहनि स्तोत्रीयाणां स्वरूपं विराजो द्वाभ्यां न्यूनं भवति तद्यथा उक्थ्यस्तोत्रपर्य्यन्त आयुष्टोमभागे स्तोत्रीयाणामेकोनपञ्चाधिकं शतद्वयमिति पूर्व्वत्रैव व्यवस्थितं तथा सति पञ्चविंशतिसंख्याभ्यो विराड्भ्य ऊर्द्ध्वं नवस्तोत्रीयशेषादेकोना विराड् भवति आपोडशिको ह्येवमतिरात्रः तस्मात् षोडशस्तोत्रगता संख्या नादरणीया रात्रिपर्य्यायस्तोत्रेषु द्वादशसु पञ्चदशस्तोमयुक्तेष्वशीत्यधिकं शतं स्तोत्रीया भवन्ति तत्राष्टादशविराजः सम्पद्यन्ते सन्धिस्तोत्रस्य त्रिवृत्स्तोमः तत्र

नवसंख्याकाः स्तोत्रीयाः प्रत्येकोना विराड् भवति एवं सत्युत्तरेऽहनि द्वयोर्विराजस्वरूपे प्रथमेऽहनि विराजस्वरूपं तिसृभिरतिरिक्तं ऊनातिरिक्तात्मकं तदुभयस्वरूपमनु प्रजानामुत्पत्तिः भवति लोके हि योषितो गुह्येन्द्रियमनु * लिङ्गरहितत्वात् द्वाभ्यां न्यूनं, पुंसस्तु द्वाभ्यां लिङ्गेन वातिरिक्तं, तदुभयं यथा प्रजोत्पादकं ॥ २ ॥

तद्वेदनं प्रशंसति ।

प्र प्रजया प्र पशुभिर्जायते य एवं वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

प्रकारान्तरेणातिरिक्तं सम्पाद्य प्रशंसति ।

एका सꣳस्तुतानां विराजमतिरिच्यत एकाकिनमेवैनमन्नाद्यस्याध्यक्षं करोति ॥ ४ ॥

प्रथमेऽहनि यास्तिस्रोऽतिरिक्तास्तासां मध्ये द्वयमानीय द्वितीयेऽहनि विराजः पूरणीयाः तथा सति संस्तुतानां स्तोत्रीयाणां मध्ये विराजमेका स्तोत्रीयातिलङ्घ्य तिष्ठति तथा यजमानमेवान्नाधिपतिं करोति अयमेव सर्वेभ्यो बन्धुभृत्येभ्योऽन्नप्रदो भवतीत्यर्थः ॥ ४ ॥

अस्य द्विरात्रस्य चैत्ररथत्वं सम्पादयितुमाख्यायिकामाह ।

* असंस्कृतोऽनुमीयते किन्तु सर्वपुस्तकेषु पाठः समान एव दृष्टः ।

एतेन वै चित्ररथं कापेया अयाजयꣳस्तमेका- कीनमन्नाद्यस्याध्यक्षमकुर्वꣳ स्तस्माच्चैत्ररथीनामेकः क्षत्रपतिर्जायते नुलम्ब इव द्वितीयः ॥ ५ ॥

कपिगोत्रे समुत्पन्ना महर्षयः कापेयास्ते ह्येतेनैव द्विरात्रेण चित्ररथनामकं राजानं याजयित्वा तमेवमन्नाद्यस्याध्यक्षमकुर्वन् तस्मात्कारणादद्यापि चित्रवंशोत्पन्नानां मध्ये एक एव राजा क्षत्रपतिर्बलाधिपतिर्भवति द्वितीयस्तु तस्माद्धेतोः शुलम्ब इव तस्यानुचर इव भवति चित्ररथेनानुष्ठितत्वादयं क्रतुश्चैत्ररथ इत्यभिप्रायः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

कापिवनं द्विरात्रमाह ।

अथ यस्य त्रिवृत्पञ्चदशोऽग्निष्टोमः पूर्वमहर्भव- त्यायुरतिरात्र उत्तरं ॥ १ ॥

त्रिवृत्स्तोमसहितपञ्चदशस्तोमे यस्मिन्नग्निष्टोमोऽस्ति सोऽयं त्रिवृत्पञ्चदशः तत्र सर्व्वेषु स्तोत्रेषु त्रिवृत्पञ्चदशौ स्तोमौ पर्य्यायेण प्रयोक्तव्यौ अग्निष्टोमः पूर्व्वमहः पूर्व्ववदायुष्टोमोऽतिरात्रो द्वितीयमहः यस्यैवमहःक्लृप्तिः सोऽनुष्ठेयः ॥ १ ॥

तत्र प्रथममहः प्रशंसति ।

मिथुनाभ्याᳩ स्तोमाभ्यामुत्तरमहः प्रजनयन्ति तत्प्रजातᳩश्व आरभन्ते चक्रे वा एते साकं वृतो यत् त्रिवृत्पञ्चदशौ स्तोमौ यं कामं कामयते तमेतेनाभ्यश्नुते यत्र यत्र हि चक्रीवता कामयते तत्तदभ्यश्नुते ॥ २ ॥

प्रथमेऽहनि मिथुनवत् द्वन्द्वभूतौ द्वौ स्तोमौ ताभ्यामृत्विज उत्तरमहरुत्पादयन्ति यथा लौकिकमिथुनात् प्रजोत्पत्तिस्तद्वदुत्पन्नं तदहः परेद्युरधिष्ठानं प्रारभन्ते किञ्च त्रिवृत्पञ्चदशौ स्तोमौ यौ विद्येते एते उभे चक्रे द्वे रथस्थानीयेन प्रथमेनाप्नोति यत्रेत्यादिर्लौकिकवृत्तान्तः चक्रयोः समाहारश्चक्री स यस्यास्तीति सोऽयं रथः चक्रीवान् लोके पुमान् यत्र स्थाने गन्तुं कामयते तत्र स्थानं चक्रीवता रथेन प्राप्नोति तद्वदपीत्यर्थः ॥ २ ॥

द्वितीयमहः प्रशंसति ।

अथ यदायुरतिरात्रो भवति प्रतिष्ठित्यै ॥ ३ ॥

योऽयमायुष्टोमोऽतिरात्रोऽस्ति सोऽयं प्राप्तेषु कामेषु प्रतिष्ठायै स्थैर्याय सम्पद्यते ॥ ३ ।

अस्य द्विरात्रस्य कापिवनत्वं दर्शयति ।

एतेन वै कपिवनो भौवायन इष्ट्वाहृत्ततामगच्छत् ॥ ४ ॥

भूनामकस्य महर्षेः पुत्रोभौवायनः कापिवन इति तस्य नाम स एतेन द्विरात्रेण स्वयमरूक्षतामगच्छत् रूक्षः उग्रः शोषणोपलक्षितो दरिद्रो वा तद्वैपरीत्येन शान्तः समृद्धो वा ऽभवत् कपिवनेनानुष्ठितत्वात् कापिवनइत्यर्थः ॥ ४ ॥

वेदनपूर्व्वकानुष्ठानस्य फलमाह।

अरूक्षो भवति यएवं विद्वानेतेन यजते ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

त्रयोदशः खण्डः।

अथ चतुर्द्दशः खण्डः।

उक्तास्त्रयो द्विरात्राः अथ त्रिरात्रेषु प्रथमं गर्गत्रिरात्रमाह।

त्रिवृत्प्रातस्सवनं पञ्चदशम्माध्यन्दिनꣳ सवनꣳ सप्तदशं तृतीयसवनं पञ्चदशं प्रातःसवनꣳ सप्तदशं माध्यन्दिनꣳ सवनमेकविꣳशं तृतीयसवनꣳ सोक्थमेकविꣳशं प्रातःसवनं त्रिणवं माध्यन्दिनꣳ सवनं त्रयस्त्रिꣳश आर्भवस्त्रयस्त्रिꣳशोऽग्निष्टोम एकविꣳ-

ण्यान्युक्थानि सषोडशिकानि षोडशं प्रथमꣳ रात्रिषाम पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

अथ नीरुग्यहानि क्रमेणाग्निष्टोमोक्थातिरात्ररूपाणि ॥१॥

तमेतं त्रिरात्रं स्तोतुमन्तरिक्ष इत्येतस्याहस्त्रयस्य सृष्टिमाह ।

प्रजापतिर्वा इदमेक आसीत्तस्य वागेव स्वमासीद्वाग् द्वितीया स ऐक्षतेमामेव वाचं विसृजा इयं वा इदꣳ सर्वं विभवन्त्येष्यतीति स वाचं व्यसृजत सेदꣳ सर्वं विभवन्त्यैत् सोर्द्ध्वोदाततनोद्यथापां धारा सन्ततैवं तस्या एति तृतीयमच्छिनत्तद्भूमिरभवद्भूदिव वा इदमिति तद्भूमेर्भूमित्वं केति तृतीयमच्छिनत्तदन्तरिक्षमभवदन्तरेव वा इदमिति तदन्तरिक्षस्यान्तरिक्षत्वꣳ ह्रो इति तृतीयमूर्द्ध्वमुदास्यत् तत् द्यौरभवद्द्युतदिव वा अदइति तद्दिवो दिवत्वं ॥ २ ॥

इदं प्रतीयमानं जगच्छब्दरूपमर्थरूपञ्च तयोः शब्दार्थयोः सृष्टेः पुरा प्रजापतिर्वा एक आसीत् प्रजापतिशब्देनात्र चिदेकरसरूपोमायाशक्तियुक्तः परमेश्वर उच्यते स एवैकस्तदानीमासीत् स एवैक आसीत् ततः सपरमेश्वर एकः स्वामी तस्य प्रभुत्वे द्वितीयेत्येवं स्वस्वामिरूपं द्वयमासीत् तदानीं

परमेश्वर ऐक्षत मनसि विचारितवान् कथं विचारितवानिति चेत् तदुच्यते इमामेव मम स्वभूतां द्वितीयां वाचं विसृजे विविधत्वेन सृजामि तत इयमेव वाङ्मनःसंकल्पवशादिदं प्रतीयमानं सर्व्वंजगदिदं भवन्ती विशेषेण भवन्तीति सर्व्वजगदाकारेण भासमाना सती मासेष्यति प्राप्स्यतीति स इत्थं विचार्य्य शब्दसामान्यरूपां वाचं व्यसृजत विविधत्वेन सृष्टवान् ततः सा शब्दसामान्यरूपा वाक् इदं सर्व्वं शब्दजातं विशेषेण भवन्ती प्रजापतिमैत् प्राप्नोत् ततः सा वागूर्द्ध्वा मायाविशिष्टादव्यक्तादुद्गता सती सततमच्छब्दविशेषेण रूपेणोदातनोत् उत्कर्षेण समन्ताद्विस्तृतःभवेत् तत दृष्टान्तः यथा वृष्टावपां धारा मेघादुद्गता सन्तता भूमौ सर्व्वतो व्याप्ता भवति तद्वद्देशास्वलौकिकभाषारूपेण या वाक् सन्तता तस्याः सकाशादृचां गानभागमनपेक्ष्य तृतीयं भागं सप्रजापतिरच्छिनत् पृथक्कृतवान् स भाग एतीत्युच्चार्य्य प्रदर्श्यते अकार इतिशब्दपरः सन् एतीति निर्द्दिश्यते अकारस्तृतीयो भाग इत्यर्थः तदकारस्वरूपज्ञात वाक्यार्थरूपा भूमिरभवत् तदानीं प्रजापतिः स्वमनस्येवं चिन्तयामास इदं पृथिवीरूपमभूद्विव वै पूर्व्वमविद्यमानं सदिदानीं विद्यमानमेवासीत् इत्येवं यस्माच्चिन्तितवान् तत्तस्मात् कारणादस्या भूतेरभूदिति व्युत्पत्या भूमिनाम सम्पन्नं ओमित्यस्मिन् वाग्व्यवहारे योऽयमादिरकारः सोऽयं वाचकः भूमिर्वाच्याभूदिति तात्पर्य्यार्थः, स प्रजापतिर्वाचः प्रसादकरं तृतीयभागं सृष्ट्वा पुनः केत्यन्तं तृतीयभागमच्छिनत् पृथक् कृतवान् तत् कशब्द-

रूपवाचकं भूत्वा पुनर्वाच्यमन्तरिक्षमभवत् तदानीं प्रजापति-रेवं चिन्तितवान् इदं प्रतीयमानं अन्तरिक्षाख्यमन्तरा द्यावा-पृथिव्योर्मध्ये इव वै स्थितमेवेत्यर्थः यस्मादेवं चिन्तितवान् तत् तस्मादन्तरिक्षलोकस्यान्तरवस्थितमिति व्युत्पत्यान्तरिक्षनाम सम्पन्नं तस्मिन्नाम्नि षकारात् पूर्व्वं कोऽस्ति तस्मादसावन्तरिक्ष-वाचक इत्यभिप्रायः भूम्यन्तरिक्षवाचकावधारकशब्दौ निर्म्माय तदपेक्षया तृतीयं वाचो भागं ह्वो इति शब्दमूर्द्ध्वमुदास्यत् ऊर्द्ध्व-देशमुद्दिश्य तद्वाचकत्वेनोत्कर्षेण प्रक्षिप्तवान् उच्चारितवानित्यर्थः तदुच्चारणं ह्वो इति शब्दरूपमूर्द्ध्वदेशवाचकं भूत्वा द्यौरभवत् तदा प्रजापतिरेवं चिन्तितवान् अहो द्युलोकरूपं वस्तु अद्युतदिव चन्द्रसूर्य्यादिप्रकाशो द्योतमानमेवेति यस्मादेवं तस्मात् द्युलोकस्य दिवत्वं द्युनामकत्वं सम्पन्नं ॥ २ ॥

प्रजापतिना यान्यकहो इत्येतानि त्रीण्यक्षराणि वाचः सकाशात् छिन्नानि तानि पुनः प्रशंसति ।

एषा वाव प्रत्यक्षं वागग्रज्जिह्वाग्रेणैतद्वाचो वदति यदेति मध्येनैतद्वाचो वदति यत् केति सर्व्वयैतद्वाचो रसोर्ध्वमुद्वदति यद्धो इति ॥ ३ ॥

यदक्षरं एषैव त्रिरूपा वागस्माकं प्रत्यक्षा यथा भवति तथोपलभ्या इति शेषः यदेति जिह्वेत्यादिना स्पष्टीकरोति एति यदस्ति आकाररूपं यदक्षरमस्ति एतद्वाचः सम्बन्ध्यक्षरं जिह्वा-ग्रेण मातृकामन्त्रोच्चारणेन जिह्वयोः प्रथमव्यापारेण लोको

वदति, केति यत् द्वितीयमक्षरमस्ति एतदक्षरं मध्येऽत्र मातृकामन्त्रे षोड़शस्वरेभ्य ऊर्द्धगतेन मध्येन जिह्वाव्यापारेण लोको वदति, ह्वो इति यदक्षरमस्ति तदक्षरस्वरूपं वाचः सर्व्वो रसः अतएवाध्यूर्द्धः मातृकामन्त्र अधिकत्वेनोर्द्धभागे मन्त्रावसाने ह-कारः पठितः तदिदं ह्वो इत्यक्षरं लोकस्तद्वदति उच्चस्वरेण पठति ॥ ३ ॥

उक्तानां त्रयाणामक्षराणां सृष्टिप्रशंसाञ्चोक्त्वा त्रिरात्रक्रतु-सम्बन्धमाह ।

यदेतानि रूपाण्यन्वहं व्यज्यन्ते मुखतएव तद्वाचं विसृजन्ते मुखतो यज्ञियं कर्म्म ॥ ४ ॥

एतान्यकह्वो इति त्रीण्यक्षररूपाणि त्रिरात्रक्रतावन्वहं प्रतिदिनं व्यज्यन्ते विशेषेणाज्यस्तोत्रेषु प्रक्षिप्यन्ते अजगति-क्षेपणयोरिति धातुः आज्यस्तोत्रेषु कथं विक्षेप इति चेत् उच्यते प्रथमेऽहन्यग्न आयाहि वीतय इत्यादावकारः पठितः द्वितीये-ऽहनि कयाते अग्ने अङ्गिरस इति शब्द आदौ पठितः तृतीये-ऽहनि होता देवो अमर्त्य इति हो शब्द आदौ पठितः यद्यस्मादेवं तस्मान्मुखत एव आज्यस्तोत्ररूपे यज्ञस्य मुखभाग एव वाच-मक्षरत्रयरूपां विसृजन्ते विशेषेण सम्पादयन्ति किञ्च यज्ञियं यज्ञसम्बन्धि यत् प्रोक्ताक्षरसाध्यमाज्यस्तोत्ररूपं कर्म्म तत् मुख-तो यज्ञमुखे सम्पादयन्ति ॥ ४ ॥

अथैतस्य त्रिरात्रस्य पुष्टिहेतुत्वं विवक्षुराह ।

प्रजापतिर्वा इदमेकाक्षरां वाचꣳ सतीं त्रेधा-व्यकरोत्तदिमे लोका अभवन् रूक्षा अनुपजीवनाः स ऐक्षत कथमिमे लोकाल्लोम गृह्णीयुः कथमुपजीवनीयाः स्युरिति स एतं त्रिरात्रमपश्यत्तमाहरत्तेनेमान् लोकानन्वातनोत्ततो वा इमे लोकाल्लोमागृह्णꣳस्तत उपजीवनीया अभवꣳस्त्रिरात्रस्य वा इदं पुष्टं त्रिरात्रस्योदरणं यदिदमेषु लोकेष्वधि ॥ ५ ॥

प्रजापतिशब्देनाचिन्त्यशक्तिः परमेश्वरः इदमित्यस्य लिङ्गव्यत्ययः स ईश्वरः इमां वाचं त्रेधा भागत्रयरूपेण व्याकरोत् विकारमापादितवान् कीदृशीं वाचं एकां अक्षरां सतीं वागित्यनेन शब्देन व्यवह्रियमाणत्वात् एकाक्षरा ककारस्य हलन्मात्रस्य पृथगक्षरत्वव्यवहाराभावाद्वागिति शब्दस्यैकाक्षरस्य ये विकारास्ते पृथिव्यन्तरिक्षद्युरूपा इमे त्रयो लोका अभवन् यथा क्षीरं दधि भवति तथा विधिवाक्योपेतत्वात् एवमीश्वरस्याचिन्त्यशक्तिवशाच्छब्दस्य लोकत्रयरूपापत्तिर्द्रष्टव्या ते च त्रयो लोका अनुपजीवना जीवनहेतुभोग्यद्रव्यरहिताः अतएव रूक्षाः शुष्काः सन्तापहेतवोऽभवन् तदा स प्रजापतिरित्थं विचारयन् इमे लोकाः कथं लोम गृह्णीयुः लोम प्रकृते व्रीहियवादिभोग्यं वस्तु कथं स्वीकुर्य्युः स्वीकृत्य च प्राणिनामुपभोगेन योग्याः कथं भवेयुः स प्रजापतिरित्थं विचार्य्य वेदान् पर्य्या-

लोच्य ब्रीहियवाद्युत्पादनसाधनमेतद्गर्गत्रिरात्रमपश्यत्तं क्रतु-
माहरदन्वतिष्ठत् तेनानुष्ठितेन क्रतुना त्रीनिमान् लोकान-
नुक्रमेण सर्व्वतो व्याप्तवान् पर्य्यालोच्य ब्रीहियवानेषु लोकेषु
चोत्पादयन् सामर्थ्यं सम्पादितवान् तदनन्तरमेव प्रथमेनाह्ना
भूलोके सामर्थ्यमभूत् मध्यमेनान्तरिक्षे उत्तमेन दिवि ततो वै
तदनन्तरमेवेमे लोका लोमोत्पाद्यं तं भोग्यजातमगच्छन्
ओषधिवनस्पतयः पृथिव्या लोमेनेष्टा अन्तरिक्षस्य लोम
चन्द्रतारकाद्या दिवो लोम ततो भोग्यसद्भावात् लोका उप-
जीवनयोग्या अभवन् यदिदं भोग्यजातमेषु लोकेष्वधि वन-
स्पतीन् लोकान् अधितिष्ठति तदिदं भोग्यवस्तु त्रिरात्रक्रतो-
रेवं सम्बन्धि पुष्टं पुष्टिकारणं यतस्त्रिरात्रस्य सम्बन्धित्वेन
उदरगं भोग्यवस्तुवदुद्गममभूत् अतस्त्रिरात्रस्य पुष्टिहेतुत्वं
युक्तं ॥ ५ ॥

एतद्वेदनं प्रशंसति ।

गच्छति पशूनां भूमानं द्विपदां चतुष्पदां य एवं वेद ॥ ६ ॥

द्विपदो मनुष्याः पुत्रभृत्यादयो मवादिवद्भोग्यत्वात्पशवः
भूमानं बाहुल्यं गच्छति प्राप्नोति ॥ ६ ॥

पूर्व्वमकहो इत्यक्षरत्रयमुपजीव्य यथा त्रिरात्रः प्रशस्तः
तथैवाक्षरेति शब्दमुपजीव्य त्रिरात्रं प्रशंसति ।

प्रजापतिर्यद्वाचं व्यसृजत साक्षरदेवेति प्रथमं

चेति द्वितीयं रेति तृतीयं येन येन वै रूपेण प्रजापतिर्वाचं व्यसृजत तेन तेन रूपेणाज्यानि चारभ्यन्तेऽहानि चाप्यन्ते ॥ ७ ॥

प्रजापतिः पुनरपि वाचं स्वीकृत्य विविधत्वेन सृष्टवानिति यदस्ति सा सृष्टा वाक् भिन्नभाण्डस्थितोदकवदक्षरदस्रवदेव तस्याः सृताया वाचः प्रति प्रथमं रूपं अकार इति शब्दपरएतोति निर्दिश्यते चेति द्वितीयं रूपं रेति तृतीयमेतदक्षरशब्दनिष्पत्तिः एवं सति प्रजापतिः येन येन रूपेण वाचं विधत्ते तेन तेन रूपेणाज्यस्तोत्रारम्भः त्र्यहफलभूतलोकत्रयप्राप्तिश्च सम्पद्यते कथमिति चेदुच्यते अकह्वो इत्येतत्त्रयसृष्टिमुपजीव्याज्यस्तोत्रारम्भः पूर्व्वमुदाहृतः अक्षरेत्येतत् त्रयमुपजीव्य लोकत्रयप्राप्तिमुदाक्रियते अकारो भूर्लोकः अयं लोक इति वाक्यस्यादावकारसद्भावात् क्षित्यन्तरिक्षलोक इत्यत्र चकारसद्भावात् द्यौरिति द्युलोक इत्यत्र रेफसद्भावात् एवञ्च सति त्रयाणामह्नां फलभूतास्त्रयो लोका अक्षरेति त्रिभिर्वाग्भवैः प्राप्यन्ते ॥ ७ ॥

पुनरपि तमेतं त्रिरात्रं पुरुषसादृश्यसम्पादनेन प्रशंसति।

तदाहुर्ब्रह्मवादिनोऽक्षरस्या वै त्रिरात्र इत्येकाक्षरा वै वाक् चाक्षरमक्षरं चाक्षरः पुरुषः स वा एनं वेदेत्याहुर्य्य एनं पुरुषसम्मितं वेदेति ॥ ८ ॥

कथमित्याशङ्क्य तदेवैकेत्यादिना स्पष्टीकृतं वागेकाक्षरा

वे ककारस्य पृथगक्षरत्वाभावाद्वाचो निष्पन्नमक्षरमिति पूर्व्वोक्त-नीत्या विराजेऽयमक्षरे स्थितो भवति मन्त्ररूपया वाचा निष्प-न्नत्वात् एकाक्षरायां वाचि स्थितिः एति चेति रेति विराज-फलानां लोकानामुक्तत्वादक्षरनाम्नि त्र्यक्षरे स्थितिः पुरुष इत्येतदपि नाम त्र्यक्षरं ततः पुरुषतुल्यत्वं वेद स पुमानिदं विराजं वेद इति शब्द उक्तार्थसमाप्त्यर्थः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे दशमाध्यायस्य चतुर्द्दशः खण्डः।

अथ पञ्चदशः खण्डः।

प्रकारान्तरेण गर्गत्रिरात्रं स्तौति।

एतेन वै देवा एषु लोकेष्वाभ्रुवन्नेतेन स्वर्गं लोकमायन् ॥ १ ॥

ये पुरुषाद्देवत्वं वाञ्छन्ते ते पुरा एतं त्रिरात्रमन्वतिष्ठन् ते एतेनैव त्रिरात्रेणेषु लोकप्रदेशेषु भोग्यवस्तुसमृद्धिं प्राप्य तत एतेन त्रिरात्रेण देहपातादूर्द्ध्वं देवा भूत्वा स्वर्गं लोकं प्राप्नुवन् ॥१॥

पूर्वखण्डोक्तमर्थमनूद्याग्निवाय्वादित्यानामक्षरादुत्पत्तिमाह।

वाग्वै त्रिरात्रो वाचो रूपेणाज्यानि चाहानि च विभज्यन्त एकाक्षरा वै वाक् त्र्यक्षरमक्षरमक्ष-

रस्य रूपेण विभज्यन्ते त्रयो गन्धर्वास्तेषामेषा भक्ति-रग्नेः पृथिवी वायोरन्तरिक्षमसावादित्यस्य द्यौस्त्र-योघर्मास उपसꣳ सचन्ते ॥ २ ॥

वाग्रूप एव आज्यस्तोत्राणामध्यक्षरो इति तत् तत्र उत्पन्नो ऽक्षरशब्दस्त्र्यक्षरः तस्य शब्दस्य त्रिविधेन रूपेण त्रयो देवा अनेन वायो रूपेण निष्पद्यन्ते त्रीण्यहानि अक्षरोत्पत्तिस्त्रिर्वा-चो रूपैर्लौकत्रयात्मकैर्विगमय्य सम्पाद्यन्ते एतावाननुवादः अथा-ग्न्याद्युत्पत्तिरुच्यते तत्रत्यवागेकाक्षरैः ककारस्याईमात्रस्य पृथ-गक्षरत्वाभावात् तत्र उत्पन्नोऽक्षरशब्दस्त्र्यक्षरः तस्य शब्दस्य त्रिविधेन रूपेण त्रयो देवा विभागेनोत्पद्यन्ते देवा गन्धर्वाः अथाग्न्याद्युत्पत्तिरुच्यते तस्य शब्दस्य त्रिविधेन रूपेणेमां वाचं त्रेधा रवतीति व्युत्पत्तेः यौगिक इत्यर्थः एतेषां त्रयाणां देवानां एषा वक्ष्यमाणाविभक्तिर्भजनं स्थानं अग्निवाय्वा दित्यदेवतानां पृथिव्यादिकं स्थानमित्येतत्प्रसिद्धमेव अस्मि न्नर्थे सम्बन्धाय कस्यचिन्मन्त्रस्य पादं पठति त्रयो घर्मास उषसं सञ्चरन्त इति घर्मासो दीप्यमानादेवास्त्रयोऽग्निवाय्वा-दित्या उषसं उषाकालरूपी तमोनिवारणेनोत्पन्ना देवाः सचन्ते सेवन्ते ॥ २ ॥

मन्त्रार्थं विविच्य दर्शयति ।

अग्निरुषसꣳ सचते वायुरुषसꣳ सचतेऽसावा-दित्य उषसꣳ सचते ॥ ३ ॥

अग्निर्द्दैवः पृथिव्यां उषो देवीं सेवते तया कृतं तमोनिवारणमनुभवतीत्यर्थः एवं वाय्वादित्यावप्यन्तरिक्षलोकयोरिति द्रष्टव्यं ॥ ३ ॥

अस्त्वेवमग्न्यादीनामुषः सेवा प्रकृते किमायातमित्याशङ्क्याह ।

त्रीणि मिथुनानि तान्येष ॥ ४ ॥

अग्निवाय्वादित्यास्त्रयो गन्धर्वाः पुरुषा लोकत्रयेऽपि उषसो योषितस्तन्मिलितेन त्रीणि मिथुनानि भवन्ति तानि चैषः त्रयस्त्रिरात्रस्त्रित्वसंख्यायाः समानत्वात् तस्मादयं प्रशस्त इत्यर्थः ॥ ४ ॥

किञ्च मिथुनावयवौ द्वौ तत्पुत्रस्त्वेक इत्यनेनापि प्रकारेण त्रित्वसाम्यात् प्रशस्त इत्याह ।

मिथुनं द्वे सम्भवतो मिथुनाद्यत्प्रजायते तत्तृतीयं ॥ ५ ॥

द्वे स्त्रीपुरुषशरीरे सम्भवत इति यदस्ति तदेतन्मिथुनमुच्यते स्पष्टमन्यत् ॥ ५ ॥

अथास्य त्रिरात्रस्य यागे सहस्रदक्षिणास्ति तत्स्तोतुमाख्यायिकामाह ।

इन्द्रो वृत्राय वज्रमुदयच्छत्सोऽब्रवीन्मा मे प्रहार्षीरस्ति वा इदम्मयि वीर्य्यन्तत्ते प्रदास्यामीति तदस्मै प्रायच्छत्तद्विष्णुः प्रत्यगृह्णात् स द्वितीयं स तृतीयमुदयच्छत्स एवाब्रवीन्मा मे प्रहार्षीरस्ति वा इदं मयि वीर्य्यन्तत्ते प्रदास्यामीति तदस्मै प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादेतद्वाव तदभ्यनूच्यते ॥ ६ ॥

लोकत्रयमावरीतुं प्रतिक्षणं वर्द्धमानेन देहेनोपेतस्त्वष्टुः पुत्रो वृत्रनामकः कश्चिदसुर आसीत् तद्वधार्थं इन्द्रः कदाचिद्वज्रमुद्यम्यावस्थितः तमिन्द्रं दृष्ट्वा स वृत्र एवमब्रवीत् हे इन्द्र कदापि मे शरीरं माप्रहार्षीः मयि वृत्रे वीर्य्यं सारभूतं इदं वस्त्वस्त्येव मच्छरीरे रक्षिते सति तद्वस्तु तुभ्यं प्रदास्यामीत्युक्त्वा प्रहारादुपरतायास्मा इन्द्राय तद्वस्तु प्रायच्छत् इन्द्राय प्रदत्तं तद्वीर्य्यरूपं वस्तु अस्येन्द्रस्य सखा विष्णुस्तस्मादिन्द्रात्प्रतिगृह्य रक्षितवान् वृत्रवधार्थं प्रवृत्तस्येन्द्रस्य वज्रोद्यमे विष्णुः साहाय्यं कृतवान् तदिदं तैत्तिरीया आमनन्ति इन्द्रो वज्रमुदयच्छत् विष्णुरनुस्थित इति विष्णुः साहाय्यादनुस्थित उपविष्ट एव सन् वज्रमुद्यतवानित्यर्थः वृत्रेण दत्तं तद्वीर्य्यं इन्द्रः प्रतिगृह्य सख्ये विष्णवे प्रायच्छत् एतदपि त एवामनन्ति तद्विष्णवे प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति तत्तस्मा इन्द्राय दत्तस्य विष्णुना प्रतिग्राह्यत्वं युक्तं स इन्द्रः पुनरपि वृत्रं हन्तुं

द्वितीयं द्वितीयवारं अस्मिन्वाक्ये पूर्व्वोक्तं वज्रमुदयच्छदित्यादिकं विष्णुः प्रतिगृह्णादित्यन्तं अनुवर्त्तते पुनरपि स इन्द्रस्तृतीयवारं उदयच्छत् तदापि स वृत्रः पूर्व्ववदेव अब्रवीत् मामे प्रहार्षीरित्यादिकं पूर्व्ववद्योज्यं तद्वावं त्रिवारञ्च तद्वृतमिन्द्रवीर्य्येण विष्णुना च प्रतिगृहीतं तदेतत्सर्व्वमेव कयाचिदृचाभ्यनूच्यते ॥ ६ ॥

तामेतामृचमुदाहरति ।

उभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्च नैनोरिन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामिति ॥ ७ ॥

हे इन्द्रविष्णू युवामुभौ जिग्यथुः सर्व्वत्र जितवन्तौ न पराजयेथे क्वापि पराजयं न प्राप्नुथ एतयोर्मध्ये कतरश्च न एकतरोऽपि पराजिग्ये द्वितीयं प्रत्यत्तं विनापि क्वापि युद्धे पराजयं न प्राप्तवान् हे विष्णो त्वमिन्द्रश्चोभौ यदपस्पृधेथां यदा परस्परं स्पर्द्धितवन्तौ तत वृत्राल्लब्धं गोसहस्ररूपं वीर्य्यं त्रेधा विभज्य इन्द्रस्य द्वौ भागौ विष्णोरेको भाग इत्येवमैरयेथां प्राप्तवन्तौ इति शब्दः समाप्त्यर्थः ॥ ७ ॥

नन्विन्द्राविष्णुभ्यां वृत्रो वीर्य्यं प्रायच्छदिति ब्राह्मणे श्रुतं तत्संवादार्थमुदाहृतायां ऋचि सहस्रं भ्रितमिति वैयधिकरण्यमाशङ्क्याह ।

एतद्वा आभ्यां तत्सहस्रं प्रायच्छत् ॥ ८ ॥

तदेतदेव गोसहस्रमभिहितं हत्र आभ्यां विष्णिन्द्राभ्यां प्रायच्छत् तस्माद्दैयधिकरण्यं उदाहृतायामृच्यभिहिता येयमिन्द्राविष्णोः परस्परस्पर्द्धा यश्चेन्द्रस्य भागद्वयं विष्णोरेको भाग इत्येतादृशो गोसहस्रस्य त्रेधा विभागस्तदुभयं तैत्तिरीयैः विस्पष्टमाम्नायते अथ या सहस्रं तस्यासीद्यस्यामिन्द्रश्च विष्णुश्च व्यायच्छेतां स इन्द्रोऽमन्यत न वा इदं विष्णुः सहस्रं प्राप्स्यत इति तस्यामकल्पेतां द्विभाग इन्द्रस्तृतीयो विष्णुस्तदेव एषाभ्यनूच्यत उभा जिग्यथुरितीति अस्याम्नानस्यायमर्थः पुरा कदाचित् प्रजापतिः वसूनिन्द्रादित्यांश्च ससर्ज्ज एते सर्व्वे संवत्सरं तपस्तप्त्वा गामेकामसृजत सा च गौर्व्वसूनां गवामेकोनसहस्रे सम्पन्ने सति स्वयं सहस्रसंख्यापूरणी सम्पन्ना तस्यां गवि ममैवेयं इति विष्णुरिन्द्रश्च परस्परं स्पर्द्धेतां तदानीमिन्द्र एवं विचारयन् अनया सहस्रतमया सहितं गोसहस्रं विष्णुर्म्मत्सकाशात् चर्करिष्यतीति तत इन्द्राविष्णू स्पर्द्धां परिहर्तुं अन्याभिर्गोभिः सहितायां तस्यां सहस्रतमं विभागं कल्पितवन्तौ तत्रेन्द्रो भागद्वयेऽवस्थितः विष्णुस्तृतीये भागेऽवस्थितः तस्मिन्नेवोक्तार्थे उभाजिग्यथुरित्यृगभ्यनूच्यते इति इत्थं अस्मिन् दक्षिणारूपेण दातव्यस्य गोसहस्रस्येन्द्रविषयोपाख्यानेन प्रशंसा कृता ॥ ८ ॥

तत्र गोसहस्रं त्रिषु दिनेषु विभज्य दातव्यं तत्र प्रथम-

द्विने प्रतिग्रहीतृविशेषं दर्शयति ।

तस्यैषा भक्तिर्य आर्षेयो विद्वाꣳस्तस्मै प्रथमेऽहनि देयं यथा वा इयमेवꣳ स प्रतिष्ठितेयं प्रतिष्ठितः सः ॥ ९ ॥

तस्य दातव्यस्य द्रव्यस्य एषा वक्ष्यमाणा भक्तिर्भागः विभज्य दानप्रकारः कथ्यते ऋषेर्गोत्रप्रवर्त्तकस्य भरद्वाजकश्यपादेः सम्बन्धी पुमानार्षेयः प्रख्यातकुलगोत्र इत्यर्थः विद्वान् वेदशास्त्राभिज्ञः तादृशोयः प्रतिग्रहीता तस्मै प्रथमेऽहनि दक्षिणा दातव्या प्रथमस्याह्नः पृथिवीरूपत्वं पूर्व्वमुक्तं इयं प्रथमाहःस्वरूपा पृथिवी यादृशी तादृगेव स आर्षेयः उभयोः प्रतिष्ठासम्बन्धस्य तुल्यत्वात् प्रतिष्ठितः ॥ ९ ॥

द्वितीयेऽहनि प्रतिग्रहीतृविशेषं दर्शयति ।

योनार्षेयो विद्वाꣳस्तस्मै द्वितीयेऽहनि देयं यथा वा अन्तरिक्षमेवꣳ सोऽन्तरिक्षमित्यन्तरिक्षं विदुर्वेदं तस्य विदुः ॥ १० ॥

अज्ञातकुलगोत्रो वैदेशिकोनार्षेयः, द्वितीयाहःन्तरिक्षरूपत्वादन्तरिक्षद्वारेण वैदेशिकस्य साम्यत्वमेतु शक्यं अन्तरिक्षमित्यनेन शब्देनान्तरिक्षं द्यावापृथिव्योरन्तरा क्षयति निवसति इति व्युत्पत्त्या सर्व्वे जना मध्यवर्त्तिनं लोकं विदुः वैदेशिकोऽपि ज्ञाताज्ञातयोर्मध्ये वर्त्तते तदीयकुलगोत्रयोरज्ञातत्वात् वेदपाठन्तु तदीयं सर्व्वे विदुः अतो द्वितीयेऽहनि प्रतिग्रहयोग्यः ॥ १० ॥

तृतीये प्रतिग्रहीतृयोगं दर्शयति ।

य आर्षेयोविदाᳪस्तस्मै तृतीयेऽहनि देयं यथा वै द्यौरेवᳪ सद्यौरिति दिवं विदुर्बन्धु तस्य विदुः ॥ ११ ॥

तृतीयाहःस्वरूपत्वेनोक्तस्य द्युलोकस्यार्षेयेण सह जातत्वमा-म्यमस्ति दीव्यति इति द्यौरित्येवं दिवं सर्वे जानन्ति तस्या-र्षेयस्य बन्धुजातं भ्रातृपुत्रादिकं च जानन्ति ॥ ११ ॥

दातव्ये गोसहस्रे या संख्यान्तर्भूतास्ति तथा तस्यां शत-संख्यायामन्तर्भूता या संख्यास्ति तदुभयं क्रमेण प्रशंसति ।

शतान्यन्वहन्दीयन्त एषा वाव यज्ञस्य मात्रा यच्छतं सैव सा विच्छिन्ना दीयते दशतोऽन्वहं दीयन्ते दशाक्षरा विराड्वैराजोयज्ञः सैव सा विच्छिन्ना दीयते ॥ १२ ॥

प्रतिदिनं गवां शतानि दीयन्ते तद्विशेषस्तूत्तरत्र वक्ष्यते शत-मिति यदस्ति एषैव संख्या यज्ञस्य मात्रा सोमयागस्य दक्षिणा-द्रव्यप्रमाणं प्रकृतौ हि द्वादशाधिकं शतं विहितं तस्य द्वादश शतं दक्षिणेत्याम्नातत्वात् ततः शतादर्वाचीनसंख्यायामभावा-च्छतसंख्यामात्रेत्युच्यते सैव शतसंख्या सा यज्ञस्य मात्रा भूत्वा प्रतिदिनमवच्छिन्ना दीयते दशत्इत्यनेन शकारान्तशब्दे-न दशानां समूहोऽभिधीयते पञ्चदशतौ वर्गो वेति पाणिनिः आर्षेयादिभ्यः प्रतिग्रहीतृभ्यो दशतो दशसंख्योपेताः वर्गाः प्रति दिनं दीयन्ते ते च वर्गाः संख्यासाम्याद्विराट्छन्दोरूपाः सोम-यागस्य वैराजः प्रकृतिगतासु स्तोत्रीयास्वेकोनविंशतिविराट्

रूपस्यासकृद्दर्शितत्वात् अतः सैवं संख्या विराड्रूपा भूत्वा प्रतिदिनमविच्छिन्ना दीयते ॥ १२ ॥

एकोनसहस्रसंख्याकानां गवां दिनत्रयसाम्येन विधानं दर्शयति ।

त्रयस्त्रिंशच्च त्रीणि च शतानि प्रथमेऽहनि देयास्तथा द्वितीये तथा तृतीये ।१३ ।

स्पष्टोऽर्थः । १३ ।

सहस्रतम्यां गोदानप्रकारमाह ।

अथैषा द्विदेवत्या त्रिरूपा ब्रह्मणे दे तृतीये तृतीयमग्नीधः ॥ १४ ॥

एकोनसहस्रकथनानन्तरमेषां सहस्रतमी कथ्यते सा चेन्द्रविश्वरूपदेवताद्वयोपेता शुक्लकृष्णसहितवर्णास्त्रिरूपा च तेषु त्रिरूपेषु शुक्लं रूपमितरापेक्षया तथा कृष्णमपि द्वितीयं रोहितमपि तृतीयं तत्र तृतीये ब्रह्मणो योग्ये तस्य द्विभागोपेतेन्द्रस्थानीयत्वात् अवशिष्टं तृतीयमग्नीधस्य योग्यं तस्यैकभागोपेतविष्णुस्थानीयत्वात् ॥ १४ ॥

अथ सहस्रतम्यामनुमन्त्रणे मन्त्रमाह ।

काम्यासि प्रियासि हव्यासीडे रन्ते सरस्वति महि विश्रुत एतानि तेऽघ्न्ये नामानि देवेषु नः सुकृतो ब्रूयात् ॥ १५ ॥

हसस्रतमो षड्भिः पादैः सम्बोध्यते हे इडे मननरूपे हे

रन्ते रमणीये हे सरस्वति सरणात्मरः चौरन्तद्दति हे महि महति हे विश्रुते प्रख्याते हे अघ्ने हन्तुमयोग्ये त्वं काम्या कमनीयासि प्रिया प्रीतिविषयासि हव्या दानयोग्यासि एतानीडादीनि काम्यादीनि तव नामानि तादृशी त्वं नो अस्मान् सुकृतः शोभनस्य कर्त्तॄन् देवेषु ब्रूतात् देवसमीपे कथय॥ १५॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
पञ्चदशः खण्डः।

अथ षोड़शः खण्डः।

पुनरपि त्रिरात्रं बहुधा तुष्टुपरादौ तावत् त्रैलोक्यवर्त्तिपदार्थसमृद्धिहितूनू दर्शयति।

इदं वाव प्रथमेनाह्ना व्यकरोद्यदिदमस्यामध्यायत्त-मूलमिदं द्वितीयेन यदिदं प्राणदेवत्यदस्तृतीयेन यद्वर्षति यन्नक्षत्राणि यदमुं लोकं भेजे॥ १॥

अस्यां पृथिव्यामध्युपरि यदिदं गिरिवृक्षादिकमायत्तमूल-मधीनमूलं वर्त्तते स्थावराणां हि मूलानि भूमौ प्रविश्य तिष्ठन्ति तदिदमेतत् स्थावरस्वरूपमयन्त्रिरात्रः प्रथमेनाह्ना व्यकरोत् विशिष्टं समृद्धं करोति प्रथमस्याह्नोऽनुष्ठानेन जनित-मपूर्व्वं तत् समृद्धेः कारणमित्यर्थः यदिदं जङ्गमं मनुष्यपश्वादि-रूपं* प्राणान् श्वासं कुर्व्वन् एजति कम्पते भूम्यन्तरिक्षयोश्चलति

* मनुष्यपश्वादिरूपमिति पुस्तकान्तरपाठः।

तदिदं द्वितीयेनाह्ना व्यकरोत् द्युलोकवर्त्तिवृष्टिनक्षत्रदेवतावि-ग्रहादिकं यदस्ति तदह एवं तृतीयेनाह्ना व्यकरोत् ॥ १ ॥

अथ महाव्रतरूपतामापाद्य प्रशंसति ।

तदाहुर्ब्रह्मवादिनो महाव्रतं वा एतद्यदेष त्रिरात्र इति तस्यै तदेव मुखं यदेतेषामह्नां बहिष्पवमानं ये अभितो-ऽहनी तौ पक्षौ यन्मध्यममहः स आत्माग्निष्टोमसामानि पुच्छं ॥ २ ॥

अग्निचयनोपेतस्य महाव्रतक्रतोः सम्बन्धी योऽयं चित्योऽग्नि स्तस्य मुखपक्षद्वयमध्यदेहपुच्छरूपाः पञ्चावयवाः तस्य सर्वस्य त्रिरात्रे सम्पादितत्वादयं त्रिरात्रो महाव्रतगतचित्याग्निभावतया कर्म्मफलसमृद्धिं ब्रुवतीत्यभिप्रायः ॥ २ ॥

प्रकारान्तरेण मुखपुच्छे निरूपयति ।

यदेवासावुदेति तन्मुखं ये अभितोऽहनी तौ पक्षौ यन्म-ध्यममहः स आत्माग्निः पुच्छं ॥ ३ ॥

बहिष्पवमानस्तोत्रात् प्रागेवासावादित्य उदेतीति यदस्ति तदेव मुखं आहवनीयाद्यग्निः पुच्छं ॥ ३ ॥

पुनरपि प्रकारान्तरेण पुच्छन्निरूपयति ।

यदेवासावुदेति तन्मुखं ये अभितोऽहनी तौ पक्षौ यन्म-ध्यममहः स आत्मा यदस्तमेति तत्पुच्छं ॥ ४ ॥

आदित्योऽस्तमितीति यदस्ति तत्र पुच्छमिति द्रष्टव्यम् त्रिरा-त्रस्य यदिदम्महाव्रतत्वसम्पादनन्तदिदमनुतिष्ठासोः प्ररोचना-योपयुक्तं अनुष्ठातुमशक्तस्य तु भावनया तत्र कश्चित्सुकृतविशेषो भवति अयमेव न्यायः सर्व्वेष्वर्थवादेष्वनुसन्धातव्यः एतदेवाभिप्रेत्य तत्र य एवं वेदेत्याम्नायते ॥ ४ ॥

अथ त्रिरात्रे प्रकारान्तरेण भावनां दर्शयति ।

एतावान्वाव त्रिरात्रो गायत्रः प्राणस्त्रैष्टुभं चक्षुर्जागतं श्रोत्रं सर्व्वमायुरेति य एवं वेद ॥ ५ ॥

यावान् गायत्र्यादिरस्ति एतावानेव त्रिरात्र इति भावयेत् त्रिरात्रे यानि गायत्रीत्रिष्टुब्जगतीरूपाणि सम्पद्यन्ते तत् सम्ब-न्धीनि पुरुषमुखवर्त्तीनि प्राणचक्षुःश्रोत्राणि तेषु छन्दःसु प्राणा-दीनां भावनीयत्वात् यः पुमानेवं वेद मनसा भावयति स पुमान् सर्व्वमायुरेति अस्यापमृत्युः न भवतीत्यर्थः ॥ ५ ॥

पुनरप्युत्तरोत्तराभ्यां त्रिरात्रस्य महिमानं विशदयति ।

तदाहुर्ब्रह्मवादिनः कियन्त्स्त्रिरात्रइतीयानिति ब्रूयादि-यध्येतदभ्ययो इयानिति ब्रूयादियध्येवैतदभिपरा३ङ्र्वा-३ङ्त्याहुः पराङिति ब्रूयात्पराङ्ह्वि वदति पराङ् पश्यति पराङ्प्राणित्येका३द्वा३उत्त्रया३इत्याहुरेक इति ब्रूयात् समानो ह्येष यत् प्राणोपानोव्यानस्तद्यथा अदोमनौ ह्वत्र-मोतमेवमेषु लोकेषु त्रिरात्र ओतः शोभतेऽस्य मुखं य एवं वेद ॥ ६ ॥

कियानिति पृच्छतां ब्रह्मवादिनां अयमभिप्रायः इदं वाव प्रथमेनाह्ना इत्यादिना त्रैलोक्यवर्त्तिभोग्यपदार्थसमृद्धिहेतुस्त्रिरात्र इत्युक्तम् किन्तावानेव त्रिरात्रोभावयितव्यः किम्वा ततोऽप्यधिक इति इयानेव त्रिरात्रोध्यातव्यो नत्वधिक इति ब्रह्मवादिनां गुरुरुत्तरं ब्रूयात् ततोपपत्तिरियध्येति वाक्येनोच्यते यद्यस्मादयं लोकत्रयपरिमितमेतद्भोग्यजातमभिलक्ष्य त्रिरात्रः प्रवृत्तः तस्मादियानेव ध्यातव्यः अथो अपिच महाव्रतरूपत्वेन च विधानमुक्तं तत् सर्व्वत्र कियानिति प्रश्नश्चेदाशंक्य तत्तदानीमियानित्येवोत्तरमुक्तोपपादयेत् वाचनिकेषु इयानादिषु यथावचनमनुतिष्ठेत नपुनः संशयः कर्त्तव्यइत्यर्थः अयं त्रिरात्रः पराङ् चार्वाङ चेति प्रश्नस्य पराङित्युत्तरं परमुत्कर्षमञ्चति गच्छत्यनेनेति पराङुत्कृष्टफलप्राप्तिहेतुरिति ध्यायेत् नत्वर्व्वाङधमइत्यर्थः हि यस्मादयमनुष्ठाता फलकाले पराङुत्कर्षप्राप्तः सन् वदनदर्शनप्राणनादिव्यवहारं करोति नत् कस्मिंश्चिदपि व्यवहारे प्रकृष्टो भवति तस्मात्फलहेतुः त्रिरात्रः पराङिति ध्यायेत् एकोद्दोत्रयमयं त्रिरात्रात्मकः क्रतुः एकएव उत त्रिसृषु रात्रिषु त्रयः क्रतवइति प्रश्नः तस्यैकइत्युत्तरं हि यस्मात्प्राणोपानोव्यान इत्येवं वृत्तित्रयरूपेण वायुः स्वरूपं वर्त्तते सवायुस्तिसृष्वपि वृत्तिषु समान एकस्तद्वदयं क्रतुरित्यर्थः यथेत्यादिनान्यो दृष्टान्त उक्तः अदः कार्पासादिजनितं सूत्रं मणौ मणिसमूहे यथा श्रोतमनुस्यूतं तद्वत् क्रतुफले लोकत्रयसाधनभूत क्रतुरनुगतः य एवं वेद ध्यायति अस्य देवताशरीरं प्राप्तस्य मुखं शोभते ॥ ६ ॥

सर्वत्र त्रिरात्रस्य त्रैष्टुभं आगतमित्येव क्रमेण लोष्टहानि

न्यायतः प्राप्नोति अत्र तु मध्यममहर्जागतमित्येकदेशवैलक्षण्यं दर्शयति।

यद्वै त्रिरात्रस्य सलोम तदस्य विलोम यदस्य विलोम तदस्य सलोम तद्यदेतत्परं सदहरवरं क्रियते यजमानायैव तत्पशून् परिगृह्णाति प्रजननाय नह्यमुष्मिन् लोके पशवः प्रजायन्ते ॥ ७॥

अनुकूलमनुष्ठानं सलोमेत्युच्यते तद्विपरीतं तु विलोमेति तथा सति तस्य सर्व्वस्य त्रिरात्रस्य न्यायप्राप्तं यत् सलोमानुष्ठानं जागतावसानमस्ति तदस्य गर्गत्रिरात्रस्य विलोम भवति अत्रास्मिन् गर्गत्रिरात्रे जागतस्याह्नोमध्यमत्वात् यत् पुनरस्येतरं त्रिरात्रस्य विलोमरूपं जागतं मध्यमत्वमस्ति तदस्य गर्गत्रिरात्रस्य सलोम भवति तस्मिन् गर्गत्रिरात्रे परं स तृतीयप्राप्तियुक्तं सज्जागतमहरवरं मध्यमं क्रियतइति यदेतदस्ति तत्तेन मध्यमत्वकरणेन यजमानार्थमेव पशून् पशुसमूहं परिगृह्णाति पशूनां जागतत्वात् जगतीछन्दसां पशव्यतामिति श्रुत्यन्तरात् सच पशुपरिग्रहः प्रजननाय बहुपशूत्पादनाय संपद्यते जागतस्याह्नस्ततीयत्वेतु तस्य तृतीयस्याह्नोद्युलोकरूपत्वात्पशुप्रजननं सम्भवति द्युलोके ह्यमृतं पीत्वा तृप्ता देवा गवादिपशून् सम्पादयति ॥ ७॥

प्रकारान्तरेण प्रशंसति।

एते वाव छन्दसां वीर्य्यवत्तमे यद्गायत्री च त्रिष्टुप् च

यदेते अभितो भवतो मध्ये जगतीवीर्य्यवतीभ्यामेव तच्छन्दोभ्यां पशून् परिगृह्णाति प्रजननाय न ह्यमुष्मिन् लोके पशवः प्रजायन्ते ॥ ८ ॥

गायत्रीत्रिष्टुप् चेति यत् छन्दोद्वयमस्ति एते छन्दसी उभे एव सर्व्वेषां छन्दसां वीर्य्यातिशयोपेते तत्र गायत्र्याः सोमाहरणेन वीर्य्यवत्त्वं द्रष्टव्यं त्रिष्टुभस्तु वीर्य्यवत्त्वं सर्व्वश्रुतिप्रसिद्धं एते गायत्रीत्रिष्टुभावभितस्ततीययोरङ्गोर्भवतः मध्यमेऽहनि जगती भवति इति यदस्ति तत्तेन त्रिविधानुष्ठानेन मध्यदिनवर्त्तिजगती सम्पादितवान् पशूनुभाभ्यां वीर्य्यं तच्छन्दोभ्यां परिगृह्णाति परिपालयति अन्यत् पूर्व्ववत् ॥ ८ ॥

अथ त्रिरात्रस्यादित्यरूपेण ध्यानमाह ।

असौ वाव त्रिरात्रो यथोदेत्येवं प्रथममहर्यथा मध्यन्दिन एवं द्वितीयं यथाऽस्तमेत्येवं तृतीयङ्गच्छत्यमुष्य सायुज्यङ्गच्छति सावेश्यं य एवं वेद ॥ ९ ॥

असौ द्युलोकवर्त्ती सूर्य्य एव त्रिरात्रस्वरूपः यथादित्यस्योदयमध्यन्दिनास्तमयास्तथास्यापि क्रतोस्त्रीण्यहानि सन्ति क्रतावादित्यस्य दृष्टिः कर्त्तव्या त्रिष्वहःसु उदयादिदृष्टिरित्यर्थः यः पुमानेवं वेद ध्यायति स पुनर्ध्यानेनामुष्य सूर्य्यस्य सायुज्यं गच्छति इति ॥

वेदार्थस्य प्रकाशेन तमोहार्दन्निवारयन् ।
पुमर्थांश्चतुरोदेयात् विद्यातीर्थमहेश्वरः ॥ ९ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्क-
भूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माध-
वीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे
विंशाध्यायस्य षोड़शः खण्डः।

विंशोऽध्यायः समाप्तिमगमत्॥

अथैकविंशोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलञ्जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

अथैकविंशोऽध्याय आरभ्यते। तत्र गर्गत्रिरात्रस्य यद्दक्षिणारूपं गोसहस्रं पूर्व्वमुक्तं या चोक्ता सहस्रतमी तयोः प्रशंसार्थमाख्यायिकानाम आह।

इन्द्रोमरुतः सहस्रमजिनात् स्वां विप्रं सोमाय राज्ञे प्रोच्य तस्माद्राज्ञे प्रोच्य विप्रं जिनन्ति तौ यमोऽष्टणोन्मरुतोह सहस्रमिज्यावहष्टामिति स आगच्छत्सोऽब्रवीदुपमास्मिन् सहस्रे ह्वयेथामिति तमुपाह्वयेता१ सयमोऽपश्यदेकाङ्गा१ सहस्रेपि सहस्रस्य पयोबिभ्रती१ सोऽब्रवीदियमेव ममास्तु सहस्रं युवां विकल्पयेथामिति तावब्रूतां यथावाव त्वमेतां पश्यस्येवमावमेतां पश्याव इति॥१॥

इन्द्रः पूर्वं सोमाय राज्ञे प्रोच्य गोसहस्रजयलक्षणं फलमावयोः सहास्त्विति कथयित्वा सहस्रं .सहस्रसंख्याकान्मरुतः अजिनात् क्षीणानकरोत् ज्यावयोहानौ अत्र हानिमात्रे प्रवर्त्तते जितवानित्यर्थः तदेवाह स्वां विप्रमिति स्वीयां प्रजामित्यर्थः

एतदुक्तं भवति स्वप्रजाभूतमरुत्सहस्रं जित्वा गोसहस्रं लब्धवानित्यर्थः यद्वा मरुतः सहस्रमिति अधिकरणनिर्देशः मरुतः सकाशात् गोसहस्रमजिनादित्यर्थः यस्मादेवं तस्मादिदानीमिता अपि राज्ञे प्रोच्य विज्ञप्यैव विशः स्वां प्रजां गवादिधनार्थं निगृह्णन्ति ताविन्द्रसोमौ यमोऽशृणोत् किमिति मरुतः खलु सहस्रं इज्यासृष्टामलभेतामिति स यमस्तु आगच्छत् तयोरन्तरितो यमस्तावब्रवीत् अस्मिन् गोसहस्रे मा मां उपह्वयेथामिति तौ च तमुपाह्वयेतां स उपहूतोयमः अपश्यत् किं एकाङ्गां सहस्रेपि कीदृशीं सहस्रस्य पयः गोसहस्रे यावत्पयोस्ति तावत् समर्द्धिं पयोबिभ्रतीं स तां दृष्ट्वा इयमेव ममास्तु युवां सहस्रं विकल्पयेथां विभजेथामित्यब्रवीत् तावपि पुनरेवाब्रूतां त्वं यथा त्वमेतां पश्यसि एवमेवास्मदर्थं पश्याव इति ॥ १ ॥

अथ तेषां समविभागकल्पनाप्रकारमाह ।

तया वा इदꣳ सहस्रं विकल्पयामहा इत्यब्रुवꣳस्तामुदके प्रावेशयꣳस्तेऽब्रुवन्नꣳशानाहरामहै यस्मै न इयं प्रथमायोदेष्यति इति तेऽꣳशानाहरन्त सोमस्य प्रथम ऐदथेन्द्रस्याथ यमस्य ॥ २ ॥

विभागश्चे इति विविधमेतास्ते समविभागप्राप्त्यर्थतया वैतया सहस्रतम्या सह इदं गोसहस्रं विकल्पयामहै विभजामहा इत्यब्रुवन् तथोक्तां तामेकाङ्गां विभागकल्पनायोदके प्रावेशयन् तदनन्तरन्तेऽंशार्थैवमब्रुवन् किमिति नो अस्माकम्मध्ये यस्मै प्रथमाय

प्रथमविभागाय उदेष्यति जलादुद्गमिष्यति ते वयं गोसहस्रस्य सहस्रतम्यास्त्रींशानाहरामहै कल्पयामहा इति एवम्मिथः सम्भाष्य अंशानाहरन्त तत्र प्रथमे अंशे सोमं ऐत् सोममागच्छत् अथ इन्द्रस्य अथ यमस्य ॥ २ ॥

अथ गोसहस्रस्य सहस्रतम्याश्च भागत्रयसाम्ये च सोमप्राप्तिं दर्शयति।

तेऽब्रुवन् सोमाय राज्ञ उदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति साबभ्रुः पिङ्गाक्ष्येकवर्षोदैत्तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयसः सा या सोमक्रयणी सैव सा ॥ ३ ॥

ते विभागक्रमकल्पनानन्तरमब्रुवन् हे सहस्रतमि सोमराज्ञे प्रथमं उदेहि जलादुद्गच्छ किं विशिष्टा सती आत्मनस्तव तृतीयेनांशेन च गोसहस्रस्य च पयसः तृतीयेनांशेन सहिता सती इति एवमुक्ता सा सहस्रतमी स्वतृतीयांशेन बभ्रुरुणवर्णा पिङ्गाक्षी एकवर्षा सती उदैत् तैर्य्यथा प्रार्थितं तथोविल्लक्तं भवति तृतीयेन चात्मन इत्यादिना अस्याः सोमांशरूपत्वात् सोमक्रयणीत्वमाह या सा सोमक्रयणी इदानीन्तनैः सोमक्रेतृभिः तत्साधनत्वं तु कल्प्यते सैव सोमक्रयणी सा जलादुद्गता बभ्रादिलक्षणोपेतेत्यर्थः ॥ ३ ॥

अथोक्तार्थज्ञानपुरःसरं क्रयणं प्रशंसति।

तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सहस्रस्य

पयसः सोमः क्रीतो भवति य एवं विद्वान् सोमं क्रीणाति यस्मा एवं विदुषे सोमं क्रीणन्ति ॥ ४ ॥

तस्याः बभ्र्वादिलक्षणाया अस्या आत्मनः स्वरूपस्य तृतीयेन भागेन गोसहस्रस्य पयसस्तृतीयांशेन च सोमः क्रीतो भवति इदानीन्तनैः योगवा क्रीतोपि यएवमादि स्पष्टं ॥ ४ ॥

अथेन्द्रभागप्राप्तिं दर्शयति ।

तेऽब्रुवन्निन्द्रायोदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति सा प्रबलीपष्ठौ ह्युदैत् तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयसः सा येन्द्रियैष्या सैव सा ॥५॥

पूर्ववद्व्याख्येयं इयांस्तु विशेषः इन्द्रियैष्या इन्द्रियं इन्द्राय हितं वा तदेतावदवगम्यते पिङ्गाक्षैकहायन्या सोमः क्रेतव्य इति तदर्थतस्या एषणीया दातव्येत्यर्थः पष्ठौहीतु प्रसिद्धा त्रिवर्षा गौरिति ॥ ५ ॥

अथोक्तार्थवेदनपुरःसरमिन्द्रियैष्यादत्तं प्रशंसति ।

तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सहस्रस्य पयस इन्द्रियैष्या दत्ता भवति य एवं विद्वानिन्द्रियैष्यां ददाति यस्मा एवं विदुष इन्द्रियैष्यां ददाति ॥ ६ ॥

अस्यस्या अपि इन्द्रियैष्यायाः गोदानेऽपि गोसहस्रतृतीयांश-पयोयुक्ता सहस्रतमो तृतीयांशमूतोक्तलक्षणैस्तैरेव दत्ता भवति ॥ ६ ॥

अथ श्रमस्य स्वांशप्राप्तिं दर्शयति ।

तेऽब्रुवन्यमायोदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति सा जरती कुष्टाऽश्रृङ्ग्यूदैद्धूम्रा वादित्यौहीर्म्मतोह्रसोयसो तृतीयेन च सहस्रस्य पयसः सा यानुस्तरणी सैव सा ॥७॥

पूर्ववद्व्याख्येयं जरतीति जरसा युक्ता कुष्टा कुष्टवर्णा अशृङ्गी शृङ्गरहिता उदैत् उदगच्छत् वर्णावान्तरप्रसिद्धतरं दर्शयति वा अथवा धूम्रा धूम्रवर्णादित्यौहीर्मत ईर्म्मतो जघनप्रदेशतोह्रसीयसी अत्यन्तं ह्रासयुक्ता करोतीत्यर्थः ईर्म्मस्तासः सिलिकमध्यमा-सइत्यादौ तथा दर्शनात् यद्वा ईर्म्मं व्रणं तत् करोतीत्यर्थः सोदैदिति सम्बन्धः अनुस्तरणीं मृतसंस्कारार्थमुपाकरणीया गौरमृतमनुष्ठन्यत इत्यनुस्तरणीति च निष्पन्नपदी भवति ॥ ७ ॥

उक्तार्थस्यानुस्तरणीकरणं प्रशंसति ।

तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सहस्रस्य पयसोनुस्तरणीकृता भवति य एवं विद्वाननुस्तरणीं करोति यस्मा एवं विदुषेऽनुस्तरणीङ्कुर्व्वन्ति नाचक्रवान्मन्यते ॥८॥

यदुक्तार्थाभिज्ञोऽनुस्तरणीं ददाति अप्यस्मै वा दुक्तार्थज्ञायानुस्तरणीं कुर्वन्ति तेनोभयविधेनोपलक्षणानुस्तरण्येव कृता भवति किञ्च सोऽर्थज्ञः स्वयं आत्मानं उक्तलक्षणानुस्तरणीदान-

मङ्गत्वा चकृवानिति न मन्यते किन्तु विहितामेव कृतवानस्मीति मन्यते ॥ ८ ॥

अथ ब्रह्मवादिनः प्रश्नावतारणमुखेन गर्गत्रिरात्रस्य गोसहस्रदक्षिणादानप्रशंसाद्वारेण त्रिरात्रगतं दानं प्रशंसति ।

तदाहुर्ब्रह्मवादिनो न वा अमुष्मिन् लोके सहस्रयाऽलोकोऽस्तीति तद्यावदितः सहस्रस्य गौर्गवि प्रतिष्ठिता तावदस्माल्लोकादमौ लोकः सहस्रयाजी वा इमान् लोकान् व्याप्नोत्यथो यावत् सहस्रं योजनान्यथो यावत् सहस्रमाश्वीनान्यथो यावत् सहस्रमङ्गयानि तद्भवा गवास्पृणोति समाक्रयणाय वा एतादीयन्ते ॥ ९ ॥

तत्र गोसहस्रदक्षिणकस्त्रिरात्रविषये आहुः ब्रह्मवादिनः अमुष्मिन् लोके भूलोकव्यतिरिक्ते फलत्वेन प्राप्तव्येषु लोकेष्वित्यर्थः सहस्रयाट् सहस्रदक्षिणोपेतगर्गत्रिरात्रावयवा अलोकः प्राप्तव्यलोकरहित इत्यर्थः तादृशो नैवास्ति सर्वोऽप्यस्य च भोगोपविषयो भवति तद्य इत्युक्तं भवति तत्तस्मात् यावद्भिरिमान् लोकान् सहस्रस्य सम्बन्धिनी एकैका गौः एकस्यामेकस्याङ्गवि प्रतिष्ठिता तावत्तावन्तोऽस्मात् लोकादारभ्यासौ लोक अमी गन्तव्या उपर्युपरि लोका इत्यर्थः अस्त्वेवं किं तत इत्याह सहस्रयाजी खलु इमान् गोसंख्यापरिमितान् लोकान् क्रमेण भोगाय व्याप्नोति तदेवोपपादयति अथो अपि च योजनानि सहस्रं यावत्परिमाणं भूस्वर्गयोरन्तरालमस्ति अथो अपि च आश्वीनानि

एकस्मिन्दिने एकस्य शीघ्रगामिनोऽश्वस्य सम्बन्धीनि योजना-न्याश्वीनानि तेषाञ्च सहस्रं यावद्भवति अथो अपि च अह्नानि अह्नःसम्बन्धीनि एकस्मिन्नहनि शीघ्रगामिना पुरुषेण गन्तव्यानि योजनान्यह्नानि तेषाञ्च सहस्रं यावत्परिमाणं भवति ताव-द्योजनानि गवा गवां सहस्रमध्ये एकैकया गवा एकैकयोजन-स्याक्रमणं युक्तमित्यर्थः ॥ ९ ॥

अथ दक्षिणारूपस्य गोसहस्रस्य परि तार्य्याच्छादनं विधत्ते।

सहस्रं यदसृजत तस्य तार्यं योनिरासीद्यत्तार्यं प्रत्यस्य नयति सयोनित्वाय ॥ १० ॥

यद्गोसहस्रमसृजत तद्दक्षिणार्थं सृष्टमनु तत्तस्य तार्य्यं घृतादिकं वस्तु तार्य्यमाहुः अन्ये चाहतं वस्त्रमाहुः तद्योनिर्योनिवदाच्छादक आसीदतस्तार्य्यं गोसहस्रस्य तर्पणभूतस्य सहस्रतमीरूपस्य वा तार्य्यं प्रत्यस्य विधानं नयति नाग्नीध्रं प्रापयति सयोनित्वाय अत्रापस्तम्बः तामुदीचीमाग्नीध्रं नीत्वा तस्यां सतार्य्यं मध्यास्यति इति ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथ चोर्ध्वांज्यदोहानि प्रशंसितुमाख्यायिकामाह ।

प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टाः पराच्य

आयन्ननत्स्यति न इति बिभ्यत्यः सोऽब्रवीदुप मावर्त्तध्वं तथा वै वोत्स्यामि यथाद्यमाना भूयस्यः प्रजनिष्यथ इति ताभ्यो वै न ऋतं ब्रूहीत्यब्रुवꣳस्ताभ्य ऋतनिधनेनर्त्तमब्रवीदौ निधनेनावयत्त्रिणिधनेन प्राजनयदेतैर्वा इदꣳसामभि र्मृत्युः प्रजा अत्ति च प्रजनयति ॥ १ ॥

पूर्व्वं प्रजापतिः ताः सृष्टाः प्रजाः स्वयमेव नः अस्मान् अत्स्यति संहरिष्यति इति तद्भक्षणाद्बिभ्यत्यः पराच्यः आयन् आगताः प्रजापतिरेवमब्रवीत् मा मामुपावर्त्तध्वमिति एवमुक्ताः ताः प्रजाः ताभ्यो बिभ्यतीभ्यो नो अस्माकं वै खलु ऋतं सत्यं शपथं ब्रूहीत्यब्रुवन् ताभ्यः प्रजापति आज्यदोहे गतेन ऋतनिधनेन ऋतं सत्यं वचनमब्रवीत् तत ई इति निधनेनावयत् पुनश्च त्रिणिधनेन प्राजनयत् उक्तनिधनवता साम्ना सहासृजत् साधनत्वमिदानीन्तनप्रसिध्याह्वयति एतैः खल्वाज्यदोहैः सामभिर्मृत्युः प्राणिहिंसोपाधिकः प्रजापतिः प्रजामत्ति च एतैरेव प्रजनयति पुनरुत्पादयति ॥१॥

इदानीमपि उक्तार्थवेदनं प्रशंसति ।

अद्यमानमस्य भूयो भवति य एवं वेद ॥ २ ॥

उक्तार्थज्ञेनाद्यमानमप्यसम्भूय पुनः पुनः प्रकृतमेव भवति न कदाचिदपि क्षीयते ॥ २ ॥

तानि पुनः प्रकारान्तरेण प्रशंसति ।

ज्येष्ठसामानि वा एतानि श्रेष्ठसामानि प्रजापतिमा-मानि ॥ ३ ॥

एतान्याज्यदोहानि साम्नाम्मध्ये ज्येष्ठानि प्रथमभूतानि खलु तथा श्रेष्ठसामानि गुणैः प्रशस्तानि तत् कथमिति तदाह आदित एतानि प्रजापतिसामानि अतः प्रजापतेर्ज्येष्ठत्वाच्च तत्सम्बन्धादेवान्यान्यपि तथाविधानीत्यभिप्रायः ॥ ३ ॥

वेदनं प्रशंसति ।

गच्छति ज्यैष्ठ्यꣳ श्रैष्ठं य एवं वेद ॥ ४ ॥

स्पष्टोऽर्थः । ४ ।

अथ निर्वचनद्वारा एतानि प्रशंसति ।

एतैर्वै सामभिः प्रजापतिरिमान् लोकान् सर्वान कामान् दुग्ध यदाज्या दुग्ध तदाज्या दोहानामाज्यदोहत्वं ॥ ५ ॥

पूर्व्वं प्रजापतिरेतैः सामभिरिमान् लोकान् तेषां जीवनाय सर्वान् कामान् कमनीयान् भोगान् दुग्ध यद्यस्मादाज्या लौकिको दोग्धा जानुनीमाज्य दुग्धे तत् प्रजापतिरपि जानुनी चक्रे कृत्वा सामाभ्यां दुग्ध तत् तस्मादाज्यदोहानां साम्नामाज्यदोहत्वं सम्पन्नं ॥ ५ ॥

उक्तार्थज्ञानपूर्वकमुक्तसाम्नां प्रयोगं प्रशंसति ।

सर्वानिमान् लोकान् कामान् दुग्धे य एवं विद्वानेतैः सामभिः स्तुते ॥ ६ ॥

एतावता एतैः स्तोतव्यमिति विधिरुन्नीयते ॥ ६ ॥

अथ विहितसामत्रयं लोकत्रयरूपत्वेन प्रशंसति ।

इमे वै लोका एतानि सामान्ययमेवर्त्तनिधनमन्तरिक्षमीनिधनं द्यौस्त्रिणिधनं ॥ ७ ॥

भूलोकस्य सर्व्वैरनुभूयमानत्वेन सत्यत्वादृतो निष्पन्नसामस्थानत्वं युक्तमन्तरिक्षस्य निराश्रयत्वात् ईनिधनं स्वरैकाक्षरत्वेन ऋतनिधनद्वयं वैषम्येणास्ते तत्साद्दृश्यं द्युलोकस्य क्षित्यपेक्षया तृतीयत्वात् त्रिणिधनसाम्यम् ॥ ७ ॥

अथोक्तार्थज्ञानं प्रशंसति ।

यथा क्षेत्रज्ञः क्षेत्राण्यनुसञ्चरत्येवमिमान् लोकाननुसञ्चरति य एवं वेद ॥ ८ ॥

स्पष्टं । ८ ।

अथैतेषां गाने अग्निसान्निध्यं विवक्षुराह ।

अग्नेर्वा एतानि वैश्वानरस्य सामानि यत्र वा एतैरशान्तैः स्तुवन्ति तत् प्रजा देवोघातुको भवत्यग्निमुपनिधाय स्तुवते स्वाया एव तद्देवतायाः साम्येक्षाय नमस्कृत्योद्गायति शान्तैः स्तुवन्ति ॥ ९ ॥

एतान्याज्यदोहानि अग्नेर्वैश्वानरस्य सम्बन्धीनि खलु अतो यत्र यत्र हि यज्ञे अशान्तैः सामभिः स्तुवन्ति तत्र तत्र देवोऽग्निः प्रजाघातुको हि प्रजाहिंसनशीलोभवति अतस्तत्परिहारायाग्नि

मुपनिधाय स्तुवते स्तुयुरित्यर्थः तत् किं ज्ञातं भवति तत्राह तथा सति स्वाया एव एतेषां साम्नां या देवता तस्या एव साम्यैत्वाय समदृष्टित्वाय नमस्कृत्योद्गायति तथा सति गान्तैरेव स्तुवन्ति कस्य स्तोत्रसमये कः पुनरग्निः कथं वा तस्य निधनमिति तत्सर्वं सूत्रकार आह आज्यदोहानामग्निमुपनिधाय स्तुवते होतुर्धिष्ण्येऽग्निं धारयेयुः प्रथमेऽहनि यन्माध्यन्दिन आनयेयुः प्रातःसवन उत्तरयोरह्नोः स्तोत्रवेलायामेनं प्रज्वलयेयुरिति आज्यदोहानामित्यादेरयमर्थः गर्गत्रिरात्रमग्निमुपनिधाय स्तुवत इति यत् तदेतदाज्यदोहानान्तदङ्गत्वेनाग्निनिधानमित्यर्थः होतुर्धिष्ण्य इति प्रथमेऽहनि अभवपवमाने कृतनिधनमाज्यदोहन्तस्य गानकाले होतुर्धिष्ण्ये अग्निं धारयेयुः यमग्निं माध्यन्दिन-पवमाने अग्नेनग्नेन्विहरेति प्रैषकाले होतुर्धिष्ण्ये आनयन्ति तमग्निन्तदा प्रभृत्याज्यदोहकालं यावद्धारयेयुरित्यर्थः प्रातः-सवन उत्तरयोरिति उत्तरयोरह्नोः प्रातःसवने यमग्निं धारयन्ति तन्माध्यन्दिनं पवमानं यावद्धारयेयुः तत्र स्थानत्वादाज्यदोहयोरिति त्रिष्वहःसु स्तुतिकालेऽग्निं प्रज्वलयेयुरिति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथ शबलीहोमं विधित्सुराह ।

वाग्वै शबली तस्यास्त्रिरात्रो वत्सस्त्रिरात्रो वा एतां प्रदापयति ॥ १ ॥

शबली कामधेनुः सा वाग्वै स्तुतिरूपभागाभिमानिदेवतैव तस्यायो गर्गत्रिरात्रः स एव वत्सस्थानीयः कथमिति तदुपपादयति एतां शबलीं त्रिरात्रः खलु प्रदापयति पयःस्थानीयंफलमिति शेषः तत् त्रिरात्रयाजिनायं होमः कर्त्तव्य इत्युक्तं भवति ॥ १ ॥

उक्तार्थवेदनं प्रशंसति ।

तद्य एवं वेद तस्मा एषा प्रत्ता दुग्धे ॥ २ ॥

यत् शबल्या वाग्रूपत्वं त्रिरात्रस्य वाग्रूपवत्सत्वं योवेद तस्मा एषा कामधुग्रूपा शबली अप्रत्ता स्वादुपायसादिप्रदाननिरपेक्षैव सती दुग्धेइति मतं फलं ॥ २ ॥

अथास्य फलमाह ।

योऽन्नमन्नाद्याय सन्नथान्नन्नाद्यात् ॥ ३ ॥

अन्नाद्यन्नाम पश्वाद्युपभोगः योविद्यातपोभ्यां सहस्रपोषार्होपि सहस्रं न प्राप्नोति स जुहुयादित्यर्थः । अत्र धानञ्जप्यः या वाग्वै शबली तस्यास्त्रिरात्रोवत्स इति श्रुतेः त्रिरात्रयाजिनएव सहस्रपोषका अस्यायं होम इति मन्यते, शाण्डिल्यस्तु प्रजापतिर्वा इदमेक आसीत्तस्य वागेव स्वमासीदित्यादिना त्रिरात्रस्य वत्सत्वं शबल्या मातृत्वं यत्पूर्वं दर्शितं तस्य विज्ञानप्रशंसार्थं वाग्वै शबलीतिश्रुतिः अतोऽधिकारवाक्ये विशेषाश्रवणाददृष्टत्रिरात्रस्यापि सहस्रपोषकार्योयं होम इत्याह, तथा च सूत्रं सहस्रपोषकामः शबलीहोमं कुर्व्वीत न त्रिरात्रयाजीति शाण्डिल्यस्त्रिरात्रो वा एतां प्रदापयतीति ह्याह यः कश्च सहस्र-

पोषकाम इति धानञ्जप्योऽयोऽलमन्नाद्याय मन्त्रशास्त्रकामाद्यादिति॥३॥

अथ शबलीहोमाङ्गं व्रतमाह।

वरासीं परिधाय तप्तं पिबन् द्वादशरात्रीरधः शयीत ॥ ४ ॥

अहतं वासो वरासी तप्तं क्षीरमिति शेषः अत्र सूत्रं वसन्ते प्रथमायां पूर्वपक्षस्य केशश्मश्रूणि वापयित्वाऽहतं वसनं परिधायानन्तर्हिते स्थण्डिले द्वादशरात्रीरधः शयीत तप्तं क्षीरम्पिबन्नित्याभ्याहितोस्याग्निरात्रमग्रे स्यान्नैनमन्यस्पृहेदः प्रेयं कुर्वान् प्रतिशेदल्पव्याहारी च स्यादिति प्रेषकृत् कर्म्मकरं मकृत् अल्पव्याहारी यावदर्थभाषी स्पष्टमन्यत् ॥ ४ ॥

अथ शबलीहोमस्तदाह्वानञ्चाह।

या द्वादशी स्यात्तस्या उपव्युषं शबलीहोमं हुत्वा पुरा वाग्भ्यः सम्प्रवदितोर्यत्र ग्राम्यस्य पशोर्नाशृणुयात्तदरण्यं परेत्य दर्भस्तम्बमालभ्य शबलि शबलीति त्रिराह्वयेद्यदन्यश्श्वनश्च गर्द्दभाच्च प्रतिवाश्यते सा समृद्धा ॥ ५ ॥

पूर्व्वमुक्तस्य द्वादशरात्रस्य यान्त्या रात्रिः स्यादत्र पूर्वकाले एव शबलीहोमं हुत्वा अनन्तरमेव वाक्सम्प्रदानात् पूर्वं यत्र ग्राम्यस्य पशोः ध्वनिर्न्न श्रूयते तदरण्यं उच्यते तत्परेत्य दर्भस्तम्बं सम्पृश्य शबलीति त्रिराह्वयेत् यदि पुनः गर्द्दभाच्चान्यः पशुः जात्या यः प्रतिवाश्यते प्रतिशब्दं करोति साह्वानं किल समृद्धेति जानीयात् ॥ ५ ॥

अथोक्तप्रतिवाग्मनाभावउपायमाह ॥

यदि न प्रतिवाश्येत संवत्सरे पुनराह्वयेत् ॥ ६ ॥

स्पष्टोऽर्थः । अत्र सूत्रम् द्वादश्या उपव्युषं परिसमुह्याग्निं परिस्तीर्य्यौदुम्बरइध्मः स्यात् स्रुक्स्रुवौ च तथा चमसस्तस्माद्दधि मधुसर्प्पिरिति स्रुवेण स्रुचि गृह्णीयाच्चतुर्गृहीतमष्टगृहीतं वा जुहुयाच्छबलि समुद्रोसीति स्वाहाकारेणोत्तरां स्रुचि यः शेषः स्यात्तं चमस आनीय प्राश्नीयात् प्रक्षाल्य स्रुक्स्रुवौ चमसञ्च निदध्यात्तवैवानुप्रहरेदिति शाण्डिल्यायनः प्राङ्गोदङ्ग्वा ग्रामान्निष्क्रम्य ग्राम्यस्य पशोर्न्नाशृणुयात्तदरण्यं परेत्य दर्भस्तम्बमालभ्य शबलि शबलीति त्रिः परमकष्टेन क्रोशेद्यदन्यङ्क्नोगर्द्दभोवा प्रतिवाश्येत समृद्धं कर्म्मेति विद्यादेवमान्ततीयं संवत्सराभ्यामप्रतिवाश्यमाने कुर्व्वीत प्रथमतश्चेत्तु श्वा गर्द्दभोवा प्रतिवाश्येत नपशूनामाशास्तीति विद्यादाद्वतीयं चाप्रतिवाश्यमाने शान्तिर्व्वामदेव्यमिति ॥ ६ ॥

अथ होममन्त्रमाह ॥

शबलि समुद्रोसि विश्वव्यचा ब्रह्म देवानां प्रथमजा ऋतस्यान्नमसि शुक्रमसि तेजोस्यमृतमसि तां त्वा विद्म शबलि दीद्यानान्तस्यास्ते पृथिवी पादोन्तरिक्षं पादो द्यौः पादः समुद्रः पाद एषासि शबलि तां त्वा विद्मसानइषमूर्जधुक्ष्व वसोर्द्धाराꣳशबलि प्रजानाꣳ श्रेष्ठा व्रतमनुगेषꣳ स्वाहा ॥ ७ ॥

हे शबलि विश्वव्यचा सर्व्वत्र व्याप्ता च समुद्रोसि समुद्रस्थानीया भवसि फलानां समुद्रवर्णसाधना भवसीत्यर्थः यद्वा वाग्वै शबलीत्युक्तत्वाद्वाग्वै समुद्र इति श्रुतेरतः समुद्ररूपत्वम् तथा ब्रह्म परिमूढासि देवानाम्मध्ये ऋतस्य सत्यभूतस्य ब्रह्मणः प्रथमजा प्रथमोत्पन्ना भवसि हिरण्यगर्भः समवर्त्तताग्रे इत्यादिश्रुतेः ब्रह्मणऋतस्य प्रथमजत्वं तस्य स्वभूतत्वादेवापि प्रथमजा इत्युच्यते किञ्च त्वं अन्नमसि धेनुरूपत्वात् शुक्रं दीप्तमसि अतएव तेजोसि अमृतमसि कदाचिदपि मरणरहितासि हे शबलि दोग्धानां द्योतमानान्त्वामुक्तमहिमोपेतां त्वा त्वां विजानीमस्त स्याउक्तरूपायास्ते पृथिव्यादिसमुद्रान्ताश्चत्वारः पादाः हे शबलि त्वं एषा निर्द्दिष्टप्रकारासीति तां तादृशीं विद्म वयं सा तादृशी त्वं नो अस्मभ्यं इषमन्नं ऊर्जञ्च धुक्ष्व किञ्च हे शबलि शचिष्ठा अतिशयेन शक्तिमती ह्यस्माकं प्रजानाञ्च सर्व्वेषु नो धारां धुक्ष्व अहं व्रतमनुगेषं अनुगच्छेयम् अस्य होमस्य कालं आपस्तंब आह उत्तमदक्षिणां नीत्वोदवंसाय वा शबलि समुद्रोसीत्युपक्रम्य शबलिहोमञ्जुहोतीति ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य तृतीयः खण्डः ॥

अथ चतुर्थः खण्डः ।

उक्तोगर्गत्रिरात्रः अथाश्वत्रिरात्रमाह ।

चतुष्टोमोग्निष्टोम एकविंशः उक्थ्यः सर्व्वस्तोमोतिरात्रः ॥ १ ॥

त्रिवृदादिचतुष्टोमोग्निष्टोमः प्रथममहरेकविंशस्तोमोपेतो द्वितीयमहः सर्व्वस्तोमकोतिरात्रः संस्थस्तृतीयमिति ॥ १ ॥

अथैतदश्वमेधत्रिरात्रं प्रजापतेरक्षिसमाधानत्वेन प्रशंसति।

प्रजापतेर्व्वा अक्ष्यश्वयत्तत्परापतत्तदश्वोऽभवत्तदश्वस्याश्वत्वं तद्देवा अश्वमेधेन प्रत्यदधुरेषवाव प्रजापतिं सर्व्वङ्करोति योश्वमेधेन यजते ॥ २ ॥

प्रजापतेर्ल्लोचनमक्षि अश्वयत् तदश्वोभवत् तदधः परापतत् पतितं तदक्षि अश्वत्वेन अरोचयत् तदश्वस्याश्वत्त्वं सम्पन्नम् तत् तमक्षि देवा अश्वमेधयागेन परिगणते अश्वेन यागं कृत्वा प्रत्यदधुः प्रतिसन्धानमकुर्व्वन् अश्वमेधेन यजते एष वाव प्रजापतिः सर्व्वं अन्यूनं सम्पूर्णं करोति ॥ २ ॥

पुनरप्यश्वमेधयाजिनः प्रशंसाद्वारा तत् प्रशंसति।

एष वाव सशरीरः सम्भवत्यमुष्मै लोकाय योश्वमेधो ॥ ३॥

योऽश्वमेधवान् अश्वमेधयाजो अस्ति एष अमुष्मै धर्म्माय लोकः सशरीरः शरीरसहितः सम्भवति ॥ ३ ॥

अथ प्रथमं चतुष्टोममहः प्रशंसति।

सरघा वा अश्वस्य सक्थ्या वृहत्तद्देवाश्चतुष्टोमेन प्रत्यदधुर्यच्चतुष्टोमो भवत्यश्वस्य सर्वत्वाय ॥ ४ ॥

सरघा मक्षिका क्रमशः अश्वस्य सक्थिप्रदेश आ वृहत् व्रणं चकारेत्यर्थः तद्देवाश्चतुष्टोमेन समदधुः यस्मादेवं तस्मादश्वस्य सर्वत्वाय सम्पूर्णतायै चतुष्टोमः कर्त्तव्यः ॥ ४ ॥

अथ प्रथमस्याह्नो बहिष्पवमानस्य प्रतिपत्तृचचतुष्टयं गायत्रीचतुष्टयं कर्त्तव्यमिति विधाय प्रशंसति ।

यत्तिस्रोनुष्टुभश्चतस्रो गायत्रीः करोति तस्मात्त्रिभिस्तिष्ठन् प्रतितिष्ठति सर्वान् पलायमानः प्रतिदधाति ॥ ५ ॥

पवस्व वाजसातय इति योयं प्रतिपत्तृचस्तस्य यास्तिस्रोनुष्टुभः स्तोत्रीयाः सन्ति ताः पादत्रयपरिगणनया चतस्रो गायत्रीः कुर्य्यात् यस्मात् प्रकृत्या तिस्रः अतस्त्रिभिः पादैस्तिष्ठन् प्रतितिष्ठति यस्माच्चतस्रो गायत्रीः तस्मात् सर्वान् चतुरः पादान् पलायमानः सन् प्रतिदधात्यश्वः यद्यप्यप्राशब्देन श्रूयते तथापि तैत्तिरीयके स्पष्टमाम्नातं पवस्व वाजसातय इति अनुष्टुप् प्रतिपद्भवति तिस्रोनुष्टुभश्चतस्रो गायत्र्यः यत्तिस्रोनुष्टुभस्तस्मादश्वस्त्रिभिस्तिष्ठति यच्चतस्रो गायत्र्यस्तस्मात् सर्वांश्चतुरः पादाः प्रतिदधत्पलायत इति ॥ ५ ॥

अथाश्वमनूद्यानुष्टुभां वैप्लवत्वं प्रशंसति ।

अन्तो वा अश्वः पशूनामन्तो नुष्टुप् छन्दसामन्तो विष्णुर्देवतानामन्तश्चतुष्टोमस्तोमानामन्तस्त्रिरात्रो यज्ञानां यदैष्णव्योनुष्टुभः प्रतिपदो भवन्ति चतुष्टोमस्तोमस्त्रिरात्रो यज्ञोन्त एव तदन्तं प्रतिष्ठापयति ॥ ६ ॥

अजादिपशूनाम्मध्ये अश्वस्यैवान्तत्वं अपशवोन्ये गोअश्वेभ्य इत्यादि श्रुतिषु प्रसिद्धं यद्वा प्रशस्तवीर्य्यत्वात् प्रजापतेरक्षि

रूपत्वाद्वा परमत्वं छन्दसां मध्येऽनुष्टुभः परमत्वं असकृद्मनं देवतानाम्मध्ये विष्णोरन्तत्वं अग्निर्देवतानामवमो विष्णुः परम इत्यादिश्रुतिषु प्रसिद्धं स्तोमानान्त्रिवृदादीनां मध्ये चतुष्टोम एवान्तः परमः प्रकृतिभूताग्निष्टोमगतत्वात् प्रजापतेः सकाशादुत्पन्नत्वाच्च यज्ञानां मध्ये त्रिरात्रोन्तः ब्रह्महत्याश्वमेधाभ्यां नापरं पुण्यपापयोरितिवदन्ति यद्वा त्रयो वा एते त्रिरात्रा यदेष द्वादशाह इति द्वादशाहस्यापि त्रिरात्रत्वेन प्रशंसा दर्शनात्त्रिरात्रस्यान्तत्वमवगन्तव्यं एवं सति यद्यनुष्टुभस्त्रिस्रोविष्णव्यः प्रतिपदो भवन्ति चतुष्टोमस्तोमस्त्रिरात्रो यज्ञश्चोभावन्तभूतौ तत् तथा सति अन्तत एव अन्तर्भूतेष्वेष्वश्वादिषु अन्तभूतं विष्णुं प्रतिष्ठापितवान् भवति ॥ ६ ॥

अथ मध्यममेकविंशमहरनूद्य प्रशंसति ।

एकविंशमहर्भवति यस्मिन्नश्व आलभ्यत एकविंशो वा इतोसावादित्यो द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविंश आदित्यस्यैवैनं मात्राङ्गमयति ॥७॥

यस्मिन् द्वितीयेहनि अश्व आलभ्यते तदहरेकविंशस्तोमकं भवति इतः पृथिवीमारभ्य द्वादशमासादिगणनया आदित्योप्येकविंशः तथा सति मध्यममहरेकविंशस्तोमन्तत् यज्ञं आदित्यस्यैव मात्रां परिमाणं गमयति ॥ ७ ॥

अथ मध्यमस्याह्नः पृष्ठमाह ।

तस्य महानाम्न्यः पृष्ठं भवन्ति ॥ ८ ॥

महानाम्न्यः शक्कर्य्यः शाक्वरं पृष्ठं भवतीत्यर्थः तथाचापस्तम्बः त्रयाणामह्नां पृष्ठान्यहरन्यतरं महानाम्नो बृहदिति पृष्ठानीति ॥ ८ ॥

तत्रायं देवानां छन्दः प्रशंसति ।

अन्यदन्यद्वा एताश्छन्दोन्योन्य एते पशव आलभ्यन्त एता वा एतं समाप्नुवन्ति यन्महानाम्न्यः पृष्ठं भवन्त्यश्वस्य सर्वत्वाय ॥ ९ ॥

एताः महानाम्न्यः ऋचः अन्यदन्यच्छन्दोवै विच्छन्दस्का इत्यर्थः तथा हि अनुष्टुप् गायत्री द्विपदादिपदे नानाच्छन्दस्का प्रचेतनप्रचेतयेति निर्वहन्तीत्यर्थः अनुष्टुप् विकित्वो अभिनोनयेति गायत्रीविद्वा मघवन्निति द्विपदा एवं सर्वेष्वपि द्रष्टव्यं अथात्र अन्योन्येनानाविधा एते पशव आलभ्यते तथाह्यापस्तम्बः अश्वेन सार्द्धमुपाकरणमाह प्रचगाखान्तरितान् पशून् स्वपर्थ्यग्यानाग्नेयं कृष्णग्रीवं पुरस्ताल्ललाटे पौष्णमनं च मैत्रापौष्णमुपरिष्टाग्नीवास्याग्नेयौ कृष्णग्रीवौ बाह्वोपिस्थानेपि पशुः अश्वरूपः गौरोमृग इत्यादयो नानापशुकथन शक्करीछन्दो नानार्थप्रशंसार्थं एताः खलु महानाम्न्यास्त्रिरात्रं समाप्नुवन्ति निर्वहन्तीत्यर्थः अतो महानाम्न्यः पृष्ठं भवन्तीति यत् तदश्वस्य सर्वत्वाय सम्पूर्णत्वाय भवति ॥ ९ ॥

अथास्य ब्रह्मसाम विधत्ते ।

पार्थुरश्मं ब्रह्मसाम भवति ॥ १० ॥

ब्रह्मसाम ब्राह्मणाच्छंसिनः साम पार्थुरश्मं पृथुरश्मिना दृष्टं साम कार्य्यं ॥ १० ॥

एतत् सामास्याङ्गोचितमिति प्रशंसति।

ईश्वरा वा एषो यतोधृतः परामपरावतमेतो रश्मिना वा अश्वोधृतो यत्पार्थुरश्मं ब्रह्मसाम भवत्यश्वस्यैव यत्यै ॥११॥

यतो नियमितो यज्ञार्थं अधृतः पाशादिभिरधार्य्यमाणोऽश्वः परामपरावत अत्यन्तदूरदेशं गन्तुं तूर्णं पलायितुमीश्वरो वै समर्थः खलु केन रश्मिना प्रग्रहेण खल्वश्वोधृतो भवति तथा सति यत्पार्थुरश्मं ब्रह्मसाम भवति तदश्वस्यैव यत्यै नियमनाय भवति पार्थुरश्मशब्देन रश्मिरूपोऽर्थः स्तूयते तच्छब्दसाम्येन स्तुतिरिति द्रष्टव्या ॥ ११ ॥

अथ सर्वस्तोमोतिरात्रं स्तौति।

सर्वस्तोमोतिरात्रो भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयति ॥ १२ ॥

सर्वस्तोमोतिरात्रः सर्वस्याप्त्यै प्रापणाय सर्वस्य जित्यै जयाय सर्वं एतेनाप्नोति ॥ १२ ॥

अथ यूपविषये किञ्चिदाह।

एकयूपोवैकादशिनी वान्येषां यज्ञानां भवत्येकविंशिन्यश्वमेधस्य खादिरो वा बैल्वो वा पार्णवान्येषां यज्ञानां

भवति नैचुदार एकविंशत्यरत्निरश्वमेधस्य नान्येषां पशूनान्तेदन्या अवद्यन्त्यवद्यन्त्यश्वमेधस्य दक्षिणतोऽन्येषां पशूनामवद्यन्त्युत्तरतोऽश्वमेधस्य प्लक्षशाखास्वन्येषां पशूनामवद्यन्ति वेतसशाखास्वश्वमेधस्य ये ग्राम्यान्पशून्नियुञ्जन्त्यारोकेष्वारण्या धारयन्त्या ग्राम्यान्पशून् लभन्ते प्रारण्या सृजन्ति* ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

अथ वेदत्रिरात्रमाह।

त्रयस्त्रिवृतोऽतिरात्राः सर्व्वे षोड़शिमन्तः ॥ १ ॥

त्रीण्यहानि त्रिवृतस्तोमकानि सषोड़शिकान्यतिरात्रसंस्थानि ॥ १ ॥

अथास्याधिकारिणमाह।

यो राज्यमाशंसेत स एतेन यजेत ॥ २ ॥

राज्ये राज्यविषये आशंसेत इच्छति स राजा एतेन यजेत स्वाराज्यफलमित्युक्तं भवति अत्रापस्तम्बः वेदत्रिरात्रेण स्वाराज्यकामस्त्रयस्त्रिवृतोऽतिरात्राः षोड़शिमन्तो रथन्तरं वामदेव्यं बृहत् पृष्ठानीति ॥ २ ॥

* अस्य टीका पुस्तकद्वयेऽपि नास्ति।

अस्य त्रिरात्रस्य यत् त्रिवृत्स्तोमत्वं तत्र राज्यफलसंयुक्तं प्रशंसति।

राजा वा एष स्तोमानाᳬराज्यमेवास्मिन्दधाति ॥ ३ ॥

एषत्रिवृत्स्तोमः स्तोमानाम्मध्ये राजा सर्व्वेषां प्राथम्यात् अतस्तत्प्रयोगादस्मिन् यजमाने राज्यमेवाभिलषितं दधाति ॥३॥

अथ प्रथमस्याह्न आर्भवान्ते यदाक्षारं सामास्ति तत् प्रशंसति।

यदाक्षाराणि प्रथममहर्भजन्त एकाक्षरा वै वाग्वाचो-नतिवादाय ॥ ४ ॥

स्तोत्रीयापेक्षया अक्षाराणीति बहुवचनं पवतेहर्य्यतोहरि रित्यत्राक्षार एकाक्षरणिधनं वागपि हलपरित्यागे सत्येकाक्षरा खलु स एवन्तन्निधनं सर्व्वस्यावाचोनतिवादाय साम्याय भवति यद्यपि कल्पकारेण आक्षारं साम नादिष्टं सामान्तरं प्रथमेनाह्ना गर्गत्रिरात्रस्यातिदेशादुक्तमेव तत् ॥ ४ ॥

अथ प्रथमेह्नि तृतीयसवने पदनिधनमाज्यदोहमन्य प्रशंसति।

अथ यत् द्व्यक्षरणिधनमाज्यदोहं भवत्युत्तरयोरह्नोरभि सन्तत्या अन्वहमाज्यदोहानि भवन्त्यन्वहमेवैनं पशुभिः सम्भर्द्धयन्ति ॥ ५ ॥

प्रथमं आज्यदोहे ऋतमिति द्व्यक्षरणिधनमस्ति अतस्तदुक्त

सामप्रयोगे उत्तरयोर्द्वयोरह्नोः सन्तत्यै अविच्छिन्नाय भवति उभयत्र द्वित्वसाम्यादित्यभिप्रायः ॥ ५ ॥

अथोक्तमाज्यदोहमतियुक्त्या विष्वहःसु विधाय प्रशंसति ।

सर्व्वे षोड़शिमन्तो भवन्तीन्द्रियं वीर्य्यꣳ षोड़शीन्द्रियेणैवैनान्वीर्य्येण समर्द्धयति ॥ ६ ॥

सर्व्वेऽतिरात्रा इति शेषः इन्द्रियमित्यस्य व्याख्यानं वीर्य्यमिति अतिरात्राणां वीर्य्यैः समर्थनन्नाम फलजनकत्वलक्षणसामर्थ्यसम्पादनम् अथ प्रसामासोविपश्चित इति गायत्रमेकस्यां साम्नमेकस्याञ्चराबोधीयमेकस्यां प्रसोमदेववीतय इति पौंगवमेकस्यामित्यादिकः कल्पोद्रष्टव्यः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

अथ छन्दोमपवमानाख्यं पशुफलसाधनं चतुर्थं त्रिरात्रमाह ।

चतुर्विꣳशाः पवमानास्त्रिवृन्त्याज्यानि पञ्चदशानि पृष्ठानि सप्तदशोग्निष्टोमश्चतुश्चत्वारिꣳशाः पवमानाः पञ्चदशान्याज्यानि सप्तदशानि पृष्ठान्येकविꣳशोग्निष्टोमः सोक्थोष्टाचत्वारिꣳशाः पवमानाएकविꣳशान्याज्यानि त्रिणवानि पृष्ठानि त्रयस्त्रिꣳशोग्निष्टोमएकविꣳशान्युक्थानि सषोड़शिकानि पञ्चदशी रात्रिस्त्रिवृन्सन्धिश्छन्दोमपवमानः ॥१॥

पृष्ठस्तोमः क्लृप्तः गायत्रीत्रिष्टुप्जगतीनामक्षरसंख्याभिर्मिलित्वा चतुर्विंशाद्यास्त्रयश्छन्दोमास्तेषु त्रयः पवमाना भवन्तीति छन्दोमपवमानो यन्त्रिरात्रः॥ १ ॥

अथास्याधिकारिणमाह॥

पशुकामो यजेत॥ २॥

स्पष्टोऽर्थः। २।

अथ छन्दोमपवमानान्तं पशुसाधनमिति प्रशंसति

पशवो वै छन्दोमा यच्छन्दोमाः पवमाना भवन्ति पशून् वावरुन्धे॥ ३॥

स्पष्टं॥ ३॥

उभये स्तोमा युग्मन्तश्चायुजश्च तत् मिथुनं तस्मात् मिथुनात्प्रजायते॥ ४॥

अहस्त्रयगतं पवमानान्तत्वात् युक्संख्यमितरस्तोत्रगत युग्मसंख्याकास्तोमा इत्यर्थः अयुजः स्तोमाः तत्र युग्मन्तु पुंसो रू अयुग्मं स्त्रियाः तद्द्वयम् मिथुनं तस्मात् मिथुनाद्यजमानः प्रजाय अत्र साम्वत्सरिकस्य विषुवतो बहिष्पवमानमुभौ पर्य्यामाविल्या दिकः कल्पो द्रष्टव्यः॥ ४॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य

षष्ठः खण्डः॥

अथ सप्तमः खण्डः।

अथ तुर्व्वसुनामानं पशुसाधनं पञ्चमन्त्रिरात्रमाह।

त्रिवृत्प्रातःसवनं पञ्चदशम्माध्यन्दिनꣳ सवनं सप्तदशं तृतीयसवनं चतुर्विꣳशं प्रातःसवनं चतुश्चत्वारिꣳशम्माध्यन्दिनꣳ सवनमष्टाचत्त्वारिꣳशं तृतीयसवनꣳ सोक्थमेकविꣳशं प्रातः सवनं त्रिणवम्माध्यन्दिनꣳ सवनं त्रयस्त्रिꣳशं तृतीयसवनꣳ सोक्थमेकविꣳशः षोड़शी पञ्चदशी रात्रिस्त्रिवृत् सन्धिरन्तर्वसुः ॥ १ ॥

अत्र त्रीण्यहानि क्रमेणाग्निष्टोमोक्थ्यातिरात्रसंस्थानि रथन्तरं वामदेव्यं बृहदिति क्रमेण पृष्ठानि स्तोमाः स्पष्टाः अष्टाचत्वारिंशं तृतीयसवनं सोक्थमिति उक्थान्यपि अष्टाचत्वारिंशस्तोमकानीत्यर्थः त्रयस्त्रिंशं तृतीयसवनं सोक्थमप्यत्राप्युक्थान्यपि त्रयस्त्रिंशस्तोमकानीत्युक्तं भवति छन्दोमानां पशुरूपत्वसाधनस्य मध्यमेऽहनि सम्भवादेवं त्रिरात्रोऽन्तर्व्वसुरित्युच्यते ॥ १ ॥

छन्दोमानां मध्यमाहर्भाक्त्वं प्रशंसितुमस्य त्रिरात्रस्य लोकत्रयात्मकत्वमाह।

इमे लोकास्त्रिरात्रः ॥ २ ॥

इमे लोकास्त्रिरात्रातिक्रमेण त्रीण्यहानि भूरादिलोकत्रयात्मानीत्यर्थः ॥ २ ॥

त्रिरात्रस्वरूपप्रतिपादनाय स्वरूपमाह।

अस्तीव वा अयं लोकोऽस्तीवासौ छिद्रमिवान्तरिक्षं॥३॥

भूलोकस्यास्तित्वं सिद्धं स्वर्गस्यापि ग्रहनक्षत्रताराधिष्ठानत्वेन तदर्थं ज्योतिष्टोमादिभिः प्रयतमानत्वेन चास्तित्वं मध्यमं त्वन्तरिक्षं छिद्रमिव निराश्रयमिवामूर्त्तत्वात् अस्त्वेव ॥ ३ ॥

कथमेतदह्नां लोकसाम्यमित्याह ।

अस्तीव त्रिरात्रस्य प्रथममहरस्तीवोत्तमं छिद्रमिव मध्यतः ॥ ४ ॥

अह्नां त्रयाद्यात्मकत्वोपन्यासान्मध्यमस्याह्नोऽन्तरिक्षस्थानीयत्वेन छिद्रत्वं ॥ ४ ॥

तस्य कः परिहार इति तत्राह ।

पशवो वै छन्दोमायच्छन्दोमामध्यतो भवन्त्यपिहित्या एवाच्छिद्रतायै ॥ ५ ॥

छन्दांसि पशुष्वाजिमयुस्तान् बृहत्युदजयतीति श्रुतेर्बृहती द्वारा च्छन्दांसि पशवः स्तोमनिर्म्मितत्वात् छन्दोमा अपि पशवः पशूनां जीवनं छिद्रकर्म्मसाधनं प्रसिद्धं अतो यच्छन्दोमामध्यतो मध्यमेऽहनि भवन्ति तदपिहित्यै अपिधानाय तच्चापिधानं अच्छिद्रतायै सम्पूर्णत्वाय भवति ये गर्गत्रिरात्रस्य प्रथमोत्तमे अहनी ते अन्तर्वंसीरुपीषु जातमप्सरमित्यादिकल्पो द्रष्टव्यः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

अथ पराकाख्यं स्वर्गसाधनं षष्ठं त्रिरात्रमाह ।

त्रिवृत् प्रातःसवनं पञ्चदशं माध्यन्दिनꣳ सवनꣳ सप्तदशं तृतीयसवनं एकविꣳशं प्रातःसवनं त्रिणवम्माध्यन्दिनꣳ सवनं त्रयस्त्रिꣳशं तृतीयसवनꣳ सोक्थं चतुर्विꣳशं प्रातः सवनं चतुश्चत्वारिꣳशम्माध्यन्दिनꣳ सवनमष्टाचत्वारिꣳशं तृतीयसवनꣳ सोक्थमेकविꣳशः षोडशी पञ्चदशो रात्रिस्त्रिवृत्सन्धिः पराकः ॥ १ ॥

स्तोमक्रमेण प्रागुपर्युपर्य्यारोहणादयं त्रिरात्रः पराक इत्युच्यते ॥ १ ॥

अत्राधिकारिणमाह ।

पराकेण वै देवाः स्वर्गं लोकमायन् स्वर्गकामो यजेत पराङ्वैतेन स्वर्गं लोकमाक्रमते ॥ २ ॥

यत् स्तोमाः पराञ्चः सन्ति एतदनुष्ठातापि पराङेव स्वर्गमाक्रमते ॥ २ ॥

अथ त्रिरात्रनामनिर्व्वचनेन प्रशंसति ।

यद्वा एतस्याकन्तदस्य पराक् तत् पराकस्य पराकत्वम् ॥ ३ ॥

यदेवतस्य भूर्लोकस्य तत्स्थस्य पुरुषस्य अकन्दुःखन्तदस्य स्वर्गस्य तत्प्राप्तवतः पुरुषस्य पराक्तं न्यग्भूतं भवति पराग्भूतमकन्दुःखं त्रिरात्रेण भवति परागित्युत्पत्तिः ॥ ३ ॥

न वै तत्र जग्मुषे किञ्चनाकं ॥ ४ ॥

तं स्वर्गं प्राप्तवते पुरुषाय किञ्चन अकन्दुःखं नैव खलु ॥ ४ ॥

अथोक्तार्थवेदनफलमाह ।

नास्मा अकम्भवति य एवं वेद ॥ ५ ॥

स्पष्टं । ५ ॥

अथ तस्य षोडशिन एकविंशस्तोमस्य तत्परिहारार्थं रात्रिपर्य्यायसन्धिस्तोत्राणां पञ्चदशी रात्रिस्त्रिवृत्स्तोमकत्वमिति प्रशंसति ।

प्रजायास्त्वक्रमः पराङ् ह्येवैतेन स्वर्गं लोकमाक्रमते तद्यदेकविंशः षोडशी भवति पञ्चदशी रात्रिस्त्रिवृत्सन्धिस्तेनास्मिन् लोके प्रतितिष्ठति ॥ ६ ॥

तत् तत्र तृतीयेऽहनि षोडशी एकविंशस्तोमकोभवति तुशब्दो विशेषोस्तीति द्योतनार्थः षोडशिनामेकविंशं कुर्वन् यजमानः प्रजायाः सकाशादक्रमः सन्प्रजाभिः सहेहस्थितिं चिरकालमलभमान एव एतेन एकविंशकरणेन पराङ्ह्येवाभिमुखमेव स्वर्गमाक्रमते अतस्तत्परिहाराय यदि रात्रिः पञ्चदशी स्यात् सन्धिः सन्धिसाम त्रिवृत्स्तोमकं स्यात् तद्यथानु-

ष्ठातास्मिन् लोके प्रतितिष्ठति प्रजादिभिः सह अयमर्थः अपरावृत्तैः स्तोमैरनुष्ठानात्पराङेव स्वर्गमाप्नोति अतोऽन्ते परावृत्तिरूपाभ्यां ताभ्यामेव पञ्चदशत्रिवृद्भ्यां समापनेन इहलोके चिरकालं पुत्रादिभोगमनुभूय पश्चात् स्वर्गमाप्नोतीत्यर्थः अत्र कल्पः, वात्सवंसोः प्रथमा सास्य पराकस्य तृचासोममधुमां असोत्यादिकः कल्पोद्रष्टव्यः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य अष्टमः खण्डः ।

अथ नवमः खण्डः ।

उक्ताः षट्त्रिरात्राः अथ चतूरात्राश्चत्वार उच्यन्ते तत्र प्रथमं चतुर्वीराख्यं वीरोत्पत्तिसाधनं चतूरात्रमाह ।

चतुर्विꣳशाः पवमानास्त्रिवृत्याज्यानि पञ्चदशानि पृष्ठानि सप्तदशोऽग्निष्टोमश्चतुर्विꣳशाः पवमानाः पञ्चदशान्याज्यानि सप्तदशानि पृष्ठान्येकविꣳशोऽग्निष्टोमः सोक्थश्चतुर्विꣳशाः पवमानाः सप्तदशान्याज्यान्येकविꣳशानि पृष्ठानि त्रिणवोऽग्निष्टोमः सोक्थश्चतुर्विꣳशाः पवमाना एकविꣳशान्याज्यानि त्रिणवानि पृष्ठानि त्रयस्त्रिꣳशोऽग्निष्टोम एकविꣳशान्युक्थानि सषोडशिकानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

आद्यमग्निष्टोमसंस्थं द्वितीयं तृतीयमुक्थसंस्थं चतुर्थमति रात्रसंस्थं सर्वत्र पवमानाश्चतुर्विंशाः त्रिष्वहःसु पवमानव्यतिरिक्तेषु त्रिवृदादिक्रमेण एकैकस्तोमपरित्यागेनाज्यादीनि कल्पनीयानि प्रथमेऽहनि त्रिवृदाद्यास्त्रय आज्यपृष्ठान्येषु द्वितीये पञ्चदशाद्यास्त्रयः तृतीये सप्तदशाद्याः उभयत्राग्निष्टोमस्तोमक उक्थ्योपि तत्स्तोमक एव चतुर्थः एकविंशाद्यास्त्रयः रात्रिसन्धि प्रकृतवत् पञ्चदश त्रिवृतौ ॥ १ ॥

अथास्य प्रयोगकर्तावीरसाधनत्वमाह ।

अत्रिरकामयत चत्वारो मे वीरा आजायेरन्निति स एतमपश्यत्तस्य चत्वारोवीरा आजायन्तास्य चत्वारोवीरा जायन्ते य एवं वेद ॥ २ ॥

अपश्यद्दिष्टौ अन्वतिष्ठदित्यर्थः ॥ २ ॥

तत् प्रशंसति ।

एकꣳस्तोममुत्सृज्यैकमभ्यारभते वीरजननं वै स्तोमो वीरमेवास्मै तत् प्रजनयति ॥ ३ ॥

स्तोमं स्तोमप्रयोगोवीरजननं वै वीरोत्पादनमेवमेतदुत्तरोत्तरादतः पूर्वस्माच्च वीरलक्षणं वीरोत्पत्त्यर्थो भवति ते च वीराः तैत्तिरीये दर्शिताः य एवं विद्वांश्चतूरात्रेण यजत अस्य चत्वारो वीराजायन्ते ॥ ३ ॥

अथ पवमानस्य चतुर्विंशं प्रशंसति ।

चतुर्व्विंशाः पवमाना भवन्ति चतुर्व्विंशत्यक्षरा गायत्री प्रजननं गायत्री प्रजात्यै ॥ ४ ॥

सर्वेष्वहःसु पवमानाश्चतुर्विंशाभवेयुः तेन गायत्रापि चतुर्विंशत्यक्षरा साच प्रजननसाधना अतो गायत्रीसंख्यासह स्तोमावोराणां प्रजननाय भवन्ति ॥ ४ ॥

अत्रास्मिन् त्र्यहःसमानगतं युग्मस्तोमकत्वं यच्च स्तोत्रगतमयुग्मस्तोमकत्वं तदुभयं प्रजननसाधनमिति प्रशंसति।

उभये स्तोमायुग्मन्तश्चायुजश्च तन्मिथुन तस्मान्मिथुनात् प्रजायते ॥ ५ ॥

स्पष्टं ॥ ५ ॥

चतुर्णामह्नां संस्थानं विदधाति।

अग्निष्टोमः प्रथममहरुक्थो द्वितीयः षोडशी तृतीयमतिरात्रश्चतुर्थन्नानावीर्य्यतायै ॥ ६ ॥

पुरुषाणां नानावीर्य्यलाभाय अहान्यपि नानावीर्य्याणि कर्त्तव्याणि ॥ ६ ॥

उक्तक्रमानुष्ठानवतो यजमानस्य नानावीर्य्यतां कथं तत्राह।

नानावीर्य्याण्यहानि करोति ॥ ७ ॥

यतोऽयं संस्थानानात्वेनाहान्यपि नानावीर्य्याणि करोति अतो नानावीर्य्यत्वमपि सिद्धमिति ॥ ७ ॥

मानान्तरप्रसिद्धा षोडशी तृतीयमिति यदुक्तं तन्निराकर्तुं प्रसिद्धानामह्नां स्थितिमनुवदति ।

गायत्रं वै प्रथममहस्त्रैष्टुभं द्वितीयं जागतं तृतीयमानुष्टुभं चतुर्थं ॥ ८ ॥

स्पष्टोऽर्थः । ८ ।

इदानीं तृतीयेऽहनि षोडशिनिराकरणविषयं ब्रह्मवादिनः प्रश्नमवतारयति ।

तदाहुर्यत् तृतीयेऽहनि षोडशिनं गृह्णीयुस्तृतीयेनाह्नानुष्टुभमाप्नुयुरच्छन्दश्चतुर्थमहः स्यादानुष्टुभो वै षोडशीति ॥ ९ ॥

तत्र षोडशिविषये ब्रह्मवादिन आहुः किमिति यद्यदि तृतीयेऽहनि षोडशिनं गृह्णीयुः तदानीं तृतीयेनाह्नानुष्टुभमेवाप्नुयुः प्राप्ता भवेयुः अस्तु नाम तथा किं छिद्रमिति तत्राह चतुर्थमहरच्छन्दः छन्दोविरहितं स्यात् कुर्वन्ति तत्राह यत् षोडशिनमहस्तिस्रः षोडश्यनुष्टुभोवे अनुष्टुप्छन्दःसम्बन्धो खलु षोडशिसंस्थायां ग्रहणायोक्तस्याग्निष्टोमोक्थादिक्रमेण चतुर्थत्वात् षोडशिनाम्नः षोडशिग्रहाङ्गत्वात् तस्य च प्रकृतत्वात्तदेवाच्छिद्रमिति वेदितव्यम् इतिशब्दस्तेषामाक्षेपसमाप्तिद्योतनार्थः ॥ ९ ॥

अथ तत्परिहारलक्षणं सिद्धान्तमाह ।

चतुर्थेऽहनि षोडशी ग्रहीतव्यः स्वयायतने षोडशी गृह्यते ॥ १० ॥

यत्र हि षोडशी गृह्यते तत्रैव षोडशी क्रियत इत्यर्थः ॥ १० ॥

कथं मध्यमयोरह्नोरुक्थ्येम नानावीर्य्याण्यहानि क्रियते तदाह ।

छन्दोभिरहानि नानावीर्य्याणि करोति ॥ ११ ॥

यथाभिहितं उक्थसंस्थं क्व भविष्यत्यस्मिन् पक्षे तथापि छन्दसां पृथक् पृथक्सम्पादनात्तेस्तानि विलक्षणवीर्य्याणि कृतवान् भवति ॥ ११ ॥

अथ चतुर्व्वहःसु माध्यन्दिनसवने क्रमेण ब्रह्मसाम विदधाति ।

नौधसं प्रथमस्याह्नोब्रह्मसाम श्यैतं द्वितीयस्य आयन्तीयं तृतीयस्य त्रैशोकश्चतुर्थस्य ॥ १२ ॥

स्पष्टं ॥ १२ ॥

अनुष्टुप्सम्बन्धिनः षोड़शिग्रहस्य चतुर्थेऽहनि कर्त्तव्यविधानाज्जागतं तृतीयमहरानुष्टुभं चतुर्थमहरिति स्थितं तत्र ब्रह्मवादिनामाक्षेपमवतारयति ।

तदाहुरपभ्रंश इव वा एष यत् ज्यायसः छन्दोधिकनीयश्छन्द उपैतीति ॥ १३ ॥

तृतीयस्याह्नोजागतत्वाच्चतुर्थस्यानुष्टुभत्वात् ज्यायसश्छन्दसोनन्तरं कनीयश्छन्द उपक्रान्तः भवति तथापगतछन्दोनुक्रमः स्यात् ॥ १३ ॥

तत्र परिहारमाह ।

तद्यदेषा चतुर्थेहन्यतिजगती क्रियतेऽनपभ्रंशाय ॥ १४ ॥

वैशीकस्य विश्वाः पृतनाइत्येषा सावतिजगती अतः छन्दसोवरोहग्रहणादपभ्रंशदोषोनास्ति ॥ १४ ॥

अथ चतुर्थमहःसु अच्छावाकसाम विदधाति ।

कालेयं प्रथमस्याह्नोच्छावाकसाम माधुच्छन्दसं द्वितीयस्य रौरवं तृतीयस्य समन्तं चतुर्थस्य नानावीर्यतायै नानावीर्य्याण्यहानि करोति ॥ १५ ॥

स्वर्गस्य विलक्षणवीर्य्यपुत्रलाभाय प्रत्यहमच्छावाकसाम्नः पृथक्करणं तेन तदर्थान्यहान्यपि नानावीर्य्याणि कृतवान् भवति चतुर्णामह्नां ब्रह्मसामान्यच्छावाकसामानि च विहितान्यथ होतुः पृष्ठानि मैत्रावरुणसामानि विधातव्यानि तत्र प्रथमद्वितीययोर्होतृरथन्तरबृहत्पृष्ठेस्वेव एवमप्यह्नोवामदेव्यमैत्रावरुणसामस्वास्वेव ॥ १५ ॥

अथोत्तरयोरह्नोर्होतुःपृष्टं मैत्रावरुणसाम च विदधाति ।

अभित्वावृषभासुत इति तृतीयस्याह्नोरथन्तरं कस्तमिन्द्रत्वावसविति वामदेव्यं यज्ञा यथा अपूर्वेति चतुर्थ

ग्राह्णो बृहद्वेदुमधोम्नदिन्तरमिति वामदेव्यं छन्दसां नानावीर्यतायै नानावीर्याण्यहानि करोति ॥ १६ ॥

अभित्वावृषभासुतइति गायत्री तृतीयस्याह्नोरथन्तरं होतुः पृष्ठम् कस्तमिन्द्रेति बृहती प्रगाथेषु वामदेव्यं मैत्रावरुणपृष्ठं त्यायथेत्यनुष्टुप् बृहत् होतुः पृष्ठम् एदुमधोःमदिन्त्रिष्टुप्क्वामदेव्यं मैत्रावरुणं साम नानावीर्यतायाइति पञ्चम्यर्थे चतुर्थी छन्दसां लक्षणे नानावीर्यत्वादहान्यपि नानावीर्याणि उपास्मै गायतानरोवभ्रवेनुस्वतवसे प्रयद्वावोन भूर्णय आशुरर्षबृहन्मत इत्यादिकञ्चोद्रष्टव्यः ॥ १६ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ द्वितीयं जमदग्नेश्चतूरात्रमाह तत्र प्रथमस्याह्नः क्लृप्तिमाह ॥

त्रिवृत्पञ्चदशोग्निष्टोमः प्रथममहः ॥ १ ॥

अग्निष्टोमसंस्थम् तस्य त्रिवृत्पञ्चदशौ स्तोमौ व्यत्यासेन स्याताम् आद्यानि स्तोत्राणि त्रिवृन्ति अन्यानि पञ्चदशानीति विभागः ॥ १ ॥

अथ द्वितीयस्याह्नमाह ।

अथोत्तरस्याह्नश्चतुर्वि॑ꣳशं बहिष्पवमानं पञ्चदशानि त्रीण्याज्यानि सप्तदशमच्छावाकस्यैकवि॑ꣳशो माध्यन्दिनः पवमानः सप्तदशे द्वे पृष्ठे एकवि॑ꣳशं तृतीयसवनꣳ सोक्थं ॥२॥

द्वितीयस्याह्नः स्तोत्रमुखं चतुर्विंशस्तोमकं तत आज्यानि त्रीणि पञ्चदशानि चतुर्थमच्छावाकस्याज्यं सप्तदशम्माध्यन्दिन-सवनेकविंशः पवमानः होतामित्रावरुणयोः पृष्ठे द्वे सप्तदशे ब्राह्मणाच्छंस्यच्छावाकयोरेकविंशे द्वे पृष्ठे उक्थसहितं तृतीयसवनं सर्वमप्येकविंशस्तोमकं ॥ २ ॥

अथ तृतीयस्याह्न आह ।

तृतीयस्याह्न एकवि॑ꣳशं बहिष्पवमानं त्रीणि चाज्यानि पञ्चदशमच्छावाकस्य चतुर्वि॑ꣳशो माध्यन्दिनः पवमान एकवि॑ꣳशानि पृष्ठानि त्रिणवं तृतीयसवनं द्वे चोक्थे एव वि॑ꣳशमच्छावाकस्य ॥ ३ ॥

तृतीयस्याह्नः आज्यत्रयबहिष्पवमानत्वं च एकविंशस्तोमकं चतुर्थमाज्यं पञ्चदशं माध्यन्दिनं सवनं पवमानपृष्ठानि च क्रमेण चतुर्विंश एकविंशानि तृतीयसवनं सर्व्वमपि त्रिणवं मैत्रावरुणब्राह्मणाच्छंसिन उक्थे द्वे अपि त्रिणवे अच्छावाकीयं तूक्थमेकविंशं ॥ ३ ॥

अथ चतुर्थस्याह्न आह ।

चतुर्थस्याह्नश्चतुर्विꣳशाः पवमानाः पञ्चदशꣳ होतुराज्यꣳ सप्तदशानि चोण्येकविꣳशानि पृष्ठानि त्रयस्त्रिꣳशोऽग्निष्टोम एकविꣳशोक्थानि स षोडशिकानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ ४ ॥

स्पष्टं । ४ ।

अथास्य पुष्टिलक्षणं फलं सप्रपञ्चमाह ।

जमदग्निः पुष्टिकाम एतमाहरत्स इमान्पोषानपुष्यत् ॥ ५ ॥

पूर्वं जमदग्निः पुष्टिकामस्तदर्थमेतं चतूरात्रमाहरत् स इमान् लोके प्रसिद्धान् पशुपुत्रादिलक्षणान् पोषान् अपुष्यत् प्राप्नोत् ॥ ५ ॥

अथ यान् पोषानपुष्यत्तेन सन्तानमाशिनः आमन्त्रित्याह ।

यदिदमाहुर्नवा ऊर्वोपल्नितौ सं जानाते इति ॥ ६ ॥

यदिदमाहुर्लौकिका ऊर्वौ उर्वपुत्रौ जामदग्न्यौ पलितौ सन्तौ नसंजानाते ॥ ६ ॥

इदानीं तत्प्रति तस्यार्थे तदनुष्ठातुस्तद्वाक्यं भवतीत्याह ।

तत्सर्वानेवैतेन पोषान् पुष्यति ॥ ७ ॥

एतेन चतूरात्रेण एतान् सर्वान् जमदग्नेः पोषान् पुष्यति इदानीन्तनोऽपि ॥ ७ ॥

अथास्मिन् चतूरात्रे विद्यमानस्तोत्रीयापरिगणनया जगती-च्छन्दःसम्पत्तिर्भवतीत्याह ।

जगती छन्दोभिः सम्पद्यते ॥ ८ ॥

एतेषामह्नां स्तोत्रीयासमया जगत्याख्यं छन्दः सम्पद्यते तथा हि प्रथममग्निष्टोममहस्तच्च द्वादशस्तोत्राणि तानि त्रिवृत्पञ्चदशाभ्यां यानि षट्त्रिवृतं षट्पञ्चदशानि तेषां स्तोमगत स्तोत्रीयापरिगणनायां चतुश्चत्वार्य्यधिकं शतं स्तोत्रीया भवन्ति ताश्चतस्रोजगत्यः एवं द्वितीयेऽहनि अष्टाशीत्यधिकं शतद्वयं स्तोत्रीयाः स्युस्ताश्च षट् जगत्यः तृतीयेऽहनि षट्त्रिंशदधिक शतानि स्तोत्रीयास्ताः सप्तजगत्यः उत्तमेऽहनि अष्टाविंशत्यधिक-पञ्चशतानि स्तोत्रीयाः स्युः ता एकादशजगत्य इति जगती सम्पत्तिः अत्रोपग्रन्थे यज्ञामदग्न्यः प्रत्यहं त्रिषट्सप्तैकादश जगत्य इति एवं जगतीति सम्पत्तिः ॥ ८ ॥

किन्तत इत्याह ।

जगती वै छन्दसां परमं पोषं पुष्टा परममेवैतेन पोषं पुष्यति ॥ ९ ॥

गायत्र्यादीनां सप्तछन्दसामध्ये उत्तमा जगती परमं पोषं पुष्टा-स्तत्सम्पत्तिः यदेतच्चतूरात्रं कुर्व्वन्नपि परममविशेषं पोषं पुष्यति प्राप्नोति यद्यदितरक्रतु गतासुपमतस्त्राज्यं द्रव्यं भवति ॥९॥

अत्र पुरोडाशं द्रव्यं कर्त्तव्यमिति सप्त रोचनं विदधाति ।

पुरोडाशिन्य उपसदो भवन्ति पशवो वै पुरोडाशाः पशुष्वेव प्रतितिष्ठति ॥ १० ॥

स्पष्टं । पशुभ्यो वै मेधादुदक्रामत् सोव्रीहिश्चैव यवश्च भूतावाजोपितामित्यैतरेयकश्रुतेः पशवो वै पुरोडाशाः, अत्रायं विवेकः, इतरयज्ञगतासूपसत्स्वग्निसोमविष्णवस्तिस्रोदेवताः तेषां आज्यं द्रव्यं यथावचनन्तिस्रः षट् द्वादशेत्यादि संख्यया सायं प्रातर्होमः अत्रतु प्रत्यहं देवताभेदपुरोडाशोद्रव्यं कपालसंख्या प्रत्यहमिष्टिः अन्यत्रेष्टिविकारा उपसदः अत्र तु हविर्होमा इति सूत्रं त्रयोदश्यामपरपक्षस्य दीक्षेत जामदग्न्याय तस्य विंशतिर्दीक्षा द्वादशोपसदस्तत्रोपसत्सु पृथग्होमानध्वर्य्युर्जुहुयात्पुरोडाशास्तउक्ताब्राह्मणेन समानदेवतौ पूर्व्वाह्णापराह्णयोरग्नेर्वेहोत्रमित्येतत् प्रभृतय एषां होमा इति तत्र आग्नेय एककपाल आश्विनो द्विकपाल इत्यादिना अग्न्यादिदेवताकमेककपालादिपुरोडाशं विधास्यति ॥ १० ॥

तेषां क्रमेण मन्त्रानाह ॥

अग्ने वेर्होत्रं वेरध्वरमापितरं वैश्वानरमवसेकुरिन्द्राय देवेभ्योजुहुताद्धविः स्वाहा ॥ ११ ॥

हे अग्ने होत्रं होतुः कृत्यं वेः विद्धि तथा अध्वरं यज्ञञ्च विद्धि होतारमधिष्ठाय होत्रं कुरु हविःप्रापणेन यज्ञन्निवर्त्तयेत्यर्थः विदेर्ईकारस्य इत्वेति कुत्वं किञ्च पितरं सर्व्वस्य पालकं वैश्वानरं

विश्वेषां नराणां हितारं मा मामवसे अस्माकं रक्षणाय अकः अभिमुखं कुरु हे ऋत्विजो यूयमपि इन्द्राय सर्व्वदेवाधिपतये देवेभ्योन्येभ्योवस्वादिभ्यश्च हविर्जुहुतः प्रयच्छतः यद्वा व्यत्ययेन जुहोमीति व्याख्येयं स्वाहेति हविस्त्यागाभिधानं इदं हविर्हुतमस्तु॥ ११ ॥

अथाश्विनोद्विकपालमन्त्रमाह ॥

देवावश्विनौ मधुकशयाद्येमं यज्ञं यजमानाय मिमिक्षतमिन्द्राय देवेभ्योजुहुताद्धविः स्वाहा ॥ १२ ॥

हे देवौ द्योतमानौ अश्विनौ युवां मधुकशया वृष्ट्यर्थं मेघ ताड़नेनोदकवत्या कशया अद्यास्मिन्दिने इमं यज्ञं यजमानाय मिमिक्षतं सेक्तुमिच्छतं वृष्ट्यादिफलोपेतं कुरुत इत्यर्थः शिष्टं पूर्व्ववत्॥ १२ ॥

अथ वैष्णवस्य त्रिकपालस्य मन्त्रमाह।

देव विष्णउर्व्वद्यास्मिन्यज्ञे यजमानायाधिविक्रमस्वेन्द्राय देवेभ्यो जुहुताद्धविः स्वाहा ॥ १३ ॥

हे देव द्योतमान विष्णो अद्येदानीमस्मिन् यज्ञे यजमानाय उरु विस्तीर्णं यथा अधिगम्य विक्रमस्व स्वपादप्रक्षेपं कुरु उपविशेत्यर्थः सिद्धमन्यत्॥ १३ ॥

अथ सौम्यस्य चतुष्कपालमन्त्रमाह।

देव सोम रेतोधा अद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्योजुहुताद्धविः स्वाहा ॥ १४ ॥

हे सोम देव इदानीमस्मिन्यज्ञे यजमानार्थं रेतोधाता एधि भव ॥ १४ ॥

अथ सावित्रस्य पञ्चकपालस्य मन्त्रमाह।

देव सवितः सुसावित्रमद्यास्मिन्यज्ञे यजमानायासुवस्वेन्द्राय देवेभ्योजुहुताद्धविः स्वाहा ॥ १५ ॥

हे सवितः विश्वस्य प्रेरयितः देव सुसावित्रं शोभनं सवितुः कृत्यं इदानीमस्मिन्यज्ञे यजमानायासुवस्वानुजानीहि कुर्व्वित्यर्थः ॥ १५ ॥

अथ धातुः षट्कपालस्याह॥

देव धातः सुधाताद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्योजुहुताद्धविः स्वाहा ॥ १६ ॥

हेधातः ब्रह्मन् देव मन्त्राभिमानी बृहस्पतिरित्यर्थः ब्रह्मा वै बृहस्पतिरिति श्रुतेः एवं भूतस्त्वं यजमानार्थं सुधाता सुष्ठुकामानां दाता एधि भव ॥ १६ ॥

अथ मारुतस्य सप्तकपालस्याह।

देवा ग्रावाणो मधुमतीमद्यास्मिन्यज्ञे यजमानाय वाचं वदतेन्द्राय देवेभ्योजुहुताद्धविःस्वाहा ॥ १७ ॥

अत्र मरुतः सदा यजमाना वर्षं सृजन्तीत्यभिषवणकाले अभिषवताद्दत्यसि वाक्शब्दाविद्यन्त इति यत्र तच्छब्दमाप्यात् ग्राव-

रूपेण मरुतां स्तुतिः हे ग्रावाणो मरुतां विभूतिभूता देवा यूयं यजमानार्थं मधुमतीं माधुर्य्योपेतां वाचं वदता ग्रावभ्यो वाचं वदता वदद्भ्यइति हि निगमान्तरम् ॥ १७ ॥

अथ बार्हस्पत्यस्याष्टाकपालमाह ।

देव्यनुमतेन्वद्येमं यज्ञं यजमानाय मन्यस्वेन्द्राय देवेभ्यो जुहुताद्धविः स्वाहा ॥ १८ ॥

हे देव्यनुमते अनुज्ञाकर्त्तृदेवते इमं यज्ञं यजमानायानुमन्यस्व अनुमतिं कुरु नन्वयं मन्त्रो बार्हस्पत्यस्य पुरोडाशस्य मन्त्रे त्वनुमतिरेव प्रकाश्यते कथं वैयधिकरण्यमिति नायं दोषः ब्रह्म वै ब्रह्मणस्पतिरिति श्रुतेः बृहस्पतिमन्त्राभिमानित्वात् मन्त्रेण क्रियमाणानां कर्म्मणां बृहस्पत्यनुज्ञाया अपेक्षितत्वादनुमत्या एव ब्रह्मणस्पतित्वात् ॥ १८ ॥

अथ मैत्रस्य नवकपालस्य मन्त्रमाह ।

देव्यदितेस्वादित्यमद्यास्मिन्यज्ञे यजमानायासुवस्वेन्द्राय देवेभ्योजुहुताद्धविः स्वाहा ॥ १९ ॥

हे अदिते देवमातः अदितिरदीना देवमातेति निरुक्तात् मित्राख्यस्यादित्यमूर्त्यन्तरस्यापि सेवमाना हे देवि सुशोभनमादित्यन्तव पुत्रभूतं अद्यास्मिन्यज्ञे यजमानायासुवस्व आभिमुख्येन प्रेरय ॥ १९ ॥

अथ वारुणस्य दशकपालस्य मन्त्रमाह ।

देव्य आपोनन्नम्यध्वमद्यास्मिन्यज्ञे यजमानायेन्द्राय देवेभ्यो जुहुताद्धविः स्वाहा ॥ २० ॥

हे देव्य आपोमन्नम्यध्वं भृशं सस्यादिसमृद्धये प्रणता भवतः वारुणस्यापामधिपतित्वादभेदेनैवोच्यते ॥ २० ॥

अथेन्द्राग्नस्यैकादशकपालस्य मन्त्रमाह ।

सदः सदः प्रजावानभुर्जुषाण इन्द्राय देवेभ्योजुहुताद्धविः स्वाहा ॥ २१ ॥

सदः सदः तत्तद्यागगृहे प्रजावान् मरुदादि प्रजाभिस्तद्वान् ऋभुः उरुभासमान एवं महिमा जुषाणो अस्मद्यज्ञं सेवमानो भवन्तु अस्येन्द्रस्य प्राधान्येन स्तुतिः ॥ २१ ॥

अथ वैश्वदेवस्य द्वादशकपालस्य मन्त्रमाह ।

देव त्वष्ट सुरेतोधा अद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्यो जुहुताद्धविः स्वाहा ॥ २२ ॥

त्वष्टा देवशिल्पी स विश्वेषां देवानामुचितानि कर्म्माणि करोतीति स एव वैश्वदेवस्थाने श्रूयते सुरेतोधा सुष्टु रेतसो विधाता विकर्त्ता रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तयास्था वे तत् प्रजापतिः इति श्रुतेः ॥ २२ ॥

उक्ता द्वादशमन्त्राः तथैते मन्त्राः स्युः ताः पुरोडाशाः क्रमेण विदधाति ।

आग्नेय एककपाल आश्विनो द्विकपालो वैष्णवस्त्रिकपालः सौम्यश्चतुष्कपालः सावित्रः पञ्चकपालो धात्रः षट्कपालो मारुतः सप्तकपालो बार्हस्पत्योष्टाकपालो मैत्रो नवकपालो वारुणो दशकपाल ऐन्द्र एकादश कपालो वैश्वदेवो द्वादश कपालः ॥ २३ ॥

अग्निर्दैवतास्य पुरोडाशस्याग्नेय इति एकस्मिन् कपाले संस्कृतः पुरोडाशः एककपालः एकस्यैवाग्ने गार्हपत्यादिषु रूपे वर्त्तमानाद्वस्तुत एकत्वादेककपालोयुक्तः, अश्विभ्यां द्वित्वेन व्यपदेशात् द्विकपालः, वैष्णवस्त्रिः इदं विष्णुर्विचक्रमेतिश्रुतेः विष्णोस्त्रिकपालः सम्मतः, जरायुजाण्डजस्वेदजोद्भिज्जानाञ्चतुःप्राणिजातानामुत्पत्त्यर्थं रेतो धारकत्वाद्वालतावीरुधावनस्पतयो वानस्पत्य इति सोमस्य चतुर्विधानां स्वामित्वाद्वा चतुःकपालो युक्तः, सवितुः सम्वत्सरस्याधिपतित्वात्पञ्चकपालः सम्वत्सरो वै धातेति श्रुत्यन्तरात् धाता सम्वत्सरात्मकः, सम्वत्सरे च षड् ऋतवः सन्तीति धातुः षट्कपालो युक्तः, सप्तगणा इति श्रुतेर्मरुतां सप्तकपालो युक्तः, तैत्तिरीयके अग्निरेकाक्षरेण वाचमुदजयदश्विनौद्व्यक्षरेण न प्राणो पानो व्युदजयतां विष्णुः अक्षरेण त्रिलोकानुदजयत इत्युक्ता वृहस्पतिरष्टाक्षरेण गायत्रीमुदजयन्मित्रो नवाक्षरेण त्रिवृत्स्तोममुदजयद्वरुणो दशाक्षरेण विराजमुदजयत् इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयद्विश्वे देवा द्वादशाक्षरेण जगतीमुदजयन्निति श्रुतित्वात् तत् कपालसंख्यायोगो द्रष्टव्यः अत्र

उपोषु जातमप्तुरमित्यनुरूपो नौधसं ब्रह्मसाम सुत्रानस्य लोके पौष्कलमित्यादिकः कल्पो द्रष्टव्यः ॥ २३ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
दशमः खण्डः ॥

अथ एकादशः खण्डः ।

अथ वसिष्ठस्य चतूरात्रमाह ।

त्रिवृत् प्रातःसवनं पञ्चदशं माध्यन्दिनꣳ सवनꣳ सप्तदशं तृतीयसवनं पञ्चदश प्रातःसवनꣳ सप्तदश माध्यन्दिनꣳ सवनमेकविꣳशꣳ तृतीयसवनꣳ सोक्थꣳ सप्तदशं प्रातः सवनमेकविꣳशं माध्यन्दिनꣳ सवनं त्रिणवं तृतीयसवनꣳ सोक्थमेकविꣳशं प्रातःसवनं त्रिणवं माध्यन्दिनꣳ सवनं त्रयस्त्रिꣳशं तृतीयसवनं प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथमं द्वे एकविꣳशे सषोडशिके पञ्चदशी रात्रिस्त्रिवृत् सन्धिः ॥ १ ॥

आदितः पूर्वपूर्वस्य परित्यागेनोत्तरस्तोमेनेहाभ्युपक्रान्तव्यानि तृतीयाणि त्रीण्युक्थानि प्रत्यवरोहीणि तद्यथा प्रथमतः त्रिणवस्तोमकन्ततो द्वे एकविंश इति ॥ १ ॥

अथैतच्चतूरात्रं कर्त्तुः प्रशंसनद्वारा समृद्धिफलसाधनमित्यत आह ।

वसिष्ठः पुत्रहतो हीन इवामन्यत स एतमपश्यत्सोग्ंपर्यैद्योहीन इव मन्येत स एतेन यजेत ॥ २ ॥

वसिष्ठः पुत्रहतः पुत्रोहीन इव कुलक्षयः पुत्राभावेन विच्छिन्नत्वादात्मानं हीन इवामन्यत सोयं मनुष्यलोकः पुत्रेणैव जय्य इति श्रुतेः पश्चादेतं चतूरात्रं हीनत्वपरिहारायापश्यत् स्वात्वायं पर्यैत् साकल्येनानुष्ठितत्वात्तस्माद्यः पुत्रादिभिः हीनमात्मानं मन्येत स एतेन यजेतेति ॥ २ ॥

अथायतस्तोमात् स्तोमान्तरारम्भः श्रुतस्तत् प्रशंसति।

यत् स्तोमात् स्तोममभिसंक्रामत्यग्रादेवाग्रꣳ रोहति वसिष्ठस्य जनित्रे भवतः प्रजात्यै ॥ ३ ॥

वशिष्ठो वा एतं पुत्रहतोऽपश्यत्स प्रजया पशुभिः प्रजायते त्यक्तत्वाद्वसिष्ठः पुत्रजननसाधनत्वेन वसिष्ठस्य जनित्रे इति नामतया कुत्र प्रयोग इति तत्र बहून् पक्षानाह तेषु प्रथमं पक्षमाह सूत्रकारः वसिष्ठस्य जनित्रे भवत इति संसर्पस्य चतुर्थेहनि बृहदनुष्टुभोः पृथगनुपूर्वमनुकल्पयेत् चतुर्थं हि जनित्रस्थानमिति अस्यायमर्थः वसिष्ठस्य चतूरात्रस्य शाखान्तरप्रसिद्धा ससर्प इति नामधेयं तथा च कारब्राह्मणं वसिष्ठो वा अकामयत स इमान् लोकान् सर्पेयमिति स एतं चतूरात्रमपश्यत्ता इमान् लोकान् सर्पं तत्सं सर्पस्य संसर्पत्वमित्यर्थः तस्य चतुर्थेहनि माध्यन्दिनपवमाने बृहत्यां प्रथमञ्जनित्रं अभिसोमास इत्यत्र मध्ये अर्भवेनुष्टुभि द्वितीयन्तं चोदस्र मृतीषहमित्यत्र गायेत् यद्यपि जनित्रे भवत इति सहैव पठिते तथापि

जनित्रा जनित्रा इत्युभयोरन्त्यस्यैकरूपत्वादजामितायै पृथगेव पर्याक्रियेते इति विशेषेण विहितयोः जनित्रयोः कथं चतुर्थेऽहनि नियम इति अत्रोपपत्तिरुच्यते चतुर्थमहः जनित्रस्य स्थानं दृष्टं समूढे षडहे सोमः पवते जनितामतीनामिति जनित्रमन्त्यं माध्यन्दिनस्येति कल्पकारवचनात् तदत्रापि युक्तमित्यर्थः अथ द्वितीयं पक्षमाह राथन्तरबृहत्यौ वासिष्ठं प्रजननोक्तं रथन्तरमिति अयमर्थः साम्नः पक्षान्तरार्थे अथ वा राथन्तरबृहत्पृष्ठयोः प्रथमतृतीययोरह्नोः पवमाने ये बृहत्यौ तयोर्जनित्रे कुर्यात् पुनरनुष्टुभि छन्दःसाम्यात् बृहत्योर्जनित्रयोरुत्पत्तिहेतुत्वमुच्यते प्रजननत्वेन यत्र संस्तुतं रथन्तरं वसिष्ठस्य रथन्तरं दृष्टा तादृशे च जनित्रे इति सा दृश्यते तत्रोत्तरः कारणं तृतीयं पक्षमाह बार्हतयोरित्येके तयोर्विकल्पः स्यादार्षेयकल्पेनेति बृहत्यबृहत्योर्द्वितीयचतुर्थयोरह्नोर्ये बृहत्यौ तयोः कुर्यादित्यर्थः आर्षेयकल्पे एते सामनी नोक्ते इति तयोर्विकल्पः स्यादेतेनार्षेयकल्पेनेत्युक्तं प्रत्यक्षब्राह्मविहितत्वेन त्वयोगादिकल्पायुक्त इत्यभिप्रायः ॥ ३ ॥

अथ चतुर्थेऽहनि प्रत्यवरोहीण्युक्थानि तानि प्रशंसति ।

प्रत्यवरोहीण्युत्तमस्याह्न उक्थानि भवन्ति प्रतिष्ठित्यै ॥ ४ ॥

एकविंशाहर्द्वयकर्त्तव्यत्वात् प्रतिष्ठितहेतुत्वं अत्र या जामदग्न्यस्य प्रथमा सा संसर्पस्य न वा सौपर्णं उद्गाति परितापिस्व नामृतमिति बार्हदुक्थमित्यादि कल्पो द्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथ विश्वामित्रस्य सञ्जयाख्यं चतूरात्रमाह ।

त्रिवृदग्निष्टोमः पञ्चदशउक्थः सप्तदशउक्थ एकविंशो-तिरात्रो विश्वामित्रस्य सञ्जयः ॥ १ ॥

विश्वामित्रस्य सञ्जयसाधनत्वात् सञ्जयं नाम ॥ १ ॥

कथमेतन्नाम सम्पन्नमिति तदुपपादयति ।

जह्नु वृचीवन्तोराष्ट्र आहिंसन्त स विश्वामित्रो जाह्नवो राजैतमपश्यत् स राष्ट्रमभवदराष्ट्रमितरे ॥ २ ॥

जह्नोः पुत्रा ऋचीवन्नामकाः केचन राजानः आसन् ते च राष्ट्रे राष्ट्रविषये राज्यस्वामित्वाय अहिंसन्त परस्परं हिंसां कलहं सर्वतोऽकुर्वन् तेषां मध्ये जाह्नवः जह्नुपुत्रो विश्वामित्र एतं चतूरात्रमपश्यत् दृष्ट्वा स्थितवानित्यर्थः स तत्सामर्थ्यात् राष्ट्रमभवत् राष्ट्रं सर्वं विश्वामित्र एव पर्य्यग्रहीदित्यर्थः इतरे ऋचीवन्त अराष्ट्रं अराष्ट्रनामका इतरराज्यस्थाः पुरुषानाज्ञां चक्रुरित्यर्थः ॥ २ ॥

एतस्याधिकारिणमाह ।

भ्रातृव्यवान्यजेत ॥ ३ ॥

यस्माद्भ्रातृव्याणां मध्ये वसिष्ठोन इतरलक्षणेन अतीजय-साधनमभूत् अतो भ्रातृव्यवानधिकारी ॥ ३ ॥

उक्तार्थवेदनं प्रशंसति ।

भवत्यात्मना परास्य भ्रातृव्यो भवति य एवं वेद ॥ ४ ॥

स्वयं यजनवान् भवति अस्य भ्रातृव्यः पराजितो भवतीत्यर्थः ॥ ४ ॥

अथ चतुर्णामह्नां यत्त्रिवृदादिस्तोमचतुष्टयात्मकत्वमस्ति तत् प्रशंसति ।

ज्योतिर्वा एषविहृतः ॥ ५ ॥

त्रिवृत्पञ्चदशसप्तदशैकविंशतानेव तानि ज्योतींषीति श्रुत्यन्तरादेष चतूरात्रविहृतो ज्योतिरेव ॥ ५ ॥

अथ वेदनं प्रशंसति ।

ज्योतिः प्रजानां भवति य एवं वेद ॥ ६ ॥

स्पष्टं ॥ ६ ॥

प्रकारान्तरेणैतं चतूरात्रं प्रशंसति ।

चतुष्टोमो वा एष चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठति ॥ ७ ॥

एष चतूरात्रश्चतुष्टोमः खलु क्रमेण त्रिवृदादीनां विधानात् ॥ ७ ॥

अथ चतुर्णामप्यह्नां यदेकविंशात् स्तोमादतिक्रमणमस्ति तत् प्रशंसति ।

एकवि(ं)श(ं)स्तोमानातियन्ति प्रतिष्ठा वा एकवि(ं)-शोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥ ८ ॥

प्रजापतेः पादत उत्पन्नत्वात्पादयोः प्रतिष्ठाहेतुत्वात् असावादित्य एकविंश इति श्रुतेः तस्य च प्रतिष्ठितत्वाच्चास्य प्रतिष्ठितत्वं अत्र प्रसोमासो विपश्चित इति गायत्रमेकस्यामाश्वमेकस्यां जराबोधीयमेकस्यां प्रसोम देववीतय इति यौधाजयन्तिस्रषु समानमितरं प्रथमेनाह्ना समर्पस्येत्यादिकः कल्पो द्रष्टव्यः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

अथ त्रयः पञ्चरात्राः तत्राद्यमसंख्यातव्यं पञ्चरात्रमाह ।

द्वे त्रिवृती सवने पञ्चदशमेकं द्वे पञ्चदशे सवने सप्तदशमेकं द्वे सप्तदशे सवने एकवि(ं)शमेकं द्वे एकवि(ं)शे सवने त्रिणवमेकं द्वे त्रिणवे सवने त्रयस्त्रि(ं)शमेकं प्रत्यवरोहो व्युक्थानि त्रिणवं प्रथमं द्वे एकवि(ं)शे सषोडशिके पञ्चदशो रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

त्रिवृत्स्तोमके प्रातर्मध्यन्दिने सवने तृतीयं सवनं पञ्चदशस्तोमकं पुनर्द्वितीयस्मिन्नहनि द्वे पञ्चदशस्तोमके सवने तृतीयं सप्तदशस्तोमकमित्येवं क्रमेण द्रष्टव्यं अत्राप्युक्थानि वीण्यपि

प्रत्यवरोहस्तोमकानि तत्रायं विभागः त्रिणवं प्रथममुक्थ्यं द्वे उक्थ्ये एकविंशे रात्रिः सन्धिः प्रकृतिवदेव ॥ १ ॥

अस्मिन् पञ्चरात्रे यत्पञ्चरात्रत्वमस्ति तत् प्रशंसितुमाह ।

देवाश्च वा असुराश्चास्पर्द्धन्त ते न व्यजयन्त ते ब्रुवन् वाचो मिथुनेन विजयामहै यतरेनो वाचो मिथुनन्नप्रतिविन्दाꣳस्ते परा भवानिति ते देवा एक इत्यब्रुवन्नेकेत्यसुरा वाचो मिथुनं प्रत्यविन्दं द्वाविति देवा अब्रुवन् द्वे इत्यसुरा वाचो मिथुनं प्रत्यविन्दꣳस्त्रय इति देवा अब्रुवꣳस्तिस्र इत्यसुरा वाचो मिथुनं प्रत्यविन्दꣳश्चत्वार इति देवा अब्रुवꣳश्चतस्र इत्यसुरा वाचो मिथुनं प्रत्यविन्दन् पञ्चेति देवा अब्रुवन्नासुरा अविन्दꣳस्ततो देवा अभवन् परासुराः ॥२॥

पूर्वं देवाश्चासुराश्चास्पर्द्धन्त ततो अन्येषामपि जयं ये अप्रापन्नदर्थं देवा इत्यब्रुवनसुरान् वयं वाचा मिथुनेन स्त्री पुंलिङ्गात्मकेन विजयामहे जयं प्राप्नुमः अस्माकं मध्ये वाङ्मिथुनं प्रयोक्तुं न शक्नुवन्ति ते पराभूता इति मिथुनः समयमकुर्वत एवं सति ते देवा एक इति पुंलिङ्गां वाचं अब्रुवन् तस्याः प्रतियोगित्वेन एके तिस्त्रीलिङ्गा वाचमब्रुवन् एवं द्वि त्रि चतुः संख्यावाचकं वाचो मिथुनं परस्परमब्रुवन् ततो देवाः पञ्चेत्यब्रुवन् तस्य स्त्रीलिङ्गे रूपाविशेषात् विलक्षणशब्दं कर्त्तुन्नाविन्दन् नालभन्त ततो

वाचो मिथुनजया देवा अभवन् समभुवन् असुरास्तु पराभवन् एवं देवानां जयहेतुरयं पञ्चरात्र इति तस्य स्तुतिर्द्रष्टव्या ॥ २ ॥

उक्तार्थवेदनं प्रशंसति ।

भवत्यात्मना परास्य भ्रातृव्यो भवति य एवं वेद ॥ ३ ॥

स्पष्टं ॥ ३ ॥

पुनः प्रशंसति ।

संवत्सरं वा एषान्तद्वीर्यमन्नाद्यमवृञ्जत ॥ ४ ॥

तत्तदा वाग्विवादकाले एषामसुराणामन्नाद्यं वीर्य्यं आग्निष्टवलक्षणं यद्वा वहुपुत्रपोषणसामर्थ्यं मध्यं संवत्सरं संवत्सरमूर्त्तिपर्य्यन्तमवृञ्जत् अवर्जयन् देवाः संवत्सरस्य पञ्चात्मकत्वात् पञ्चसंख्यायां वाचो मिथुनत्वाविन्दन् यतः अतः संवत्सरं वीर्य्येणावृञ्जतेत्यर्थः ॥ ४

उक्तार्थज्ञं प्रशंसति ।

संवत्सरं वीर्यमन्नाद्यं भ्रातृव्यस्य वृङ्क्ते य एवं वेद ॥ ५ ॥

स्पष्टं ॥ ५ ॥

पुनरत्र यत् पञ्चत्वं तत् प्रशंसति ।

पञ्चरात्रो वा एष पाङ्क्तः पुरुषः पाङ्क्ताः पशवस्तेन पुरुषञ्च पशूंश्चाप्नोति ॥ ६ ॥

एषयज्ञः पञ्चरात्रः खलु पाङ्क्तः पुरुषः द्वौ पादौ द्वौ

हस्तौ मध्यदेहश्चेति पुरुषः पञ्चसंख्यायोगात्पाङ्क्तः पशवोपि पाङ्क्तास्तत्प्रयोगेन पुरुषं पुत्रभृत्यादिरूपं पशून् प्राप्नोति यजमानः ॥ ६ ॥

अथैतत्सवनत्रयस्तोमं द्वित्वसंख्याद्वारेण प्रशंसति।

अस्थूरिर्वा एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमावनुवहतोयं कामं कामयते तमेतेनाभ्यश्नुते ॥ ७ ॥

एष उक्तः पञ्चरात्रः सन्ततोऽस्थूरिर्वै यद्वा अस्थूरिः सन् सन्ततः अविच्छेदेन प्रवृत्तः अस्थूरित्वमेव दर्शयति द्वौ द्वावेव त्रिवृदादि स्तोमौ खलु एकैकमहरनुवहतः स्तोमद्वयेनाहर्वहनप्रकारो द्वे त्रिवृती सवने पञ्चदशमेकमित्यादिना स्पष्टं अतोप्राप्तिसाधनविषयसंख्याया अत्राभावाद्यजमानोयं कामं कामयते तदस्थूरिणा पञ्चरात्रेणाप्नोति ॥ ७ ॥

तदेव प्रसिद्धीकृत्याह।

यत्र यत्र ह्यस्थूरिणा कामयते तत्तदभ्यश्नुते ॥ ८ ॥

यस्मिन् देशे अस्थूरिणाभ्यश्नुत इत्युक्तं भवति ॥ ८ ॥

अथ पुनः प्रशंसति।

अभ्यासंग्यः पञ्चाहो भवति सन्तत्यै ॥ ९ ॥

अभ्यासञ्जनप्रयुक्तेन स्तोमेन पुनरनन्तरे यत्कर्म इत्यर्थः तद्वताञ्चाहःकर्त्तव्यः सचाह्नः सन्तत्या अविच्छेदाय भवति ॥ ९ ॥

अथोक्थानां यः प्रत्यवरोहः प्रयोगोस्ति तं प्रशंसति ।

प्रत्यवरोहीण्युत्तमस्याह्न उक्थानि भवन्ति प्रतिष्ठित्यै ॥१०॥

स्पष्टं । अथ वैश्वामित्रोद्वाहो जराबोधीयस्य लोकसाम-सामस्याग्निरामर्कस्य मोक्षं सौरभस्यौपगवं द्वादशाहिकं तृतीय-महरित्यादिकः कल्पोक्त द्रष्टव्यः ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

पञ्चशारदीयाख्यं पञ्चरात्रमाह ।

त्रिवृदग्निष्टोमः पञ्चदश उक्थः सप्तदश उक्थः पञ्चदश उक्थः सप्तदशोतिरात्रः पञ्चशारदीयोमरुताꣳस्तोमः ॥१॥

यः पञ्चसु शरत्स्वङ्गभूतैः पशुबन्धैरिष्ट्वा पश्चादय आरभ्यते स पञ्चशारदीयो नाम स एव मरुतां स्तोमः ॥ १ ॥

अस्याधिकारिणमाह ।

यः कामयेत बहु स्यामिति स एतेन यजेत ॥ २ ॥

स्पष्टं ॥ २ ॥

उक्तं फलं प्रयोगद्वारा प्रशंसति ।

मरुतो वै देवानां भूयिष्ठा बहुरेव भवति ॥ ३ ॥

देवानां मध्ये अतिशयेन बहवः अत एतदनुष्ठातापि पुत्रादिभिर्बहुरेव भवति ॥ ३ ॥

अथ यत् स्तोमानां सप्तदशादनतिक्रमणमस्ति तत् प्रशंसति ।

सप्तदशꣳ स्तोमं नातियन्ति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ४ ॥

यः स्तोमः सप्तदशं स्तोमं नातिक्रामति प्रजापतिर्वै सप्तदशः स्तोमः अतः स्तोतारः प्रजापतिमेवाप्नुवन्ति ॥ ४ ॥

अथ विधास्यमानसप्तदशोपलक्षणस्तुत्यर्थं कयाशुभीयस्य साम्नो विधानार्थं पुरावृत्तमाह ।

अगस्त्यो वै मरुद्भ्य उक्ष्णः प्रौक्षत्तानिन्द्रायावध्नात्ते वज्रमादायाभ्यपतन्त्स एतत्कयाशुभीयमपश्यत्तेनाशमयत् ॥ ५ ॥

पूर्वं अगस्त्यो मरुद्भ्यो देवेभ्य उक्ष्णः प्रौक्षत् मरुद्भ्यो देवेभ्यो युष्मान् प्रोक्षामीति प्रोक्षितवान् अस्मिन् प्रोक्षणसमये देवतोद्देशः यथापस्तम्बः उपकरणेनियोगप्रोक्षणे वपा यदृक्षणे इति एवम्मरुद्भ्यः प्रोक्षितानेवेन्द्रायावघ्नात् उपेत्य न्ययोजयत् नियोजनेपि देवतोद्देशः प्रदर्शितः ते मरुतः क्रुद्धा वज्रमुद्यम्यागस्त्यमभ्यपतन् अपीडयन् सो अगस्त्य एतत्कयाशुभीयं साम मरुतां शान्त्यर्थं अपश्यत् तेन तेषां कोपं अशमयत् तैत्तिरीयके अपि अगस्त्येन्द्रावुभावपि मरुतां कोपमशमयतामगस्त्यश्चेन्द्रश्च कयाशुभीयेनाशमयतामिति ॥ ५ ॥

इदानीन्तद्विधत्ते ।

यत कयाशुभीयं शस्यते शान्त्या एव ॥ ६ ॥

स्पष्टं । ६ ।

अथ पञ्च संवत्सरेषु ये पशुबन्धाः सन्ति तत्र प्रयोगसंग्रहः सप्तदशोक्षाणः प्राजापत्यं कृत्वा विसृजेत् तत् स्थाने त्रिवृत्स्तोमः आलभेत एवं पञ्च संवत्सरापितं परित्यक्तानाम नवस्थान् कुर्यादिति तत्सर्वं प्रदर्शयति ।

सप्तदश पृश्नीनुक्ष्णः पञ्चवर्षान् सप्तदश पृश्नीस्त्रिवत्सा अप्रवीतास्तान् पर्यग्निकृतान् प्रोक्षितानेतरानलभन्ते प्रेतरान् सृजन्ति ॥ ७ ॥

सप्तदशसंख्यान् पञ्चवर्षीयानुक्षलक्षणान् सेचनसमर्थान् वृषभान् सप्तदशसंख्याकाः स्त्रिवत्सा वर्षत्रयस्का अप्रवीता वीगति प्रजनकान्त्यशनखादनेषु धातोः अत्र प्रजननार्थः अगर्भिणीरित्यर्थः ताश्चानीय सहैवापाकृत्य तानुभयानपि प्रोक्षितान् पर्यग्निकृतान् कृत्वा इतरा वत्सतरीरालभेरन् इतरानुक्ष्णो विसृजेयुः प्रोक्षितानिति स्त्रापुंसेति पुंवद्भावः पुंलिङ्गता आधारार्थे पदविभागः आलभन्ते प्रेतरान् सृजन्तीति समन्वयः ॥ ७ ॥

अथ द्वितीयादिसंवत्सरचतुष्टयेष्वितरसेकत्वमित्याह ।

ततः संवत्सरे नवनीतपृश्नीररुणा आनयन्ति तथैवोक्ष्णस्तान् पर्यग्निकृतान् प्रोक्षितानेतरानलभन्ते प्रेतरान्

सृजन्ति ततः संवत्सरे राजीवा आनयन्ति ताᳩ श्वैवोदृणा-
स्तान् पर्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति
ततः संवत्सरे पिशङ्गीरानयन्ति ताᳩ श्वैवोदृणस्तान् पर्यग्नि-
कृतान् प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति ततः संव-
त्सरे मारङ्गीरानयन्ति ताᳩ श्वैवोदृणस्तान् पर्यग्निकृतान्
प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति ॥ ८ ॥

आलभ्यानां स्त्रीपशूनां वर्णं प्रतिसंवत्सरं विशेषः तद्वर्ण
विशेषाः स्पष्टाः उक्तानेव वर्णविशेषानापस्तम्बोऽनुचक्राम वर्णानन्
क्रमिष्यामो राजीवानवनीतपृश्निरकृष्णपिशङ्गो मारङ्गो उत्त
मोगालभ्य दोऽन्त इति अत्र द्राह्यायणः पञ्चशारदीयेन पशुबन्धै
र्यजेत त उक्ता ब्राह्मणेन सप्तम्यामष्टम्यां वाश्वयुजीपक्षेत् वत्सतरी-
रेवालभेरन्नृचो विसृजेयुस्तेषां यावन्तोऽभिपमापदोरंस्तावतोऽन्यान
यजुष्ट तानपि सृजेयुस्तथारूपां स्तावद्वर्षान् पञ्चां शरदि कार्त्तिके
मासि यजेत तस्य द्वादशोपसदः ॥ ८ ॥

अस्य विहितपञ्चरात्रस्य यः कालस्तन्दर्शयति ।

ततः संवत्सरे सोमाभवन्ति ॥ ९ ॥

पञ्चसु शरत्सु पशुबन्धैरिष्ट्वा ततोनन्तरं समानान्तरं स एव
सोमा भवन्ति पञ्चसोमान् यागान् कुर्युः तत्रापि कालविशेषः
षष्ठ्यां शरदि कार्त्तिकइति ॥ ९ ॥

तत्प्रदर्शितपञ्चवर्षसंपूर्त्तिपर्यन्ताः ये सप्तदशोक्षणः पर्यग्नि-

क्रत्व युक्ताः तेषां मध्ये प्रत्यहं कियन्त आलभ्याइति विवेके प्राप्त-
माह ॥

त्रींस्त्रीनन्वहमालभन्ते पञ्चोत्तमेऽहनि ॥ १० ॥

स्पष्टं ॥ १० ॥

सवनीयपशुवदग्नीषोमीयस्येत्यक्तश्रुतिरिति त्रयरोगाभिमानि-
नो पापदेवता प्रसक्तौ अजः कर्त्तव्य इत्याह ॥

अजोऽग्नीषोमीयः ॥ ११ ॥

स्पष्टं ॥ ११ ॥

अथ उक्थ्यपशूनां उत्तान्तपशुवन्ययोगाद्दत्सतरीणाञ्च देवता
माह ॥

ऐन्द्रामारुता उक्षाणो मारुत्यो वत्सतर्य्यः ॥ १२ ॥

इन्द्रस्य मरुताञ्च पशुसम्बन्ध अगस्त्योवै मरुद्भ्यउक्ष्णः प्रौक्ष
दित्यादिकः ॥ १२ ॥

अथालम्भात् पुरा कस्यचिदुक्ष्णो रुद्रेणातियातः तस्योपाय
माह ॥

**यदि रुद्रोऽभिमन्येताग्नये रुद्रवते पुरोडाशमष्टाकपाल-
न्निरुप्याथान्यमालभेत ॥ १३ ॥**

यद्यदि किञ्चिदुक्षणे रुद्रेण रुद्रः पशुस्वामी अभिमन्येत
रोगोत्पादनेन प्रणाशयेत् सुज्ञानमन्यत् ॥ १३ ॥

अथ प्रमादादरपतनादिना अभूमावेव कश्चित् संशीर्य्येत तदा कथमिति तत्राह ।

यदि सञ्शीर्येत भौममेककपालं निरूप्याथान्यमालभेत ॥ १४ ॥

भौमो भूमिदेवताकः तस्य एकत्वादेककपालोयुक्तः ॥ १४ ॥

पोषार्थं मुक्तानां मध्ये यदि कश्चिदत्यन्तकृशःस्यात्तत्राह ।

यद्यवसीदेन्नैऋतञ्चरुन्निरूप्याथान्यमालभेत यद्यप्सु म्रियेतापोनप्त्रीयञ्चरुन्निरूप्याथान्यमालभेत यद्यन्धः स्यात् सौर्यं चरुन्निरूप्याथान्यमालभेत ॥ १५ ॥

सूर्य्यश्चक्षुरभिमानिदेवत्वात्तदीयोयुक्तः ॥ १५ ॥

त्वग्दोषश्शृङ्गाद्यङ्गयोरित्याह ।

यदि स्रवणो वा कूटोवा स्याद्बार्हस्पत्यञ्चरुन्निरूप्याथान्यमालभेत ॥ १६ ॥

स्रवणोरक्तवर्णो विड्द्वारः त्वग्दोषः कूटः शृङ्गहीनः ॥ १६ ॥

अथ कस्यचित्पलायमानमाह ।

यदि पलायेत वायव्यं चरुन्निरूप्याथान्यमालभेत ॥१७॥

पलायनस्य वायुनुग्रहाधीनत्वाद्वायव्यश्चरुर्युक्तः ॥ १७ ॥

अथ चौर्य्यादिभिः कस्यचिद्बलादपहारे आह ।

यदि प्रासहाजयेयुरिन्द्राय प्रसङ्कन एकादशकपालन्निरूप्याथान्यमालभेत ॥ १८ ॥

बलात्कारस्येन्द्राधीनत्वादैन्द्र एकादशकपालोयुक्तः ॥ १८ ॥

अथ रुद्रस्य व्यतिरेकेण मृत्युनैव यदि कश्चित् मृतः स्यात्तत्राह।

यद्यन्येन मृत्युना म्रियेत प्राजापत्यं द्वादशकपालन्निरूप्याथान्यमालभेत ॥ १९ ॥

मृत्योरिति प्रजापत्यधीनत्वात् प्रजापतेः संवत्सरात्मकत्वात् द्वादशमाससद्भावात् प्रजापतेस्तत्संख्याकपालः पुरोडाशो युक्तः ॥ १९ ॥

अथास्य सर्वसिद्धिसाधनत्वं प्रयोगद्वारेणोपपादयति।

एतेन वा एकया वा गान्दमो वेतस्वतीष्ट्वा सर्वामृद्धिमार्ध्नोत् ॥ २० ॥

एतेन खलु पञ्चरात्रेण एकया वा एक एव सहायः सन् मित्रशत्रुमित्रानित्येकया वा गान्दरेषां वाचं भूमिवादमयतीति गान्दमः वेतस्वति सद्गुवेतासुतीर्थविशेष इष्ट्वा सर्वामृद्धिं कृत्स्नां भूमिं स्वामित्वलक्षणामार्ध्नोत् प्राप्तवान् ॥ २० ॥

सर्वामृद्धिमृध्नोति य एवं वेद ॥ २१ ॥

स्पष्टं ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
चतुर्दशः खण्डः ॥

अथ पञ्चदशः खण्डः ।

अथान्तर्महाव्रतस्य पञ्चरात्रमाह ।

ज्योतिष्टोमोऽग्निष्टोमो गोरुक्थो महाव्रतं गोरुक्थ आयुरतिरात्रः ॥ १ ॥

सुगमं ॥ १ ॥

यन्महाव्रतं मध्यमहस्तत् प्रशंसितुमाह ।

संवत्सरो वै व्रतं तस्य वसन्त ऋतुर्मुखं ग्रीष्मश्च वर्षाश्च पक्षौ शरन्मध्यं हेमन्तः पुच्छं ॥ २ ॥

यन्महाव्रतमस्ति तत् संवत्सरो वै संवत्सरसत्रस्य गवामयनस्योत्पत्तिमाह तस्य महाव्रतस्य संवत्सररूपत्वमुक्तं अतः संवत्सरावयवैन महाव्रतावयवे योजयति ऋतुषु वसन्तस्य प्राधान्यात् अङ्गेषु मुखस्य प्राधान्यात् वसन्तस्य मुखकल्पनं ग्रीष्मवर्षयोः परस्परनियोगित्वेन पक्षद्वयकल्पना शरदः ऋतुषु मध्यमत्वात् मध्यत्वकल्पनं हेमन्तस्यान्तिमत्वात् पुच्छकल्पनं ॥ २ ॥

शरदो मध्यत्वे उपपत्तिं दर्शयति ।

तस्माच्छरदमोषधयोऽभिसंपच्यन्ते शरद्धि मध्यं संवत्सरस्य ॥ ३ ॥

यस्माच्छरत् महाव्रतस्य मध्यदेशः तस्माच्छरदमभिलक्ष्य ओषधयो व्रीहियवादयः पच्यन्ते यथापलिता भवेयुस्तथा क्रियन्ते

कृषीवलैः मध्यतोऽयनं धीयते अतः शरदि अन्नसिद्धिस्तस्य मध्य-देहकल्पनमिति प्रसिद्धिदर्शनार्थं एतत् प्रासङ्गिकं ॥ ३ ॥

अथास्मिन् पञ्चरात्रे महाव्रतमनुक्तमित्याक्षिपति ।

अकृतं वा एते कुर्वन्ति ये पुरा संवत्सरात् व्रतमुपयन्ति ॥ ४ ॥

महाव्रतस्य संवत्सरसत्र एवाभिप्रायेण सम्भवात् संवत्सरात्पुरा पञ्चरात्रे व्रतं महाव्रतं यदुपयन्ति अकृतकार्य्यमेव कुर्वन्ति अतो न युक्तमत्र महाव्रतमित्यर्थः । ४ ।

अथास्य परिहारमाह ।

एतद्वै व्रतमाप्तं यत्पञ्चरात्रे पञ्चह्यृतवः ॥ ५ ॥

अस्मिन् पञ्चरात्रे यद्व्रतमस्ति एतत् खलु आप्तं आप्तव्ययुक्तं व्रतं अतोऽकृतकरणन्न भवति अत्र ज्योतिष्टोमोऽग्निष्टोमो गोरूक्थो महाव्रतं गोरूक्थ आयुरतिरात्र एकाह क्रमा इति कल्पो द्रष्टव्यः कथमस्याप्तत्वमिति तद्दर्शयति पञ्चह्यृतव इति संवत्सरे हेमन्तशिशिरयोरैक्येन पञ्चर्तवः खलु अयमपि पञ्चरात्र अतः पञ्चत्वसंख्यासाम्यात् पञ्चरात्रस्य संवत्सरसत्रसदृशत्वात् आप्तमेव व्रतमित्यर्थः ॥ ५ ॥

उक्तार्थवेदनं प्रशंसति ।

आप्तेन व्रतेन स्तुते सर्वमायुरेति य एवं वेद ॥ ६ ॥

व्रतमिति प्राधान्यं न महाव्रताहर्गतानां राजनादिपञ्च

साम्नान्तत्सम्बन्धीनां तदाश्रयस्याङ्गोपि नामधेयं अतो यो व्रतस्यात्मत्वयुक्तरूपेण जानाति स आत्मनैतद्व्रतेनैव च स्तुते सर्वं सम्पूर्णं व्रतं संवत्सरलक्षणमायुश्चेति प्राप्नोति ।

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ६ ॥

इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरवुक्क-भूपालसाम्राज्यधुरन्धरेण सायणाचा-
र्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे

ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
पञ्चदशः खण्डः ।

एकविंशोध्यायः समाप्तिमगमत् ।

अथ द्वाविंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदायोवेदेभ्योखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ।
एकविंशे गर्गशेषस्तथा पञ्चत्रिरात्रकाः ।
षतूरात्राश्च चत्वारः पञ्चरात्रास्त्रयः क्रमात् ।
प्रोक्ता द्वाविंशकेऽध्याये षड्वात्राह्णथ वर्ण्यते ।

त्रयः षड्वात्राः तत्र प्रथमं प्रतिष्ठासाधनं ऋतूनां षड्वात्रमाह

पृष्ठ्यः षडहः ॥ १ ॥

ते च षडहाः कल्पकारः पृष्ठ्यः षडहः समूढो वा व्यूढोवेल्लु भावान् उभयोरन्यतरप्रकृतिकत्वं ॥ १ ॥

अथास्य ऋतुसम्बन्धं ब्रूवन् अधिकारिणमाह ।

ऋतवो न प्रत्यतिष्ठꣳस्त एतेन प्रत्यतिष्ठन् प्रतिष्ठाकामो यजेत प्रत्येव तिष्ठति ॥ २ ॥

स्पष्टोर्थः ॥ २ ॥

पुनः प्रकारान्तरेण प्रशंसति ।

षड्वा ऋतव ऋतुष्वेवैतेन प्रतितिष्ठति पृष्ठ्यः षडहो भवति प्रत्यक्षमृध्यै ॥ ३ ॥

यस्मिन् षडहे रथन्तरादि रैवतान्तं पृष्ठानि क्रमेण होतुः पृष्ठानि स्युः स पृष्ठ्यः षडहः स चेतरक्रतुवदतिशयफलत्वाभावात् प्रत्यक्षसमृध्या एव भवति ॥ ३ ॥

अस्य कथं प्रत्यक्षर्द्धिहेतुत्वमिति तत्राह।

प्रत्यक्षं ह्येतेनर्त्तव आर्ध्नुवन्नृध्या एव ॥ ४ ॥

एतेन पृष्ठषडहेन ऋतवः खलु प्रत्यक्षमिदानीं दृश्यमानप्रकारेण शाखोचितपुष्पफलादिलक्षणेनार्ध्नुवन् अतोयमृध्या एव भवति कल्पः पृष्ठ्यः षडहः समूढो वा शव्यूढो वा समूढस्त्वेव तस्योपास्मै गायतानर उपोषु जातमप्तुरः पवमानस्यते कव इति प्रथमस्याह्नोवहिष्पवमानमोदलमासितं त्वाष्ट्रीमामित्यादिकः कल्पो द्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

अथोपरिष्टात् त्रिकद्रुकाख्यं द्वितीयं षड्रात्रमाह।

त्रिवृदग्निष्टोमः पञ्चदशउक्थः सप्तदशउक्थो ज्योतिर्गौरायुरतिरात्रः ॥ १ ॥

ज्योतिरादय ऐकाहिका द्रष्टव्याः ॥ १ ॥

अथास्मिन्नधिकारिणमाह ।

यः कामयेत सर्वमायुरियामिति स एतेन यजेत ॥ २ ॥

स्पष्टं ॥ २ ॥

पूर्वन्त्र्यहः प्रशंसति ।

यत्त्र्यहः पुरस्ताद्भवति त्रयः प्राणापानव्यानास्त एव तत्सन्धीयन्ते ॥ ३ ॥

यद्यदि त्रिवृत्पञ्चदशसप्तदशस्तोमात्मकस्त्र्यहः षडहस्य पुरस्ताद्भवति प्राणापानव्यानात्मकाः प्राणा अपि तेन त्र्यहेन त एव प्राणादयः सन्धीयन्ते संयोजिता भवन्ति ॥ ३ ॥

उत्तरं त्र्यहं प्रशंसति ।

अथ यत् ज्योतिर्गौरायुरतिरात्रो भवति प्रतिष्ठित्यै ॥ ४ ॥

स्पष्टः तत्रैष एव त्र्यहो यद्वृतनां यथाव्यूह इत्यादिकः कल्पो द्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथाभ्यासंग्याख्यं तृतीयं षड्रात्रमाह ।

अभ्यासंग्यः पञ्चाहोविश्वजिदतिरात्रः ॥ १ ॥

आदौ पञ्चाहो द्वे त्रिवृती सवने पञ्चदशमेकं द्वे पञ्चदशे

सवने सप्तदशमेकं द्वे सप्तदशे सवने एकविंशमेकमित्याद्यभ्यासयः क्रमेनानुष्ठेयः षष्ठमहर्विश्वजिदतिरात्र कर्त्तव्यः ॥ १॥

अथ तं षड्रात्रक्रतुं सत्रात्मना स्तोतुं सत्रपक्षयोः फलवैलक्षण्यं दर्शयति ।

अन्यस्मै वै कामाय सत्रमन्यस्मै यज्ञो न तत्सत्रेणाप्नोति यस्मैकं यज्ञेन तद्यज्ञेनाप्नोति यस्मैकꣳ सत्रं ॥ २ ॥

अन्यस्मै कामाय खलु सत्रमनुष्ठीयते तथा यज्ञोपि तदेव सृष्टयति यस्मैकं यस्मै फलाय स्वर्गादिलक्षणाय वै यज्ञो ज्योतिष्टोमादिरनुष्ठीयते तदेव फलं सत्रेणाप्नोति फलस्य प्रतिनियतत्वात् सत्रेण यत्तत् फलं यज्ञेनाप्नोति उभयत्र कमित्यनर्थको यस्मैकं युनेन च्छाकयमित्यादिवत् ॥२॥

अस्त्वेवमुभयोः फलवैलक्षण्यं प्रकृते किमागतमित्याह ॥

सत्रमिव वा एतद्यदनुलोमं पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिꣳस्तदोजोवीर्य्यन्दधाति ॥ ३ ॥

अनुलोमं षड़हःसु क्रमेण रथन्तरं बृहदित्येवं पृष्ठानि यद्यदि स्युः एतत्सत्रमिववै सत्वत्या खलु गव्यादिसत्रे क्रमेण दृष्टानां सम्भवात् एवं सति यद्यदि एकधैव पृष्ठानि षडपि भवन्ति अस्मिन् यजमानेप्येकधैव तेजोदधाति प्रयोक्ता ॥ ३ ॥

अन्नं पष्ठान्यन्नाद्यमेवास्मिन्दधाति ॥ ४ ॥

पृष्ठानां षट्संख्याकत्वात् अन्नस्यापि षट् सामात्मकत्वात्

षट्रात्रप्रभवत्वाच्च पृष्ठान्यन्नमित्युपचर्य्यते अतः पृष्ठप्रयोगात् तानि यजमाने अदनीयं व्रीह्याद्यन्नमेव स्थापयति ॥ ४ ॥

अथ तानि पशुसाधनत्वेन प्रशंसति ।

पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठति ॥ ५ ॥

स्पष्टं । स्पृशतेरिति निरुक्तात् पृष्ठानि यथा ऋतुषु प्रकाशितानि एवं पशूनामपि सर्वैः स्पर्शनीयत्वात् पृष्ठानि पशव इति व्यपदेशः ॥ ५ ॥

अथादितः पञ्चाहस्य यदभ्यासङ्गित्वं तत् प्रशंसति ॥

अभ्यासंग्यः पञ्चाहो भवति सन्तत्यै ॥ ६ ॥

पूर्वमहर्येन स्तोमेन समापितं तेनैव स्तोमेनाहरन्तरस्याप्युपक्रमादह्नां सान्तत्यं ॥ ६ ॥

अथान्त्यस्याह्नो विश्वजिदतिरात्रत्वं प्रशंसति ॥

विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥ ७ ॥

स्पष्टं । एष एव पञ्चाहो यः ऋतूनां समूढोभ्यासङ्गः इत्यादिकः कल्पो द्रष्टव्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
तृतीयः खण्डः ॥

अथ चतुर्थः खण्डः ।

अथ सप्त सप्तरात्राः तत्र प्रथमं सप्तर्षीणां सप्तरात्रं समृद्धिफलसाधनं वा यज्ञमाह ॥

पृष्ठः षडहोमहाव्रतमतिरात्रः ॥ १ ॥

स्पष्टं। महाव्रतस्यैकाहिकः ॥ १ ॥

अथास्य सप्तर्षिसम्बन्धं समृद्धिफलसाधनं यज्ञं चाह ॥

सप्तऋषय एतेनार्ध्नुवꣳ स्तेनर्द्धिस्तस्मादेतेन यजन्त-ऋद्धया एव ॥ २ ॥

एतेन सप्तरात्रेणार्ध्नुवन् पुत्रपश्वादिभिरत्यन्तसमृद्धा अभवन् तस्मादेतेन ऋद्धा एव यजन्ते एकः द्वौ बहव इति बहूनामप्यधिकारे सम्भवाद्यजन्त इति बहुवचनं यजेरन्नित्यर्थः ॥ २ ॥

अथैतमहर्गतसप्तसंख्याद्वारेण प्रशंसति।

सप्त शिरसि प्राणाः प्राणाइन्द्रियाणीन्द्रियाण्येवैतेनाप्नोति ॥ ३ ॥

शिरसि चक्षुरादि सप्तच्छिद्रगतानि सप्त इन्द्रियानि प्राणसंवादे प्राणस्यैव इह धारकत्वात् प्रशस्तत्वेनेन्द्रियाण्यपदेशे प्राणव्यपदेशं लभन्ते इतीन्द्रियाणि प्राणाइत्युच्यन्ते तदेवाह प्राणा इन्द्रियाणीति प्राणाः प्राणव्यपदेशात्पूर्वं स्वरूपेणेन्द्रियाणीत्यर्थः अत एतेन सप्तरात्रेण इन्द्रियाण्याप्नोति चक्षुरादिपाटवन्नयतीति ॥ ३ ॥

पुनः सप्तसंख्याद्वारेण प्रशंसति।

सप्त ग्राम्याः पशवस्तानेतेनाप्नोति ॥ ४ ॥

ग्राम्याः पशवो गवाश्वादयः ॥ ४ ॥

सप्तमस्याह्नोऽयन्महाव्रतपृष्ठत्वं तत् प्रशंसति ।

व्रतꣳ सप्तमस्याह्नः पृष्ठं भवति तद्ध्यन्नाद्यमन्नं वै व्रत-मन्नाद्यमेवैतेनाप्नोति ॥ ५ ॥

व्रतं महाव्रतं सप्तमस्याह्नः पृष्ठं भवति तद्धि अन्नाद्यं सर्वेष्वेव प्राचुर्येण सम्भवात् किं च महाव्रतमन्नं वै अन्नमेव तत्साधनत्वात् अतएव तत् पृष्ठकरणेनादनीयमन्नमाप्नोति ॥ ५ ॥

अथ महाव्रतातिरात्रमतिरिक्तमहःषट्कं प्रशंसति ।

पृष्ठः षडहो भवति प्रत्यक्षमृध्यै ॥ ६ ॥

यत्र प्रयोगलक्षणं समृध्युपभ्रंशेन जायते केवलमृद्धिकामो यजेतेत्येवं स्तूयते स परोक्षसमृद्धिः ॥ ६ ॥

ऋद्धेः प्रत्यक्षत्वमेव दर्शयति ।

प्रत्यक्षꣳह्येतेन सप्त ऋषय आर्ध्नुवन्नृद्ध्याएव ॥ ७ ॥

अत एष एव षडहोयः ऋतूनां समूढो वा व्यूढो वा समूढस्त्वे दैकाहिकं महाव्रतं तस्य ज्योतिष्टोमोतिरात्रः षोडशिमानिति कल्पो द्रष्टव्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ प्रजापतेः सप्तरात्राख्यं प्रजादिफलसाधनकं द्वितीयं सप्तरात्रमाह ।

पृष्ठः षडहः सप्तदश महाव्रतमतिरात्रः ॥ १ ॥

षडहः स्पष्टः । सप्तदशस्तोमकमतिरात्रसंस्थम्महाव्रतं प्रथमं भवति ॥ १ ॥

अथान्तिमस्याह्नः शिर आद्यङ्गस्य स्तोमव्यवस्थामाह ।

तस्य त्रिवृच्छिरः पञ्चदशौ पक्षौ सप्तदश आत्मैक-विंशं पुच्छं ॥ २ ॥

महाव्रतस्तोत्रस्य शिरसः अवयवास्त्रिवृदादिस्तोमकाः कर्त्त-व्याः ॥ २ ॥

अथैतस्य प्रजापतेः सृष्टिसाधनत्वेन प्रजासृष्टिसाधनत्वमि-त्याह ।

एतेन वै प्रजापतिः प्रजा असृजत ॥ ३ ॥

सुगमं ॥ ३ ॥

उक्तार्थञ्च प्रशंसति ।

प्र प्रजया प्र पशुभिर्जायते य एवं वेद ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

अथास्याह्नः आत्मभागस्य यत् सप्तदशस्तोमत्वं तदनूद्य प्रशं-सति ।

सप्तदशो वै प्रजापतिर्यत् सप्तदशं व्रतं भवति प्रजापति-मेवाप्नोति ॥ ५ ॥

प्रजापतेः सप्तदशं असकृदुक्तं ॥ ५ ॥

अथ शिरोभागस्य त्रिवृत्त्वं प्रशंसति ।

यत् त्रिवृच्छिरो भवति नव प्राणाः प्राणेष्वेव प्रतितिष्ठति ॥ ६ ॥

त्रिवृत्स्तोमस्तोत्रीया नवकात्मकाः प्राणा अपि शीर्षण्याः सप्त द्वाववाञ्चाविति नव अतस्त्रिवृत्करणेन प्राणेष्वेव प्रतितिष्ठति ॥ ६ ॥

अथ पक्षयोः पञ्चदशत्वं प्रशंसति ।

यत्पञ्चदशौ पक्षौ सवीवधत्वाय ॥ ७ ॥

वीवधइत्युभयतो भारयुक्तः स्कन्धेनोह्यः काष्ठविशेषः स यथा समभारो भवति तद्वदुभयपक्षयोः पञ्चदशत्वे वैषम्याभावात् सवीवधता भवति ॥ ७ ॥

अथात्मभागस्य सप्तदशत्वं प्रशंसति ।

सप्तदश आत्मा भवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

अथ यः पुच्छभागस्यैकविंशत्वं तत् प्रशंसति ॥

एकविंशं पुच्छं भवति प्रतिष्ठित्यै ॥ ९ ॥

प्रजापतेः पादत उत्पन्नत्वात् सप्त प्रकृतिभूतोग्निष्टोमः समा

त्रिसाधनत्वाच्च एकविंशस्तोमानां प्रतिष्ठा पुच्छभागस्य प्रतिष्ठित्वे पक्षिणां पुच्छयोः प्रतिष्ठात्वं प्रसिद्धं अत एष एव षडहोयः ऋतूनां समूढो वा व्यूढोवा समूढस्त्वेव सप्तदशं व्रतं तस्योपास्मै गायतानरः पवस्व वाचो अग्रियोदविद्युतत्याकृचेत्यादिकः कल्पो द्रष्टव्यः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

अथ छन्दोमपवमानाख्यं पशुफलं तृतीयं सप्तरात्रमाह।

षष्ठः षडहश्छन्दोमपवमानं महाव्रतमतिरात्रः ॥ १ ॥

षडहः स्पष्टः। छन्दोमपवमानमिति अस्य चतुर्विंशं बहिष्पवमानं चतुश्चत्वारिंशो माध्यन्दिनः पवमानोऽष्टाचत्वारिंश आर्भवः कर्त्तव्यः तदेव महाव्रतमिति प्रथमसप्तरात्रमहाव्रतं तदेवं तदेवातिरात्रमहः अग्निष्टोमपर्यन्तान्यावृत्तिस्तोत्राणि उक्थानि पञ्चविंशस्तोत्राणि पञ्चदशोरात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

अस्याधिकारिणमाह।

पशुकामोयजेत ॥ २ ॥

स्पष्टं ॥ २ ॥

कथमस्य पशुसाधनत्वं तदाह।

पशवो वै छन्दोमाः ॥ ३ ॥

छन्दोमानां चतुर्विंशादीनां गायत्र्याद्यक्षरसंख्यासाम्यात्तेषां च छन्दांसि पशुष्वाजिमयुरिति श्रुतेः छन्दोमाः पशवः ॥ ३ ॥

अस्त्वेवं किमत इति अत आह ।

यच्छन्दोमाः पवमाना महाव्रतस्य भवन्ति पशूने-वावरुन्धे ॥ ४ ॥

स्पष्टं ॥ ४ ॥

अथान्यपवमानानामन्येषां स्तोत्राणां च यत् स्तोमद्वैविध्य-मस्ति तत् प्रशंसति ।

उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनन्तस्मान्मिथु-नात् प्रजायते ॥ ५ ॥

गतं । अत्र एष एव षड़हीयः ऋतूनां समूढो वा व्यूढोवा समूढस्त्वेव छन्दोमपवमानं व्रतं तस्य पवमानस्य ते वयमिति चतुर्ऋचस्य लोके तृचंव्यपरिवहति सत्रासाहीयजरावोधीय इत्यादिकः कल्पोद्रष्टव्यः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य षष्ठः खण्डः ॥

अथ सप्तमः खण्डः ।

अथ पुष्टिसाधनं जामदग्न्यं चतुर्थसप्तरात्रमाह ।

अभ्यासंग्यः पञ्चाहोऽथ त्रयस्त्रिंशमहस्तस्य चतुस्त्रिंशोऽग्निष्टोमः सप्तदशं महाव्रतमतिरात्रस्तस्य चतुर्विंशं बहिष्पवमानं त्रिवृच्छिरः पञ्चदशौ पक्षौ सप्तदश आत्मैकविंशं पुच्छं ॥ १ ॥

द्वे त्रिवृती सवने पञ्चदशं तृतीयसवनमित्याद्युक्तलक्षण आदावभ्यासंग्यः पञ्चाहः पूर्ववत् अथ षष्ठमहः कृत्स्नमपि त्रयस्त्रिंशस्तोमकं तस्याग्निष्टोमश्चतुस्त्रिंशः अथ सप्तममहः सप्तदशस्तोमकं महाव्रतमतिरात्रसंस्थं चतुर्विंशं बहिष्पवमानं भवति महाव्रतस्य तस्य पृष्ठविभागः प्रजापतेः सप्तरात्रवदवगन्तव्यः ॥ १ ॥

अथास्य जमदग्निसम्बन्धद्वारेण पुष्टिसाधनमाह।

एतेन वै जमदग्निः सर्वान् पोषानपुष्यत्सर्वानेवैतेन पोषान्पुष्यति ॥ २ ॥

अनेन सर्वविषयकामोऽधिकार्युक्तं भवति ॥ २ ॥

आदितः पञ्चाहं प्रशंसति।

यदभ्यासंग्यः पञ्चाहः पुरस्ताद्भवति सन्तत्या एव ॥ ३ ॥

अभ्यासङ्ग्यस्याह्नः सन्ततिप्रकारः पूर्वमेव प्रदर्शितः ॥ ३ ॥

अथ षष्ठस्याह्नो यत् त्रयस्त्रिंशस्तोमकत्वं तदनूद्य प्रशंसति।

अथैतत्त्रयस्त्रिंशमहस्त्रयस्त्रिंशद्देवता देवता एवाप्नोति ॥ ४ ॥

अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्-कारश्चेति त्रयस्त्रिंशद्देवताः ॥ ४ ॥

अथ तस्यैवाह्नोऽग्निष्टोमसाम्नो यच्चतुस्त्रिंशत्त्वं तत् प्रशंसति।

तस्य चतुस्त्रिꣳशोऽग्निष्टोमः प्रजापतिश्चतुस्त्रिꣳशो देवतानां प्रजापतिमेवाप्नोति ॥ ५ ॥

यद्यपि त्रयस्त्रिंशमध्ये एकः प्रजापतिरपि गतः तथापि व्यष्टि-समष्टिभेदेन प्रजापतेस्त्रयस्त्रिंशद्देवताः समात्मकत्वाच्चतुस्त्रिंशत्त्वं अथ वा ये देवाः तदित्येकादशस्थ पृथिव्यामधीत्यादिमन्त्रवर्णात् पृथिव्यादिस्थानत्रयवासिनस्तत्रस्त्रिंशद्देवाः तदपेक्षया प्रजापति श्चतुस्त्रिंश इत्यवगन्तव्यं ॥ ५ ॥

अथान्तिमस्याह्नो वहिष्पवमानगतां स्तोमसंख्यां प्रशंसति।

चतुर्विꣳशं वहिष्पवमानं भवति महाव्रतस्य चतुर्विꣳशत्यक्षरा गायत्री प्रजननं गायत्री प्रजात्यै ॥ ६ ॥

स्पष्टं। एते असृग्रमिति गायत्र्याः सकाशात् देवादिकृत्स्नजगदुत्पत्तेः गायत्र्याः प्रजननसाधनत्वं यद्वा सर्व्वच्छन्दसामादिभूतत्वेनास्या एव चतुश्चतुरक्षराधिकेन पृथक्पृथगुत्तरोत्तरच्छन्दसामुत्पत्तेर्गायत्र्याः प्रजननत्वं ॥ ६ ॥

उभये स्तोमा युग्मंतश्चायुजश्च तन्मिथुनं तस्मान् मिथुनात् प्रजायते ॥ ७ ॥

स्पष्टं ॥ ७ ॥

अथान्यस्याङ्गः पवमानानामितरस्तोत्राणां च यत् युग्मायुग्मस्तोमकत्वं तत् प्रशंसति ।

यत्त्रिवृच्छिरो भवति नव प्राणाः प्राणेष्वेव प्रतितिष्ठति यत् पञ्चदशौ पक्षौ सवीवधत्वाय सप्तदश आत्मा भवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोत्येकविंश पुच्छं भवति प्रतिष्ठित्यै ॥ ८ ॥

स्पष्टोऽर्थः । अत्र एष एव षडहो यः ऋतूनां समूढो वा व्यूढो वा समूढस्त्वेव तस्यैवाभ्यामङ्गः पञ्चाहो यथा पृष्ठावलंवश्चतुर्थस्याह्न एवैकविंशः षोड़शी पञ्चमस्याह्नः पार्थिवस्य लोकस्य आक्रमणमित्यादिकः कल्पोद्रष्टव्यः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे द्वादशाध्यायस्य

सप्तमः खण्ड ॥

अथ अष्टमः खण्डः ।

अथ प्रजापतेरवधानमेन्द्रं पञ्चमं सप्तरात्रमाह ।

ज्योतिष्टोमोग्निष्टोमो गौरुक्थ आयुरुक्थोभिजिदग्निष्टोमोविश्वजिदग्निष्टोमः सर्वजिदग्निष्टोमः सर्वस्तोमोतिरात्रः ॥ १ ॥

त्रिकद्रुकाः अभिजिद्विश्वजितौ पञ्चमाहः स्पष्टः महाव्रतमेकाहः सर्व्वजित् षष्ठमहः सर्व्वस्तोमातिरात्रः सप्तममहः ॥१॥

अथास्य फलं सार्थवादमाह।

एतेन वा इन्द्रोऽत्यन्या देवता अभवदत्यन्या प्रजा भवति य एवं वेद ॥ २ ॥

स्पष्टं ॥ २ ॥

आद्यमहः प्रशंसति ॥

यत् ज्योतिर्गौरायुस्त्र्यहः पुरस्ताद्भवति प्रज्ञातान् स्तोमानुपैतीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठति ॥ ३ ॥

प्रज्ञातान् स्तोमान् त्रिवृदादिकानित्यर्थः किं तदिमानेव लोकानुपैति अयं वै लोकोज्योतिरन्तरिक्षं गौरसौ लोक आयुरिति ज्योतिरादीनां भूरादिलोकात्मकत्वात् ज्योतिराद्यनुष्ठाता एषु त्रिषु लोकेष्वपि क्रमेण प्रतिष्ठितो भवति ॥ ३ ॥

अथाभिजिद्विश्वजित्सर्वजिताख्यानि त्रीण्यहानि प्रशंसति।

अथाभिजिदभिजिता वै देवा इमान् लोकानभ्यजयन्विश्वजिता विश्वमजयन् सर्वजिता सर्वमजयन् ॥ ४ ॥

अत इदानीन्तनानामप्येतान्यहानि तज्जयाय भवन्तीत्यर्थः ॥ ४ ॥

अन्त्यमहः प्रशंसति।

सर्व्वस्तोमोतिरात्रो भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयति ॥ ५ ॥

स्पष्टोऽर्थः, अत्र कल्पः, ज्योतिष्टोमोग्निष्टोमः प्रथममितरौ द्वावुक्थौ विश्वजिन्महाव्रतं विश्वजिदग्निष्टोमः सर्वस्तोमोतिरात्र एकाहक्रमा इति ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथान्नाद्यकामं जनकसप्तरात्रं षष्ठं यज्ञमाह ।

चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानि विश्वजिन्महाव्रतं ज्योतिष्टोमोतिरात्रः ॥ १ ॥

तच्चत्वार्यहानि त्रिवृन्त्यग्निष्टोममुखानि अग्निष्टोमः प्रथममितरे त्रय उक्थो विश्वजिन्महाव्रतं चाग्निष्टोमोतिरात्रस्तूत्तममहः ॥ १ ॥

अथास्य फलं सप्रयोजनमाह ।

एतेन वै प्रजापतिः पुरुषमसृजत ससर्वस्यान्नाद्यस्याधिपत्यमगच्छत् ॥ २ ॥

प्रजापतिः सर्वस्य जनकः पुरुषं विराडाख्यं असृजत स्पष्टमन्यत् अनेनान्नाद्यकामोधिकारीत्युक्तं भवति ॥ २ ॥

उक्तार्थवेदनं प्रशंसति ।

सर्वस्यान्नाद्यस्याधिपत्यङ्गच्छति य एवं वेद ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथैतत् क्रतुम् सप्तरात्रं पुरुषजनकमित्युक्तं तत्राद्यश्चतुरहः शिरस्थानीयो विश्वजिन्मध्यस्थानीय इति प्रशंसति ।

शिरोवा अग्रे सम्भवतः सम्भवति चतुर्द्धा विहितं वै शिरः प्राणश्चक्षुः श्रोत्रं वागात्मा वै पृष्ठानि यत्पृष्ठान्युपैति शिरएवात्मानमनुसन्दधाति ॥ ४ ॥

सर्वे प्राणिनः प्राणेन शिरःप्रमुखा एवोत्पद्यन्ते अतः शिरसः प्रथमं सम्भवतः स्वस्य चक्षुः श्रोत्रं वाक्त्वगभेदेन चतुर्द्धाविहितत्वा दङ्गाश्च चतुष्टयस्तेषां त्रिवृत्स्तोमकत्वान्नवकपालं शिरसि यदस्य चतुरहः पुरुषशिरःस्थानीयः विश्वजिति तस्य सर्वपृष्ठाश्रयस्य मध्यमत्वेनात्मस्थानीयत्वाच्चतुरहानन्तरं विश्वजित् प्रयोक्ता आत्मानम्मध्यदेहं शिरशानुसंयोजितवान् भवति ॥ ४ ॥

अथ महाव्रतं उत्पन्नस्य पञ्चरात्रात्मकपुरुषस्यान्नत्वेन प्रशंसति ।

एतद्वै पुरुषमकस्तस्मा अन्नमेव व्रतमपिदधाति ॥ ५ ॥

एतत् खलु पञ्चरात्रं पुरुषं कृतवान् तस्मात्पञ्चरात्रादनन्तरं महाव्रतप्रयोक्ता पुरुषेऽन्नमेव स्थापितवान् भवति ॥ ५ ॥

अथोत्पन्नज्योतिष्टोमातिरात्रं उत्पन्नस्य पुरुषस्यान्नव्यतिरिक्तसर्वभोगस्थानीयमिति प्रशंसति ।

अथ यत् ज्योतिष्टोमोतिरात्रोभवत्यक्लृप्तस्य क्लृप्त्यै ॥६॥

अथ कल्पः, या देवानां पञ्चरात्रस्य प्रथमा सा जनकसप्तरात्रस्यान्यभ्यासक्ता द्वितीयस्याह्नः स्तोत्रीयानुरूपौ पर्य्यासौ वृषापवस्व धारयेति गायत्रं हाविष्मतमाजिगन्त एकर्चाः पुनानः सोमधारयेति त्रिस्त्रिणिधनमयास्यमित्यादिकः कल्पोद्रष्टव्यः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य

नवमः खण्ड ।

अथ दशमः खण्डः ।

अथान्नाद्यफलसाधनपृष्ठस्तोमाख्यं सप्तरात्रं सप्तममाह ।

पृष्ठ्यः स्तोमः षडहोविश्वजिदतिरात्रः ॥ १ ॥

बृहद्रथन्तरपृष्ठ्यः षडहः अतिरात्रसंस्थो विश्वजित्सप्तमहः ॥ १ ॥

अथैतदितरवैलक्षण्येनानुलोम्यपृष्ठत्वेन सत्त्ववान् भवतीति प्रशंसति ।

अन्यस्मै वै कामाय सत्रमन्यस्मै यज्ञोन तत्सत्रेणाप्नोति यस्मैकं यज्ञोन तद्यज्ञेनाप्नोति यस्मैकं सत्रꣳ सत्रमिव वा एतद्यदनुलोमं पृष्ठानि यदेकधा पृष्ठानि भवत्येकधैवास्मिꣳस्तदोजोवीर्य्यं दधात्यन्नं पृष्ठान्यन्नाद्यमेवास्मिन् दधाति पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठति ॥ २ ॥

अथाभ्यासङ्गयषड्रात्रं पूर्व्ववद्व्याख्येयं ॥ २ ॥

उक्तेषु षट्सु सप्तरात्रेषु प्रत्यक्षं महाव्रतमस्ति अत्र तु विश्वजि-दतिरात्र एव स एव परोक्षं महाव्रतमहरिति प्रशंसितुमाह।

यद्वै मनुष्याणां प्रत्यक्षन्तद्देवानां परोक्षमथ यन्मनुष्या-णां परोक्षन्तद्देवानां प्रत्यक्षं ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

किमत इति चेत्तदुच्यते।

एतद्वै परोक्षं व्रतं यद्विश्वजित् प्रत्यक्षमेवैतेनान्नाद्यम-वरुन्धे ॥ ४ ॥

अस्माकं प्रत्यक्षेण महाव्रतमुक्तं प्रत्यक्षं विश्वजिदतिरात्रं अहर्य्यदस्ति तद्देवानां व्रतं परोक्षमेव अतो यद्देवानां परोक्षं महाव्रतं तस्य महाव्रतस्य सर्वत्रान्नरूपेण स्तुतित्वेन प्रयोक्तापि प्रत्यक्षमन्नाद्यमवरुन्धे प्राप्नोति विश्वजिन्महाव्रतयोरुभयोरपि नानाविधानां बहूनां स्तोत्राणां सम्भवाद्विश्वजिदेव महाव्रत-मित्युपचारः अथैष एव षडहीय ऋतूनां समूढोभ्यासङ्गो बृहद्रथ-न्तरपृष्ठश्चतुर्थस्याङ्गः प्रत्यस्मै पिपीषत इति गौरीवितमित्यादि कल्पोद्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य

दशमः खण्डः ॥

अथ एकादशः खण्डः।

अथ देवत्वप्राप्तिसाधनमष्टरात्रमाह।

पृष्ठः षडहोमहाव्रतं ज्योतिष्टोमोतिरात्रः॥ १॥

महाव्रतमग्निष्टोमः अतिरात्रः षोड़शिमान् स्पष्टमन्यत् ॥१॥

अस्य फलं सप्रयोजनमाह।

एतेन वै देवा देवत्वमगच्छन्॥ २॥

इदानीन्तनेनापि देवत्वप्राप्तिकामेनैतत् कर्त्तव्यमित्युक्तं भवति॥ २॥

उक्तार्थेत्तं प्रशंसति।

देवत्वं गच्छति य एवं वेद॥ ३॥

स्पष्टोऽर्थः॥ ३॥

अथ महाव्रतस्य यदग्निष्टोमसंस्थात्मकत्वं तत् प्रशंसति।

एतद्वै व्रतमाप्तं यदष्टरात्रेऽग्निष्टोमोह्रि व्रतꣳसम्पद्यते॥ ४॥

अस्मिन् अष्टरात्रे यन्महाव्रतमस्ति देवैः प्राप्तं महाव्रतं आप्तत्वमेव दर्शयति अग्निष्टोमरूपं संस्थं खलु महाव्रतरूपं सम्पद्यते एतद्वै व्रतस्याप्तत्वं स्वकीयाग्निष्टोमसंस्थानतिक्रमणात्॥ ४॥

अथान्त्याज्ज्योतिरात्रसंस्थत्वं प्रशंसति।

अथ यत् ज्योतिष्टोमोतिरात्रो भवत्यक्तप्तस्य कॢप्त्यै॥५॥

अथ यत् ज्योतिष्टोमसंस्थः क्लृप्तः तमकृत्वातिरात्रसंस्थः कर्त्तव्यः तच्च करणं अक्लृप्तस्य फलविशेषस्य क्लृप्त्यै भवति ॥ ५ ॥

एवं स्तुत्वा सर्वाप्त्यै स्तौति ।

अष्टरात्रेण वै देवाः सर्वमाश्नुवत ॥ ६ ॥

स्पष्टं । यद्वा अष्टरात्रे याष्टत्वसंख्यास्ति तद्द्वारेणास्य स्तुति द्रष्टव्या अश्नोतेर्हि अष्टन्निति अष्टनवत्यर्थे अष्टनशब्दस्य व्याप्तिवचनः अतस्तत्संख्योपेतेनाष्टशब्दस्य व्याप्तुतोक्तं ॥ ६ ॥

उक्तार्थज्ञं प्रशंसति ।

सर्वमश्नुते य एवं वेद ॥ ७ ॥

अस्य कल्पः । एष एव षडहोय ऋतूनां समूढो वा व्यूढो वा समूढस्त्वे वैकाहिकं व्रतं ज्योतिष्टोमोतिरात्रः षोडशिक इति ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

उक्तोष्टरात्रः, द्वौ नवरात्रौ, तत्र शतायुष्यसाधनं प्रथमं देवानान्नवरात्रमाह ।

पृष्ठ्यः षडहोज्योतिर्गौरायुरतिरात्रो देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावंस्तेभ्य एतेन नवरात्रेणामृतत्वं प्रायच्छत् ॥ १ ॥

अतोऽमृतत्वकाम्यधिकारीत्युक्तं भवति ॥ १ ॥

ननु सर्वत्र शक्यमेव फलं काम्यं अत्र त्वमृतकामानां फलं देवानां युक्तं न मनुष्याणामित्याशंक्य मनुष्योचितममृतत्वं दर्शयति ।

एतद्वाव मनुष्यस्यामृतत्वं यत् सर्वमायुरेति वसीयान् भवति ॥ २ ॥

यत् सर्वं शतवर्षलक्षणमायुरिति एतदेव खलु मनुष्यस्यामृतत्वं नाम न केवलं सर्वमायुःप्राप्तिरेवामृतत्वं किन्तु जीवनकालेपि वसीयस्त्वं श्रेष्ठत्वमपि सर्वश्रेष्ठो भूत्वा शतवर्षजीवनमेव मनुष्यस्यामृतत्वमित्यर्थः ॥ २ ॥

अथोक्तार्थज्ञानं प्रशंसति ।

सर्वमायुरेति वसीयान् भवति य एवं वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

नवरात्रो वा एष नव प्राणाः प्राणेष्वेव प्रतितिष्ठति ॥ ४ ॥

सुगमं ॥ ४ ॥

पृष्ठ्यः षडहो भवति प्रत्यक्षमृद्ध्या अथ यत् ज्योतिर्गौरायुरतिरात्रो भवति प्रतिष्ठित्यै ॥ ५ ॥

अथास्य कल्पः । एष एव षडहोय ऋतूनां समूढो वा व्यूढो वा समूढस्त्वेव ज्योतिर्गौरायुरतिरात्र एकाहक्लृप्त्या इति ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
द्वादशः खण्डः ॥

अथ त्रयोदशः खण्डः ।

अथ पशुसाधनं द्वितीयन्नवरात्रमाह ।

ज्योतिष्टोमोग्निष्टोमो गौरुक्थ आयुरुक्थोभ्यासंग्यः पञ्चाहो विश्वजिदतिरात्रः पशुकामोयजेत ॥ १ ॥

प्रथमं त्रिकद्रुकाः, तत्र ज्योतिष्टोमोग्निष्टोमसंस्थोगो आयुषी उकथसंस्थे अभ्यासंग्यः पञ्चाहलक्षणं द्वे त्रिवृती सवने पञ्चदशमेक-मित्यादिकमसकृद्दर्शितं अतिरात्रसंस्थो विश्वजिन्नवमम्हः ॥१॥

प्रथमं त्रिरात्रं प्रशंसति ।

यत् ज्योतिर्गौरायुस्त्र्यहः पुरस्ताद्भवति प्रज्ञातान् स्तोमानुपैतीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठति ॥ २ ॥

एतेषां प्रकृतौ क्रमस्तोमत्वात् प्रज्ञातान् स्तोमत्वं ॥२॥

अथ सवनेन्तराभाविनं पञ्चाहं प्रशंसति ।

अथ यदभ्यासंग्यः पञ्चाहोमध्यतो भवति पाङ्क्तः-पुरुषः पाङ्क्ताः पशवस्तेन पुरुषं च पशूंश्चाप्नोति ॥ ३ ॥

पुरुषस्य पशूनाञ्च पञ्चसंख्यायोगोभ्यासंग्यः पञ्चरात्रे दर्शितः ॥ ३ ॥

अथान्त्यमहः प्रशंसति ।

विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥ ४ ॥

स्पष्टं । अस्य कल्पः, ज्योतिष्टोमोऽग्निष्टोमो गौरुकथ्य आयुरुक्थ्यस्तस्यायुषः पुरोजितीवो अन्धस इति श्यावाश्वमेकस्यामान्धीगवमेकस्यामाकूपारमेकस्यां बृहत्तिसृषु बृहन्निधनं वा आर्कजम्भं पृष्ठावलम्बस्य पञ्चाहो विश्वजिदतिरात्र इति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
त्रयोदशः खण्डः

अथ चतुर्दशः खण्डः ।

अथ चत्वारो दशरात्राः । तत्र त्रिकद्रुकाख्यं प्रथमं दशरात्रमाह ।

त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यस्त्रिवृदग्निष्टोमः सप्तदशोऽग्निष्टोम एकविंश उक्थ्यः सप्तदशोऽग्निष्टोमस्त्रिणवोऽग्निष्टोमस्त्रयस्त्रिंश उक्थ्यस्त्रिणवोऽग्निष्टोमो विश्वजिदतिरात्रः ॥ ॥ १ ॥

स्पष्टं । १ ।

अथैतत् प्रशंसति ।

इन्द्रोऽसुरान् हत्वाकार्यञ्चकृवा अमन्यत तं देवा एतेन स्तोमेनायाजयन् सपाप्मनो निर्दश्यमगच्छत् ॥२॥

इन्द्रः पूर्वं प्राजापत्यानसुरान् हत्वा भ्रातृवधादकार्यं कृतवानहं इत्यमन्यत तं देवा एतेन त्रिकद्रुकाग्निष्टोमेन यज्ञेनाया-

जयन् स एतेनेष्ट्वा पाप्मनो भ्रातृवधनिमित्तस्य नैर्दैश्यन्निर्गत-दशरात्रत्वं अगच्छत् विश्वस्य हि दशरात्रादूर्द्ध्वं वेदना निवर्त्तत इति नैर्दैश्यशब्देन दुःखनिवृत्तिर्लक्ष्यते ॥ २ ॥

इदानीमपि व्यथितस्य दशरात्रेतीते व्यथापगम एतं निब-न्धमाह ।

तस्मादिषुहतो वा दण्डहतो वा दशमीं नैर्दैश्यं गच्छति ॥ ३ ॥

यस्मादिन्द्रो दशरात्रेण पाप्मनोनैर्दैश्यमगच्छत्तस्मादि त्यर्थः ॥ ३ ॥

अथास्य संख्यायोगं प्रशंसति ।

दश दशिनी वा एषा विराडन्नं विराडन्नाद्यमेवा स्मिन् दधाति ॥ ४ ॥

एषा विराट् इयं विराट् संख्यानिबन्धो दशरात्र इत्यर्थः विराडपेक्षया दशरात्रस्यैषेति स्त्रीलिङ्गता दशदशिनी वै दशि-कानुबन्धदशकं दशदशो दशारम्भाभ्यां विश्वजित इति दशदशिनी विराट् त्रिवृति व्यतिरिक्तेषु पञ्चदशादिस्तोमेषु दशसंख्यायोगाः सन्तीति दशदशिनीति दशरात्राभिधानं ॥ ४ ॥

अथ षट्त्रिंशत्तोग्निष्टोमः क्रियते मध्यतस्त्रीणि उक्थ्यानि तदिदं प्रशंसति ।

अग्निष्टोमेन वै देवा असुरान्निगृह्य मध्यत उक्थ्यैः प्रज-

या पशुभिः प्राजायन्ताग्निष्टोमेनैव भ्रातृव्यन्निगृह्य मध्यत उक्थ्यैः प्रजया पशुभिः प्रजायते ॥ ५ ॥

स्पष्टं । ५ ।

अथात्राग्निष्टोमानन्तरं यत् त्रिःकृत्वः उक्थ्यानुष्ठानमस्ति तत् प्रशंसति ।

त्रिककुब्वा एष यज्ञः ॥ ६ ॥

ककुवेव ककुप् उत्थितोपदेशस्य नाम प्रकृतिभूताग्निष्टोमा उत्थिता उक्थानां त्रयाणां उक्थ्यककुप् अत एतेन यजमानोपि समानानां प्रजानाञ्च मध्ये श्रुतशीलाचरणैस्त्रिभिः स्वयमप्युत्थितो भवतीत्यर्थः ॥ ६ ॥

उक्तार्थज्ञस्याप्येतत् फलं भवतीत्याह ।

त्रिककुप् समानानाञ्च प्रजानाञ्च भवति य एवं वेद ॥ ७ ॥

स्पष्टोऽर्थः । अथास्य कल्पः, अग्न आयूंषि पवस इत्यनुरूप यशःषु शचीपत इत्यभीवर्त्तो ब्रह्मसाम प्रस्वानायाल्पम इत्यौदलदैवोदासे अभिप्रियाणोति यज्ञायज्ञीयमल्पं नमस्ते अग्न ओजस इति जराबोधीयमग्निष्टोमसामस्यामवा समानमितरं प्रथमेनाह्ना जनकसप्तरात्रस्येत्ययं प्रथमः कल्प एवमितरेषान्नवानामह्नां कल्पस्तत्रैव क्रमेण द्रष्टव्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

अथ बहुभावफलसाधनकं द्वितीयं कुसुरुविन्ददशरात्रमाह ।

त्रयस्त्रिवृतोग्निष्टोमास्त्रयः पञ्चदश उक्थ्यास्त्रयः सप्तदश उक्थ्या एकविंꣳशोतिरात्रः कुसुरुविन्ददशरात्रः ॥१॥

स्पष्टं । तथाविधानां त्रयाणामुक्थ्यानामत्र सम्भवादयं दशरात्रः त्रिककुप् । १ ।

अथाधिकारिणमाह ।

यः कामयेत बहु स्यामिति स एतेन यजेत ॥ २ ॥

पुत्रपौत्रद्वारा स्वयमेव बहुविधः स्यामिति यः कामयेत ॥२॥ तत्राधिकृतः सम्यक् कथनं बहुत्वसाधनत्वमिति तस्योत्पत्तिं दर्शयति ।

यद्गणशः स्तोमा बहुरेव भवति ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

अस्य गणस्तोमत्वं दर्शयति ।

सह त्रिवृतः सह पञ्चदशाः सह सप्तदशाः ॥ ४॥

त्रयस्त्रिवृतः आदौ सह भवन्तीति ततस्त्रयः पञ्चदशाः सहसप्तदशाः सहेति स्तोमानाङ्गणत्वं ॥ ४ ॥

अथान्त्यस्याह्नः एकविंशत्वं प्रशंसति ।

एकविंꣳशोतिरात्रो भवति प्रतिष्ठित्यै ॥ ५ ॥

सिद्धमिदं ॥ ५ ॥

अथैतत् ज्योतिष्टोमत्वेन प्रशंसति ।

ज्योतिर्वा एष विहृत: ॥ ६ ॥

त्रिवृत्पञ्चदशसप्तदशएकविंशा एतानि वाव तानि ज्योतींषीति श्रुति: ज्योतिष्टोमे चतुर्णां सम्भवात् षट्दशरात्री विहृतो ज्योतिष्टोम एव खलु ॥ ६ ॥

उक्तार्थन्तं प्रशंसति ।

ज्योतिष्प्रजानां भवति य एवं वेद ॥ ७ ॥

स्पष्टं ॥ ७ ॥

अस्य चतुष्टोमत्वं प्रशंसति ।

चतुष्टोमो वा एष चतुष्पाद: पशव: पशुष्वेव प्रतितिष्ठति ॥ ८ ॥

स्पष्टं ॥ ८ ॥

अस्य चतुष्टोमत्वमेव प्रकारान्तरेण प्रशंसति ।

एकविंशं स्तोमानातियन्ति प्रतिष्ठा वा एकविंश: प्रत्येव तिष्ठति ॥ ९ ॥

सिद्धप्रायमेतत् ॥ ९ ॥

अथास्य फलं सप्रयोजनमाह ।

एतेन वै कुसुरुविन्द औद्दालकिरिष्ट्वा भूमानमाश्नुत ॥ १० ॥

उद्दालकस्यापत्यमौद्दालकिः स च कुसुरुविन्दनामकः ॥१०॥

उक्तार्थज्ञं प्रशंसति।

भूमानमश्नुते य एवं वेद ॥ ११ ॥

अस्य कल्पः। या बृहस्पतिसवस्य सा कुसुरुविन्दस्य प्रथमा तस्यैजनुषैकचैाहाविषतस्य लोके यौक्ताश्वं स्वाशिरामर्कस्य हाविषतं कुसुन्नानयोरित्यादिकल्पः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
पञ्चदशः खण्डः।

अथ षोड़शः खण्डः।

अथ फलपशुसाधनं तृतीयं दशरात्रमाह।

अभ्यासंग्यः पञ्चाहश्चत्वारश्छन्दोमा विश्वजिदतिरात्रः पशुकामोयजेत ॥ १ ॥

स्पष्टं। १।

प्रथमपञ्चाहं स्तौति।

यदभ्यासंग्यः पञ्चाहः पुरस्ताद्भवति पाङ्क्तः पुरुषः पाङ्क्ताः पशवस्तेन पुरुषञ्च पशूंश्चाप्नोति ॥ २ ॥

गतमिदं ॥ २ ॥

अथानन्तरभाविचतुरहं प्रशंसति ।

छन्दोमामध्यतो भवन्ति पशवो वै छन्दोमाः पशूनाम-वरुध्यै ॥ ३ ॥

स्पष्टं । ३ ।

अथान्यमहः प्रशंसति ।

विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥ ४ ॥

अथास्य कल्पः । पृष्ठ्यावलम्बः पञ्चाहः प्रथमस्याह्नः प्रत्नवदहि-ष्यवमानं पञ्चमस्याह्नोऽसृक्षतेत्यनुरूप इत्यादिकः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य

षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

अथ देवपुराख्यं चतुर्थं दशरात्रमाह ।

त्रिष्टोमोग्निष्टोमो ज्योतिरुक्थ्य स्त्रिष्टोमोग्निष्टोमो गौरु-क्थ्योभिजिदग्निष्टोमो गौरुक्थ्यो विश्वजिदग्निष्टोम आयु-रुक्थ्यो विश्वजिदग्निष्टोमस्य सर्वस्तोमोतिरात्रः ॥ १ ॥

स्पष्टं । १ ।

अथैतत् प्रशंसति ।

देवा वा असुरैर्हन्यमानास्ते प्रजापतिमुपाधावꣳस्तेभ्य एतान्देवपुरं प्रायच्छत् तां प्राविशन् ॥२॥

पूर्वं प्रजापतिरसुरैर्हन्यमानेभ्यो देवेभ्यस्तत्कृतोपद्रवपरिहारार्थं पुरस्थानीयमेतं दशरात्रं प्रायच्छत् यथा पुरन्द्विनिर्वारावृतेः प्राकारपरिवारादिभिरन्यैर्दुरवगाहं भवति एवं त्रिः स्थानीयं त्रिष्टोमोग्निष्टोमोज्योतिरादिभिर्वेष्टितन्त एव पुरस्थानीयं यज्ञन्ते देवाः प्राविशन्नन्वतिष्ठन्नित्यर्थः तेन शत्रूनजयन्नित्यभिप्रायः ॥ २ ॥

अभिचार्य्यमाणं याजयेदेतामेव देवपुरं प्रविशत्य स्तित्यै ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य सप्तदशः खण्डः।

अथ अष्टादशः खण्डः।

अभ्यासंग्यः षडहस्त्रयश्छन्दोमाश्चतुष्टोमोग्निष्टोमो विश्वजिदतिरात्रः ॥ १ ॥

स्वराजोवा एष यज्ञः ॥ २ ॥

स्वाराज्यं गच्छति य एवं वेद ॥ ३ ॥

प्रजापतिर्हि स्वाराज्यं परमेष्ठी स्वाराज्यं ॥ ४ ॥

परमेष्ठितां गच्छति य एवं वेद ॥ ५ ॥

उभे बृहद्रथन्तरे भवतस्तद्धि स्वाराज्यमजुतं दक्षिणा-स्तद्धि स्वाराज्यं षड्विंशस्तोमो भवति स हि स्वाराज्यं चतु-ष्टोमस्तोमः सह्यन्तोऽन्तं श्रिया गच्छति य एवं वेद ॥ ६ ॥

एतेन वै क्षेम धृत्वा पौण्डरीक इष्ट्वा सुदामस्तीर उत्तरे ॥ ७ ॥

सर्व्वांस्त्वद्धिमाद्धोत् सर्वांस्त्वद्धिमाद्धीति य एवं वेद* ॥ ८ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।

पुमर्थांश्चतुरो देयात् विद्यातीर्थमहेश्वरः ॥ ८ ॥

इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य अष्टादशः खण्डः।

द्वाविंशोऽध्यायः समाप्तिमगमत्।

* सप्तदशखण्डस्य तृतीयमन्त्रावधि अष्टादशखण्डस्य शेषपर्य्यन्तं द्वाविंशाध्याय समाप्ति यावत् ग्रन्थभागः टीकापुस्तके नास्ति मन्त्रपुस्तके तु एते मन्त्राः वर्त्तन्ते।

अथ त्रयोविंशोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निःश्वसितं वेदा योवेदेभ्योऽखिलं जगत्।
निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

द्वादशाहप्रभृतिसत्रभेदोऽथ वर्ण्यते। द्वौ त्रयोदशरात्रौ तत्र प्रथमं आप्तद्वादशाख्यं सर्व्वर्द्धिसाधनं सत्रमाह।

अतिरात्रः पृष्ठ्यः षडहः सर्वस्तोमोतिरात्रश्चत्वारश्छन्दोमा अतिरात्रः॥ १॥

आद्यन्तावतिरात्रौ मध्येपि त्रिवृदादिसर्वस्तोमकोतिरात्रः तस्य पृष्ठ्यः षडहः पूर्वः उपरिष्टाच्च चत्वारश्छन्दोमाः अविवाक्यमहश्चतुर्थः छन्दोमं भवति॥ १॥

अथैतत् प्रशंसति।

एष वा आप्तो द्वादशाहो यत् त्रयोदशरात्रयः॥ २॥

त्रयोदशरात्रो यदस्ति एष खलु आप्तः सम्पूर्णो द्वादशाहः यथा लोके धनादिके दिशति सति न्यूनताशङ्कापरिहाराय क्लृप्तसंख्यात ईषदधिकं संख्याकं वस्तुनो यत् तद्वत् द्वादशाहस्य यदि द्वादशैव स्युरहानि ततो द्वादशाहः सम्पूर्णोन्युनोवेति सन्दिग्धे

अहानि त्रयोदश स्युरेवेत् निःशङ्कं द्वादशाहः सम्पूर्णो भवति अतो अस्य त्रयोदशरात्रत्वात् अयमाप्तो द्वादशाह उच्यते ॥ २ ॥

आद्यन्तावतिरात्राभ्यामेव तत् प्रशंसति।

समानोह्येष यत् प्रायणीयश्चोदयनीयश्चातिरात्रौ यं कामं कामयन्ते तमेताभिरभ्यश्नुवते ॥ ३ ॥

एष त्रयोदशरात्रः समानो हि आद्यन्तयोरेकरूपः खलु तदेवोपपादयति तत् प्रायणीयश्चोदयनीयश्चेत्यादिना अससमान ताल्लोको भवति तदुच्यते यं कामं कामयन्त इत्यादिना ॥ ३ ॥

अथ मध्यमस्यातिरात्रस्य सर्वस्तोमत्वं प्रशंसितुमाह।

गृहपतेस्तु वागुपदासुका भवति तद्यन्मध्ये सर्वस्तोमो तिरात्रो भवति तेन गृहपतेर्वागनुपदासुका भवति ॥ ४ ॥

वाग्वै द्वादशाह इति श्रुतेः द्वादशाहात्मकस्य वाचोमध्ये ऽतिरात्रस्य कृतत्वात् यद्यपि समानत्वात् सम्पूर्णकामसाधनीयत्व तथापि गृहपतेर्यजमानस्य वागुपदासुका उपक्षयशीला भवति तस्य कः परिहार इत्युच्यते तन्मध्येतिरात्रः सर्वस्तोमो भवति तत्तेन तस्य वागतथाभूता भवति विच्छिन्नाया वाचः परिहाराय सर्वस्तोमस्य कारितत्वादित्यभिप्रायः ॥ ४ ॥

अथास्य रात्रीणां सर्वर्द्धिफलसाधनत्वं प्रयोगद्वारोपपादयति

एता वा अर्य्यल गृहपतय आरुणि होतारः सुभगा सूपयन्ति ते सर्वामृद्धिमार्ध्नुवन् सर्वामृद्धिमृध्नुवन्ति य एता उपयन्ति ॥ ५ ॥

पूर्वमिताः खलु त्रयोदशरात्रीरथैल गृहपतयोर्यल गृहपतिं कुर्व्वाणा आरुणिं होतारः आरुणिं होतारं कुर्व्वाणाः सत्रिणः सुभगासु प्रजासु हृद्येषु जनपदेष्वित्यर्थः यद्वा कुलचणासु नदीषु एता रात्रीरुपयन्ति उपेयुरित्यर्थः सर्वामृद्धिमित्यादि स्पष्टं अत्र दीचाक्रयप्रसवोत्थानानि सर्वसत्रेषु पूर्वपच उपपादयेयुरित्यादिकं सत्रसामान्यविषयं सूत्रे द्रष्टव्यं अत्र पृष्ठ्यः षडहश्छन्दोमाश्च विद्यन्ते षडहः प्रकृतिक इति तद्विचारं वच्यति छन्दोमा व्यूढा समूढकल्पिता विशेषश्रवणादिति प्राप्ते सूत्रकार आह पूर्वस्मिंस्त्रयोदशरात्रे व्यूढाश्छन्दोमाः सोमसामादेशाद्गौरीवितस्य चानादेशादिति यदि समूढाश्छन्दोमाः स्युस्तदानीं प्रथमस्य छन्दोमकगणस्यन्तरस्य गौरी सोमसामेति कल्पकारोन वच्यते पूर्वमेव छन्दोमदशरात्रे छन्दोमानां समूहत्क्रमो तथैवोक्तत्वात् तथा समूढपचे गौरीवितलोकसामान्तरमात्रेयादिकं पूर्वमुक्तं तदिदानीन्निवर्त्य गौरीवितं पुनरादेष्टव्यं सर्वसत्रेष्वार्भवे गौरीवितनियमात् नच तदादिष्टन्तदिदं व्यूढपचे एवोपपद्यते तदानीं यथा ब्राह्मणं गौरीवितस्य सिद्धत्वादिति भवत्येवं पृष्ठ्यस्तु कथन्तत आह गवामयनन्यायेन तु पृष्ठ्या इति यथा गवामयने प्रतिमाससमूहाः पृष्ठ्यः तद्वदिति कृत इत्याह अविच्छिन्नो हि तथा प्रवर्त्तत इति छन्दोमैत्यत्रच्छिन्ने पृथक्कृतः पृष्ठ्यः समूहानेव सर्वत्र प्रवर्त्तते अत सर्वस्तोमेन च्यावयेत पृथक्कृत इति सिद्धान्तमाह दशरात्रचतुःछन्दोमत्वादिति यथा गवामयने दशरात्रे पृष्ठ्योव्यूढस्तद्वदत्रापि स्यात् छन्दोमसहितत्वात् छन्दोमाभावेहि केवलषडहव्यूढः स्यात् अपूर्णत्वात् समूढो भवति तथा च ब्राह्मणे निदानकारेणोदाहृत

नरर्त्तिच्छन्दोमेभ्यः पृष्ठ्योव्यूह्य मानस इति हेत्वन्तरञ्चाह व्यूह-समाध्यव्यतिरेकादिति समाधिः साम्यव्यतिरेको व्यतिपर्य्ययः व्यूहसाम्यस्य क्वचिदपि विपर्य्ययोभावात् एतदुक्तं भवति यदिदं छन्दोमेषु व्यूहः स्यात् तदा पृष्ठ्योपि व्यूहः कार्य्यः यदि नस्यात् तदा पृष्ठ्योपि न कार्य्य इति तदिदं व्यूहसाम्यं सर्व्वत्रोभिन व्यवायो नादरणीय इति भाव इति, अथास्य कल्पः, त्रयोदशरात्रे प्रथमस्य छन्दोमस्य कण्वरथन्तरस्य लोके सोमसाम पुनानः सोमधारयेत्येतदिति अत्रातिरात्रानन्तरं पृष्ठ्यः षडहः सम्भवादत्रातिरात्रात् पृष्ठ्यमुपर्यन्ति प्रथमस्याङ्गोऽस्य प्रत्नानुरूप इति साधारणकल्पो भवितव्यः तथापि प्रत्नवत्राद्यबहिष्पवमानं परेण स्रोतद्स्य प्रत्नानुरूप इत्याहेत्यादि सूत्रकारेण चतुर्दशप्रभृतिषु चायं कल्प इति व्यवस्थापितत्वान्नात्र प्रवर्त्तते ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथ द्वितीयं त्रयोदशरात्रं प्रतिष्ठासाधनं सत्रमाह ।

अतिरात्रो द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥ १ ॥

गवामयनिकं महाव्रतं शिष्टान्यहानि स्पष्टानि ॥ १ ॥

अथ तत् पूर्ववैलक्षण्येन स्तौति ।

वाग्वा एषा प्रतायते यदेष द्वादशाहस्तां विच्छिन्द्युर्यन्म-ध्येतिरात्रं कुर्युः ॥ २ ॥

द्वादशाहस्य वाग्रूपत्वात् तस्यानुष्ठानेनैव वाक्सन्तानमेव यतो यन्मध्यं पूर्ववदतिरात्रं कुर्युः तदानीं सन्ततां वाचं विच्छिन्द्युः ॥२॥

अथातिरात्राभावे वाग्विदः तथापि तदभावे वाग्विच्छेदः तथापि तदभावेऽङ्गान्न जनकत्वाद्विच्छेदस्तदवस्थ एवेत्याशङ्क्य तत्परिहारमाह।

यदुपरिष्टाद् व्रतमुपयन्ति न वाचं विच्छिन्दन्त्याप्नुवन्ति त्रयोदशम्मासं ॥ ३ ॥

अतिरात्रप्रतिनिधित्वेन द्वादशाहस्तेन महाव्रतस्य करणात् अङ्गां त्रयोदशत्वसिद्धरूपे युवामोपि त्रयोदशं मासमाप्नोति मास त्रयोदशकोपलक्षितान्बहून् संवत्सरान् जीवन्तीत्यर्थः ॥ ३ ॥

अथास्य फलमाह।

एता वै प्रतिष्ठितास्त्रयोदशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ४ ॥

प्रतिष्ठितसंवत्सरावयवभूतत्रयोदशमासा मासगतसंख्यासा-म्यादेतासां रात्रीणां प्रतिष्ठितत्वं सत्पक्षे संवत्सरस्य त्रयोदश मासस्य कृताः सांवत्सरिकं व्रतमिति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य

द्वितीयः खण्डः।

अथ तृतीयः खण्डः ।

अथ त्रयश्चतुर्दशरात्रयस्तत्र प्रथमं सर्वफलसाधनं चतुर्दश रात्रमाह ।

अतिरात्रः पृष्ठ्यः षडहः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भणोऽतिरात्रः ॥ १ ॥

आवृत्तः षडह इत्यर्थः ॥ १ ॥

अथैताः प्रशंसति ।

कामसनयो वा एता रात्रयः ॥ २ ॥

स्पष्टं ॥ २ ॥

तत् कथमिति तद्विभज्य दर्शयति ।

विराड्ढि दशात्मैकादशी प्रजा द्वादशी पशवस्त्रयोदशी कामाय चतुर्दशी ॥ ३ ॥

आदित्यतः दशरात्रो विराट् खलु साक्षादन्नमित्यर्थः दशसंख्यासाम्यात् विराट् एकादशी रात्रिः सा आत्मस्थानीया द्वादशी रात्रिः प्रजास्थानीया त्रयोदशी रात्रिः पशवः चतुर्दशी रात्रिः उक्तव्यतिरिक्तसर्वफलस्थानीया ॥ ३ ॥

एवं कामसनित्वमस्योपपाद्यानुष्ठातॄणामपि सर्वकामसिद्धिर्भवतीत्याह ।

सर्वानेवैताभिः कामानवरुन्धते ॥ ४ ॥

स्पष्टं ॥ ४ ॥

अथैतान्यहान्यस्य छन्दोमस्य कण्वरथन्तरस्य लोके सोम साम पुनान. सोमधारयेत्येतद्दिति आरोहं प्रशंसति ।

एता वाव ब्रध्नस्य विष्टपोयदेतौ त्रयस्त्रिꣳशौ मध्यतः सन्धीयेते तेन ब्रध्नस्य विष्टपꣳ रोहन्ति ॥ ५ ॥

ब्रध्नस्य यस्मिन् ब्रह्ममूत आदित्ये बद्धा लोकावर्त्तन्ते स ब्रध्नस्य विष्टपो लोकाः एता वाव एता एव रात्रयः खलु इति अस्त्वेवं किन्तत इति तदुपपादयति यद्यस्मादेतौ त्रयस्त्रिंशौ स्तोमौ मध्यतः चतुर्द्दशरात्रस्य मध्ये प्रथमषडहः स्यात्तत्द्वितीयषड़हस्यादौ च सन्धीयते अव्यवधानेन प्रयुज्यते तेन ब्रध्नस्यादित्यविष्टपं लोकं रोहन्ति सत्रिणः ॥ ५ ॥

अथ यत् पृष्ठानां द्विरावर्त्तनमस्ति तत् प्रशंसति ।

द्विःपृष्ठान्युपयन्त्यभिपूर्वमेवैताभिरन्नाद्यं दधते ॥ ६ ॥

अन्नं वै पृष्ठानीतिश्रुतेः तत् क्रमेण पृष्ठानि द्विरुपजन्ति तेनानु वर्त्तते तेनान्नाद्यं अन्नयोग्यं व्रीहियवादिरूपमन्नं दधते ॥ ६ ॥

अथ प्रकारान्तरेण स्तौति

पक्षिण्यो वा एता रात्रयो यङ्कामङ्कामयन्ते तमेताभि रभ्यश्नवते ॥ ७ ॥

अतिरात्रौ अभिहितौ द्वौ पृष्ठः षड़हपक्षौ तद्वत्य एव चतुर्द्दशरात्रयः खलु अस्त्वेवं किं तत इत्याह अतः पक्षिणोभिरेवाहो रात्रिभिः ऐहिकं आमुष्मिकञ्च यङ्कामङ्कामयन्ते तं प्राप्नुवन्ति ॥७॥

रात्रीणां पक्षिणोत्वेन कथं कामप्राप्तिरिति तद्दर्शयति ।

यत्र यत्र हि पक्षी कामयते तत्तदभ्यश्नुते ॥ ८ ॥

गतमिदं ॥ ८ ॥

आद्यन्तावतिरात्रौ प्रशंसति ।

त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणा वै त्रिवृत् स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥ ९ ॥

प्राणाः शीर्षण्याः सप्त द्वावर्वाञ्चाविति त्रिवृदपि नव स्तोत्रीयात्मक इति प्राणास्त्रिवृदित्युच्यते यद्वा त्रिवृति त्रित्वसंख्यास्ति प्राणापानौव्यान इति प्राणोपि त्र्यात्मकः अतः प्राणास्त्रिवृत् साधारणः कल्पः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ द्वितीयं चतुर्दशरात्रमाह ।

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहः पृष्ठ्यः षडह आयुर्गौर्ज्योतिरतिरात्रः ॥ १ ॥

अनुलोमप्रतिलोमौ द्वौ त्रिकद्रुकौ कल्पे पृष्ठ्यः षडह आद्यन्तयोरतिरात्र इति चतुर्दशरात्रः ॥ १ ॥

आसामधिकारिणमाह।

याꣳस्तल्पे वोदके वा विवाहे वा मीमाꣳसेरꣳस्त एता उपेयुः॥ २॥

यान् पुरुषान् तल्पे शयान् वा उदके अभिषेकार्थं विवाहे वा मीमाꣳसेरन् विवदेयुरन्ये ते मीमांसमाना एतद्रात्रीरुपेयुः तल्पाद्यर्थेनाधिकरण इत्यर्थः॥ २॥

आद्यन्त्र्यहं प्रशंसति।

यत् ज्योतिर्गौरायुस्त्र्यहः प्रज्ञाताꣳस्तोमानुपयन्ति॥३॥

स्पष्टं॥ ३॥

कथं प्रज्ञातत्वमिति तत्राह।

इमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठन्ति॥४॥

ज्योतिरादीनां भूरादिलोकात्मकत्वाद्भूरादीनां सर्वैः प्रज्ञातत्वात् स्तोमा अपि प्रज्ञाता इत्युच्यते॥ ४॥

अनन्तरभाविनं षड़हं प्रशंसति।

अथ यत् पृष्ठ्यः षड़होमध्यतो भवत्येष वाव देवतल्पो देवतल्पमेव तदारोहन्ति तल्प्या भवन्ति॥ ५॥

यथा लोकाः तल्पमारुह्य सुखेन शेरते एवं देवा अपि षड़ह-माश्रित्य तुष्यन्तीति षड़हो देवतल्पः यद्वा यथा गृहस्य मध्ये वर्त्तते एवमहोमध्ये संस्थानात्तल्प इत्युपचारः अतः षड़हं क्रमेण प्रयु-

ज्ञानास्तेन षडहेन देवतल्पमेवारोहन्ति स्वयञ्च तल्प्याः शोभन-तल्पार्हा भवन्ति ॥ ५ ॥

किञ्च ।

प्रवसीयसस्तल्पमाप्नुवन्ति ॥ ६ ॥

सुमत्तरस्य सुकृतिनो देवास्तल्पं प्राप्नुवन्ति कर्म्मणि षष्ठी प्रश-स्ततल्पमित्यर्थः ॥ ६ ॥

अथावृत्तं त्रिकद्रुकं प्रशंसति ।

अथ यदायुर्गौर्ज्योतिरतिरात्रोयेनेतोयन्ति तेन पुनरा-यन्ति ॥ ७ ॥

येन ज्योतिरादिक्रमेण इतोऽस्माल्लोकात् यन्ति स्वर्गं प्राप्नुवन्ति तेनैवावरोहक्रमेण पुनरायन्त्यमुं लकं स्वर्गे चिरकालमुषित्वा पुनरागच्छन्ति सत्रिणः प्रयोगारोहावरोह एव स्वर्गारोहावरोहणं अथास्य कल्पः रात्रातिरात्रात् पृष्ठमुपयन्ति प्रथमस्याह्नोस्य प्रत्ना-नुरूपोयत्र वा त्रिकद्रुकस्य यत्र ज्योतिर्गौरायुस्वाहा एहिकास्ते गौरीवितस्वरा एत एवावृत्तायुर्गौर्ज्योतिरतिरात्र इत्यादिकः साधारणः कल्पोद्रष्टव्यः । ७ ।

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ तृतीयचतुर्दशरात्रं प्रतिष्ठासाधनं मतमाह ।

अतिरात्रो गौश्चायुश्च द्वे अहनी द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं । १ ।

द्वितीये द्वे अहनी प्रशंसति ।

यद्गौश्चायुश्च द्वे अहनी भवतो मिथुनौ स्तोमावुपयन्ति प्रजात्यै ॥ २ ॥

गोरायुषी इति द्वौ स्तोमौ स्त्रीपुंसात्मकौ मिथुनौ अतस्तदनुष्ठानं प्रजात्यै पुत्रादिप्रजननाय भवति । २ ।

अथानन्तरभाविनं दशाहं प्रशंसति ।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥ ३ ॥

द्वादशाहस्य वागात्मकत्वात्तदन्तःपाती दशाहोपि वागात्मकः अतस्तस्या विच्छिन्नप्रयोगेणाविच्छिन्नां वाचमुपयन्ति तत्र प्रजननाय सन्तत्यविच्छेदाय भवतीत्यर्थः । ३ ।

अथ सर्वाश्चतुर्दशरात्रीः प्रशंसति ।

एता वै प्रतिष्ठिताश्चतुर्दशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ४ ॥

रात्रीणां समसंख्यासद्भावात् समसंख्याश्रयाश्च द्विपाद्यजमानः प्रतिष्ठित्या इत्यादि प्रतिष्ठात्मकत्वाद्रात्रीणां प्रतिष्ठितत्वं यद्वा

द्वादशाहे प्रतिष्ठितानां रात्रीणां अत्रापि क्रियमाणत्वात् प्रतिष्ठितत्वं सिद्धमन्यत् अत्र ज्योतिर्गौरायुस्त्र्याह एकाह्निकास्तइत्युक्त्वा एतएव गोआयुषी इत्युक्तः साधारणः कल्पोद्रष्टव्यः । ४ ।

इति तार्ण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

चत्वारः पञ्चदशरात्राः तेषु देवत्वप्राप्तिसाधनं प्रथमं पञ्चदशरात्रं सत्रमाह ।

अतिरात्रः पृष्ठ्यः षडहो महाव्रतं पृष्ठ्यः षडहस्त्रय-स्त्रिꣳशारम्भणोतिरात्रः ॥ १ ॥

त्रयस्त्रिंशारम्भण इत्यनुवर्त्तत इत्यर्थः ॥ १ ॥

अथास्य फलं सप्ररोचनमाह ।

एताभिर्वै देवा देवत्वमगच्छन् देवत्वङ्गच्छन्ति य एता उपयन्ति ॥ २ ॥

स्पष्टं ॥ २ ॥

अथैतद्देवसम्बन्धद्वारेण प्रशंसति ।

एतद्वै देवानाꣳ सत्त्रन्तदद्यापि देवाः सत्रमासते ॥ ३ ॥

यस्मादेतत् पूर्वं देवैरनुष्ठितं तत् तस्मादद्यापि तत् सत्रं देवा अथासते तत इदं प्रशस्त इत्यर्थः नतु देवानान्तदाभावाद्य-नुपपत्या यद्यपि कर्माधिकारोनास्ति तथापि स्तुत्यर्थत्वादिति न विरोधः॥ ३॥

अथासां पञ्चदशरात्रीणां क्रमेणाहर्नियममाह।

पौर्णमास्यतिरात्रोऽथ यानि षडहानि स पृष्ठ्यः षडह एकाष्टका महाव्रतमथ यानि षडहानि स पृष्ठ्यः षडहोऽमावास्यातिरात्रः॥ ४॥

पौर्णमास्यां प्रायणीयातिरात्रः ततः प्रतिपदाद्यहःषट्के क्रमेण पृष्ठ्यः षडहः कर्त्तव्यः अपरपक्षाष्टम्येकाष्टका तत्र महाव्रतमह-र्भवति ततोहःषट्क पृष्ठ्यः षडह आमावास्यामुदयनीयोतिरात्र इति देवैरनुष्ठितत्वादयं यागोदेवसुतएवम्मनुष्यसुत इत्यर्थः॥ ४॥

तस्मात्तर्हि मनुष्याणान्नसुतो देवानां हि तर्हि सुतः प्रत्यक्षमेवै ताभिर्देवता अभ्यारोहन्ति॥ ५॥

तस्मात् देवैरनुष्ठितत्वात् कृष्णपक्षे सत्रसमापनत्वाद्वा तर्हि तथा सत्ययं मनुष्याणामुचितः सोमयागो भवति किन्तु तर्हि तथा सति देवानां सुतो हि अतः प्रत्यक्षमेवैताभिः रात्रीभिर्देवता अभ्यारोहन्ति सत्रिणोमनुष्याः देवैरनुष्ठितस्यैतैरपि कृतत्वा-द्यद्यपि देहान्ते देवप्राप्तिः स्वर्गादेव तुल्या तथाप्यस्य देवसत्र-त्वात् प्रत्यक्षमेव सशरीरमेते देवता आभिमुख्येन गच्छन्ति

अथास्य सत्रस्य सामान्यप्राप्तदीक्षोपसदो द्वादशत्वाङ्गीकारे प्रथमस्तुत्याङ्गभूतपौर्णमास्याः पूर्वं चतुर्विंशतिदिवसादर्वाक् दीक्षोपक्रमे सति कृष्णपक्षे दीक्षारम्भः स्यात् ॥ ५ ॥

तं पक्षन्निराकृत्य पूर्वपक्षे दीक्षोपक्रमं विदधाति ।

प्रतिनोदात्तु भय्यमितरमनुपक्षो दीक्षेरन्नप्रतिनोदाय ॥६॥

तुशब्दो वैलक्षण्यद्योतनार्थः सत्रत्वसामान्यप्रयुक्तद्वादशदीक्षा अस्मिन् पक्षे पौर्णमासीसुत्योपक्रमापेक्षं कृष्णपक्षषष्ठ्यां योदीक्षोपक्रमस्तस्मिन् पक्षे प्रतिनोदाद्देवत्वं प्राप्तवतां सत्रिणां देवकर्तृकत्वात् स्वर्गान्निष्कासनाद्भयं भवति अतस्तत्परिहारायेतरमनुपक्षः इतरं पक्षमनु शुक्लपक्षे दीक्षेरन् सा च स्वर्गादप्रतिनोदाय भवति अयमर्थः सर्वोपि सूत्रेण स्पष्टो भवति अत्र सुत्यारम्भे मतभेदसिद्धार्थं दीक्षारम्भे दर्शयति सूत्रकारः प्रथमे पञ्चदशरात्र एकान्नविंशतिर्दीक्षा इति धानञ्जय्य इति स्पष्टं तच्छ्रुत इत्यत आह एकाष्टकामहाव्रतममावस्यातिरात्र इति ह्याहेति अयमर्थः अपरपक्षाष्टम्येकाष्टका तस्यां महाव्रतं अमावास्यायामुदयनीयातिरात्र इति ब्राह्मणे अतस्तदानुगुण्येन कृष्णःप्रतिपदि प्रायणीयं ततः पूर्वं द्वादशोपसदः ततः पूर्वमेकान्नविंशतिर्दीक्षा पौर्णमस्या सहेति सामर्थ्यात् सिद्धमिति अष्टादशेति गौतमः पौर्णमास्यतिरात्र इति ह्याहेति अयमर्थः पौर्णमास्यां प्रायणीयोतिरात्र इति वचनात् पञ्चदश्यामेव सुत्यारम्भेन प्रतिपदि तथा सति पौर्णमासीसिद्धः प्रतिपच्छब्दार्थः स्यात् तच्चायुक्तं तेन पञ्चदश्याः पूर्वन्तूपसद्व्यतिरिक्तान्यष्टादशैवेति गौतममतं नन्वेव-

मेकाष्टका यः शब्दः सप्तमीलक्षणार्थः स्यात् अमावास्याशब्दश्चत्-दर्शं लक्षयेदिति पदद्वयस्य श्रौतार्थभङ्गः स्यात् सत्यं पदद्वयेपि तावल्लक्षणा दुर्वारा सत्यं तत्र पौर्णमासीशब्दः प्रथमश्रुतत्वादसञ्जातविरोधीमुख्यस्य इति गौतमस्याभिप्रायः भूयसोन्यायेन पदद्वयस्य मुख्यार्थलाभोयुक्त इति धानञ्जप्यस्याशयः एवं दीक्षायां मतद्वयं प्रदर्श्यान्यं स्वमतं दर्शयति सूत्रकारः जातिकल्पो वेति सर्वेति सामान्यञ्जातिः तत् प्रयुक्तकल्पो जातिकल्पः तेषां द्वादश दीक्षा द्वादशोपसदः ता एवात्रापि स्युरित्यर्थः नन्वेवमितरमनुपक्षो दीक्षेरन्निति वचनविरोधः अवगतः नायं विरोधः कृष्णपक्षे दीक्षामभ्युपगम्य दैवैः प्रतिनोदशङ्कया पक्षान्तरत्वेन विधानात् तेन विकल्प एव युक्तः न च कृष्णपक्षे दीक्षोपक्रमकल्पो ब्राह्मणे निर्दिष्ट इति वाच्यं प्रतिनोदशेषस्योपन्यस्तत्वात् कृष्णपक्षे दीक्षोपक्रमाङ्गीकाराभावे प्रतिनोददोषस्यैवानुदयात् कृष्णपक्षोपक्रमः सत्रसामान्यविहितो द्वादशदीक्षापक्षो ब्राह्मणे निर्दिष्टप्राय एवेति अतः पूर्णमास्यां प्रतिपदि वा युक्तोपक्रम इति मतद्वयं सिद्धं एतज्जातिकल्पपक्षेपि समानं "अथासद्वादशाहप्रभृतीनां सत्राणां सामान्यकल्पः सर्वेषु स्यादतिरात्रात् पृष्ठ्यमुपयन्ति प्रथमस्याङ्गोस्य प्रत्नानुरूपो यत्र वा त्रिकद्रुकेभ्यो यत्र ज्योतिर्गौरायुस्त्र्यहं ऐकाह्निकास्ति गौरीवितस्वरा एत एवावृत्ता यद्वायुर्गौर्ज्योतिरतिरात्र एते एव गो आयुषी रात्रिसत्रेष्वन्यतरमतिरात्राभ्यः संवत्सरसंमिताभ्यश्चेति क्लृप्तं प्रथमं पञ्चदशरात्रमिति ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
पञ्च. खण्ड ।

अथ सप्तमः खण्डः ।

अथ ब्रह्मवर्चसफलसाधनं द्वितीयं पञ्चदशरात्रं सत्रमाह ।

अतिरात्रस्त्रिवृदग्निष्टुदग्निष्टोमो ज्योतिर्गौरायुस्त्र्यहः पृष्ठ्यः षडह आयुर्गौर्ज्योतिरतिरात्रः ॥ १ ॥

सर्वाग्नेये कश्चित् त्रिवृत्स्तोमक एकाहविशेषस्त्रिवृदग्निष्टुदग्निष्टोमः शिष्टानि स्पष्टानि ॥ १ ॥

अथैता रात्रयः प्रशंसति ।

क्षत्रं वा एतारात्रयोभिनिर्वदन्ति ॥ २ ॥

एताः पञ्चदशरात्रयः क्षत्रमित्यभिनिर्वदन्त्यभिज्ञाः क्षत्रमित्यकत्वमत्राह्नां पञ्चदशस्तोमगतां संख्यासादृश्यात्तस्य चोरसो बाहुभ्यां पञ्चदशन्निरमिमीतेत्युपक्रम्य राजन्योमनुष्याणामिति श्रुतत्वेन क्षत्रसम्बन्धात् क्षत्रमिति अह्नां स्तुतिः ॥ २ ॥

अथ सोमाधिकारिणमाह ।

ब्रह्मवर्चसकामा उपेयुः ॥ ३ ॥

स्पष्टं ॥ ३ ॥

प्रथममहस्तत्र त्रिवृद्द्वारा प्रशंसति ।

यत्त्रिवृदग्निष्टुदग्निष्टोमो भवति प्रह्म तद्यशसार्द्धयति ॥४॥

त्रिवृदग्निष्टुदग्निष्टोमकरणं यदस्ति तत्तेन ब्राह्मणजातिमेव यशसार्द्धयति समर्द्धयति ॥ ४ ॥

त्रिवृत्स्तोमब्राह्मणयोः सम्बन्ध इति तत्राह ।

ब्रह्म वै त्रिवृत् ॥ ५ ॥

प्रजापतिमुखात् त्रिवृतो ब्राह्मणस्य च सहोत्पत्तिसम्बन्धः ॥५॥

अथ त्रिकद्रुकमध्यभाजं पृष्ठ्यः षडहः आवृतं त्रिकद्रुकं च क्रमेण प्रशंसति ।

यत् ज्योतिर्गौरायुस्त्र्यहः प्रज्ञातान् स्तोमानुपयन्तीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठन्त्यथ यत् पृष्ठ्यः षडहोमध्यतो भवत्यन्नं वै पृष्ठान्यन्नमेव तन् मध्यतो धीयते तस्मान् मध्ये सदन्नन्धिनोत्यथ यदायुर्गौर्ज्योतिरतिरात्रो येनेतोयन्ति तेन पुनरायन्ति ॥ ६ ॥

गतोऽर्थः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

अथाहीनसत्रोभयफलसाधनं तृतीयं पञ्चदशरात्रमाह ।

त्रिवृदग्निष्टुदग्निष्टोमो ज्योतिर्गौरायुस्त्र्यहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

एकतोतिरात्रत्वमहीनलिङ्गं ॥ १ ॥

अहःसङ्घातात्मकत्वं सत्त्रलिङ्गं तदुभयस्यापि सद्भावादेतदुभयात्मकमिति प्रशंसितुमहीनसत्त्रयोर्विलक्षणप्रकृतिकत्वं दर्शयति ।

अन्यस्मै वै कामाय सत्त्रमन्यस्मै यज्ञोन तत् सत्त्रेणाप्नोति यस्मैकं यज्ञोन तद्यज्ञेनाप्नोति यस्मैक सत्त्रं ॥ २ ॥

गतोर्थः ॥ २ ॥

एवं वैलक्षण्यमुपन्यस्य तदुभयलिङ्गं दर्शयति ।

यदन्यतोतिरात्रास्तेन यज्ञोऽथ यानि द्वादशाहस्य दशाहानि तेन सत्त्रं ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अस्तूभयात्मकत्वं ततः किमित्यत आह ।

उभाविवैताभिः कामाववरुन्धते ॥ ४ ॥

त्रयो ज्योतिर्गौरायुस्त्र्यह इत्यादिकः साधारणः कल्पो द्रष्टव्यः ॥ ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
अष्टमः खण्ड ।

अथ नवमः खण्डः ।

अथ प्रजाफलसाधनं चतुर्थं पञ्चदशरात्रमाह ।

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहो द्वादशाहस्य दशा-हान्यतिरात्रः प्रजाकामा उपेयुः ॥ १ ॥

स्पष्टं ॥ १ ॥

अथास्य प्रजाफलसाधनत्वं सप्ररोचनमाह ।

एताभिर्वै प्रजापतिः प्रजा असृजत प्र प्रजया पशुभि-र्जायन्ते य एता उपयन्ति ॥ २ ॥

सुगमं ॥ २ ॥

अथाद्यं त्र्यहं प्रशंसति ।

यत्ज्योतिर्गौरायुस्त्र्यहः प्रज्ञातान् स्तोमानुपयन्तीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठन्ति ॥ ३ ॥

भूरादिलोकानां प्रज्ञातत्वादादित्यं वै ज्योतिरित्यादि श्रुतेर्ज्योतिरादीनां भूरादिलोकात्मकत्वाच्चैषां स्तोमानां प्रज्ञा तत्वं ॥ ३ ॥

अनन्तरभावीनि दशाहानि प्रशंसति ।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छि-न्नामुपयन्ति प्रजननाय ॥ ४ ॥

वाग्वै द्वादशाह इति श्रुतेः तत्रत्यानां द्वादशानामह्नामवि-च्छेदेनानुष्ठानादविच्छिन्नामेव वाचमुपयन्तीति साचोपलब्धिः प्रजननाय सन्तत्यविच्छेदाय फलोत्पत्तये वा भवति ॥ ४ ॥

एवमहानि विभज्याथ समुच्चित्य प्रशंसति।

एता वै प्रतिष्ठिताः पञ्चदशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ५ ॥

विप्रकीर्णत्वाभावेनान्यत्र व्यवस्थितानामेवाहःसङ्घातानामत्र प्रयोगादह्नां प्रतिष्ठितत्वं यद्वा पञ्चदशवार्द्धमासस्य रात्रय इति श्रुतेः प्रतिष्ठितसंवत्सरान्तर्भूतार्द्धमासरात्रिसंख्यासाम्यादासां प्रतिष्ठितत्वं ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य

नवमः खण्डः।

अथ दशमः खण्डः।

अथ परमविजयसाधनमन्यं षोडशरात्रं सत्रमाह।

एता एव स महाव्रताः ॥ १ ॥

एता एवातीतपञ्चदशरात्रगता उभयतोतिरात्रगुणास्त्रिक-द्विकसहिता द्वादशाहरूपा एव महाव्रतोपेताः षोडशरात्रमहा-व्रतमुपास्य वेदितव्यं ॥ १ ॥

आसां फलं सम्प्रीत्तनमाह।

एताभिर्वा इन्द्रः परमां विजितिं व्यजयत परमामेवै-ताभिर्विजितिं विजयन्ते ॥ २ ॥

सर्वलोकजयः परमोजयः विपराभ्याञ्जेरित्यात्मनेपदं ॥ २ ॥

अथ पूर्वोक्तं पञ्चाहं वज्रत्वेन प्रशस्य महाव्रतं षोडशमहर्वज्रस्य धारणस्थानीयत्वेन प्रशंसति ।

पञ्चदशो वै वज्रोन वा अगृहीतेन वज्रेण वीर्यङ्करोति या षोडश्यारम्भणमेव तद्गृहीतेन वज्रेण वीर्यङ्करोति ॥ ३ ॥

पूर्वोक्तः पञ्चदशरात्रः पञ्चदशस्तोमान् संख्यासामान्यात् पञ्चदशस्तोमेन सह प्रजापत्युरसो बाहुभ्याञ्चोत्पत्तेस्तस्य वज्रसम्बन्धात् पञ्चदशोवज्र इत्युच्यते तस्य महाव्रतं षोडशमहरारम्भणस्थानीयं सुज्ञानमन्यत् तृतीयपञ्चदशरात्रप्रभृति षोडशरात्रपर्य्यन्तस्य क्लमद्वादशरात्रादिकः कल्पः द्रष्टव्यः ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथ प्रजापतेः सप्तदशरात्रं सत्रमाह ।

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं ॥ १ ॥

आसां फलं सप्ररोचनमाह ।

एताभिर्वै प्रजापतिरनन्ताꣳश्रियमजयदनन्ता वा एता यत् पञ्चाहविधाः ॥ २ ॥

अनन्तां श्रियञ्जयहेतुत्वोपपत्तित्वमर्थं अनन्ता वा एता इत्याद्युपन्यासः पञ्चाहविधाः पञ्चाहसङ्गाः तत्संख्याका रात्रय इत्यर्थः अनन्तश्रीकामाश्चत्राप्यधिकारिण इत्यर्थः ॥ २ ॥

अथाद्यं पञ्चाहं प्रशंसति ।

यत् पञ्चाहोऽनन्तादेव प्रजायन्ते ॥ ३ ॥

पञ्चाहानामनन्तत्वादनन्तादैश्वर्य्यादेकाः प्रजायन्तेऽनुष्ठातारो अपि अथ वैताभिर्वैत्यादिकः सर्वोऽपि पञ्चाहार्थवादपरो द्रष्टव्यः ॥ ३ ॥

अथानन्तरभावि द्वादशाहं प्रशंसति ।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्ना-मुपयन्ति प्रजननाय ॥ ४ ॥

गतार्थोऽयं ॥ ४ ॥

कृत्स्नारात्रीः प्रशंसति ।

एता वै प्रतिष्ठिताः सप्तदशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ५ ॥

सप्तदशो वै प्रजापतिरिति श्रुतेः प्रजापतेः प्रतिष्ठितत्वाच्च तत्समानसंख्याका एताः सप्तदशरात्रयोऽपि प्रतिष्ठिता इत्युच्यते एता वा इत्यादिः पञ्चाहस्तुतिपरत्वे प्रतिष्ठाकामा उपेयुरित्येतदधिकारवाक्यं द्रष्टव्यं सप्तदशरात्रे चत्वार्य्यभिप्लविकान्य-

हानि श्यैतनौधसं ब्रह्मणाम पौष्कलस्रुध्योषिहानीत्यादिकः कल्पो-द्रष्टव्यः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
एकादशः खण्डः ॥

अथ द्वादशः खण्डः ।

अथ सर्वायुर्लक्षणसाधनं देवानामष्टादशरात्रं सत्रमाह ।

अतिरात्रोऽभिप्लवः षडहो द्वादशाहस्य दशाहान्यति-रात्रः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अस्यामृतत्वसाधनत्वं सप्ररोचनमाह ।

देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावꣳस्तेभ्य एतेनाष्टादशरात्रेणामृतत्वं प्रायच्छत् ॥ २ ॥

युक्तममृतत्वप्राप्तिरनेन देवानां तेषां मरणाभावात् ॥ २ ॥

कथन्तत् मनुष्याणां फलं स्यादित्याशंक्य तदुचितममृतत्वं दर्शयति ।

एतद्वाव मनुष्यस्यामृतत्वं यत् सर्वमायुरेति वसीयान् भवति ॥ ३ ॥

स्पष्टं ॥ ३ ॥

इदानीममृतत्वकामैरेतदनुष्ठेयमित्याह ।

सर्वमायुर्यन्ति वसीया७ँसो भवन्ति य एता उपयन्ति ॥

॥ ४ ॥

सुगमं ॥ ४ ॥

अथासां रात्रीणां सर्वायुःसाधनत्वमुपपादयति ।

द्विर्वा एता नव नव प्राणा अभिपूर्वमेवैताभिरायुर्द-

धते ॥ ५ ॥

एता अष्टादशरात्रयो द्विर्नव भवति खलु प्राणाश्च नव शिरो-गताः सप्त द्वावर्व्वाञ्चाविति तथा सति अभिपूर्वमेव प्रथमं नवरा-त्रेण पूर्वं पश्चाशहर्षलक्षणं आयुर्योगश्च द्वितीयेन चरममायु-रित्यनुक्रमेणैवं ताभीरात्रीभिः सर्वमायुर्धारयन्ति अथ त्र्यति-रात्रादभिप्लवमुपयन्ति तत्र प्रथमस्याह्न एष प्रत्नानुरूप इत्यादि-कः कल्पोद्रष्टव्यः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य

द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

अथ पञ्चाधिपत्यसाधनं वार्यैकोनविंशतिरात्रमाह ।

एता एव समहाव्रताः ॥ १ ॥

एताः पूर्वोक्ताः अष्टादशैवातिरात्रात् पूर्वभाविनैकेन महा-व्रतेनाह्ना सहैकोनविंशतिरात्रयो भवन्ति ॥ १ ॥

अथासां पशुसाधनत्वं सप्ररोचनमाह ।

एताभिर्वै वायुरारण्यानां पशूनामाधिपत्यमाश्नुतोभ-येषां पशूनामाधिपत्यङ्गच्छन्ति य एता उपयन्ति ॥ २ ॥

एताभिरेकोनविंशतिरात्रोभिर्वायुरारण्यानां द्वीपिशूकरश्वापदपक्षिसरीसृपहस्तिपर्कटादीनां समस्तानामारण्यानां पशूनामाधिपत्यमाश्नुत प्राप्नोत् यद्यप्येताभिरुभयविधाः पशव उलभ्यन्ते तथापि वायोर्गोष्ठेषु गवादिषु नैरपेक्षादारण्येषु विशेषसम्बन्धाद्वायोरारण्यपश्वाधिपत्यमुक्तं उभयेषामित्यादि स्पष्टं तत्रारण्याः दर्शिताः ग्राम्यास्तु गोजाविकपुरुषाश्वगर्दभोष्ट्राः एतेन पश्वर्थिनोधिकारिण इत्युक्तं भवति ॥ २ ॥

प्रकारान्तरेणैताः प्रशंसति ।

मृगसत्त्रं वा एतत् ॥ ३ ॥

मृगार्थं वायुनानुष्ठितं सत्रं मृगसत्रं ॥ ३ ॥

तदेव समर्थयते ।

एताभिर्वा आरण्याः पशवो नाक्रुताः प्रजायन्ते ॥ ४ ॥

एताभिः खलु रात्रीभिर्वायुर्थमारण्याः पशवोनाक्रुताः आ ईषदर्थे क्रुतमिति भावे निष्ठा नविद्यते ईषदपि क्रुतं कारणं रक्षणादिप्रयत्नोयेषान्ते यथोक्ताः तादृशाः सन्तः प्रजायन्ते यद्वैवं व्याख्येयं मृगैर्वासप्रदानादपालनप्रयत्नराहित्येन प्रजननार्थमनुष्ठितं सत्रं अस्ति मृगादीनामपि गवादीनामिवाधिकारः गावो

वा एतत् सत्रमासतेत्यादि श्रुतेः सर्वार्थवादत्वान्न विरुध्यते एताभिर्वा इत्यादि मृगसत्रसमर्थनं ॥ ४ ॥

अस्त्वस्य मृगसत्रत्वं किमतोभिवदतीत्यत आह ।

अनाकृतमेषां प्रजायते य एता उपयन्ति ॥ ५ ॥

अस्यानुष्ठातॄणां अपि पुत्रपश्वादिकमप्रयत्नेनैवोत्पद्यत इत्यर्थः अथाष्टादशरात्रिप्रभृतीनां साधारणः कल्पः, यत्राभिप्लवोरात्रिसत्रेषु श्यैतनौधसब्रह्मसामानः पौष्कलशुध्यौग्निहोत्रसंवत्सरमिताभ्यः कॢप्तमाविंशतिरात्रादिति अयमर्थः अभिप्लवस्य प्रथमोत्पत्तौ प्रत्यहमभीवर्त्तो ब्रह्मसाम तथा प्रत्यहमुष्णिक्षु सुज्ञानं रात्रिसत्रेष्वभीवर्त्तस्थाने श्यैतनौधसेन व्यत्यासं कुर्यात् सुज्ञानस्थाने पौष्कलशुध्यौष्णिहे व्यत्यासङ्कुर्यादिति तथापि रात्रिसत्रेष्वभीवर्त्तस्थाने श्यैतनौधसयोरन्यतरत् साम किमभीवर्त्तस्तोत्रीये स्यात् उत स्वस्तोत्रीया इति सूत्रकारः सम्पाद्य पूर्वोत्तरौ पक्षौ दर्शयति तत्र पूर्वपक्षमाह अभीवर्त्तस्थाने श्यैतनौधसे तास्वेवेति तास्वभीवर्त्तस्तोत्रीयास्वेवेत्यर्थः दृष्टान्तमाह तथोष्णिहेयासु सुज्ञानमिति यथा सुज्ञानस्य स्थाने विहितपौष्कलशुध्ययासु सुज्ञानं तास्वेव भवतस्तद्वदत्रापि भवत इति सिद्धान्तमाह स्वासु त्वावर्त्तीनि सामानि कस्यचित् स्थाने विहितानि स्वास्वेव भवन्तीत्यर्थः दृष्टान्तमाह यथा बृहतौ वषट्कारनिधनं स्वकीयास्वेव भवति बृहद्रथन्तरश्च तत् पृष्ठ्यः षडहः इति अयमर्थः इपुर्नामैकाहः कल्पकारेण श्येनसधर्मः कॢप्तः तत्र श्यैनिकस्य बृहतः स्थाने वषट्कारणिधनं स्वकीयास्वेव भवति तथा बृहद्रथन्तरे पृष्ठ्यः षडह इत्युक्तं वैरूप-

वैराजादिस्थानेष्वेव बृहद्रथन्तरे भवतः तद्दद्वाप्नोति श्यैत-नौधसे यदि परकीयासु स्तोत्रीयासु स्यातां तदा विशेषतस्ता निर्दिशेदेव यथा नौधसस्यर्क्षु जनित्रं ब्रह्मसामित्यादि निर्दिशति स्तस्मात् स्वास्वेवेति सिद्धान्तः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ॥

अथ पुरुषफलसाधनं विंशतिरात्रं सत्रमाह ।

अतिरात्रोभिप्लवः षडहोभिजिच्च विश्वजिच्च द्वे अहनी द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अथासां पुरुषफलसाधनत्वं सप्ररोचनमाह ।

पुरुषकामा उपेयुरेताभिर्वै प्रजापतिः पुरुषमसृजत ॥२॥

स्पष्टं ॥ २ ॥

अथ पुरुषस्य फले तत् साध्यन्तस्यार्थवादमाह ।

स सर्वस्यान्नाद्यस्याधिपत्यमगच्छत् सर्वस्यान्नाद्यस्याधिपत्यं गच्छन्ति य एता उपयन्ति ॥ ३ ॥

सुगमं ॥ ३ ॥

अथैतत् सत्रं रात्रिसंख्याद्वारा प्रशंसति ।

पुरुषमात्रं वा एतत् ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

तत् कथमिति तदुपपादयति ॥

विंशो वै पुरुषो दश हि हस्त्या अङ्गुल्यो दश पाद्याः ॥ ५ ॥

स्पष्टं ॥ ५ ॥

अस्त्वेवं एतावता प्रकृते किमित्यत आह ।

यदेता विंशती रात्रयो भवन्त्येष्वेवैताभिर्लोकेषु पुरुषं प्रतिष्ठापयन्ति ॥ ६ ॥

पुरुषांगुलिसंख्यासाम्याद्विंशतिरात्रात्मकं सत्रमुपयन्ति ते पुरुषमेष्वेव लोकेषु प्रतिष्ठापयन्ति ते लोकेषु प्रतितिष्ठन्तीत्यर्थः ॥६॥

पुनरेताः रात्रीः प्रशंसति ।

एता वै प्रतिष्ठिता विंशतीरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ७ ॥

रात्रीणां पुरुषांगुलिसंख्यासाम्यात्तस्य प्रतिष्ठितत्वादासामपि प्रतिष्ठितत्वं अथात्र विंशतिरात्रे सांवत्सरिकौ विश्वजिदभिजितावित्यादिकः कल्पो द्रष्टव्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

अथ द्वौ एकविंशतिरात्रौ तत्र पशुफलसाधनं प्रथमं एकविंशतिरात्रमाह ।

अतिरात्रोऽभिप्लवः षडहोऽतिरात्रोऽभिप्लवः षडहोऽभिप्लवः षडहोऽतिरात्रः पशुकामा उपेयुः ॥ १ ॥

स्पष्टं ॥ १ ॥

पशुफलं सार्थवादं दर्शयति ।

एताभिर्वा आदित्याः सप्त ग्राम्यान् पशूनुदसृजन्त पशूनेवैताभिरुत्सृजन्ति ॥ २ ॥

उत्सृजन्ति उत्पादयन्ति लभन्त इत्यर्थः पशवोगोजाश्वादयः एकविंशतिरात्रीणां पशुसाधनत्वमुक्तं ॥ २ ॥

एकविंशतेः सप्तसंख्यायाश्च कथं वैषम्यं स्यादिति तत् समर्थयते ।

त्रिर्वै सप्त सप्तादित्याः ॥ ३ ॥

यद्यप्येता एकविंशतिस्तथापि विभागस्त्रिसप्त भवन्ति वस्तुतोऽतिरात्रः षडहश्चेति सप्तैव आदित्याश्च सप्त आरोगभ्राजादयः देवा आदित्याः सप्तेति मन्त्रवर्णाऽच्च तूभयसंख्यासाम्यं ॥ ३ ॥

रात्रीणामादित्यसमसंख्यात्वेन कथं पशुफलकत्वमिति तदुपपादयति ।

पशव आदित्याः ॥ ४ ॥

आदित्यानां पशूनाञ्च सृष्टिविभागसम्बन्धः सच प्रदर्शित एव यद्वा संख्यासाम्यसम्बन्धः ॥ ४ ॥

न केवलं रात्रीणामादित्यसंख्यासाम्यात् पशुफलसाधनत्वं किन्तु लोकद्वयसमृद्धिहेतुरिति भवतीति वक्तुमाह ।

आदित्या अस्मिंल्लोकऋद्धा आदित्या अमुष्मिन् ॥५॥

स्पष्टं ॥ ५ ॥

कथं लोकद्वयेषु तेषां समृद्धित्वमिति तदुपपादयति ।

पशवोऽस्मिन् ऋतवोऽमुष्मिन् ॥ ६ ॥

पशव आदित्या इत्युक्तत्वात् पशूनामस्मिंल्लोके समृद्धिः आदित्या अप्यत्र समृद्धा एव तथा अमुष्मिन् द्युलोके ऋतवः समृद्धाः सप्तादित्या नित्य इत्यमुष्मिन् द्युलोकेष्वादित्याः समृद्धाः ॥ ६ ॥

इदानीमादित्यसंख्याकैकविंशतिरात्रीरुपेयुषामपि लोकद्वयसमृद्धिर्भवतीत्याह ।

उभयोरनयोर्लोकयोर्ऋध्नुवन्ति देवलोके च मनुष्यलोके च य एता उपयन्ति ॥ ७॥

अथास्य कल्पः पर्वस्यैकविंशतिरात्रस्य षोडशिकाग्र्यतिरात्रावभितः षोडषिमान्मध्ये सर्व्वा षोडशिकाः तेच सर्वे तेचाग्नेऽर्हिस मन्तइति अत्रैकविंशतिरात्रे त्रयोऽभिप्लवाः षडहास्तत्र तृतीयः

प्रतिलोमानुलोमा वेति संशये मतद्वयं दर्शयति सूत्रकारः तथा-हि पूर्वस्मिन्नेकविंशतिरात्रे भिप्लवं तृतीयमनुलोमं व्यावृत्तिरिति कुतइत्यादि नव्यावृत्तिं विज्ञायत इति आवृतस्तृतीयोभिप्लवः कुत इति नास्ति वचन इत्यर्थः प्रतिलोमं शाण्डिल्योद्वावभिप्लवावित्येक-वचनादिति द्वितीयतृतीययोरभिप्लवयोर्व्यवधानाभावात् द्वावभि-प्लवावित्येकशेषं कृत्वा वक्तव्यं न च तथाकृतं ब्राह्मणे किंत्वभि-प्लवोभिप्लवइति पृथगेव निर्दिष्टाः तेन नूनं पृथग्धर्म्माः तृतीयः प्रतिलोमः यथा प्रथमे चतुर्दशरात्रे द्वयोः पृष्ठ्ययोः सह वक्तव्यात् प्रातिलोम्यादेव पृथङ्निर्द्दिशः तद्यथा पृष्ठ्यः षडहस्त्रयस्त्रिंशा-रंभण इति तद्वदत्रापीति युक्तं ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य पञ्चदशः खण्डः ॥

अथ षोड़शः खण्डः।

अथ द्वितीयमेकविंशतिरात्रं ब्रह्मवर्चसफलसाधनमाह।

अतिरात्रः पृष्ठ्यः षड़हस्त्रयः स्वरसामानो दिवाकीर्त्त्य-महस्त्रयः स्वरसामानः पृष्ठ्यः षड़हस्त्रयस्त्रिंꣳशारम्भणो-तिरात्रो ब्रह्मवर्चसकामाउपेयुः ॥ १ ॥

ब्रह्मवर्चसन्नाम तेजोविशेषः सच तमोहनमन्तरेण नोदेति ॥१॥

अतस्तद्रूपं फलं सार्थवादमस्य दर्शयितुमाह।

स्वर्भानुर्वा आसुरः सूर्य्यं तमसाविध्यत्तस्मै देवाः प्राय-श्चित्तिमैच्छꣳस्तएता अविन्दꣳस्ताभिरस्मात्तमोपाघ्नन् ॥ २ ॥

पूर्व्वमासुरः असुरसम्बन्धी स्वर्भानुर्न्नामकः सूर्य्यन्तमसा मायया अविध्यत् आवृतवान् यद्वा आसुरः असुरः स्वार्थिकस्तद्धितः तथा च मन्त्रसाधनवर्णः तस्मै तमोविद्वाय सूर्य्याय देवाः प्रायश्चित्तिन्तमोहननसाधनमैच्छन् विचारितवन्तः ते तदा एता एकविंशतिरात्रीः साधनत्वेनाविदन् लब्धवन्तः ताभिरनुष्ठिताभिरस्मात् सूर्य्यात्तमोपाघ्नन् ॥ २ ॥

तदनुष्ठातॄणामप्येतत् फलं भवतीति दर्शयति ।

अपतमोघ्नते य एता उपयन्ति ॥ ३ ॥

प्रतिबन्धकपापरूपन्तमोपहत्य ब्रह्मवर्च्चसन्तेजोऽभजन्त इत्यर्थः अत्र राजने रुद्रदैवस्य एतासां रात्रीणामनुष्ठानेन किंलाभाभवदिति वक्ष्यमाणत्वात्तत्परिहाराय केचित् प्रयोगविशेषाः कर्त्तव्याः ॥ ३ ॥

तत्र किञ्चित् पशुविशेषमालभ्यं दर्शयति ।

सौमपौषं पशुमुपालंभ्यमालभेरन् ॥ ४ ॥

सोमपूषणौ तावुभौ देवता अस्य स पशुः सौमपौषः स चोपालंभ्यः सवनीयपशोः पश्चादालम्भनीयः तं पशुमालभेरन् ॥ ४ ॥

अथ पशोरुक्तदेवतात्वं प्रशंसति ।

सोमो वै ब्राह्मणः पशवः पूषा स्वामेव तद्देवतां पशुभिर्व्व्यृद्धयन्ते त्वचमेवाकृत ॥ ५ ॥

सोमोऽस्माकं ब्राह्मणानां राजा इति श्रुतेः ब्राह्मणस्वामित्वात्

स्वयमपि च ब्राह्मणएव वैराजरथन्तरप्रसिद्धिद्योतनार्थः तन्ने णोक्तदेवतापशुकरणेन तस्यामेव देवतां सोममेव पशुभिर्वर्द्धयन्ते बहुकुर्व्वन्ति यद्वा वर्द्धेति वर्द्धनार्थः किञ्च त्वचमेव सद्वृत्तिं रक्षामेव दीप्तं त्वग्यातुं वा कृतवन्तो भवन्ति तथा च सौमपौषं पशुं प्रकृत्य श्रुत्यन्तरं सोमोवै देवता पुरुषः पौष्णाः पशवः स्वयैवात्मानं देवतया पशुभिस्त्वचं करोति न दुःखमाभजतीति ॥ ५ ॥

अत्र सामिधेनीषु विशेषमाह ।

मनो ऋचः सामिधेन्यो भवन्ति ॥ ६ ॥

स्पष्टं । ६ ।

मनुसम्बन्धं प्रशंसति ।

मनुर्वै यत् किञ्चावदत्तद्भेषजम्भेषजतायै ॥ ७ ॥

रागद्वेषादिशोकापनोदकस्य मनोः परानुग्रहार्थं स यत् किञ्चापि धर्म्मविषयं वाक्यमवदत् तद्भेषजं हितं अथ यस्तदीयधर्म्मः सामिधेनीकरणं भेषजतायै सकलदोषस्यौसधाय भवति ॥ ७ ॥

अस्य सत्रस्य कालविशेषमाह ।

नैदाघीय उपेयुः ॥ ८ ॥

नैदाघीये निदाघसम्बन्धिनि काले ग्रीष्मर्त्तावित्यर्थः ॥ ८ ॥

तं कालं प्रशंसति ।

तद्ध्येष प्रतितेजिष्ठन्तपति ॥ ९ ॥

तत्र तस्मिन् निदाघे एषः सूर्य्यः तेजिष्ठं अत्यन्ततेजोयुक्तं खलु तपति इति ॥ ९ ॥

अस्त्वेवं ततः सत्रिणां किं स्यादित्यत आह ।

किलासत्वात्तु भयमतिह्येभ्योपघ्नन्ति ॥ १० ॥

सुविशेषोवास्त एते तत् सत्रेण किलासः सिद्धाः किलासत्वात् दुश्चर्म्मावयवस्याधिसम्भवात् भयन्न भवति अतो ग्रीष्मेनुष्ठानाविष्टपत्वादित्य एभ्यः सत्रिभ्यः सकाशादति अत्यधिकां अपहर्ति खलु भयं अतो अयं कालोचित इत्यर्थः ॥ १० ॥

कथमस्य किलाससाधनत्वमिति तत् समर्थयते ।

एतावाउग्रदेवो राजनिरुपैत् सकिलासोभवत् ॥ ११ ॥

एता रात्रीः खलु राजनिः रजनस्यापत्यमुग्रदेव उपैति उपेत्य सोग्रदेवाः किलासः किलासवानभवत् ॥ ११ ॥

अथोक्तार्थज्ञानपुरःसरमेव सत्रानुष्ठानं प्रशंसति ।

अकिलासो भवति य एवं विद्वानेता उपैति ॥ १२ ॥

उग्रदेवस्यैकस्यैव प्रयोगप्रामविद्यानुवोत्येककर्तृकत्वविधानं तेनास्मिन् सत्रे एकोप्यभिक्रमतीति वेदितव्यं यद्वा उपैतीति उभयत्र बहुवचनं कर्त्तव्यं अत्र कल्पः उत्तरस्यैकविंशतिरात्रस्य संवत्सरक्लृप्तान्यहान्यनु क्लृप्ताभोवर्त्तकाले यः पृष्ठ्यः श्वेतनौधसब्रह्मसामानः पौष्कलस्युध्यौष्णिहोविषुवतः तस्य सामटचस्य लोक आभोगव आयन्त इव सूर्य्यमिति विकर्ण्णं समानमितरमिति तथा यस्मादतिरात्रात् पृष्ठ्यमुपयन्ति प्रथमस्याङ्गोस्य प्रज्ञानुरूप इति साधारणः कल्पः ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य षोडशः खण्डः ।

अथ सप्तदशः खण्डः।

अथान्नाद्यफलसाधनं द्वाविंशतिरात्रं सत्रमाह।

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहोभिप्लवः षडहो द्वादशाहस्य दशाहानि महाव्रतस्यातिरात्रस्यान्नाद्यकामा उपेयुः॥ १॥

स्पष्टं। १।

आसां रात्रीणां उक्तफलसाधनत्वं प्रदर्शयन् प्रशंसति

पञ्चर्त्तवो द्वादशमासास्त्रयइमे लोका असावादित्य एकवि[ं]शोन्नं द्वावि[ं]शमेभ्यो लोकेभ्यः संवत्सरादमुष्मादादित्यादन्नाद्यमवरुन्धते य एता उपयन्ति॥ २॥

ऋतव आदित्यपर्य्यन्तादेवाः अन्नहेतवः स्वस्थानीया एकविंशतीरात्रयः द्वाविंशमहः तत् सम्बन्ध्यन्नं अन्नत एताभिरत्रावरोधोयुक्तः अत्र यत्रातिरात्रादभिप्लवमुपयन्ति प्रथमस्याङ्ग एष प्रत्नानुरूपो यत्र वा त्रिकद्रुकेभ्यो यत्राभिप्लवीरात्रिसत्रेषु श्वैतनौधसब्रह्मसामानः पौष्कलश्रुध्योष्णिहोन्यत्र संवत्सरसंमितादिति सामान्यकल्पोद्रष्टव्यः॥ २॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य सप्तदशः खण्डः।

अथ अष्टादशः खण्डः ।

अथ प्रतिष्ठासाधनं त्रयोविंशतिरात्रम् सत्रमाह ।

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहोभिप्लवः षडहोद्वादशाहस्य दशाहान्यतिरात्रः प्रतिष्ठाकामा उपेयुः ॥ १ ॥

स्पष्टं ॥ १ ॥

प्रतिष्ठासाधनत्वं सप्ररोचनमाह ।

एताभिर्वै प्रजापतिरेषु लोकेषु प्रत्यतिष्ठत् ॥ २ ॥

एषु भूरादिलोकेषु ॥ २ ॥

पुनस्त्रित्वद्वारेतारात्रीः प्रतिष्ठाफलस्योचिता इति प्रशंसति ।

यदेतास्त्रयोविꣳशतीरात्रयो भवन्ति त्रय इमे लोका एष्वेवैताभिर्लोकेषु प्रतितिष्ठन्ति ॥ ३ ॥

स्पष्टं ॥ ३ ॥

रात्रीणां प्रतिष्ठितत्वादपि सत्रिणामपि प्रतिष्ठाफलं भवतीत्याह ।

एता वै प्रतिष्ठितास्त्रयोविꣳशतीरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ४ ॥

प्रजापतेः प्रतिष्ठासाधनत्वाद्वा प्रतिष्ठितलोकत्रयसमसंख्याकरात्रीणामाधिक्याद्वा एता अपि प्रतिष्ठिता इत्युच्यन्ते ॥४॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
अष्टादशः खण्डः।

अथ ऊनविंशः खण्डः।

द्वौ चतुर्विंशतिरात्रौ तत्र स्वर्गोत्पत्तिसाधनं प्रथमं चतुर्विंशतिरात्रं सत्रमाह।

अतिरात्रः पृष्ठ्यः स्तोमः षड़हस्त्रयस्त्रिंशमहरनिरुक्तमुपहव्यस्य तन्त्रे क्लृप्तन्तस्य कण्वरथन्तरम्माध्यन्दिनेऽथ त्रयस्त्रिंशं निरुक्तं त्रिणवन्द्वे एकविंशे त्रिणवन्त्रयस्त्रिंशमहनिरुक्तं त्रयस्त्रिंशमहरनिरुक्तं पृष्ठ्यः स्तोमः षड़हः प्रत्यङ्त्रिवृदहरनिरुक्तं ज्योतिष्टोमोग्निष्टोमोतिरात्रः ॥१॥

पृष्ठ्यः स्तोमः षडहइति वैरूपादिपृष्ठचतुष्टयरहितोरथन्तरबृहद्भ्यामेव निर्वर्त्त्यः रथन्तरपृष्ठान्ययुजानि बृहत्पृष्ठानीतराणीति व्यवस्था सच द्वितीयः प्रत्यङिति त्रयस्त्रिंशारम्भण इत्यर्थः प्रथमं त्रयस्त्रिंशमहरनिरुक्तं तदोपहव्यस्य तन्त्रे क्लृप्तं उपहव्योनामैकाहतन्त्रेणैव तदतिक्लृप्तं इर्यांस्ततो विशेषः माध्यन्दिनसवने पवमाने कण्वरथन्तरं पुनानस्सोमधारयेत्येतासु कर्त्तव्यं शिष्टं स्पष्टं ॥ १ ॥

अस्य स्वर्गोत्पत्तिसाधनत्वं सप्ररोचनमाह।

एताभिर्वै देवाः स्वर्गे लोके समसीदन् स्वर्गे लोके सीदामेत्येताः ॥ २ ॥

पूर्वमेताभीरात्रिभिः स्वर्गे लोके सीदामेत्यभिसन्धायैता रात्रीरनुष्ठाय देवसंलक्षणे स्वर्गे समसीदन् अत एताः स्वर्ग्या इति शेषः तथा च तैत्तिरीयकं यथा वै मनुष्या एवं देवा अग्र आसन् ते कामयन्तावर्त्तिं पाप्मानं मृत्युमपहत्य दैवे संसदं गच्छेमेति त एतं चतुर्विंशतिरात्रमपश्यन्नित्यर्थः ॥ २ ॥

अथासां स्वर्गत्वं साधयति।

एता वाव ब्रध्नस्य विष्टपो यदेते त्रयस्त्रिंशा मध्यतः सन्धीयन्ते तेन ब्रध्नस्य विष्टपं रोहन्ति ॥ ३ ॥

एता वाव एता एव चतुर्विंशतीरात्रयो ब्रध्नस्यादित्यस्य विष्टपो द्युलोक इत्यर्थः असौ वा आदित्यो ब्रध्न इति हि श्रुत्यन्तरं एवं सति ब्रध्नस्य विष्टपस्थानीयासु रात्रिषु यद्यपि एते त्रयस्त्रिंशाः त्रयस्त्रिंशस्तोमकान्यहानि मध्यतः सन्धीयन्ते सम्यक् प्रयुज्यन्ते तेन साधनेन ब्रध्नस्य विष्टपमेव रोहन्ति सत्रिणः ॥ ३ ॥

अथासां मध्ये यत् पृष्ठ्यः स्तोमः षडहस्तद्यन्तत् प्रशंसति।

मध्यतः पृष्ठान्युपयन्त्यन्नं वै पृष्ठान्यन्नमेव तन्मध्यतो धीयते तस्मान्मध्ये सदन्नं धिनोति ॥ ४ ॥

अन्नसाधनत्वात् षट्सामात्मकान् संख्यासाम्यात पृष्ठानां साम्येन स्तुतिः ॥ ४ ॥

अथातिरात्रमग्निष्टोममुक्त्वा शिष्टा एकविंशतिरात्रीः सप्तधा विभज्य प्रशंसति।

सप्ताहा वा एते ॥ ५ ॥

स्पष्टं ॥ ५ ॥

ततः किमित्यत आह।

अतो वै प्रजाः प्रजायन्ते ॥ ६ ॥

अतः सप्ताहमकाशात् ॥ ६ ॥

ततश्च किमित्यत आह।

प्रप्रजया प्रपशुभिर्जायन्ते य एता उपयन्ति ॥ ७ ॥

स्पष्टं ॥ ७ ॥

अथ पुनः सप्ताहरूपत्वमेव छन्दोमस्थानीयत्वेन प्रशंसति।

अपशव्यं वा एतत् सत्रं यदच्छन्दोमं यत्सप्ताहास्तेन छन्दोमवत्यस्तेन पशव्याः ॥ ८ ॥

पशवश्छन्दोमा इति श्रुतेस्तद्राहित्यादेतत्सत्रमपशव्यङ्खलु तथा सति यत्सप्ताहा भवन्ति तेन छन्दोमवत्यः अतः पशव्याः मुख्यसप्तछन्दःसंख्यासाम्यात् छन्दोमत्वस्तुतिः ॥ ८ ॥

अत्र त्रयस्त्रिंशविंशत्योश्च यदहरन्तरा व्यवहितमस्ति तत् प्रशंसति।

त्रयस्त्रिंशस्त्रयस्त्रिंशमन्वेति त्रिवृत्त्रिवृतमशादग्रं

रोहन्ति यत्त्रयस्त्रिंशस्त्रयस्त्रिंशमन्वेति प्राणात् प्राणेषु प्रतितिष्ठन्ति ॥ ९ ॥

त्रयस्त्रिंशस्य त्रिवृदादिषट्कानामग्रत्वात्तयोरानन्त्यात्मकत्वस्य स्वर्गादेरग्ररोहणं युक्तं त्रिवृच्छन्दोमस्तोत्रीयानवकात्मकत्वात् प्राणानां च नवकात्मकत्वात् प्राणेषु प्रतितिष्ठन्ति प्राणेषु प्रतिष्ठा नाम चिरकालजीवनं त्रयस्त्रिंशयोरनुगतिः स्पष्टा ॥ ९ ॥

यत्त्रिवृत्त्रिवृतं ॥१० ॥

त्रिवृतो द्वितीयस्य पृष्ठ्यस्तोमषडहस्य प्रत्यक्त्वादन्तिमं त्रिवृदहर्भवति तत उत्तरमेकं त्रिवृदनिरुक्तमहः स्यात एवमतस्तयोरनुगतिः ॥ १० ॥

अथान्तिममग्निष्टोममहस्तदितरसम्पत्त्यर्थमिति प्रशंसति ।

विलोमानो वा एता रात्रयो यत्ज्योतिरग्निष्टोम उत्थानीयमहर्भवत्यक्लृप्तस्य क्लृप्त्यै ॥ ११ ॥

त्रयस्त्रिंशानन्तरं त्रिणवमहस्ततः पश्चादेकविंशे द्वे इत्यादिव्युत्क्रमादेता रात्रयो विलोमानः अस्य स्त्रीलिङ्गेप्येवं रूपं तासां यद्यदि ज्योतिष्टोमोग्निष्टोम उत्थानीयः सत्रोत्थानसम्बन्ध्यहर्भवति तदक्लृप्तस्य अनिर्दिष्टस्य प्रजापश्वादिव्यतिरिक्तस्य फलस्य क्लृप्त्यै सम्पद्यते ज्योतिष्टोमस्याङ्गः एव प्रतानुरूपो गौरीवितमनुष्टुभ्यन्वहमविक्लृप्तस्य सर्वसाधनत्वादिति भावः अथ कल्पः, अत्र संसदामतिरात्रः पृष्ठ्यः स्तोमः षडहः प्रथमक्लृप्तं चतुर्थमहः

पञ्चमस्याह्न आकूपारस्य लोके त्वाष्ट्री साम यद्यनुतोदमित्यादि-
कल्पो द्रष्टव्यः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
एकोनविंशः खण्डः ।

अथ विंशः खण्डः ।

अथ द्वितीयं चतुर्विंशतिरात्रं प्रजापश्वोरन्यतरकामानां सत्र-
माह ।

**अतिरात्रौ द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहा-
न्यतिरात्रः प्रजाकामा वा पशुकामा वोपेयुः ॥ १**

स्पष्टं । १ ।

आद्यं षडहद्वयं प्रशंसति ॥

**क्लृप्ताद्वै योनेः प्रजाः पशवः प्रजायन्ते यत् क्लृप्तौ षडहा-
वुपयन्ति क्लृप्तादेव योनेः प्रजया पशुभिः प्रजायन्ते ॥ २ ॥**

लोके खलु क्लृप्तादेवोत्पादनयोग्यादेव प्रच्छाद्यो न प्रजाः
पशवश्चोत्पद्यन्ते अस्तु तथा लोके किन्तत आह यद्यदि क्लृप्तौ
गवामयने सिद्धौ षडहावुपयन्ति सत्रिणः तर्हि क्लृप्तादेव योनेः
स्वयमपि प्रजाः पशुभिश्च प्रजायन्ते समृद्धाभवन्ति ॥ २ ॥

अथ दशाहं प्रशंसति ।

**अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्ना-
मुपयन्ति प्रजननाय ॥ ३ ॥**

गतार्थमिदं ॥ ३ ॥

अथ सर्वा रात्रीः प्रशंसति ।

एतावै प्रतिष्ठिताश्चतुर्विंꣳशतीरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ४ ॥

प्रतिष्ठितस्य संवत्सरस्यावयवभूतानामर्द्धमासानां समानसंख्योपेतत्वादासामपि प्रतिष्ठितत्वमिति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य विंशः खण्ड ।

अथ एकविंशः खण्डः ।

अथान्नाद्यफलसाधनं प्रजापतेः पञ्चविंशतिरात्रं सत्रमाह ।

एता एव स महाव्रताः ॥ १ ॥

एता एव द्वितीयचतुर्विंशतिरात्रोक्ता एव ॥ १ ॥

आसामन्नाद्यफलाय सम्प्ररोचनमाह ।

एताभिर्वै प्रजापतिः सर्वमन्नाद्यमवारुन्ध ॥ २ ॥

अत इदानीं अन्नाद्यमवरुन्धते इति ॥ २ ॥

अथादिष्टमहाव्रतम्मिलित्वान्नाद्यफलसाधनमिति प्रशंसति ।

चतुर्विंꣳशतिः संवत्सरस्यार्द्धमासाः संवत्सरः पञ्चविंशोन्नं व्रतं संवत्सरादेताभिरन्नाद्यमवरुन्धते य एता उपयन्ति ॥ ३ ॥

संवत्सरावयवभूताश्चतुर्विंशतिरर्द्धमासस्थानीयाश्चतुर्विंशति-रात्रयः पञ्चविंशोऽवयवी संवत्सरः तत्स्थानीयं महाव्रतमन्नं एवं सत्येताभिः सत्रिभिः संवत्सरादेवान्नाद्यमवरुन्धते संवत्सरे कृत्स्ना-न्ननिष्पत्तेः के अवरुन्धत इति चेत् य एता उपयन्ति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
एकविंशः खण्डः।

अथ द्वाविंशः खण्डः।

अथ षड्विंशतीरात्रं प्रतिष्ठासाधनं सत्रमाह।

अतिरात्रो गौश्चायुश्च द्वे अहनी द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं ॥ १ ॥

आसां प्रतिष्ठासाधनत्वं सप्ररोचनमाह।

ऋतवोनप्रत्यतिष्ठंस्त एताभिः प्रत्यतिष्ठन् प्रतिष्ठाकामाउपेयुः प्रत्येव तिष्ठन्ति ॥ २ ॥

स्पष्टं। २।

प्रतिष्ठामेव प्रयोक्तृगतसंख्यया प्रशंसति।

षडवा ऋतव ऋतुष्वेवैताभिः प्रतितिष्ठन्ति ॥ ३ ॥

स्पष्टं। ३।

आद्यौ द्वे अहनी प्रशंसति ।

यद्गौश्चायुश्च द्वे अहनी भवतो मिथुनौ स्तोमावुपयन्ति प्रजात्यै ॥ ४ ॥

गौः स्त्री आयुः पुरुष इति मिथुनौ परस्परं प्रजात्यै प्रजननाय ॥ ४ ॥

अथ षडहौ प्रशंसति ।

यत्क्लृप्तौ षडहावुपयन्ति क्लृप्ता एव ॥ ५ ॥

विप्रकीर्णत्वाभावेन गवामयनं एतत् क्लृप्तौ प्रजादिक्लृप्तौ सम्पद्यते ॥ ५ ॥

अथ दशाहं प्रशंसति ।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥ ६ ॥

स्पष्टं । ६ ।

अथ सर्वामिलित्वा प्रशंसति ।

एता वै प्रतिष्ठिता षड्विंशतीरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ७ ॥

ऋतूनां प्रतिष्ठासाधनत्वात्तेषां च संवत्सरात्मकत्वेन प्रतिष्ठितत्वादासामपि प्रतिष्ठितत्वं ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
द्वाविंशः खण्डः ।

अथ त्रयोविंशः खण्डः ।

अथ सिद्धसाधनसत्त्राणां सप्तविंशतिरात्रमाह ।

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहो द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्र ऋद्धिकामा उपेयुः ॥ १ ॥

गतार्थमेतत् ॥ १ ॥

ऋद्धिफलं प्रयोगद्वारोपपादयति ।

एताभिर्वै नक्षत्राणि सर्वामृद्धिमार्ध्नुवन् सर्वामृद्धिमृध्नुवन्ति य एता उपयन्ति ॥ २ ॥

अत एता उपेयुसः समृद्धा भवन्ति ॥ २ ॥

प्रयोक्तृसंख्यासाम्यादप्येताः प्रशस्ता इत्याह ।

यदेताः सप्तविꣳशतीरात्रयो भवन्ति सप्तविꣳशतिर्नक्षत्राणि नक्षत्रसम्मिता वा एता रात्रयो नक्षत्राणामेवर्द्धिमृध्नुवन्ति ॥ ३ ॥

स्पष्टं ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
त्रयोविंशः खण्डः ।

अथ चतुर्विंशः खण्डः ।

अथ पशुफलसाधनमष्टाविंशतिरात्रं सत्रमाह ।

एता एव स महाव्रताः पशुकामा उपेयुर्यदेता अष्टा-

त्रिंशतीरात्रयो भवन्त्यष्टाशफाः पशवः शफशएवैताभिः पशूनवरुन्धते ॥ १ ॥

सुगमं ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
चतुर्विंशः खण्डः ॥

अथ पञ्चविंशः खण्डः ।

अथानन्तकश्रीफलसाधकं प्रजापतेरेकोनत्रिंशद्रात्रं सत्रमाह ।

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहोद्वावभिप्लवौ पड्हौ द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं ॥ १ ॥

आसां श्रीफलं सप्ररोचनमाह ।

एताभिर्वै प्रजापतिरनन्ताᳪश्रियमजयत् ॥ २ ॥

स्पष्टं ॥ २ ॥

कथमनन्तश्रीफलसाधकत्वं अस्येति तदुपपादयति ।

अनन्ता वा एता या एकयानत्रिᳪशन्नेति वै वाचोनन्त ॥ ३ ॥

एता रात्रयोऽनन्ता वह्वः खलु यद्वा अनन्ताः पञ्चाहपडहाद्याः

अनन्तसङ्ख्यात्मकासु तथा ततः कीतिशयइति तन्नोच्यते यदा नैकयानेति न अयत तदेव वाचोऽनन्त्यं तद्भाव आनन्त्यं वा प्रतीतिः ॥ ३ ॥

अस्त्वेवं सत्रिणां किमायातमिति तदुच्यते ।

यदेता एकयानत्रिंशद्रात्रयोभवन्त्यनन्तामेवैताभिः श्रियं जयन्ति ॥ ४ ॥

स्पष्टं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य पञ्चविंशः खण्डः ।

अथ षड्विंशः खण्डः ।

अथान्नाद्यफलसाधनं त्रिंशद्रात्रं सत्रमाह ।

अतिरात्रस्त्रयोभिप्लवाः षडहाद्वादशाहस्य दशाहान्यतिरात्रोऽन्नाद्यकामा उपेयुः ॥ १ ॥

स्पष्टं ॥ १ ॥

अथैता अन्नाद्यसाधनाइति स्तौति ।

परोक्षमन्यानि सत्राणि विराजं सम्पद्यन्ते प्रत्यक्षमेता-विराजꣳसम्पन्नाः ॥ २ ॥

अन्यानि सत्राणि स्तोमपरिगणनादिना विराजं संपद्यन्ते एतत् सत्रगतासु रात्रयः प्रत्यक्षं विराजं त्रिंशत्संख्योपेतत्वात् त्रिंशदक्षरा विराडिति श्रुतेः ॥ २ ॥

अस्त्वेवं किं ततः सत्रिणामित्यत आह ।

प्रत्यक्षमेताभिरन्नाद्यमवरुन्धते य एताउपयन्ति ॥३॥

अन्नं विराडिति श्रुतेरेताभिरन्नावरोधइति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
षड्विंशः खण्डः ।

अथ सप्तविंशः खण्डः ।

अथान्नाद्यसाधनं प्रजापतेरेकत्रिंशद्रात्रंसत्रमाह ।

एता एव समक्षाभ्रता एताभिर्वै प्रजापतिरभिपूर्वमन्नाद्यमवारुन्ध ॥ १ ॥

अभिपूर्वमनुक्रमेणैव ॥ १ ॥

कथमाभिरन्नाद्यस्याभिपूर्व्वमिति तदुपपादयति ।

अन्नं विराडन्नं व्रतं ॥ २ ॥

पूर्वोक्तं त्रिंशद्रात्राख्यमेवमन्नस्य महाव्रतस्यानसाधनत्वं अस-कृदुक्तं अत उभयोरप्यन्नात्मकत्वादुभयानुष्ठानक्रमेणान्नलाभः ॥ २ ॥

अथान्येषामपि एतदनुष्ठायिनामेतत् फलं भवतीत्याह ।

अभिपूर्व्वमेवैताभिरन्नाद्यमवरुन्धते ॥ ३ ॥

स्पष्टं ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य सप्तविंशः खण्डः ।

अथ अष्टाविंशः खण्डः ।

अथ पशुफलसाधनं द्वात्रिंशद्रात्रं सत्रमाह ।

अतिरात्रो गौश्चायुश्च द्वे अहनी त्रयोभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः ॥ १ ॥

स्पष्टं ॥ १ ॥

अथास्य पशुसाधनत्वं वक्तुमुक्तसंख्यामनुष्टुप्संपादनेन प्रशंसति ।

अनुष्टुब्वा एता रात्रयः ॥ २ ॥

स्पष्टं ॥ २ ॥

कथमिति तदुपपादयति ।

द्वात्रिꣳशदक्षरानुष्टुप् ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अतः किमित्याह ।

वागनुष्टुप् ॥ ४ ॥

स्पष्टं ॥ ४ ॥

वागात्मकत्वेन पश्वात्मकत्वं दर्शयति।

चतुष्पादाः पशवः॥ ५॥

अनुष्टुभश्चत्वारः पादाः पशूनामपि तावन्त एव अतस्तयोः सम्बन्धः॥ ५॥

अस्त्येवं किं तत इत्याह।

वाचा पशून्दाधार॥ ६॥

पूर्व्वं प्रजापतिः वाचानुष्टुवात्मना यान् पशून् दाधारेति अनुष्टुभोवाग्रूपत्वमसकृद्दर्शितं॥ ६॥

कयावाचेति सोच्यते।

एताभीरात्रीभिः॥ ७॥

रात्रीणां अनुष्टुभाञ्च संख्यासाम्याद्वाचा दाधारेत्युपचर्य्यते॥ ७॥

इदानीमपि पशूनां वाचा आगमनादिव्यवहार एतत्सम्बद्ध इत्याह।

तस्मात्ते वाचा सिद्धा वाचा हूता आयन्ति॥ ८॥

यस्मात् प्रजापतिः वाचा पशून् धृतवान् तस्मादिदानीमपि स्वस्वामिवाचा सिद्धा वाङ्मात्रव्यवहारा आसन् किञ्च वाचा एहीत्यादिरूपया वाचा आहूताः स्वामिशकाशमायान्ति इदानीन्तनप्रतिछ्या प्रजापतेर्वाचा पशुधारणं सम्मतं भवति अत एवाभीरात्रीभिः पशुकामानामुचित इत्यर्थः।

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ ८ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्क-
भूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माध-
वीये सामवेदार्थ-प्रकाशे ताण्ड्यमहाब्राह्मणे
त्रयोविंशाध्यायस्य अष्टाविंशः खण्डः ।
त्रयोविंशाध्यायः समाप्तिगमत् ।

अथ चतुर्विंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निश्वसितं वेदायो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

त्रयोविंशत्यध्याये द्वात्रिंशद्रात्रिपर्यन्तानि सत्राणि निगदितानि अथास्मिंश्चतुर्विंशेऽध्याये त्रयस्त्रिंशद्रात्रमारभ्य संवत्सरपर्यन्तानि सत्राणि निरूप्यन्ते तत्रादौ प्रतिष्ठाकामाय त्रयस्त्रिंशद्रात्रसंज्ञकं सत्रमाह ।

अतिरात्रस्त्रयः पञ्चाहा विश्वजिदतिरात्र एकः पञ्चाहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं । १ ।

एतस्मिन् सत्रे अधिकारिणो दर्शयति ।

प्रजापतिः प्रजा असृजत ताः प्रत्यतिष्ठꣳस्ता एताभिः प्रत्यतिष्ठन्निमे लोका न प्रत्यतिष्ठꣳस्त एताभिः प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः प्रत्येव तिष्ठन्ति ॥ २ ॥

प्रजापतिना सृष्टा देवमनुष्याद्याः प्रजाः पृथिव्यादिलोकाश्च न प्रत्यतिष्ठन् स्थैर्य्यन्नालभन्त ततः प्रजापतिनानुष्ठिताभिरेताभिस्त्रयस्त्रिंशद्रात्रीभिः प्रतिष्ठामलभन्तः तत्तस्मात् प्रतिष्ठाकामिनामस्मिन्नधिकारः ॥ २ ॥

अत्र पश्चाह्ने बृहद्रथन्तरयोः साम्नोरन्योन्यस्थानव्यत्ययेनानुष्ठानमभिप्रेत्य तत् प्रशंसति ।

अरूपेण वा एताः सरूपा अरूपेण प्रजाः सरूपा अरूपेणेमे लोकाः सरूपा यद्रथन्तरस्य लोकं बृहदापद्यते बृहतो रथन्तरमरूपेणैवैभ्यस्तत् सरूपं प्रजनयन्ति ॥ ३ ॥

सत्रावयवभूतास्त्रयस्त्रिंशद्रात्रयो याः सन्ति एता अरूपेणैव सरूपाः सम्पन्नाः इयं प्रथमा रात्रिरियं द्वितीयेत्येवं व्यत्ययं रूपमनुष्ठानात् पूर्वं नास्ति पश्चात्तु सम्पत्तेः तस्मादरूपं कारणं सरूपं कार्य्यं प्रजाश्च हस्तपादादिरूपरहितेन शुक्रशोनितात्मना वीजनियोजनोत्पादिता हस्तपादादिरूपोपेताः सम्पन्नाः पृथिव्यादिलोकाश्च रूपरहितेन परब्रह्मणोत्पादितरूपवन्तोऽभवन् तद्वत्बृहद्रथन्तरसाम्नोरपि परस्परस्थानव्यत्यये सति स्वकीयस्थानराहित्यलक्षणं कृत्वा तदरूपमस्ति तत्तेनारूपेणैवैभ्यः यजमानोपकारार्थं सामगानलक्षणा उद्गातारः प्रजनयन्ति ॥ ३ ॥

अत्र पश्चाह्नप्रयुक्तं किञ्चिद्दोषमाशंक्य परिहरति ।

लुप्यते वा एतत् षष्ठमहर्य्यत् पञ्चाहानुपयन्ति नर्त्तवः

कल्पन्ते यत् पृष्ठ्यः षडहस्तेन षष्ठमहर्न्न लुप्यते तेनर्त्तवः कल्पन्ते ॥ ४ ॥

पञ्चाहानुपयन्त्यनुतिष्ठन्तीति यदस्ति एतदेतेनानुष्ठानेन षष्ठस्याह्नोलोपे सति षट्संख्याका ऋतवो न कल्पन्ते स्वस्वकालोचितफलदानसमर्था न भवन्ति सोऽयं दोषः द्वादशाहमध्ये पृष्ठ्यषडहानुष्ठानादुक्तदोषपरिहारो द्रष्टव्यः ॥ ४ ॥

षड़हानुष्ठाने पञ्चाहानुष्ठानं विच्छिद्यतेत्याशंक्य दशाहस्य पञ्चाहद्वारूपत्वान्न विच्छेद इत्यभिप्रायेणाह।

अथ यानि द्वादशाहस्य दशाहानि तेन पञ्चाहेभ्यो नयन्ति ॥ ५ ॥

अहर्ल्लोपदोषसमाधानानन्तरं पञ्चाहविच्छेददोषसमाधानं द्रष्टव्यमिति शेषः, कथमिति चेत्तदुच्यते द्वादशाहस्य यानि दशाहानि विद्यन्ते तेषां द्वौ द्वौ विभागे सति द्वौ पञ्चाहौ सम्पद्येते तेन पञ्चाहद्वयसम्पत्त्यैव सत्रानुष्ठायिन पञ्चाहेभ्यो न यन्ति नापगच्छन्ति ॥ ५ ॥

अथास्य यत् त्रयस्त्रिंशद्रात्रसत्रस्य मध्ये योऽयो विश्वजिदतिरात्रस्तमेव प्रशंसितुं दृष्टान्तत्वविवक्षया लोकत्रये किञ्चिद्रूपकं परिकल्प्योपन्यस्यति।

ऊधर्वा अन्तरिक्षं स्तनावभितोनेन वा एष देवेभ्यो दुग्धेऽमुना प्रजाभ्यः ॥ ६ ॥

द्यावापृथिव्योर्म्मध्ये यदिदमन्तरिक्षमस्ति तदिदं ब्रह्माण्डरू-

पाया अजाया ऊधर्वै अजाधेनुमहिषादीनां प्रभूतक्षीरसन्देशादूधरित्युच्यते अजासम्बन्धिन ऊधसः पार्श्वयोर्द्वौस्तनौ भवतः एवं ब्रह्माण्डरूपस्याजाशरीरस्यान्तरिक्षमूधस्थानीयं प्रभूतवर्षापसंग्रहस्तनत्वात्तस्य चान्तरिक्षस्य ऊधस इति तदुपरि अधस्ताच्च द्यावापृथिव्याख्यौ द्वौ स्तनौ भवतः तयोर्म्मध्ये अनेन वै द्यावापृथिवीरूपेणैव स्तनेन देवेभ्य इन्द्रादिदेवार्थमेषजगदीश्वरो दुग्धे यागसम्बन्धिहविर्लक्षणं क्षीरं सम्पादयति अमुना द्यूलोकरूपेण स्तनेन प्रजाभ्यो मनुष्यपश्वाद्यर्थं दुग्धे वृष्ट्युदकरूपं सम्पादयति ॥ ६ ॥

नन्वन्तरिक्षस्य कथमूधस्त्वं कथंवा द्यावापृथिव्योस्तनद्वयरूपत्वमित्याशंक्याह ।

इयं वा अन्तरिक्षं वियदिमौ स्तनावभितः ॥ ७ ॥

इयं वै दृश्यमानमेवान्तरिक्षं वियत् व्यगमयत् द्यावापृथिव्यौ स्तनसंश्लेषवद्वर्त्तेते तस्माद्स्योधस्त्वात् देवमनुष्यापेक्षितस्य हविर्वृष्टिरूपस्य क्षीरद्वयस्य स्रवणादन्तरिक्षस्याभितोवर्त्तमानयोः द्यावापृथिव्योः स्तनत्वं स्यात् एतत् द्यावापृथिव्योः स्तनद्वयत्वमुक्तं ब्राह्मणवाक्येन ॥ ७ ॥

तस्य दार्ढ्यार्थं विसंवादिनीं काञ्चिदेव ऋचमीरयति ।

तदभ्यनूक्ता ॥ ८ ॥

तदुभे द्यावापृथिव्यौ देवमनुष्यतृप्तिहेतुत्वलक्षणं स्तनत्वं यदन्ति तदभिलक्ष्य उक्ता ॥ ८ ॥

अनुकूला काचिदृक् समाम्नाता तामेतामृचं पृच्छति ।

त्रिंशति त्रयः परोऽये देवा बर्हिरासतव्यं नद्ददिताद-
नेति ॥ ९ ॥

हविर्भुजो ये देवा बर्हिरासतव्यं सतरूपं यज्ञमवस्थिताः ते देवास्त्रिंशति त्रिंशत् संख्याकाः तथा त्रयः परः अपरेऽपि त्रिसंख्याकाः एते त्रयस्त्रिंशत्संख्याकाः देवा लोकत्रये विभज्य वर्त्तन्ते एतत्र ये देवा दिव्येकादशस्थेत्यादिमन्त्रे समाम्नाताः तत्र शब्दो धननामसु पठितः दितेतिशब्दः द्वैविध्यमावष्टे दशब्द एवकारार्थः व्यतिशब्दोवीगतिप्रजननकान्त्यशनखादनेष्विति धातोरुत्पन्नः अत्र प्रजननार्थमाचष्टे तस्य वाक्यस्यायमर्थः त्रयस्त्रिंशत संख्याका देवा हविर्वृष्टिलक्षणं धनं लोकद्वयवर्त्तिनं द्विधाकृत्वा प्रजनयन्ति इतिशब्दः समाप्त्यर्थः इत्यस्यामस्याः अस्तरिक्षस्यौधस्त्वं द्यावापृथिव्योः स्तनद्वयत्वं च सम्पादयन्ति ॥ ९ ॥

तद्दृष्टान्तेन प्रकृतक्रतावपि तत् सर्वं सम्पादयति ।

ऊधर्वं मध्यमोतिरात्रः स्तनावभितः ॥ १० ॥

अस्मिन् क्रतावाद्यन्तयोरतिरात्रयोर्मध्यवर्त्ती योयं विश्वजिदतिरात्रः सोयं ऊधर्वं क्रतुफलाख्यस्य बहुक्षीरस्य धारणस्थानमूधस्तस्य विश्वजिदतिरात्रस्याभितः पुरस्तात्पश्चाच्च यौ पश्चार्शौ विद्येते तौ स्तनस्थानीयौ क्रतुफलदोहनहेतुत्वात् ॥ १० ॥

उक्तस्य विश्वजिदतिरात्रस्याभावे बाधमाह ।

यद्येषोनतिरात्रः स्यादूधः प्रतिहरेत् ॥ ११ ॥

यद्येष त्रयस्त्रिंशदतिरात्ररूपः क्रतुरनतिरात्रो विश्वजिदतिरात्ररहितः स्यात् तदानीमेतस्याः सत्ररूपायाः कामधेनोरूधःस्थानीयं फलदानसामर्थ्यं प्रतिहरेत् ॥ ११ ॥

अन्वयव्यतिरेकाभ्यां विश्वजिदतिरात्रं प्रोच्य कर्त्तव्यमुपसंहरति ।

तस्मादतिरात्रः कार्य्य ऊधसोऽप्रतिहाराय ॥ १२ ॥

यस्मात् कारणादयं विश्वजिदतिरात्रः ऊधःस्थानीयः तदभावे फलसामर्थ्याख्यमूधो विनश्यति तस्मात् कारणाद्विश्वजिदतिरात्रः ऊधसो विनाशायानुष्ठेयः ॥ १२ ॥

अस्य क्रतोः समृद्धिहेतुत्वं दर्शयति ।

त्रयस्त्रिꣳशद्देवता एताभिरार्ध्नुवꣳस्तेनर्द्धिस्तस्मादेताभिर्यजन्त ऋध्या एव ॥ १३ ॥

याः त्रयस्त्रिंशत्संख्याका देवता हविर्भुजः सन्ति ताः सर्व्वा एताभिः सत्रगताभिस्त्रयस्त्रिंशद्रात्रिभिरार्ध्नुवन् समृद्धिं प्राप्ताः तेनेदं सत्रं ऋद्धिसंज्ञकं भवति यस्माद्देवता आर्ध्नुवन् तस्मादन्योपि एताभिर्य्यथोक्ताभिस्त्रयस्त्रिंशद्रात्रिभिर्य्यजन्ते ॥ १३ ॥

एतत्सत्रगतासु त्रयस्त्रिंशद्रात्रिषु ब्रह्मसाम्नां नानाविधत्वं प्रशंसति ।

नाना ब्रह्मसामान्युपयन्त्यह्नां नाना वीर्यतायै नानैव वीर्य्याण्यवरुन्धते ॥ १४ ॥

अस्मिन् क्रतौ बहवः पञ्चाहाः सन्ति तेषु ब्रह्मसामानि नाना परस्परविलक्षणानि उपयन्त्यनुतिष्ठेयुः तद्यथा प्रथमं पञ्चसु दिनेषु क्रमेण बृहद्रथन्तरनौधसं श्यैतमहावैष्टम्भमित्येतानि ब्रह्मसामानि द्वितीयपञ्चाहस्य प्रथमतो बृहत्पश्चाद्रथन्तरं ततो मानवं छन्दस्यं वाशिष्ठमिति ब्रह्मसामानि यद्यपि द्वितीयतृतीययोर्मानवमस्ति तथापि द्वितीये त्वामिद्धाह्योनर इत्यस्यामृचि मानवत्तृतीयेत् शग-ध्यूषु शचीपत इत्यस्यामृचीतिभेषः तदेवं ब्रह्मसाम्नान्नानाविधत्व-मह्नान्नानाविधवीर्य्यतायै सम्पद्यते ततो यजमानाश्चापि नाना-विधान्येव वीर्य्याणि प्राप्नुवन्ति ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्व्विंशाध्यायस्य
प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथापरं त्रयस्त्रिंशद्रात्रमृद्धिकामानां सत्रमाह ।

अतिरात्रोभिप्लवः षडहोतिरात्रोऽभिप्लवः षडहोति-रात्रोऽभिप्लवः षडहोद्वादशाहस्य दशाहानि महाव्रत-ञ्चातिरात्रश्च ॥ १ ॥

स्पष्टं । १ ।

तमेतं त्रयस्त्रिंशद्रात्रक्रतुं द्वेधा विभज्य तत्र द्वयरूपत्वं सम्पाद्य तेन सत्रद्वयेन समानं फलं दर्शयति ।

आदित्याश्चाङ्गिरसश्चैतत् सत्रꣳसमदधतादित्याना-मेकविꣳशतिरङ्गिरसां द्वादशाह आदित्या अस्मिँल्लोक ऋद्धा आदित्या अमुष्मिन्नङ्गिरसोऽस्मिन्नङ्गिरसोऽमुष्मिन् द्वयꣳ सत्रं यावत्द्वयेन सत्रेणार्ध्नुवन्ति तावत्येतासामृद्धिः ॥ २ ॥

यदिमे आदित्याः सन्ति ये चान्येऽङ्गिरसः सन्ति तदुभयेपि मिलित्वा एतत् सत्रमन्वतिष्ठन् अस्मिन् सत्रे त्रिभिरतिरात्ररूपो पेतास्त्रयोऽभिप्लवाः षडहामिलित्वा एकविंशतिरात्रं सत्रं सम्पद्यते स आदित्यानां भागः अतिशिष्टं द्वादशाहरूपं सत्रं सोयमङ्गिरसां भागः तत्रादित्याः स्वकीयेन भागेन लोकद्वयसमृद्धिं प्राप्ताः अङ्गिरसो अपि स्वभागेन लोकद्वयसमृद्धिं प्राप्नुवन् तदेतदादित्यानामङ्गिरसाञ्च द्विविधं सत्रं यावद्भवति तावतीश्च क्रतसत्रगतानामेतासां त्रयस्त्रिंशद्रात्रीणां समृद्धिद्वयं सत्रमित्यस्यर्द्धयनेतिव्याख्यानं एकविंशतिरात्रद्वादशाहरूपेण द्विविधेन सत्रेणादित्या अङ्गिरसश्च समृद्धिं यथा प्राप्नुवन्ति तथैव त्रयस्त्रिंशद्रात्रेण लोकद्वये द्विगुणां समृद्धिं प्राप्नुवन्ति ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्व्विंशाध्यायस्य

द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथ तृतीयं त्रयस्त्रिंशद्रात्रं सर्वकामसाधनमाह ।

अतिरात्रस्त्रयः पञ्चाहा विश्वजिदतिरात्रस्त्रयः पञ्चाहा अतिरात्रः ॥ १ ॥

स्पष्टं । १ ।

अस्मिन् सत्रे किञ्चिद्दोषमुद्भाव्य परिहरति ।

अपशव्यं वा एतत् सत्रं यदच्छन्दोमं यद्विश्वजिति छन्दोमानुपयन्ति तेन छन्दोमवत्यस्तेन पशव्याः ॥ २ ॥

चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशनामकाः स्तोमाः गायत्रीत्रिष्टुब्जगतीछन्दोभिरक्षरसंख्याभिर्म्मानत्वाच्छन्दोमा इत्युच्यन्ते ते च पशुप्राप्तिहेतुत्वात् पशव्यास्तैः छन्दोमैर्विरहितत्वादेतत् सत्रं अपशव्यं पशुप्राप्तिसाधनन्न भवतीति दोषोद्भावनं अनुष्ठातारोत्र विश्वजिदतिरात्रे छन्दोमाननुतिष्ठन्ति तेनैतत् सत्रगतारात्रयः छन्दोमवन्तो भवन्ति तेन कारणेन पशुप्राप्तिहेतवश्च भवन्ति यद्यप्यस्मिन् विश्वजिदतिरात्रे साक्षात्छन्दोमा नसन्ति तथाप्युपायेन छन्दोमाः सम्पादयितुं शक्यन्ते कथमिति चेत् तदुच्यते त्रिवृत्पञ्चदशयोः स्तोमायश्चतुर्विंशः सम्पद्यते सप्तदशत्रिणवयोश्चतुश्चत्वारिंशः पञ्चदशत्रयस्त्रिंशयोरष्टाचत्वारिंश इति सम्पादनं ॥ २ ॥

उक्तस्य सत्रस्य पङ्क्तिरूपत्वसम्पादनेन सर्वकामप्राप्तिहेतुत्वं दर्शयति ।

पक्षिण्यो वा एता रात्रयो यद्यामद्यामयन्ते तमेताभि-रभ्यश्नुवते यत्र यत्र हि पक्षी कामयते तत्तदभ्यश्नुते ॥ ३ ॥

अस्य सत्रस्य मध्ये विश्वजिदतिरात्रः पक्षिदेहं वर्द्धयते तस्या-भितो द्वौ पञ्चाहौ पक्षाविव स्थितौ तस्मात् पक्षिसम्बन्धात् सत्रग-तारात्रयः पक्षिण्य एव भवन्ति तथा सत्येतत् सत्रानुष्ठायिनोय-द्यामद्यामयन्ते तं काममेताभिः पक्षसमानरात्रीभिः सर्वतः प्राप्नुवन्ति लोकेपि हि पक्षी यत्र यत्र कामयते तत्र तत् स्थान मभितः प्राप्नोति तद्वदत्रापि कामप्राप्तिरित्यर्थः ॥ ३ ॥

अत्र विश्वजिदतिरात्रात् पूर्वेषूत्तरेषु च या त्रित्वसंख्यास्ति तां प्रशंसति ।

त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणा वै त्रिवृत् स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥ ४ ॥

नात्र त्रिवृच्छब्दः स्तोमवाची किन्तु अहर्गतत्रिसंख्यामुपल-क्षयति तथा च निदाने यत् त्रिवृता प्रयन्ति त्रिवृतोद्यन्तीति त्रयः पञ्चाहाः पुरस्तात् त्रय उपरिष्टादिति त्रिसंख्यायोगात् त्रिवृदि-त्युक्तं भवतीत्यर्थः त्रिवृत्त्वात् पूर्वभाविपञ्चाहगतया त्रिसंख्यया प्रयन्ति प्रारभन्ते त्रिवृत्त्वात्पश्चाद्भाविपञ्चाहगतया त्रिसंख्यायोगा-दुद्यन्ति समापयन्ति तस्मादिदं सत्रं प्रशस्तं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य

तृतीयः खण्डः ।

अथ चतुर्थः खण्डः।

अथ चतुस्त्रिंशद्रात्रसमृद्धिकामानां सत्रमाह।

अतिरात्रो ज्योतिर्गौरायुस्त्रयहस्त्रयोऽभिप्लवाः षडहा द्वादशाहस्य दशाहानि महाव्रतश्चातिरात्रश्चर्द्धिकामा उपेयुः॥ १॥

ज्योतिर्गौरायुरिति तेषां त्रयाणामह्नां समाहार एवात्र त्र्यहो द्रष्टव्यः॥ १॥

अस्य सत्रस्य समृद्धिफलं कथयन्नादिशं दर्शयति।

एताभिर्वै प्रजापतिः सर्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नुवन्ति य एता उपयन्ति॥ २॥

एताभिः सत्रगताभीरात्रिभिः स्पष्टमन्यत्॥ २॥

रात्रिगताश्चतुश्चत्वारिंशत्संख्यां प्रशंसति।

यदेताश्चतुस्त्रिंशद्रात्रयो भवन्ति त्रयस्त्रिंशद्देवताः प्रजापतिश्चतुस्त्रिंशो देवतानां प्रजापतेरेवर्द्धिमृध्नुवन्ति॥३॥

यदेताः या एताश्चतुस्त्रिंशत्संख्याका रात्रयो भवन्ति तासु विद्यमानाः संख्या हविर्भुजोदत्त्रयस्त्रिंशद्देवतास्तदुत्पादके प्रजापतौ च विद्यते अतः संख्यासाम्याद्देवतानां प्रजापतेश्च सम्बन्धिनी येयमृद्धिरस्ति तां सर्वामृद्धिमध्नुवन्ति प्राप्नुवन्ति॥ ३॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य चतुर्थः खण्डः।

अथ पञ्चमः खण्डः ।

अथ पञ्चविंशद्रात्रं पशुकामानां सत्रमाह ।

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहस्त्रयोभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः ॥ १ ॥

द्वे अहनी तत्समाहाररूपः पञ्चाहोवगन्तव्यः स्पष्टमन्यत् ॥ १॥

रात्रिगतां पञ्चविंशसंख्यां प्रशंसति ।

यदेताः पञ्चविंशद्रात्रयो भवन्ति पाङ्क्ताः पशवः पशूनेवैताभिरवरुन्धते ॥ २ ॥

पाङ्क्ताः पञ्चविंशतसंख्याकारात्रयः सन्ति तास्वन्तर्भूताः पञ्चसंख्याविद्यन्ते पशवश्चतुर्भिः पादैःशिरसा च पञ्चभिरवयवैरुपेतत्वात् पाङ्क्ता इत्युच्यन्ते तस्मात् पञ्चसंख्याद्वारकसम्बन्धसम्भवादेताभीरात्रीभिर्यजमानः पशूनवरुन्धत एव प्राप्नुवन्त्येव ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
पञ्चमः खण्डः ।

अथ षष्ठः खण्डः

अथ षट्त्रिंशद्रात्रं पशुकामानां सत्रमाह ।

अतिरात्रश्चत्वारोऽभिप्लवाः षडहा द्वादशाहस्य दशा-
हान्यतिरात्रः पशुकामा उपेयुः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

फलान्तरमाह ।

एताभिर्वै देवा आदित्यमस्तभ्नुवन्नादित्यलोकञ्जयन्ति
य एता उपयन्ति ॥ २ ॥

पुरा देवा एतत्सत्रमनुष्ठाय एताभिः षट्त्रिंशद्रात्रीभिः आ-
दित्यमस्तभ्नुवन् आदित्य आकाशगामी सन् भूमौ यथा नपतति
तथास्तां इति समवनह्य तस्मादेताभीरात्रीभिरनुष्ठातारो यज
माना आदित्यलोकं प्राप्नुवन्ति ॥ २ ॥

स्वाराज्यलक्षणं फलान्तरमाह ।

बृहती वा एता रात्रयः स्वाराज्य छन्दसां बृहती यो वै
पशूनां भूमानङ्गच्छति स स्वाराज्यं गच्छति प्र स्वाराज्य-
माप्नुवन्ति य एता उपयन्ति ॥ ३ ॥

एतत्सत्रगतासु रात्रीषु षट्त्रिंशत्संख्या विद्यन्ते तथाच तैत्ति-
रीयकाः इष्टकाचयनब्राह्मणे बृहत्या विजयं स्वाराज्यप्राप्तिं च
समामनन्ति अस्मिन्नपि सामब्राह्मणे प्रश्नोत्तराभ्यां बृहत्याः श्रेष्ठ-
त्वं पुरस्तादाम्नातं यत्त्वित्याहुरन्यानि छन्दांसि वर्षीयांसि क-

स्मादहृत्युच्यत इति प्रश्नः एषा हीमान् लोकान् व्याप्तोत्यन्य-च्छन्दः किञ्च नेत्युत्तरं एवं सति रात्रीणां बृहतीसाम्यात् स्वाराज्यप्राप्तिहेतुत्वं सम्भाव्यते किञ्च लोके यो वै यः कोपि पुमान् पशूनां भूमानं लक्षकोटिसंख्यारूपं बाहुल्यं गच्छति स पुमानन्येषामधिपतिः सन् स्वाराज्यं प्राप्नोति तद्वदेतासां रात्रीणां अनुष्ठातारोपि बहुपशुलाभेन स्वाराज्यं प्राप्नुवन्ति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

अथ सप्तत्रिंशद्रात्रमन्नपशुरूपफलद्वयकामानां सत्रमाह ।

एता एव समहाव्रताः ॥ १ ॥

याः षट्त्रिंशद्रात्रयः पूर्व्वखण्डेभिहिताः एता एव महाव्रतेनाह्ना सहिताः सप्तत्रिंशद्रात्रयो भवन्ति ॥ १ ॥

एतासां रात्रीणां फलं दर्शयति ।

एताभिर्वै प्रजापतिरुभौ कामाववारुन्धान्नं व्रतं पशवो बृहत्युभावेवैताभिः कामाववरुन्धते ॥ २ ॥

व्रतम्महाव्रताख्यमहरन्नं बृहती पशुसाधनत्वात् एतावुभौ

अश्वपशुरूपौ कामौ प्रजापतिरेताभिरेव सप्तविंशद्रात्रिभिरेवावरुन्धते प्राप्नोति तस्मादन्येपि यजमाना उभौ कामौ प्राप्नुवन्ति॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य

सप्तमः खण्डः ॥

अथ अष्टमः खण्डः।

अथाष्टाविंशद्रात्रं पशुकामानां सत्रमाह।

अतिरात्रौ गौश्चायुश्च द्वे अहनी चत्वारोभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः॥१॥

स्पष्टार्थः। १।

एतासां रात्रीणां पशुसाधनत्वं विशदयति।

यदेता अष्टाविंशद्रात्रयोभवन्त्यष्टाशफाः पशवः शफश एवैताभिः पशूनवरुन्धते ॥ २ ॥

या एता अष्टाविंशद्रात्रयः सन्ति तास्वष्टसंख्या विद्यन्ते गोमहिषादिपशवश्चाष्टसंख्याशफोपेताः अतः शफश एव संख्यासाम्योपेतशफद्वारेणैव एताभिरष्टाविंशद्रात्रिभिर्यजमानाः पशून् प्राप्नुवन्ति ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य

अष्टमः खण्डः।

अथ नवमः खण्डः।

एकोनचत्वारिंशद्रात्रं अन्नस्यौजयकामानां सत्रमाह।

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहश्चत्वारोभिप्लवाः षड्-
द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टार्थः । १ ।

अत्रादावनन्तश्रीजयरूपं फलं वक्तुं तत्सद्भावमाह ।

एताभिर्वै प्रजापतिरनन्ताꣳ श्रियमजयदनन्ता वा
एता या एकया न चत्वारिꣳशन्नेति वै वाचोनन्तं ॥ २ ॥

या रात्रय एकया रात्र्या अस्मिन् क्रतावविद्यमानया चत्वा-
रिंशन्न भवन्ति एता एकोनचत्वारिंशद्रात्रयोऽनन्ता एव कथ-
मिति चेत्तदुच्यते नेति वै निषेधवाचकं नेत्येतत्पदमेव वाचोनन्तं
वाचः सम्बन्धिषु पादेषु अन्तरहितार्थवाचकं तथाहि याचकैर्द-
ने याच्यमाने बहवः पुरुषा लोभयुक्ताः सन्तो नेति चोच्चार्य्य परि-
हरन्ति स चानन्तार्थवाचकोनेत्यसौ शब्दः एकयानचत्वारिंशदि-
त्यत्र विद्यते तस्मादेताभीरात्रिभिः प्रजापतेरनन्तश्रीजयः सम्भा-
व्यते ॥ २ ॥

सम्भावितन्तत्फलं यजमानानां दर्शयति ।

यदेता एकया न चत्वारिꣳशद्रात्रयो भवन्त्यनन्तामेवै
ताभिः श्रियञ्जयन्ति ॥ ३ ॥

स्पष्टार्थः । ३ ।

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ चत्वारिंशद्रात्रं परमराज्यप्रतिष्ठाकामानां सत्रमाह ।

एता एव समहाव्रताः ॥ १ ॥

एताः पूर्वखण्डोक्ता एवैकोनचत्वारिंशद्रात्रयो महाव्रतेन सहानुष्ठेयाः ॥ १ ॥

अस्य क्रतोः फलं वक्तुमत्र स्थितानां रात्रीणां विराड्रूपत्वमाह ।

सर्व्वा वा एता विराजो दशिनी प्रथमा विंशिनी द्वितिया त्रिंशिनी तृतीयैषा वै परमा विराट् यच्चत्वारिंशद्रात्रयः पङ्क्तिर्वै परमा विराट् ॥ २ ॥

अस्मिन् क्रतौ या रात्रयः सन्ति ताः सर्वा विराज एव कथमिति चेत् तदुच्यते दशानां रात्रीणां समाविशनी प्रथमा विराट् भवति दशाक्षरा विराडिति श्रूयमाणाया दशसंख्यायास्तत्र विद्यमानत्वात् विंशतिसंख्याकानां रात्रीणां समष्टिर्विंशिनी सा द्वितीया विराट् द्विगुणीकृताया दशसंख्यायास्तत्र विद्यमानत्वात् त्रिंशत्संख्याकानां रात्रीणां समष्टिस्त्रिंशिनी त्रिगुणाया दशसंख्यायास्तत्र सद्भावात् चत्वारिंशद्रात्रीणां समष्टिरेषैवात्र विद्यमानानां विराजां मध्ये परमोत्तमा विराट् चतुर्गुणायाः दशसंख्यायास्तत्र सद्भावात् किञ्चेयं परमा विराट् पङ्क्तिर्वै पिपीलिकापङ्क्तिं च इन्द्रायमानोन्नस्थीयमानत्वात् ॥ २ ॥

तादृशीं परमाविजयमनुतिष्ठतां यजमानानां वैराजप्रतिष्ठारूपं फलमाह ।

परमायामेव विराजि प्रतितिष्ठन्ति ॥ ३ ॥

अत्र विराडिति अन्तरा विराट्शब्देन विवक्षितमत्यन्तसमृद्धेन प्रतितिष्ठन्तीत्यर्थः यद्वा परमायां विराजि उत्तमे विशिष्टराज्ये प्रतिष्ठिताभवन्ति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे तुचर्विंशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथ विधृतिसंज्ञकानामेकोनपञ्चाशद्रात्रीणां सत्रानाम्मध्ये प्रथमं सत्रं पापव्यावृत्तिफलायाह ।

अतिरात्रस्त्रीणि त्रिवृन्त्यहान्यग्निष्टोममुखान्यतिरात्रो दश पञ्चदशा उक्थ्याः षोडशिमहृशममहरतिरात्रो द्वादश सप्तदशा उक्थ्या अतिरात्रः पृष्ठ्यः षडहोतिरात्रो द्वादशैकविंशा उक्थ्या अतिरात्रः ॥ १ ॥

अत्र प्रथमं पञ्चमं षोडशं एकोनत्रिंशत् षट्त्रिंशमेकोनपञ्चाशदेतानि षट्संख्यकान्यतिरात्ररूपाणि तेषु प्रथमपञ्चमयोर्म्मध्ये त्रिवृत्स्तोमेनोक्तानि त्रीण्यहानि तानि चाग्निष्टोममुखानि अग्निष्टोममुखं रूपं प्रथममहरुक्थ्यरूपे द्वे अहनी इत्यर्थः पञ्चमषोडशयोर्म्मध्ये पञ्चदशस्तोमयुक्ता उक्थ्याः दशसंख्याकाः प्रयोक्तव्याः तेषु यद्दशममहरस्ति तत् षोडशिस्तोत्रयुक्तं कर्त्तव्यं

षोडशैकोनत्रिंशयोर्म्मध्ये सप्तदशस्तोमयुक्ता उक्थ्या द्वादशसंख्याका अनुष्ठेयाः एकोनत्रिंशषट्त्रिंशयोर्म्मध्ये पृष्ठ्यः षडहोनुष्ठेयः षट्त्रिंशैकोनपञ्चाशयोर्म्मध्ये एकविंशस्तोमयुक्ता उक्थ्या द्वादशसंख्याकाः कर्त्तव्याः तदेकोनपञ्चाशद्रात्रं सत्रं भवति ॥ १ ॥

अत्र पापव्यावृत्तिरूपं फलं विवक्षुस्तत्सम्भावयितुमर्थवादमाह ॥

प्रजापतिः प्रजा असृजत ता अविधृता असञ्ज्ञानाना अन्योन्यामादंस्तेन प्रजापतिरशोचत्स एता अपश्यत्तती वा इदं व्यावर्त्तत गावो गावोभवन्नश्वा अश्वाः पुरुषाः पुरुषाम्मृगाम्मृगाः ॥ २ ॥

प्रजापतिना सृष्टा गवाश्वमनुष्यादयः प्रजा अविधृताः अनियमिताः प्रजापतिना नियन्तुमशक्या असञ्ज्ञानाना ऐकमत्यरहिता अन्योन्या मादन् परस्परविरोधात् प्रबला दुर्बलानां भक्षणमकुर्वन् तेन नियन्तुमशक्यत्वेन प्रजापतिरशोचत् खिन्नोभूत् स खिन्नः प्रजापतिस्तद्व्यावृत्त्युपायं पर्य्यालोच्य एता उक्ता एकोनपञ्चाशद्रात्रीस्तदुपायत्वेन दृष्ट्वानुष्ठितवान् ततोयोप्येतदनुष्ठानादनु इदं अन्योन्यभक्षं व्यावर्त्तत व्यावृत्तमुपरतमासीत् तदनन्तरं गावः परद्रोहरहिता गावोभवन् इतरभक्षणरूपस्याभावात् स्वकीयेन गोरूपेणैव व्यवस्थिताः एवमश्वपुरुषमृगेषु योज्यं ॥ २ ॥

इदानीं यजमाननां पापव्यावृत्तिरूपं फलं दर्शयति ।

विपाप्मना वर्त्तन्ते य एता उपयन्ति ॥ ३ ॥

स्पष्टोर्थः ॥ ३ ॥

यदतिरात्रा अन्तरा विधृत्यै तस्मान्नेतर इतरस्मिन्रेतो दधाति ॥ ४ ॥

अत्राहर्गणानाम्मध्ये अन्तरालेष्वनुष्ठिता अतिरात्रा विधृत्यै विभज्य धारणाय गणद्वयसाङ्कर्य्यपरिहाराय सम्पद्यन्ते तस्मात् कारणादितरो गोजातीयपशुरितरस्मिन् महिषादिजातीयपशौ रेतो न दधाति गर्भधारणन्न करोति तथा महिषादिरपि जात्यन्तरे ॥ ४ ॥

अतिरात्रान् प्रशस्य पृष्ठ्यषडहं प्रशंसति ।

यत् पृष्ठ्याः स्तोमाः सꣳसृष्टास्तस्मादजावयः पशूनाꣳ सह चरन्ति तस्माद् गर्दभोवडवायाꣳरेतोदधाति ॥ ५ ॥

पृष्ठ्यषडहस्य प्रथमेहनि त्रिवृदाद्यास्त्रयस्त्रिंशत्पर्य्यन्ताः स्तोमाः क्रमेणानुष्ठीयन्ते एवं द्वितीयादिष्वहःसु पञ्चदशादि तथा सति यद्यस्मात् कारणात् पृष्ठ्यषडहगताः स्तोमाः संसृष्टाः सर्वेष्वहःस्वेकविधा अनविलक्षणाः तस्मात् कारणात् फलभूतानां पशूनामपि केचित् पशवोऽजाश्चावयश्च सहचरन्ति न तु परस्परं विरुध्यन्ते तस्माद् तस्मादेव पृष्ठ्यस्तोमसंसर्गकारणाद्गर्दभोजात्यन्तरयुक्तः पुमान् वडवायां अश्वयोषिति रेतोऽवस्थापयति ॥ ५ ॥

अस्मिन् सत्रे किञ्चिद्दोषमुद्भाव्य परिहरति ।

अपशव्यं वा एतत्सत्रं यदच्छन्दोमं यत्सन्धिषामसु छन्दाꣳस्युपयन्ति तेन छन्दोमवत्यस्तेन पशव्याः ॥ ६ ॥

अतीते तृतीये खण्डे छन्दोमराहित्यादप्रशस्तत्वात् दोषो यथोद्भावितः तथात्राप्युद्भाव्यते तस्य परिहारः यद्यस्मात् कारणादतिरात्राणामन्येषु सन्धिः सन्धिस्तोत्रेषु यानि सामानि सन्ति तेषु सामसु गायत्र्यादीनि बृहत्यन्तानि सप्त छन्दांस्युपयन्ति यजमाना अनुतिष्ठन्ति तेन कारणेनैतत् सत्रगतारात्रयः छन्दोमवन्तोभवन्ति छन्दोमशब्दस्य मुख्यार्थानां चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशद्रूपाणां स्तोमानामभावेपि तत्समानाक्षरसंख्यानाङ्गायत्रीत्रिष्टुब्जगतीनामनुष्ठितत्वात् छन्दोमशब्देन तानि त्रीणि छन्दांसि उपलक्ष्यन्ते तथा सत्यस्य सत्रस्य छन्दोमवत्त्वं सिध्यति तेन छन्दोमवत्त्वेनैतारात्रयः प्रशस्याभवन्ति ॥ ६ ॥

ननु सन्धिसामसु किं सामास्मिंश्छन्दसि प्रयुज्यते इत्याशङ्क्याह ।

गायत्रीषु जराबोधीयमुष्णिक्षु श्रुध्यमनुष्टुप्सु नानदम्बृहतीषु रथन्तरं पङ्क्तिषु रायोवाजीयं त्रिष्टुप्स्वौशनञ्जगतीषु कावं ॥ ७ ॥

स्पष्टोर्थः । यद्यपि षट्स्वतिरात्रेषु नानदव्यतिरिक्तानि जराबोधीयादीनि कावपर्य्यन्तानि षडेव सन्धिसामानि तथा दशसूक्तेषु दशमेऽहनि सूर्य्यास्तमयवेलायां षोडशिस्तोत्रं नानदं प्रयुज्यते तदपि सन्धिसामत्वेनोपचर्य्यते ॥ ७ ॥

गायत्र्यादीनां जगत्यन्तानां क्रमेणानुष्ठानं प्रशंसति ।

ऊर्द्ध्वानि छन्दांऽस्युपयन्त्यनपभ्रंशाय ॥ ८ ॥

गायत्र्या ऊर्द्ध्वमुष्णिक् चतुर्भिरक्षरैरधिका अत ऊर्द्ध्वमनुष्टुप् एव

मुत्तराणि तेन क्रमेणैतान्यूर्द्ध्वानीत्युच्यन्ते तेषां क्रमानुष्ठाने सति तस्यापि छन्दोमानपभ्रंशोभवति औशनकावयोः साम्नोः स्वरशब्दो निधनभागो भवति ॥ ८ ॥

तमेतं प्रशंसति।

प्राणो वै स्वरोयत् स्वरावन्ततो भवतस्तस्मात् द्वावन्ततः प्राणौ ॥ ९ ॥

निधनरूपः स्वरशब्दोगमनक्रियामाचष्टे स्वरति गच्छतीति व्युत्पत्तेः प्राणोपि गतिमान् सात्मस्वरशब्दरूपनिधनं प्राण एव भवति यद्यस्मात् स्वरशब्दरूपौ निधनविशेषौ अन्ततो भवतः अनयोरौशनकावयोः साम्नोर्य्यद्वियते तस्माल्लोकेप्यन्ततो मरणकाले द्वौ प्राणौ उच्छ्वासनिश्वासौ तीव्रौ भवतः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्व्विंशाध्यायस्य एकादशः खण्डः।

अथ द्वादशः खण्डः।

अथ द्वितीयमेकोनपञ्चाशद्रात्रं श्रीकामानां सत्रमाह।

अतिरात्रौ द्वावभिप्लवौ षडहौ गौश्चायुश्चातिरात्रौ द्वावभिपूर्वौ षडहावभिजिच्च विश्वजिच्चातिरात्रावेकोऽभिप्लवः षडहः सर्वस्तोमश्च नव सप्तदशश्चातिरात्रौ द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥ १ ॥

अत्र द्विवचनान्तमतिरात्राविति पदन्त्रिःप्रयुक्तं तत्राद्यं गोआयुषेत्यनयोर्व्विशेषणं द्वितीयं अभिजिद्विश्वजितोरनयोर्व्विशेषणं तृतीयन्तु सर्व्वस्तोमश्च नवसप्तदशश्चेत्यनयोर्व्विशेषणं स्पष्टमन्यत् ॥ १ ॥

एतत्सत्रगतानां रात्रीणां फलविशेषं कथयितुं तदनुकूलं संज्ञाविशेषमाह ॥

आदित्यानां यमातिरात्राः ॥ २ ॥

आदित्यैर्दृष्टत्वादेतारात्रयः आदित्यानां संबन्धिन्यः ॥ २ ॥

तासां यमातिरात्रा इति संज्ञानुकूलं फलमाह ॥

यमेवैषाꣳश्रीर्भवति यएता उपयन्ति ॥ ३ ॥

ये यजमाना एतारात्रीरनुत्तिष्ठन्ति तेषां यजमानानां यमेव श्रीर्भवति यमशब्दः सहोत्पन्नयोर्द्वयोः पुरुषयोर्लोके प्रसिद्धः सचात्र द्वैगुण्यमुपलक्षयति इवशब्द एवकारार्थः यमा द्विगुणा श्रीर्भवतीत्यर्थः ॥ ३ ॥

फलान्तरमाह ।

एताभिर्व्वा आदित्या इदमार्ध्नुवन्मित्रश्च वरुणश्च धाता चार्य्यमा चाꣳशश्च भगश्चेन्द्रश्च विवस्वाꣳश्चैतासामेव देवतानामृद्धिमृध्नुवन्ति य एताउपयन्ति ॥ ४ ॥

मित्राद्या विवस्वदन्ता अष्टावदितेः पुत्रा आदित्याः ते च इदन्त्वं यथाभवति तथार्ध्नुवन् द्वौद्वौ मिलित्वा सर्व्वे समृद्धिं प्रापाः तान्येव

चत्वार्य्यादित्यानां इंद्वानि मितश्चेत्यादिना स्पष्टीक्रियन्ते ये यजमाना एतारात्रीरनुतिष्ठन्ति ते यजमाना एतासामेव मित्रादीनां देवतानां सर्व्वां समृद्धिं प्राप्नुवन्ति ॥ ४ ॥

नन्वष्टौ वसव एकादश रुद्रा द्वादशादित्या इत्यादिश्रुत्यादित्यानां द्वादशसंख्या प्रसिद्धा इह तु मित्रश्चेत्यादिना कथमष्टावादित्या उच्यन्ते इत्याशंक्य द्वादशानां मध्ये मुख्यानामष्टानां श्रुतिप्रसिद्धिं दर्शयितुं काञ्चिदृचमवतारयति ।

तदभ्यनूक्ता ॥ ५ ॥

तत् पूर्व्वोक्तमादित्यानामष्टसंख्योपेतत्वमभिलक्ष्यानूक्तेति काचिदृक् समाम्नाता ॥ ५ ॥

तामेव ऋचं पठति ।

अष्टौ पुत्रासो अदितेर्य्ये जातास्तन्वं परिदेवाँ उप प्रैत् सप्तभिः परामार्त्तण्डमास्यदिति ॥ ६ ॥

अदितेर्देवतायाः पुत्राः पुत्रासः अष्टौ सन्ति ये पुत्राः जाताः सन्तस्तन्वं परि अदितिशरीरं परितोव्याप्य स्तनपानाद्यर्थमास्थिताः तेषाम्मध्ये मित्राद्यैरिन्द्रान्तैः सप्तभिः पुत्रैः सहैदिति देवानुपसेवितुं प्रैत् प्रागच्छत् विवस्वत्संज्ञकमष्टममार्त्तण्डं सूर्य्यं परास्यत् परिच्छिन्नवती अस्य देवसेवाप्रयासोमाभूदिति क्वचिद्गोपितवतीत्यर्थः इतिशब्दोऋक्समाप्त्यर्थः ॥ ६ ॥

आदित्यवद्यजमानानां लोकद्वये समृद्धिरूपं फलं दर्शयति ।

आदित्या अस्मिंल्लोक ऋद्धा आदित्या अमुष्मिन्-भयोरनयोर्ल्लोकयोर्ऋध्नुवन्ति देवलोके च मनुष्यलोके च य एता उपयन्ति ॥ ७ ॥

मितायां अष्टावादित्या अतः सत्रानुष्ठानेन द्वयोर्ल्लोकयोः ऋद्धा यजमाना अपि ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दिंशाध्यायस्य
द्वादशः खण्डः ॥

अथ: त्रयोदशः खण्डः ।

अथ तृतीयमेकोनपञ्चाशद्रात्रं सुरभिद्रव्याभ्यञ्जनकामानां सत्रमाह ।

अतिरात्रश्चत्वारोभिप्लवाः षडहाः सर्व्वस्तोमोतिरात्रो द्वावभिप्लवौ षड्हौ द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

अत्र मध्यपठितातिरात्रपदं सर्व्वस्तोमपदस्य विशेषणं स्पष्टमन्यत् । १ ।

अत्राञ्जनाभ्यञ्जने विधातुन्तयोस्तावकमर्थवादमाह ।

प्रजापतिः प्रजा असृजत सरूक्षोभवत्तऽरूक्षन्नाजानन् स आचाङ्क्ताभिचाङ्क्त ॥ २ ॥

पुरा कदाचित् प्रजापतिः प्रजाः सृष्ट्वा रूक्षः शुष्कोऽभवत

सर्गप्रयासेन शरीरगतपुष्टिकान्तिरहितोऽभूदित्यर्थः तं प्रजापतिरूपं पुष्टिकान्तिहीनं नाजानन् प्रजापतिरयमिति प्रजाः सर्व्वा नज्ञातवत्यः ततः स प्रजापतिः प्रजानां स्वप्रज्ञातार्थमाचाङ्क्त च स्वकीययोरूचक्षणे रञ्जनमपि प्रक्षिप्तवान् अभ्यङ्क्ता च स्वशरीरे सुगन्धिद्रव्यैरभ्यङ्गमपि कृतवान् ॥ २ ॥

इत्थं प्रशस्य एतत्सत्राधिकारिणां मन्त्रवर्ज्जनाभ्यञ्जनं विधत्ते ।

य आत्मानन्नेव जानीरꣳस्त एता उपेयुर्य्यदा चाञ्जतेऽभिचांजते शुभमेवात्मन्दधते जानन्त्येनान् ॥ ३ ॥

ये पुरुषा आत्मानन्नेव जानीरन् इवशब्द एवकारार्थः अत्राभिधातुरर्न्ते वा वितरणार्थः तज्ज्ञापयेयुरेव ये पुरुषाः सभामध्ये स्वात्मानं न प्रख्यापयितुं शक्ता इत्यर्थः ते पुरुषा एता एकोनपञ्चाशद्रात्रीरनुतिष्ठेयुः तासु रात्रिषु अञ्जने चाभ्यञ्जने च अक्षणोरञ्जणं शरीराभ्यङ्गञ्च सम्पादितवन्तः यद्यवसरादेवं कृतं तस्मात्ते यजमानाः शुभमेवात्मन् धत्ते शोभनं स्वख्यापनचिह्नमेव स्वशरीरे धारयन्ति तेन चिह्नेन समागताः प्रजाएतान्यजमानान् जानन्ति विद्याधनादिसम्पन्ना इत्यवगच्छन्ति ॥ ३ ॥

अञ्जनाभ्यञ्जनसाधनद्रव्याणि विधत्ते ।

गौग्गुलवेन प्रातःसवने सौगन्धिकेन माध्यन्दिने सवने पैतुदारवेण तृतीयसवने ॥ ४ ॥

धूपसाधनविवासहेतोः गुग्गुलः प्रसिद्धः तदीयेन विलेपना-

ञ्जनमञ्जनञ्च प्रातःसवने कुर्य्युः सुगन्धिशब्दः तृणविशेषवाची तद्र-सयुक्तेन विलेपेन माध्यन्दिनसवने तदुभयङ्कुर्य्युः पैतुदारव उदुम्बरइति केचिद्देवदारुरन्ये तदीयतैलेन तृतीयसवने तदुभयं कार्य्यं ॥ ४ ॥

विहितानिगुग्गुल्वादीनि उत्पत्तिप्रदर्शनेन प्रशंसति ।

अग्निर्वै देवानाꣳ होत्रमुपैष्यञ्छरीरमधूनुत तस्य यन्माꣳसमासीत्तद्गुग्गुल्वभवद्यत् स्नाव तत्सुगन्धि तेजनं यदस्थि तत् पीतुदारावेतानि वै देवसुरभीणि देवसुरभिभिरेव तदभ्यञ्जते ॥ ५ ॥

पूर्वमग्निर्देवानां यज्ञे हौत्रं होतृकर्म्म उपैष्यन् स्वशरीरमधूनुताकम्पयत तथा कुर्वतस्तस्य यन्मांसं सोमांसलचणः तत्चणात् शरीरावयवोधूत आसीत् एतत् गुग्गुल्वभवत् एवं स्नायुरस्थिनी प्रक्षिपतोः सुगन्धितेजनम्पीतुदारुणी चाभूतां अतो देवस्याग्नेः शरीरसम्बन्धादेतानि खलु देवसुरभीणि अस्त्वेवं किं तत इत्याह ततो गुग्गुल्वादिभ्यंजनेन देवसुरभिरेवाभ्यञ्जने सत्रिणः अत सूत्रं आञ्जनाभ्यञ्जनास्सु गार्हपत्य उपसत्सु सर्पीषि फाणयेयुः पृथग्देवसुरभिभिर्य्योन्युक्तानि ब्राह्मणेन तैस्तुल्यासूपाकरणवेलायां मन्नानां पूर्व्वेण हविर्द्धाने आसीना आञ्जीरन्नभ्यञ्जीरंश्च भुङ्क्तान्नोभ्वीय एवेति गौतमः उक्तमानुपूर्व्यं ब्राह्मणेनाहरहरेतत् कुर्य्युरिति धानञ्जप्यशाण्डिल्यौ सर्व्वस्तोमएवेति गौतमः पृष्ठ्य इत्येक इति ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्व्विंशाध्यायस्य
नवोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

अथ चतुर्थमेकोनपञ्चाशद्रात्रं सम्वत्सरसम्मिताख्यं ऋद्धिकामानां सत्रमाह ।

अतिरात्रश्चतुर्व्विंशः प्रायणीयमहस्त्रयोऽभिप्लवाः षडहा अभिजित्त्रयः स्वरसामानो दिवाकीर्त्त्यमहस्त्रयः स्वरसामानो विश्वजिदेकोऽभिप्लवः षडह आयुश्च गौश्च द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च संवत्सरसम्मिता यावती संवत्सरस्यर्द्धिस्तावत्येतासामृद्धिः ॥ १ ॥

कल्पनं स्पष्टं । अहःसंघसाध्यं सत्रं संवत्सरसम्मिता गवामयनसंवत्सरसत्रेण समः तत्रत्यानामङ्गानामत्र सद्भावादित्यभिप्रायः तदेवोच्यते यावती संवत्सरस्यर्द्धिः संवत्सरस्यर्द्धिरहःसमृद्धिः तावती वै आसां रात्रीणामृद्धिः समृद्धिरित्यर्थः संवत्सरसत्त्वे त्वावृत्त्या अहान्यधिकानि स्युः तथापि प्राधान्येन यानि सन्ति तान्येवात्रापोत्यर्थः ॥ १ ॥

प्रायणीयमहश्चतुर्व्विंशङ्कार्य्यमित्युक्तं तन्निरस्य त्रिवृत्कार्य्यमिति सप्ररोचनमाह ।

तदाहुर्य्यच्चतुर्व्विंशमहः प्रायणीयङ्कुर्य्युः संवत्सरमारभ्य न समापयेयुरिति त्रिवृदेव कार्य्यं प्राणा वै त्रिवृत् प्राणां नेवोपयन्ति ॥ २ ॥

तत्र प्रायणीयविषये आहुर्ब्रह्मवादिन: यद्यदि प्रायणीयमहश्चतुर्व्विंशं कुर्य्युः तदा तेन संवत्सरमारभ्योपक्रम्य न समापयेयु: यथा गवामयने चतुर्व्विंशमारभ्य द्वादशमासान् समाप्नुयु: न तथात्रेत्यर्थ: अतस्तत्परित्यज्य त्रिवृदेव कार्य्य: अत्र त्रिवृच्छन्द: केचिद्दशरात्रस्य प्रथमं पृष्ठ्यमहस्त्रिवृत्स्तोमकमस्ति तदेवात्र कार्य्यं तस्यापि प्रायणीयत्वादिति व्याचक्षते. अपरे सांवत्सरिकं चतुर्व्विंशमहर्द्धर्मातिदेशत: प्राप्तं तत्र चतुर्व्विंशत्वमपोह्य त्रिवृत्स्तोमकं कर्त्तव्यमिति दशान्यस्तरेण केवलस्यैकस्यातिदेशायोगादिति प्राणइत्यादि स्पष्टं ॥ २ ॥

अथोक्तं पक्षनिरस्य पूर्व्वोक्तमेव पक्षं पुन: सिद्धान्तयति।

अथो खल्वाहुश्चतुर्व्विंशमेव कार्य्यंसमृद्ध्यै ॥ ३ ॥

अस्यायमभिप्राय: संवत्सरे गवामयने प्राधान्येन पञ्चविंशतिरेवाहानि विद्यन्ते इति तेषां सर्व्वेषामत्र प्रयोगात् संवत्सरसमापित: स्यात् अत: सत्रासमाप्तिलक्षणदोषाभावादृक्समृद्ध्यर्थं चतुर्व्विंशमेव कार्य्यं त्रिवृत्करणे चतुर्व्विंशस्यैवाभावात् संवत्सरो न समाप्यते ॥ ३ ॥

अत्र यद्दिवाकीर्त्याहस्तदुभयस्वरसामत्वं तत् प्रशंसति।

अथैते स्वरसामान: शिरोव दिवाकीर्त्यं प्राणा: स्वरसामानो यद्दिवाकीर्त्यमभित: स्वरसामानो भवन्ति शिरस्येव तत् प्राणाधीयन्ते ॥ ४ ॥

अथाभिजिदनन्तरं एते वक्ष्यमाणा: स्वरसामानो भवन्ति

तदनन्तरं दिवाकीर्त्य्मह्रस्ति तच्छिरो वै शिरो वै प्रथममहः खलु सर्वेषु तस्य मध्यमत्वेन प्रधानत्वात् तथा सति प्राणरूपाः स्वरसामानः शिरःस्थानीयस्य दिवाकीर्त्यस्याभितो भवन्ति तत्तेन शिरस्यवस्थानत्वात् समङ्क्त्वा प्राणाश्चक्षुरादयः धीयन्ते स्थापिता भवन्ति एकत्वात् प्राधान्यपरिवारकत्वात्तस्य शिरस्त्वकल्पनं बहुत्वसंख्यायोगादन्यान्यगत्वेनोपसर्जनत्वाच्च स्वरसाम्नां प्राणत्वकल्पनं ॥ ४ ॥

अथैतेषां स्वरसाम्नामभितोयौ विश्वजिदतिरात्रौ खलु अभिप्लवः षड्हानन्तरं ये गो आयुषो अहनो ते प्रशंसति।

अथ यावन्त्यौ प्राणौ तौ विश्वजिदभिजितावथैते गो आयुषो मिथुनौ स्तोमावुपयन्ति प्रजात्यै॥ ५ ॥

गोनामकं यदहस्तत्स्त्रियाः रूपं आयुस्तु पुरुषस्थानीयत्वयोसान्नत्यं प्रजात्यै भवति ॥ ५ ॥

अथोक्ताहःसमनन्तरभावीनि दशाहानि प्रशंसति।

अथैतानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजजनाय ॥ ६ ॥

वाचा स्तोत्रशस्त्रलक्षणया निष्पाद्यत्वाद्दशाहान्यपि वाग्रूपाणि तान्यनुक्रमेण यदुपयन्ति तेनाविच्छिन्नां वाचमेवोपयन्ति प्रजननार्थं ॥ ६ ॥

अथानन्तरभाविमहाव्रतं प्रशंसति।

अथैतद् व्रतमन्नं वै व्रतमन्नं वा अन्यत्र मुखादन्नन्धिनोति यदुपरिष्टाद्व्रतमुपयन्ति मुखत एव तदन्नाद्यन्धीयते तस्मान् मुखे सदन्नन्धिनोति ॥ ७ ॥

अथ वाग्रूपद्याहानन्तरं एतद्व्रतम्महाव्रतमुपयन्ति तदन्नं वै अन्नरूपं खलु लोकमुखादन्यत्र मुखाद्यतिरिक्ताऽवयवान्तरेन वा धिनोति नैव प्रीणयत्यात्मानं अत एतदुपरिष्टाद्द्याहानामनन्तरं व्रतमुपयन्ति शिष्टं स्पष्टं ॥ ७ ॥

अथाद्यन्ते अहनी प्रशंसति।

अथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ८ ॥

यद्येतौ प्रायणीयोदयनीयावुभावप्यतिरात्रौ भवतः प्रायेन प्राणेन प्रयन्तुमुपक्रमते सत्रं तमेव प्राणमभिलक्ष्याभ्युद्यन्ति ऊर्द्ध्वं प्रापयन्ति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
चतुर्दशः खण्डः।

अथ पञ्चदशः खण्डः।

अथ सवितुः ककुभ इति मन्त्रं पञ्चममेकोनपञ्चाशद्रात्रं प्रजाप्रसक्तत्वकामानां सत्रमाह।

अतिरात्रोनव त्रिवृन्त्यहान्यग्निष्टोममुखःपडहोथ यानि

स्पष्टं ॥ १ ॥

अत्राधिकारिणो दर्शयति ।

ऋतवोन प्रत्यतिष्ठꣳस्तएताभिः प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः ॥ २ ॥

ऋतूनां प्रतिष्ठासाधनत्वादेतासां प्रतिष्ठार्थिनः साधिकारिणः ॥ २ ॥

अत्र षड़हचतुष्टयं विद्यते तत्र षट्संख्याद्वारैताः रात्रीः प्रशंसति ।

प्रत्येव तिष्ठन्ति षड्वा ऋतव ऋतुष्वेवैताभिः प्रतितिष्ठन्ति यत् क्लृप्तान् षडहानुपयन्ति क्लृप्तया एव ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथ महाव्रतस्य मध्यमस्थानत्वं प्रशंसति ।

अथैतद्व्रतमन्नं वै व्रतं नवा अन्यत्र मध्यादन्नन्धिनोति यद्व्रतम्मध्यत उपयन्ति मध्यत एव तदन्नाद्यन्धीयते तस्मान् मध्ये सदन्नन्धिनोति ॥ ४ ॥

स्पष्टं ॥ ४ ॥

अथ महाव्रतान्तरभाविषड़हद्वयं प्रशंसति ।

यत् क्लृप्तौ षड़हावुपयन्ति क्लृप्तया एव ॥ ५ ॥

स्पष्टं ॥ ५ ॥

अथ द्वादशाहस्य दशाहान्यतिरात्रौ च क्रमेण प्रशंसति ।

अथैतानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननायाथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ६ ॥

उक्तार्थं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

अथ सप्तममेकोनपञ्चाशद्रात्रमन्यं प्रजाभिभवकामानां सत्रमाह ।

अतिरात्रः षडभिप्लवाः षडहा द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥ १ ॥

स्पष्टं ॥ १ ॥

अथासां प्रजातिक्रमणसाधनत्वं प्रदर्शयन्त्यधिकारिणमाह ।

एताभिर्वा इन्द्राग्नी अत्यन्या देवता अभवतामत्यन्याः प्रजा भवन्ति य एता उपयन्ति ॥ २ ॥

इन्द्राग्नी पूर्वं एताभी रात्रिभिः अन्या देवता अभिभवतां देवानां श्रेष्ठावभूतामित्यर्थः अत इदानीमप्येता अभूता अपि अन्याः प्रजाश्च भवन्ति अभिक्रामन्त्यधिका भवन्तीत्यर्थः ॥ २ ॥

एताश्चोजोद्वारा प्रशंसति।

इन्द्राग्नी वै देवानामोजिष्ठावोजिष्ठाभवन्ति य एता उपयन्ति ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथ षडहादीन् क्रमेण प्रशंसति।

यत् क्लृप्तान् षडहानुपयन्ति क्लृप्ता एवाथैतानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननायाथैतद्व्रतमथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयंति तमभ्युद्यंति ॥ ४ ॥

उक्तप्रायमेतत् ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य

सप्तदशः खण्डः।

अथ अष्टादशः खण्डः।

अथ ऋद्धिकाममनायामेकषष्टिरात्रं सत्रमाह।

अतिरात्रश्चतुर्विंशं प्रायणीयमहस्त्रयोभिप्लवाः षडहाः पृष्ठ्यः षडहोभिजित् त्रयः स्वरसामानोदिवाकीर्त्यमहस्त्रयः स्वरसामानोविश्वजित्पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भण एकोभिप्लवः षडहश्चायुश्च गौश्च द्वे अहनी द्वादशाहस्य

दशाहानि महाव्रतस्चातिरात्रस्च तदेतदेकषष्टिरात्रं देवानां व्रात्यानां ॥ १ ॥

मध्येऽभिजित्प्रभृतीनि नवरात्राणि ततः पूर्वं पृष्ठाः षडहः ततः पूर्वं त्रय अभिप्लवाः षडहाः ततः पूर्वं आद्यो प्रायणीयचतुर्विंशो नवरात्रात्परमावृत्तः षडहः ततस्त्रयस्त्रिंशस्तोमप्रमुखः एकोभिप्लवः षडहस्ततः आयुश्च गौश्च द्वे अहनी ततो द्वादशाहस्य दशाहानि ततोन्त्योपान्त्यौ व्रतोदयनीयाविति क्लृप्तिः एतदेकषष्टिरात्रं व्रात्यानां सङ्घात्मकानां वस्वादीनां सत्रं देवानामिति स्वार्थिकस्तद्धितः ॥ १ ।

देववरुणेति मन्त्रेण देवयजनाध्यवसानानन्तरं होमः कर्त्तव्य इति विधास्यति तदर्थमाख्यायिकामाह ।

देवा वै व्रात्याः सत्रमासत बुधेन स्थपतिना ते ह वा अनिर्याच्य वरुणꣳ राजानं देवयजनन्दिदीक्षुस्तान् ह वरुणो राजानुव्याजहारान्तरेमि वोयज्ञियाद्भागधेयान्न देवयानं पन्थानं प्रज्ञास्यथेति तस्मात्तेभ्योन हविर्गृह्णन्ति न ग्रहं ॥ २ ॥

पूर्वं व्रात्या देवाः बुधेन स्थपतिना यजमानेन उक्ताः सत्रमासत ततो यद्वरुणं देवराजानमवाचयित्वैव दिदीक्षुर्दीक्षयमाणान् देवान् वरुणो व्याजहारोक्तवान् हे देवाः यतोयूयन्देवयजनमयाचित्वैव दीक्षिताः स्थितास्ततो वोयुष्मान् यज्ञियाद्भागधेयात् सोम-

चर्वादिरूपादिकं भागं अन्तरेमि वियोजयामि किञ्च देवयानं पन्थानं देवैर्गन्तव्यं यज्ञमार्गात्र प्रज्ञास्यथ इति व्याजहार तस्मा-त्तेभ्योन हविर्गृह्णन्ति तथा सोमग्रहं न गृह्णन्ति तस्माद्देवयजनायाचनेन देवान्वरुणः शशाप अतः सत्रिभिर्वक्ष्यमाणमन्त्रेण होतव्यमित्यर्थः ॥ २ ॥

अथैतत्सत्रं सर्व्वनिधिसाधनमिति विवक्षुराह ।

अथ ह वै तर्हि नौषधीषु पय आसीन्न व्रीरे सर्पिर्न्न माꣳसे मेदो न त्वचि लोमानि न वनस्पतिषु पलाशानि तद्यत एतदेकषष्टिरात्रं देवा व्रात्या उपायꣳ स्ततो वै तानि तान्येतैर्व्वीर्य्यैः समसृज्यन्त तेजस्वन्त्येवासन् पयस्वन्ति ॥ ३ ॥

अथ ह वै एवं सति पूर्वं वरुणायाचितदेवयजने सत्रेऽनुष्ठिते सति तर्हि तदानीं ओषधीः पयः सारभूतारसानासीत् नक्षीर इत्यादि स्पष्टं मेदोमांसरसः तथा सति यद्यदा यतो यस्मादुक्त एकषष्टिरात्रं व्रात्यादेवामुपायन् ततस्तस्मात् स खलु तानि भूतकार्य्याण्योषध्यादीनि एतैर्व्वीर्य्यैः पयआदिलक्षणैः स्वसामर्थ्यैः सहिता असृज्यन्त सृष्टा अभूवन् तदेव तेजस्वन्त्यासन् तेजोयुक्ता-न्यभवन् पयस्वन्ति च प्रकृष्टपयोयुक्तानि च ॥ ३ ॥

उक्तार्थविस्रम्भाय पूर्वोक्तं स्तोकबद्धं ब्राह्मणमुदाहरति ।

तदेष श्लोकोऽभ्यनूच्यत ॥ ४ ॥

श्लोक इति जात्येकवचनं व्यत्ययेन चाश्लोको अभ्यनूच्यतेत्यर्थः ॥ ४ ॥

तत्र प्रथमं श्लोकमाह ।

किमकर्त्तेति यत्पुत्रान् मुहुर्देवाꣳ अपृच्छत महोबुध-स्यासीद्दीक्षा सहोरे सपिरावहत् ॥ ५ ॥

देवा यद्यदा पुत्रान् गणदेवान् किमकर्त्तकं कृतवन्तो यूयमिति मुहुरभीक्ष्णमोपव्यादीनाम्प्रय आदिप्राप्तिविषयं पृच्छतः पृच्छन्तेति वचनव्यत्ययः यद्वा हे देवाः यूयं पुरा पृच्छतेत्युपेक्ष्यायं तत् यदा अपृच्छन्त अत्र कात्यादेवास्तत्प्रश्नादुत्तरमकुर्वन्निति शेषः बुधस्य महीमता दीक्षा आसीत् वरुणतादेवयजनतयार्थनप्रवि-काऽभूत् बुधः चोरे अपगतं सपिरावहत् स्थापितवान् इति ॥ ५ ॥

अथ द्वितीयमाह ।

महीन्दीक्षाꣳ सोमायनो बुधायदुदयच्छदनन्दत्सर्वमाप्नोन्मनाꣳसे मेदोधा इति ॥ ६ ॥

सोमायनः सोमपुत्रः महतीन्दीक्षां उदयच्छत् कृतवान् तदा सर्वं जगदनन्दत् तत्संख्यानमाप्नोत् पञ्च आदि किञ्च मनांसि मदीयमांसि मेदः पूर्वमपगतं बुधाः बुधस्य स्थापितवान् पुरु पञ्चत्वयः एवं यद्यताऽनुवर्त्तिनि देवान्तरन्दः ॥ ६ ॥

अथ तृतीयमाह ॥

दरिद्रा आसन् पशवः कृशाः सन्तोव्यस्थकाः सौमायनस्य दीक्षायाᳪ समसृज्यन्त मेदसेति ॥ ७ ॥

व्यस्थका अस्थिभीरहिताः शिष्टं स्पष्टं स वरुणप्रार्थनं सत्रमुषित्वा पय आदीनि पुनर्लब्धवन्तः तस्मै इत्युत्तरं भवति ॥ ७ ॥

एवमर्थवादेन वरुणतोदेवयजनप्रार्थनं प्रशस्येदानीं समन्त्रकं देवयजनाध्यवसायाङ्गहोमं विधत्ते ॥

तद्यएतदेकषष्टिरात्रमुपेयुस्ते देवयजनमध्यवसाय गार्हपत्यआहुतिञ्जुहुयुर्देव वरुण देवयजनन्नोदेहि स्वाहेति ते दत्ते देवयजनेन यजन्ते ॥ ८ ॥

तत्तस्माद्ये यजमाना एतत् निर्दिष्टमेकषष्टिरात्रमुपेयुः ते देवयजनमिदं भविष्यतीत्यध्यवसाय निश्चित्य गार्हपत्येग्नौ देववरुणेति मन्त्रेणाहुतिञ्जुहुयुः प्रथमन्ते इति पदं ये इति वाक्यादिभूतस्य सम्बन्धार्थं तत्तदा होमः देवयजने वरुणानुज्ञाते यजन्ते ॥ ८ ॥

उक्तार्थोपसंहारपूर्व्वकमधिकारिणो दर्शयति ।

ते सर्व्वामृद्धिमार्ध्नुवन् सर्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥ ९ ॥

ते व्रात्यादेवा उत्तैकषष्टिरात्रं नापत्य सर्व्वामृद्धिमार्भुवन् अतः समृद्ध्यर्थिनो अत्राधिकारिण इत्युक्तं भवति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
अष्टादशः खण्डः।

अथ एकोनविंशः खण्डः ॥

अथामृतत्वसाधनं शतरात्रं सत्रमाह ।

अतिरात्रोज्योतिर्गौरायुस्त्र्यहश्चतुर्दशाभिप्लवाः षडहा द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥ १ ॥

स्पष्टं ॥ १ ॥

अस्य फलं सार्थवादमाह ।

देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावंस्तेभ्य एतेन शतरात्रेणामृतत्वं प्रायच्छदेतद्वाव मनुष्यस्यामृतत्वं यत् सर्व्वमायुरेति वसीयान् भवति सर्वमायुर्य्यन्ति वसीयांसोभवन्ति य एतदुपयन्ति ॥ २ ॥

मृत्योर्भीतेभ्योदेवेभ्यः प्रजापतिरेतेन शतरात्रसत्रेणामृतत्वं प्रायच्छत् अमृतत्वायैतत् साधनमिति प्रायच्छदित्यर्थः अमृतत्वमनामलचणं देवानां मनुष्याणान्तु किममृतत्वमिति तत्राह सर्व्वं प्रजापतिना क्लृप्तं शतमायुरेति वसीयान् भवति जीवनकाले एतद्वाव एतदेव मनुष्यस्यामृतत्वं एतदुपयन्तीत्यादि स्पष्टं ॥ २ ॥

अस्यानुष्ठाने किञ्चिन्नियममाह।

अभिप्रयायमभिषुण्वन्त्यभिक्रान्त्यै समानत्राभिषुण्वन्ति प्रतिष्ठित्यै ॥ ३ ॥

अभिप्रयायं सारस्वतसत्रादभिगत्याभिगत्य प्रतिदिनमभिषुण्वन्ति उत्तरोत्तरमभिक्रान्त्यै अभिवृद्ध्यै भवति समानत्रवेति विकल्पः स्यात् अत्र सूत्रं शतरात्रेभिप्रयायमभिषुण्वन्त्यभिक्रान्त्यै समानत्राभिषुण्वन्ति प्रतिष्ठित्याइति स विकल्पः स्याद्यान्तःसुनुयुर्यथा सारस्वतेषु यत्र तु क्वच समानदेशे वा यथान्येषामयान्त एव चक्रीवन्ति सहोहविर्द्धानानि कारयित्वाहःसंस्थासु चक्राणि विपरिवर्त्तयेयुरित्याचार्य्यास्तदभिप्रयातरूपमप्रयाणाच्च समानत्राभिषवोऽहरहरेतत् कुर्य्युरिति धानञ्जप्यशाण्डिल्यावभिप्लवेष्वेवेति गौतमस्त्रिकद्रुकेष्वित्येक इति अभिप्रयायमभिषुण्वन्त्यस्मिन् पक्षेऽहरहरेतत् कुर्य्युरित्यादि द्रष्टव्यम् ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य एकोनविंशः खण्डः ॥

अथ विंशः खण्डः ॥

अथ सर्वकामसाधनं गवामयनाख्यं संवत्सरं सर्व्वप्रकृतिभूतं सत्रमाह।

अतिरात्रश्चतुर्विंशं प्रायणीयमहश्चत्वारोऽभिप्लवाः षडहाः पृष्ठ्यः षडहः स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्रयोभिप्लवाः षडहाः पृष्ठ्यः षडहोऽभिजित् त्रयः

स्वरसामानोदिवाकीर्त्यमहस्त्र्यः स्वरसामानो विश्वजित् पृष्ठ्यः षडहस्त्र्यस्त्रिंशारम्भणस्त्रयोभिप्लवाः षडहाः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भणाश्चत्वारोभिप्लवाः स मासः स द्वितीयः स तृतीयः स चतुर्थस्त्रयोभिप्लवाः षडहा आयुश्च गौश्च द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च॥ १॥

स्पष्टं॥ १॥

अथ पूर्व्वविहितं गवामयनिकं ब्राह्मणमत्रातिदिशति।

संवत्सरब्राह्मणं ब्राह्मणमिति॥ २॥

यत् संवत्सरब्राह्मणं गावो वा एतत् सत्रमासत इत्यारभ्य प्रथमपञ्चिकायां चतुर्थपञ्चमाध्यायाभ्यामुक्तं तदेवात्रापि ब्राह्मणमिति द्रष्टव्यं ननु किमर्थमत्र विधानं पूर्व्वमेव विहितत्वात् न अत्र प्रसङ्गः संवत्सरप्रकृत्यर्थं विधातव्यत्वात् तर्हि पूर्वत्र वा किमर्थं विधानं तत् सर्वं प्रकृतिभूतान्यहानि गवामयने विद्यन्ते अतोऽग्निष्टोमादीनां तदपेक्षत्वात् पूर्व्वं वक्तव्यमेव तच्चातिदेशमात्रेणैवालं किमहःकल्पनया सत्यमेवं तथापि सुखबोधनार्थं सहस्रेण प्रदर्शितमित्यदोषः॥ २॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-
बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते
माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे
चतुर्व्विंशाध्यायस्य विंशःखण्डः ।
चतुर्विंशोध्यायः सम्पूर्णः ।

पञ्चविंशोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निश्वसितं वेदा योवेदेभ्योऽखिलं जगत् ।
निर्म्ममे तमहं बन्दे विद्यातीर्थमहेश्वरं ॥

अथ स्वर्गसाधनमादित्यानां मध्ये पृष्ठ्यमयनमाह ।

अतिरात्रश्चतुर्विंशं प्रायणीयमहर्द्वौ त्रिवृत्पञ्चदशौ षडहौ पृष्ठ्यः षडहोद्वौ त्रिवृत्पञ्चदशौ षडहौ स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्रयस्त्रिवृत्पञ्चदशाः षडहाः पृष्ठ्यः षडहस्त्रिवृद्बृहस्पतिस्तोमस्त्रयः स्वरसामा-

नोदिवाकीर्त्यमहस्त्रयः स्वरसामानः पञ्चदश इन्द्रस्तोम उक्थ्यः पृष्ठ्यः षडहस्त्रयस्त्रिꣳशारम्भण एकः पञ्चदशस्त्रिवृत् षडहो द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृत उद्भिच्च बलभिच्च द्वे अहनी द्वौ पञ्चदशत्रिवृतौ षडहौ पृष्ठ्यः षडहो द्वौ पञ्चदशत्रिवृतौ षडहौ स मासः स द्वितीयः स तृतीयः स चतुर्थः पञ्चदशत्रिवृत्षडहः पृष्ठ्यः षडहः पञ्चदशत्रिवृत्षडहो गौश्चायुश्च द्वे अहनी छन्दोमदशाहोऽष्टाचत्वारिꣳशं प्रथममहरथ चतुश्चत्वारिꣳशं चत्वारिꣳशꣳ षट्त्रिꣳशं द्वात्रिꣳशं त्रिꣳशं द्वे अष्टाविꣳशे पञ्चविꣳशं चतुर्विꣳशम्महाव्रतस्यातिरात्रश्च ॥ १ ॥

अत्रादितो द्वे अहनी षष्ठमासस्यान्त्योपान्त्ये भवत द्वौ त्रिवृदित्यादिना पञ्चमासाः पूरणीयाः तत्रायुग्मान्यहानि त्रिवृन्ति युग्मानि तु पञ्चदशानीति षडहेषु त्रिवृत्पञ्चदशयोर्विवेकः त्रयस्त्रिवृत्पञ्चदश इत्यादि स्वरसामान इत्यन्तेन षष्ठमासस्याद्यानि गत्यहानि आद्ये द्वे इति तत्पूर्त्तिः तत्राभिजित्स्थानीयस्त्रिवृद्बृहस्पतिस्तोमः दिवाकीर्त्यन्तु मध्यममहर्न मासान्तर्भावि अयं [illegible] पक्षः सप्तमे मासि त्रयः स्वरसामानः अतो विश्वजित्स्थानीयः पञ्चदशस्तोम उक्थ्यसंस्थ इन्द्रस्तोमः। तत आवृत्तः पृष्ठ्यः षडहः एकः पञ्चदशत्रिवृत्षडहः अत्र पूर्ववत्पर्यायेणायुग्मानि अहानि

पञ्चदशानि युग्मानि तु त्रिवृन्ति ततो द्वादशाहस्य दशाहानि तानि च व्यूढच्छन्दस्य त्रिवृत्स्तोमकान्यग्निष्टोमसंस्थानि तत उद्भिद्बलभिदौ ततोन्ते महाव्रतोदयनीये अत्र मिलित्वैकोमासः ततो द्वौ द्वौ पञ्चदशत्रिवृताविव्यादिसंख्याया अष्टमनवमदशमैकादशमासाः पूरणीयाः ततः पञ्चदशत्रिवृत्षडहौ प्रथमतृतीयौ द्वितीयः पृष्ठ्यः षडह इत्यष्टादशाहानि ततो गोष्टोम आयुष्टोमाविति विंशत्यहानि ततश्छन्दोमदशाह इति द्वादशमासपूर्त्तिः छन्दोमदशाह इत्थं अष्टाचत्वारिंशं जागतं प्रथममहश्चतुश्चत्वारिंशं त्रैष्टुभं द्वितीयञ्चत्वारिंशं पाङ्क्तं तृतीयं षड्विंशं बार्हतञ्चतुर्थं द्वात्रिंशमानुष्टुभं पञ्चमन्त्रिंशं वैराजं षष्ठं अष्टाविंशे औष्णिहे सप्तमाष्टमे पञ्चविंशं पाङ्क्तं नवमं पूर्वन्तु पाङ्क्तं अष्टाक्षरपादपञ्चकापेक्षया द्वितीयपञ्चाक्षरपादपञ्चकापेक्षयेति चतुर्विंशं गायत्रं दशममिति॥ १॥

अथास्य नाम दर्शयति।

आदित्यानामयनं पृष्ठ्यं॥ २॥

स्पष्टं॥ २॥

अस्य फलमाह।

मध्ये पृष्ठेन वा आदित्याः स्वर्गं लोकमाक्रमन्त यन्मध्ये पृष्ठान्युपयन्ति स्वर्गस्य लोकस्याक्रान्त्यै॥ ३॥

स्पष्टोर्थः॥ ३॥

अथ पृष्ठानि प्रशंसति ।

अन्नं वै पृष्ठान्यन्नमेव तन्मध्यतोधीयते तस्मान्मध्ये सदन्नम्बिनोति ॥ ४ ॥

पृष्ठानां प्रयोगेणान्नस्य सिद्धिः पृष्ठान्यन्नमित्युपचर्य्यते तेषां मध्ये प्रयोगेण अन्नमेव मध्यदेशे स्थापितं भवति ॥ ४ ॥

अथ तानि पुनः पशुरूपेण प्रशंसति ।

पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठन्ति ॥ ५ ॥

स्पष्टं ॥ ५ ॥

अथ पृष्ठगतं त्रिवृत्पञ्चदशस्तोमत्वं प्रशंसति ।

चक्रे वा एते साकं वृतीयत् त्रिवृत्पञ्चदशौ स्तोमौ यं कामं कामयन्ते तमेतेनाभ्यश्नुवते यत्र हि चक्रीवता काम-यते तत्तदभ्यश्नुते ॥ ६ ॥

त्रिवृत्पञ्चदशौ स्तोमाविति यत् यौ स्तः ते एते कामं वृतीयत् सहैव वर्त्तमाने हि चक्रे खलु यथा रथस्य चक्रे परिभ्रमतः एवं सर्वेष्वहःसु एतौ प्रायेण परिभ्रमतः एतेन स्तोमद्वयेनेत्यर्थः चक्री-वता चक्रस्थानीयोक्तस्तोमद्वयवता पृष्ठे यत्र यत्र यद्यम् कामयते तत्र तत्र तत्काम्यमश्नुते ॥ ६ ॥

अथ बृहस्पतिस्तोमं स्तौति ।

अथैष त्रिवृद्बृहस्पतिस्तोम एतेन वै बृहस्पतिर्देवानां पुरोधामगच्छत् पुरोधाकामानुपेयुर्गच्छन्ति पुरोधाम्पुर एनान्दधते ॥ ७॥

स्पष्टोऽर्थः॥ ७॥

अथ स्वरसामानोदिवाकीर्त्यञ्च सह प्रशंसति।

अथैते स्वरसामानः शिरोवै दिवाकीर्त्यं प्राणाः स्वरसामानोयद्दिवाकीर्त्यमभितः स्वरसामानो भवन्ति शिरस्येव तत् प्राणाधीयन्ते ॥ ८॥

उक्तार्थमिदं॥ ८॥

अथेन्द्रस्तोमं प्रशंसति।

अथैष पञ्चदश इन्द्रस्तोम उक्थ्य एतेन वा इन्द्रोऽत्यन्या देवता अभवदत्यन्याः प्रजाभवन्ति य एतदुपयन्ति ॥ ९॥

अथ स्वरसामानन्तरं पञ्चदशस्तोमक उक्थ्यसंस्थ इन्द्रस्तोमः कर्त्तव्यः॥ ९॥

अथ द्वादशाहस्य दशाहानि स्तोमसंस्थाविकृतीनि प्रशंसति।

अथैतानि द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृतोमध्यतः पाप्मनोमुच्यन्त एष वाव देवतल्पो देवत-

ल्पमेव तद्रारोहन्ति तल्पग्राभवन्ति प्रथमीयमस्तल्पमाप्नु-
वन्ति ॥ १० ॥

अग्निष्टोमत्वात् त्रिवृत्त्वाच्च दशाहानि तेजोरूपाणि अत एत-
दनुष्ठानात्तमोरूपात् पाप्मनोमुच्यन्त इत्युक्तं किञ्च एष दशरात्रः
समग्रान्तर्वर्त्तित्वात्तल्प इत्युपचर्य्यते यथा लौकिकस्तल्पो गृहस्यान्तः
यद्वा देवानां निवासयोग्यत्वात्तल्पत्वं अतस्तदेतदनुष्ठातारोपि
देवतल्पमेव रोहन्ति अस्त्वेवं किन्तत इत्याह तल्पग्रातल्पार्हाभवन्ति
तस्यैव विवरणमुत्तरं वाक्यं ॥ १० ॥

अथोद्भिद्बलभिदौ स्तूयेते।

अथैतावुद्भिद्वलभिदावेताभ्यां वै बृहस्पतिर्देवेभ्य पशून्-
दसृजत्पशूनेवैताभ्यामुत्सृजन्तः ॥ ११ ॥

उद्भिद्यते गवादिलक्षणं फलमिति उद्भित् तथा बलेन भिद्यते
उत्पाद्यते फलमिति बलभित् अथवा बलनामानमसुरन्देवा-
गवार्थं बृहस्पतिः भिन्नवाननेनेति बलभिदेतावेकाहौ शिष्टं
स्पष्टं ॥ ११ ॥

अथ गोआयुषी प्रशंसति।

अथैते गो आयुषी मिथुनौ स्तोमावुपयन्ति प्रजात्यै ॥१२॥

एकया गौरतिरिक्तः एकया आयुरूनः अतिरिक्तः पुमान्
पुनः स्त्रिया इत्यनयोर्म्मिथुनत्वं ॥ १२ ॥

अथ छन्दोमदशाहः स्तूयते।

अथैष छन्दोमदशाहश्छन्दसान्दोहोऽर्वाञ्चि छन्दाꣳ-स्युपयन्ति तस्मादर्वाञ्चोभुञ्चन्तः पशव उपतिष्ठन्ते ॥१३॥

छन्दोमः छन्दोभिर्निर्म्मितोदशाह एष एव छन्दसां दोहः एवं सति अष्टाचत्वारिंशं जागतं प्रथममहरित्यादिक्रमेण छन्द-सामवरोहेणोपयन्ति सत्रिणस्तस्माद्भुञ्जते पयमादिना पालयन्तोग-वादिपशवः अर्व्वाञ्चोऽधोमुखाः सायं स्वामिगृहमुपतिष्ठन्ति ॥१३॥

अथ महाव्रतं प्रशंसति।

अथैतद्व्रतमन्नं वै व्रतन्नं वा अन्यत्र मुखादन्नन्धिनोति यदुपरिष्टाद्व्रतमुपयन्ति मुखत एव तदन्नाद्यन्धीयते तस्मा-न्मुखे सदन्नन्धिनोति ॥ १४ ॥

गतमिदं ॥ १४ ॥

अथाद्यन्ते अहनी प्रशंसति।

अथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ १५ ॥

एतदपि गतं अत्रादित्यानामयनस्य कल्पोमध्ये पृष्ठस्य क्लृप्तो-तिरात्रः क्लृप्तं चतुर्विंशमहराभिप्लविकस्य प्रथमस्याङ्गः प्रसोमा-सोविपश्चित इत्यादिकं द्रष्टव्यं ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

अथ पुरस्तात् पृष्ठ्याख्यमङ्गिरसामयनमाह।

अतिरात्रश्चतुर्विंशं प्रायणीयमहः पृष्ठ्यः षडहस्त्वा-रस्त्रिवृतोभिप्लवाः षडहाः स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्रयस्त्रिवृतोभिप्लवाः षडहा पृष्ठ्यः षडहस्त्रिवृद्बृहस्पतिस्तोमस्त्रयः स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानः पञ्चदश इन्द्रस्तोम उक्थ्यः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भण एकत्रिवृदभिप्लवः षडहो द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृत उद्भिच्च बलभिच्च द्वे अहनी चत्वारस्त्रिवृतोभिप्लवाः षडहाः पृष्ठ्यः षडहः समासः स द्वितीयः स तृतीयः स चतुर्थो द्वौ त्रिवृतावभिप्लवौ षडहौ पृष्ठ्यः षडह आयुश्च गौश्च द्वे अहनी छन्दोम दशाहश्चतुर्विंशं प्रथममहरष्टाविंशं त्रिंशं द्वात्रिंशं षट्त्रिंशञ्चत्वारिंशञ्चतुश्चत्वारिंशमष्टाचत्वारिंशञ्चतुर्विंशमहाव्रतञ्चातिरात्रश्चाङ्गिरसां पुरस्तात् पृष्ठ्यम् ॥ १ ॥

आद्ये अहनी पूर्ववत् षण्मासमासा भवन्तः पृष्ठ्यः षडहस्सर्वैश्चतुर्भिरभिप्लवषडहैरेको मास इत्येवमादितः पञ्चमासाः स्युः ते चा-

भिप्लवाः सर्वेऽपि त्रिवृत्स्तोमकाः षष्ठे मासि त्रयस्त्रिवृदभिप्लवाः पृष्ठ्यः षडहोऽभिजित्स्थानीयको बृहस्पतिस्तोमस्ततस्त्रयः स्वरसामान: आद्ये अहनी इति षष्ठोमास: ततो दिवाकीर्त्यमहः पूर्ववदेव सप्तमोमासस्त्रयः स्वरसामान इन्द्रस्तोमश्च तत आवृत्तः पृष्ठ्यः षडहस्त्रिवृदभिप्लव एकस्ततो द्वादशाहस्य दशाहानि व्यूढानि पूर्ववद्दशाहविशेषणानि तत उद्भिद्बलभिदौ ततोऽन्त्ये महाव्रतोदयनीये द्वे अहनी इति त्रिंशदहानि अथाष्टमादिचत्वारो मासाश्चतुर्भिरावृत्तैरभिप्लवैरेकेन पृष्ठ्येन चैकैकमासकल्पनया आसव्यः द्वादशस्तु मासः द्वाभ्यां त्रिवृदभिप्लवाभ्यां आवृत्तेनैकेन पृष्ठ्यषडहेन सायुर्गौभिश्छन्दोमदशाहैः पूर्य्यते छन्दोमदशाहेषु चतुर्विंशप्रभृतीनामष्टाचत्वारिंशत्पर्य्यन्तान्यनुक्रमेणैव पञ्चविंशं नविद्यते तत् स्थाने चतुर्विंशं तस्मान्ततोदशमं भवति एतत्सत्रमङ्गिरसां पुरस्तात् पृष्ठ्यमित्युच्यते प्रथमत एव पृष्ठ्यषडहस्य प्रयोज्यत्वात् ॥ १ ॥

अथास्य फलं सप्ररोचनमाह।

पुरस्तात् पृष्ठेन वा अङ्गिरसः स्वर्गं लोकमाक्रमन्त यत् पुरस्तात् पृष्ठान्युपयन्ति स्वर्गस्य लोकस्याक्रान्त्यै ॥२॥

स्पष्टं ॥ २ ॥

अथ पशुत्वात् पृष्ठान्यन्नपशुत्वेन प्रशंसति।

अन्नं वै पृष्ठान्यन्नमेव तन्मुखतोधीयते तस्मान् मुखे सदन्नन्धिनोति पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठन्ति ॥ ३॥

स्पष्टं ॥ ३ ॥

अथ छन्दोमदशाहपर्य्यन्तस्याहर्व्विदनं सम्पाद्य पूर्वसत्रस्यादित्यानामयनस्यार्थवादमतिदिशति ।

यदन्यच्चक्राभ्याᳪ साकं वृद्भ्यान्तत्समानमाछन्दोमदशाहात् ॥ ४ ॥

अत्राभिप्लवे पञ्चदशस्याभावात् पूर्वेषम्याञ्चक्रे वा एते साकं वृतीयत् त्रिवृत्पञ्चदशौ स्तोमावित्युक्तादन्यच्छन्दोमदशाहपर्य्यन्तं ब्राह्मणमत्रापि समानमित्यर्थः यद्यप्यत्रायुर्गोरिति क्रमः तथापि मिथुनत्वादर्थवादः समानएव ॥ ४ ॥

अथ छन्दोमदशाहं प्रशंसति ।

अथैष छन्दोमदशाहश्छन्दसान्दोह ऊर्द्ध्वानि छन्दाᳪस्युपयन्त्यनपभ्रᳪशायैष वाव देवयानः पन्थाः प्रदेवयानं पन्थानमाप्नुवन्ति य एतदुपयन्त्यथैतद्व्रतं ॥ ५ ॥

छन्दसामवरोहक्रमेणानुष्ठाने क्रमेण कर्म्मणश्छन्दसोनयभ्रंशः स्यात् अतस्तदभावाय भवन्दुदेमानछन्दसामवाप्तिः एष एव छन्दोनुक्रमो देवलोकगमनमार्गः देवयजनमार्गः अथैतद्व्रतमित्यत्र प्रतीकग्रहणं पूर्वोक्तार्थवादानुकर्षणार्थं ॥ ५ ॥

आद्यन्ते अहनो प्रशंसति ।

अथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ६ ॥

गतमिदं। अस्यायनस्य पुरस्तात् पृष्ठ्यस्य क्रमोतिरात्रः क्रमश्चतुर्विंशमहः क्रमः पृष्ठ्यः क्रमं प्रथममहराभिप्लवस्य यथा मध्ये पृष्ठ्य इत्यादिकल्पोद्रष्टव्यः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथ दृतिवातवतोरयनमाह ।

अतिरात्रस्त्रिवृता मासं पञ्चदशेन मासꣳ सप्तदशेन मासमेकविꣳशेन मासन्त्रिणवेन मासन्त्रयस्त्रिꣳशेन मासम्महाव्रतं त्रयस्त्रिꣳशेन मासं त्रिणवेन मासमेकविꣳशेन मासꣳ सप्तदशेन मासं पञ्चदशेन मासं त्रिवृता मासमतिरात्रः ॥ १ ॥

प्रथमं प्रायणीयोतिरात्रस्ततस्त्रिवृदादित्रयस्त्रिंशान्ताः आदितः षण्मासा आमव्याः विषुवतः स्थाने महाव्रतं भवति तएव त्रिवृदादिमासा उत्तरस्मिन् पक्षसि द्वादशादिसप्तमासान्ताः षण्मा-

सा: स्युः तत उदयनीयमहः एतानि त्रिषष्ट्युत्तरशतत्रयमहानि स्युः अधिकयोर्द्वयोरह्नोर्व्यवस्थाविषये सूत्रकारः इतिवानवतो-ऽयने द्वावेकोनौ मासौ सुत्युस्त्रिवृताविति गौतमस्त्रयस्त्रिं-शाविति धानञ्जय्यः उभौ वा त्रिंशिनौ स्यातां यथैतद्ब्राह्मणमि-ति त्रयस्त्रिंशावेकोनाविति कल्पकारस्य मतं ॥ १ ॥

अथास्य फलं सप्ररोचनमाह।

ऋतवोन प्रत्यतिष्ठꣳस्त एतेन प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः प्रत्येव तिष्ठन्ति षड्वा ऋतव ऋतुष्वेवैतेन प्रतिति-ष्ठन्ति॥ २॥

स्पष्टं। ऋतुषु प्रतिष्ठानं नाम तत्तदृतुचितभोगास्पदत्वं ॥२॥

अथ मध्यमं महाव्रतमहः प्रशंसति।

यद्व्रतम्मध्यत उपयन्ति मध्यत एव तदन्नाद्यन्धीयते तस्मान्मध्ये सदन्नन्धिनोति ॥ ३ ॥

गतमेतत् ॥ ३ ॥

अथ कृत्स्नमयनं पक्षित्वेन प्रशंसति।

पक्षि वा एतत्सत्रायणं यङ्कामं कामयन्ते तमेतेनाभ्य-श्नुवते यत्र यत्र हि पक्षी कामयते तत्तदभ्यश्नुते ॥ ४ ॥

पूर्वोत्तरमासषट्कल्पपक्षद्वयमयुक्तमेतत्सत्रायणं अस्त्येवं कि-न्तत इत्याह यङ्कामं कामयन्ते इत्यादिना अथ सर्वकामसाधनमि-

वोपपादयति यत्र यत्र हि पक्षो इत्यादिना यद्वा पक्षिवेत्यादि महाव्रतस्यैव स्तुतिः तच्च मध्यमाहस्त्वेन प्रधानत्वात् पक्ष्यपि भवति अत एव सत्रनिर्व्वाहकत्वात् सत्रायणमित्युच्यते ॥ ४ ॥

आद्यन्तयोर्म्मासयोर्थैत् त्रिवृत्त्वन्तत् प्रशंसति ।

त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणा वै त्रिवृत् स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥ ५ ॥

त्रिवृतः प्राणत्वमसकृदुक्तम् ॥ ५ ॥

अथैतदयनं कर्तृद्वारा प्रशंसति ।

एतद्वै दृतिवातवन्तौ खाण्डव उपेतोविषुवति वातवानुत्तिष्ठति समापयति दृतिस्तस्मात्तनीयाꣳसोवातवता भूयाꣳसोदार्त्तेयाः ॥ ६ ॥

एतत्सत्रायणन्दृतिश्च वातवांश्चेत्युभौ यजमानौ खाण्डवे वने उपेतः अन्वतिष्ठतामित्यर्थः भूतकाले व्यत्ययेन वर्त्तमानप्रत्ययः एवमुत्तरयोरप्याख्यातयोर्द्रष्टव्यं तयोरनुष्ठानप्रयुक्तं किञ्चित् फलवैषम्यं वक्तुमाह वातवान् विषुवति महाव्रते सम्पूर्णे उत्तिष्ठति उदतिष्ठत् सत्रं समापितवान् दृतिस्तु द्वादशापि मासानाक्रम्य समापयत् यस्मादेवं तस्माद्वातवता वातवतो वंश्यास्तनीयांसः अल्पार्थं ततवः कृशा अभवन् दार्त्तेया दृतरवंश्यास्तु भूयांसो बहुतराः प्रवृद्धा अभवन् अत उभयस्यानुष्ठानसद्भावे-

पि कृत्स्नानुष्ठानं प्रशस्तफलवदित्युक्तं भवति अत्र विधृतिभिः क्लृप्तं इति वातवतोरयनमात्रिणवेभ्यस्त्रिवृद्गा उद्धरत्युक्थानि पञ्चदशेभ्यः षोडशिनमित्यादिकं द्रष्टव्यं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ सर्व्वर्द्धिसाधनं कुण्डपायिनामयनमाह ।

मासन्दीक्षिताभवन्ति ते मासि सोमं क्रीणन्ति तेषां द्वादशोपसद उपसद्भिश्चरित्वा सोममुपनह्य मासमग्निहोत्रञ्जुह्वति मासं दर्शपूर्णमासाभ्यां यजन्ते मासं वैश्वदेवेन मासं वरुणप्रघासैर्म्मासꣳ साकमेधैर्म्मासꣳ शुनासीर्य्येण त्रिवृता मासꣳ पञ्चदशेन मासꣳ सप्तदशेन मासमेकविꣳशेन मासं त्रिणवेन मासमष्टादश त्रयस्त्रिꣳशान्यहानि द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥ १ ॥

मासं मासपर्य्यन्तं दीक्षिताभवन्ति दीक्षितधर्म्मानन्नुतिष्ठेयुः तएव मासि दीक्षासम्बन्धिनि सम्पूर्णे प्रायणीयायां कृतायां प्रथमप्रवर्ग्योपसद्दिवसे सोमं क्रीणन्ति क्रीणीयुः तेषां द्वादशोपसदो

भवन्ति ततः क्रतोपसदहः पूर्व्वक्रीतं सोममुपनह्य उपरि देशे संरक्ष्य ततः मासमग्निहोत्रमित्यारभ्य त्रिणवेन मासमित्यन्तत्रिगदसिद्धं आदितः षण्मासाहविर्य्यज्ञकाद्इतरैनुसौमिकाः द्वादशस्य मासस्य त्रयस्त्रिंशकान्यष्टादशान्यहानि ततो द्वादशाहस्य दशाहानि ततो महाव्रतं चातिरात्रश्चेति त्रिंशदहानीति द्वादशः॥ १ ॥

अथ क्रमेणानुष्ठेयं अग्निहोत्रादिचतुष्टयं प्रशंसति।

अग्निहोत्रं दशहोता दर्शपूर्णमासौ चतुर्होता चातुर्म्मास्यानि पञ्चहोता सौम्योध्वरः सप्तहोता॥ २॥

यदेतत् प्रथमे मास्यनुष्ठेयमग्निहोत्रमस्ति तच्च चित्तस्येत्यनुवाकोक्तोदशहोता तेन यो होमोस्ति सोमेन क्रतो भवतीत्यर्थः एवमुत्तरवाक्येष्वपि द्रष्टव्यं दर्शपूर्णमासौ द्वितीयमास्यनुष्ठेयावेव चतुर्होता तथा मासचतुष्टये क्रमेणानुष्ठेयानि चातुर्मास्यान्येवं पञ्चहोता यः सौम्योध्वरः उत्तरमासषट्कसम्बन्धी सएव सप्तहोता अग्निहोत्रादि चतुष्टयमध्वर्य्युब्राह्मणे स्पष्टमाम्नातं पृथिवी होता अग्निर्होता महाहविर्होतेति तानि क्रमेण चतुर्होतृपञ्चहोतृसप्तहोतॄणां प्रतीकाः दशहोतुः प्रतीकस्तु प्रदर्शित एव॥ २ ॥

अथैतेषां फलमाह॥

एते वाव सर्व्वेण यज्ञेन यजन्ते यएतदुपयन्ति सर्व्वएव भवन्ति॥ ३॥

ये सत्रिण एतदुपयन्ति एते वाव एतएव सर्व्वे अग्निहोत्रादि-भेदेन प्रकृतिविकृत्यात्मना च यो यज्ञोऽस्ति तेन कृत्स्नेनाभीष्टा भवन्ति अत एव पशुपुत्रधनस्वर्गादिफलैः समृद्धा भवन्ति ॥ ३ ॥

अथैषां शेषभक्षणे किञ्चिद्विशेषमाह।

ते सर्वे कुण्डपायिनोऽत्सरुकैश्चमसैर्भक्षयन्ति ॥ ४ ॥

सर्वे सत्रिणः कुण्डैः पातारो भवन्ति अत एवास्यैतन्नाम सम्पन्नम् अत्सरुकैः अत्सरुर्नाम दण्डरहितो मध्येऽत्यन्तमवनतः स्थूलः पात्रविशेषस्तादृशैश्चमसैर्भक्षयन्ति कुतः शिष्टसोमं ॥ ४ ॥

अत्रार्त्विज्यसमानतां विधत्ते।

योहोता सोऽध्वर्युः सपोता य उद्गाता सनेष्टा सोऽच्छावाको योमैत्रावरुणः सब्रह्मा सप्रतिहर्त्ता यः प्रस्तोता सब्राह्मणाच्छंसी सग्रावस्तुद्यः प्रतिप्रस्थाता सोऽग्नीत्स उन्नेता गृहपतिर्गृहपतिः सुब्रह्मण्यः सुब्रह्मण्यः ॥ ५ ॥

सुगमं ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

अथ सर्व्वसमृद्धिसाधनं तपश्चितामयनं सत्रमाह।

संवत्सरन्दीक्षिताभवन्ति संवत्सरमुपसद्भिश्चरन्ति संवत्सरं प्रसुतोभवति ॥ १ ॥

संवत्सरं प्रसुतो भवति संवत्सरं प्रसुनुयुरित्यर्थः सिद्धमन्यत् अत्राङ्गां विशेषकल्पनामात्रा सत्रप्रकृतिभूता गवामयनाहःक्लृप्तिः यद्वा सर्वप्रकृतिभूतज्योतिष्टोमेनाङ्गां क्लृप्तिर्द्रष्टव्या तथा चार्षेयकल्पः गवामयनेन क्लृप्तं तपश्चितामयनं ज्योतिष्टोमेन वा विक्लृप्तेनेति ॥ १ ॥

तत्संवत्सरन्दीक्षिताभवन्ति तप एव तेन तप्यन्ते यत्संवत्सरमुपसद्भिश्चरन्ति पुनत एव तेन यत्संवत्सरं प्रसुतोभवति देवलोकमेव तेनापियन्ति ॥ २ ॥

दीक्षायां पयोव्रतादिनियमसद्भावात् दीक्षा संवत्सरेण तप एव तप्तं भवति ततः संवत्सर पसदनुष्ठानेन देवत्वप्राप्तये सत्कृता भवन्त्येव ततः संवत्सरसोमयागेन पूताः देवलोकं देवनिवासस्थानं प्राप्नुवन्ति ॥ २ ॥

अस्य फलं सप्ररोचनमाह।

एतेन वै तपश्चितोदेवाः सर्व्वामृद्धिमार्ध्नुवन् सर्व्वामृद्धिमृर्ध्नुवन्ति य एतदुपयन्ति ॥ ३ ॥

स्पष्टोर्थः ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य

पञ्चमः खण्डः।

अथ षष्ठः खण्डः ।

अथ सर्व्वर्द्धिसाधनं प्रजापतेर्द्वादशसंवत्सराख्यं सत्रमाह ।

त्रयस्त्रिवृतः संवत्सरास्त्रयः पञ्चदशास्त्रयः सप्तदशास्त्रय एकविंशाः प्रजापतेर्द्वादशसंवत्सरं ॥ १ ॥

सुज्ञानमिदं ॥ १ ॥

अथास्य फलं सप्ररोचनमाह ।

एतेन वै प्रजापतिः सर्व्वस्य प्रसवमगच्छत्सर्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति ॥ २ ॥

सर्व्वस्य प्रसवं प्रेरणं तत्सर्व्वसमृद्धस्यैव नान्यस्येति सर्व्वसमृद्धिकामा अत्राधिकारिणः ॥ २ ॥

अथ विहितसंवत्सरत्रयचतुष्टयं क्रमेण प्रशंसति ।

यत् त्रयस्त्रिवृतः संवत्सरा भवन्ति तेजो ब्रह्मवर्च्चसं त्रिवृत्तेज एव ब्रह्मवर्च्चसमवरुन्धते यत् त्रयः पञ्चदशा ओजो वीर्यं पञ्चदश ओज एव वीर्यमवरुन्धते यत् त्रयः सप्तदशा अन्नं वै सप्तदशोऽन्नाद्यमेवावरुन्धते यत् त्रय एकविंशाः प्रतिष्ठा वा एकविंशोऽन्तत एव यज्ञस्य प्रतितिष्ठन्ति ॥ ३ ॥

अग्निना सह त्रिवृतः प्रजापतिमुखादुत्पन्नस्तस्य च गायत्रीसंबन्धाद्गायत्र्या ब्रह्मवर्च्चससाधनत्वाद् ब्रह्मवर्च्चसं तेज एव त्रिवृत् अतस्तदनुष्ठातारोऽपि तावदेवावरुन्धते एवं पञ्चदशादिष्वपि द्रष्टव्यं ॥ ३ ॥

अथास्य प्रशंसाप्रशंसाद्वारेण सर्व्वसिद्धिलक्षणं फलं दर्शयति ।

एतेन वै नैमिशीयाः सर्व्वामृद्धिमार्ध्नुवन् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥ ४ ॥

नैमिशीया नैमिशारण्यवासिनः ॥ ४ ॥

अथास्य सत्त्रस्य नववार्षिकप्रयोगोऽपि विद्यत इत्याह ।

ते ह सप्तदशेभ्य एवाध्युत्तस्थुस्त उ होचुर्येन प्रजायाम ध्यातै स एतत्सत्त्रं समापयादिति तदेतत्समीप्सन्तो ब्राह्मणाः सत्त्रमासते ॥ ५ ॥

ते नैमिशीयाः सप्तदशेभ्य एव सप्तदशस्तोमकेभ्यस्त्रिभ्यः संवत्सरेभ्यः सप्तदशं समाप्यैवाध्युत्तस्थुः सत्त्रादुत्थिता आसन् तउ ह त एव खलु तदेवमूचुः योऽदीक्षितोऽनोऽस्माकं प्रजायां पुत्रपौत्रादिलक्षणायां ऋद्धातैः यज्ञाङ्गैः समृद्धः स्यात् स एतत् सत्त्र एकविंशवर्षत्रयमप्यननुष्ठाय समापयेदिति एतावतास्य नवसंवत्सरानुष्ठानं विद्यते तथापि साधनसमृद्धावप्यनापदि सप्तदशेभ्य उत्थापनं कुर्य्यादित्युक्तं भवति यस्माद्योनः प्रजायामृद्धात इति नैमिशीयैरुक्तं तस्मादित्यर्थः तत्सत्त्रं समीप्सन्तः समापयितुमिच्छन्तो ब्राह्मणा द्वादशसंवत्सरमेव सत्त्रमासते ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य षष्ठः खण्डः ।

अथ सप्तमः खण्डः।

अथ सर्व्वर्द्धिसाधनं षट्त्रिंशत्संवत्सराख्यं शाक्त्यानां सत्रमाह।

नव त्रिवृतः संवत्सरा नव पञ्चदशा नव सप्तदशा नवैकविंशाः शाक्त्यानां षड्विंशत्संवत्सरं ॥ १॥

शाक्त्या शक्तिगोत्रोत्पन्ना ऋषयः ॥ १ ॥

अथास्यानुष्ठाने किञ्चिद्विशेषसमृद्धिसाधनं दर्शयति।

एतेन वै गौरीवितिः शाक्त्यस्तरसपुरोडाशोयव्यावत्याꣳ सर्व्वामृद्धिमार्ध्नोत् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति॥ २ ॥

गौरीवितिर्नामऋषिः तरसं मांसन्तदेव सवनीयं पुरोडाशं यस्यासौ तरसपुरोडाशः यव्यावतीनाम नदी सिद्धन्यत् ॥ २ ॥

अथैतत् संवत्सरगतसंख्याद्वारा प्रशंसति।

बृहती वा एतत्सत्रायणꣳ स्वाराज्यञ्छन्दसां बृहती प्रस्वाराज्यमाप्नुवन्ति य एतदुपयन्ति ॥ ३ ॥

सत्रञ्च तदयनञ्च सत्रायणं एतत् सत्रायणं बृहती वै बृहत्यपि षट्त्रिंशदक्षरा अस्यापि संवत्सरगता षट्त्रिंशत्संख्यास्ति अतस्तद्द्वारा एतत् बृहती अस्त्वेवं किन्ततइत्यतआह बृहती छन्दसां मध्येस्वाराज्यमित्युक्तं अत एतदनुष्ठातारोपि स्वाराज्यमाप्नुवन्ति ॥ ३ ॥

अथैतद्बहुपुत्रसाधनत्वेन प्रशंसति ॥

तदेतच्छाक्त्यानां दशवीरमेषां दशवीराजायन्ते य एतदुपयन्ति ॥ ४ ॥

तदेतदुक्तं सत्रं शाक्त्यानां दशवीरं वीरयन्त्यमित्रानिति वीराः पुत्रास्तेषां दशसंख्यानां साधकं अतोये दीक्षिता एतदुपमन्ति तेषामपि दशवीराः पुत्राजायन्ते ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य सप्तमः खण्डः ॥

अथ अष्टमः खण्डः

अथ स्वर्गसाधनं साध्यानां शतसंवत्सरं सत्रमाह।

पञ्चविꣳशतिस्त्रिवृतः संवत्सराः पञ्चविꣳशतिः पञ्चदशाः पञ्चविꣳशतिः सप्तदशाः पञ्चविꣳशतिरेकविꣳशाः साध्यानाꣳ शतसंवत्सरम् ॥ १ ॥

स्पष्टं ॥ १ ॥

अथैतस्य प्रयोक्तृप्रशंसनद्वारा स्वर्गसाधनत्वमाह।

साध्या वै नाम देवेभ्यो देवाः पूर्व आसꣳस्त एतत्सत्रायणमुपायꣳस्तेनार्ध्नुवꣳस्ते सगवः सपुरुषाः सर्व्वएव सह स्वर्गं लोकमायन्नेवं वाव ते सह स्वर्गंलोकं यन्ति य एतदुपयन्ति ॥ २ ॥

पूर्व्वं साध्याख्यादेवाः तस्मादयोदेवेभ्यः इदानीं ज्योतिष्टोमादिकर्म्मकत्त्वात् देवतात्वं प्राप्नुवन्तः पूर्व्वा आसन् ते स्वदेवत्व प्राप्त्यर्थं एतच्छतसंवत्सरं सत्रायणमुपेत्य समृद्धा अभवन्निह लोकात्पश्चात्तैः सपुरुषाः सपरिचारकाः सर्व्वएव कात्स्न्येन स्वर्गं लोकमायन्नेवमेवेदानीमपि ते स्वर्गमित्यादिस्पष्टं अतएव साध्यानां सम्बन्धात् साध्यानां शतसंवत्सरमिति नाम सम्पन्नं ॥ २ ॥

अथैतच्छतसंवत्सरशतसंख्याद्वारेण प्रशंसति ।

आयुर्व्वा एतत्सत्रायणꣳ शतायुः पुरुषोयावदेवायुस्तदवरुन्ध ते नह्यत्यायुषꣳसत्रमस्ति ॥ ३ ॥

यतः शतायुः पुरुषो अतस्तत्संख्याकः संवत्सरसद्भावादेतत्सत्रायणमायुरित्युच्यते अतोयावदेवायुः पुरुषस्य प्रजापतिना शतमिति क्लृप्तं तत्कात्स्न्येनावरुन्धते नमध्येम्रियते नह्यत्यायुषं आयुरतिक्रान्तं आयुषोमध्ये मरणसाधनं सत्रं नास्ति अतः शतमायूंषि पुरुषस्याविच्छिन्नानि ॥ ३ ॥

उक्तार्थे ऋचमुदाहरति ।

तदभ्यनूक्ता तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्य्यस्य यतः परिजार इवाचरन्त्युषा ददृशे न पुनर्य्यतीवेति ॥ ४ ॥

अस्यामृचि बह्वपेचितमित्येतावदेव निदर्शनं क्रियते उषसः स्तुतिरेषा तानीत्तानि तेजांस्येवाहनि बहुलान्यासन् अह्नामपेक्षितत्वादामन्त्रिल्याश्योरर्थे अतोऽस्माकं सन्त्वित्यर्थः तानीत्युक्तं या यानि तेजांसि प्राचीनं पूर्व्वस्मिन् काले सूर्य्यस्य उदिता उदिते उदये सति उत्पन्नानीत्यर्थः एकस्तपनः परिस्पन्दजनितं तेजःसमूहः एवैकमहः खलु अतस्तथाविधानि बहूनि सन्त्वित्यभिप्रायः अतोयेभ्यस्तेजोभ्यस्तदर्थं जारे पत्यौ परित आचरन्ती पत्युः समीपं सञ्चरन्ती नारी जोषा जारे रात्रेर्जरयितरि आदित्ये पर्य्याचरन्ती सती ददृशे सर्व्वैः किन्तु नपुनर्य्यती पुरुषान्तरं प्रति गच्छन्ती पुंश्चलीव नददृशे तानीति सम्बन्धः ॥ ४ ॥

अथैतत् ज्योतिष्टोमस्य सादृश्येन प्रशंसति।

ज्योतिष्टोमस्यायनेन यन्ति ज्योतिरेव भवन्ति ॥ ५ ॥

ज्योतिष्टोमस्य यदयनं प्रायणं त्रिवृदादिस्तोमचतुष्टयरूपमस्ति तेनैवैतं यत्र यन्ति अतस्तेपि ज्योतिरेव तेजोरूपा एव भवन्ति ॥ ५ ॥

अथैतदंत्यद्वारेण प्रशंसति।

एकविꣳशोऽन्ततः स्तोमानां भवति प्रतिष्ठा वा एकविꣳशोऽन्तत एव यज्ञस्य प्रतितिष्ठन्ति ॥ ६ ॥

स्तोमानां त्रिवृदादीनां मध्ये अन्ततः सत्रान्ते एकविंशस्तोमो भवति सिद्धमन्यत् ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथाग्नेः सहस्रसाव्यं सहस्ररात्रं सर्व्वाब्राद्यफलम.धनं सत्रमाह ।

अतिरात्रः सहस्रमहान्यतिरात्रोऽग्नेः सहस्रसाव्यं ॥ १ ॥

सहस्राण्यहानि कार्त्स्न्येन स्तूयते अभिषूयते सोम इति सहस्रसाव्यं एतदग्नेः सम्बन्धि सहस्रसाव्यं सत्रं अस्यादावन्ते चातिरात्रौ भवत इति केचित् अस्यैवाद्यन्ते अहनी अतिरात्रौ इत्यपरे तथा च सूत्रं सहस्रसाव्ये सहातिरात्राभ्यां सहस्रमहनीत्याचार्य्याः सहस्रसाव्यमिति ह्याहेत्यन्तरेणेति शौचिवृक्षिरिति ॥ १ ॥

अथास्य फलं सप्ररोचनमाह ।

एतेन वा अग्निः सर्व्वस्य प्रसवमगच्छत् सर्व्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति ॥ २ ॥

स्पष्टं ॥ २ ॥

अथास्य कर्त्तुर्द्वारा फलान्तरं दर्शयति ।

अग्नेर्वै सर्वमाद्यꣳ सर्व्वमेषामाद्यं भवति य एतदुपयन्ति ॥ ३ ॥

एतत्पूर्व्वमनुष्ठितवतोऽग्नेः खलु एतदनुष्ठानसामर्थ्यात् सर्व्वमपि आद्यं अदनीयमासीत् अतः सर्व्वमित्यादि स्पष्टं ॥ ३ ॥

अस्याहर्गतसंख्याद्वारेणैतत्प्रशंसति ।

अथ यत् सहस्रमाव्यं भवति सहस्राक्षरा वै परमा विराट् परमायामेव विराजि प्रतितिष्ठन्ति ॥ ४ ॥

परमा विराट् संख्यानाम्मध्ये शतं हि परमं अतस्तावत् संख्या वा विराट्परमेत्युच्यते सहस्राक्षराविराडिति श्रुतेरेकैकस्यादशसंख्यात्वात् सहस्राक्षरा भवति सिद्धमन्यत् ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
नवमः खण्डः ।

अथ दशमः खण्डः।

अथ त्रीणि सारस्वतानि सत्राणि, मित्रावरुणयोः प्रथममि न्द्राग्न्योर्द्वितीयमर्य्यम्णस्तृतीयं, तत्र मित्रावरुणयोः प्रथमं सत्रमाह।

सरस्वत्या विनशने दीचन्ते ॥ १ ॥

सरस्वती नाम नदी प्रत्यक्स्रोता प्रवहति तस्याः प्रागपर भागौ सर्व्वलोकप्रत्यक्षौ मध्यमस्तु भागो भूम्यामन्तर्निमग्नः प्रव हति नासौ केनचिद्दृश्यते तद्विनशनमित्युच्यते तस्योपक्रमे दक्षिणे तीरे दीचन्ते ॥ १ ॥

सत्रस्य सारस्वतीयस्य दीक्षोपसदोरियत्तामाह।

तेषां द्वादश दीक्षा द्वादसोपसदः ॥ २ ॥

अथ कस्मिन् दिवसे दीक्षारम्भ इति जिज्ञासायां सूत्रकारो मतभेदमाह षष्ठ्यां पक्षस्येति गोतमोमावास्यायामतिरात्रः स्यादिति पूर्व्वपक्षस्य षष्ठ्यामित्यर्थः तत्रोपपत्तिं स्वपक्षे चाह एवं स्वस्थानमामावास्यं प्रयुज्यत इति अस्यायमर्थः एवं सति शुक्लपक्ष स्य प्रथमायां सान्नाय्यब्राह्मणविहितं प्रयुक्तं स्यात्पक्षान्तरमाह सप्तम्यां वा दीक्षित्वामावास्यायां यजनीयेहन्यतिरात्रः स्यादिति धानञ्जप्यसमाधय उत्तराभ्यां सुत्याभ्यामिति अस्यायमर्थः अमा- वास्यायामुत्तरेद्युर्य्यजनीये शुक्लप्रथमायामेवातिरात्रः कृतः उत्त- राभ्यां गोष्टोमायुष्टोमाभ्यां ब्राह्मणोक्ताभ्यां साम्यमिद्दार्थं प्रथमा- यामेव हि तयोरनुष्ठानमिति नन्वेवं सति द्वितीयायां कर- णात् सान्नाय्यस्य स्थानभ्रंशः स्यादित्याशंक्य स्वयमेव परिहर

ति स्वस्थानं चैवामावास्यं प्रयुज्यत इति अतः कारणात् न सान्नाय्यस्यापभ्रंश इत्यर्थः तदपि कुत इति तत्राह पूर्व्वपक्षो ह्यामावास्यस्थानमिति अयमभिप्रायः पूर्व्वपक्षोहि कार्त्स्न्येन सान्नाय्यस्य स्थानं न केवलं प्रथमैवेति दीक्षोपसदोर्म्मध्ये अथ प्रयोगक्रमः पूर्व्वोक्तदीक्षोपक्रमयोरन्यतरं परिगृह्य द्वादशदिवसदीक्षान्ते प्रायणीयया प्रचर्य्य राजानं क्रीत्वोपनह्य निधाय पश्चात् द्वादशोपसद इति ॥ २ ॥

अथोपसदनन्तरमतिरात्रमनुष्ठाय तस्मिन् दिवसे सान्नाय्यार्थं वत्सानपाकृत्य श्वोभूते तेन यष्टव्यमित्याह।

यदहरतिरात्रो भवति तदहर्व्वत्सानपाकुर्व्वन्ति सꣳस्थितेतिरात्रे सान्नाय्येन यजन्ते ॥ ३ ॥

यदहर्यस्मिन्नहनि प्रायणीयोतिरात्रो भवति तस्मिन्नहनि सान्नाय्यार्थं वत्सानपाकुर्य्युः पश्चादस्तमयात् पूर्व्वं स्वकाले दोहयेयुर्दध्यर्थं पुनश्च रात्रौ वत्सानपाकृत्य श्वः संस्थितेतिरात्रे इष्ट्यन्तं प्रक्रम्य पात्रासादनप्रोक्षणानन्तरं प्रातर्होमं दोहयेयुरित्यर्थः प्रकृतौ तु दर्शे पुरोडाशसद्भावात् कपालोपधानानन्तरं प्रातर्होमः अत्र द्राह्यायणः पुरा रात्रेः सायं दोहं दोहयेरन् संस्थितेतिरात्रे प्रातर्दोहमिति अतिरात्रसमाप्त्यनन्तरं तत्रैव देशे सान्नाय्येन यजेरन् ॥ ३ ॥

अथ सान्नाय्यानुष्ठानानन्तरमुपरिभूतानुष्ठानाय गार्हपत्याहवनीययोर्निर्म्माणप्रकारमाह।

सान्नाय्येनेष्ट्वाध्वर्य्युः शम्यां परास्यति सा यत्र निपतति

तद्गार्हपत्यस्ततः षट्त्रिंशतं प्रक्रमान् प्रक्रामति तदाहवनीयः ॥ ४ ॥

साम्नाय्ययागानन्तरं तस्मिन्नेवाहनि आहवनीयसमीपेऽध्वर्य्युस्थितः प्राङ्मुखः शम्यां परास्यति स्वशक्त्या सा शम्या यत्र निपतति तत्र गार्हपत्यः कर्त्तव्यः ततोऽध्वर्य्युः षट्त्रिंशत् प्रक्रमान् प्रक्रामति तत्राहवनीय औत्तरवेदिकः अत्र द्राह्यायणः साम्नाय्येनेष्ट्वाध्वर्य्युः शम्यां परास्यतीत्याहवनीयन्यन्तेन तिष्ठन् प्राङ्मुखो नित्यमिष्टिसंस्थासु प्रास्येदिति आहवनीयन्यन्तेनेत्यतः पूर्व्वं ब्राह्मणप्रतीकोपादानं न्यन्तेन समीप इत्यर्थः ॥ ४ ॥

अथ सदः प्रभृतीनां निर्म्माणप्रकारमाह।

चक्रीवत् सदश्चक्रीवद्धविर्द्धानं चक्रीवदाग्नीध्रमुलूखलवुध्नो यूपः प्रकृष्य उपोप्य एव नोपरवान् खनन्ति ॥ ५ ॥

चक्रीवत् चक्री चक्रं अक्षुत्रचक्र्योरित्यादौ तथा दर्शनात् सद आदिकं चक्रं चतुःफलकादिनिर्म्मितं कार्य्यमिति केचित् अपरे तु चक्री रथः शकटो वा तद्युक्तं सद आदि आदिकार्य्यमिति प्रथमनिर्म्मितैरेव सदःप्रभृतिभिरत्रोत्थानमनुष्ठानादुपर्य्यतिदेशप्रायणाय सदआदिषु पृथक् पृथक् रथो वा नौवा सम्पादयेयुरित्यर्थः अत्रानुक्तयोरपि पत्नीशालाशामित्रयोश्चक्रीवतोर्निर्म्माणमाह सूत्रकारः तथापि पत्नीशाला स्याच्छामित्रञ्चेति एतेषां प्रायणे विशेषं सूत्रकारश्चाह समश्चेद्भूमिभागः स्यादनुपूर्व्वं विषमे वेदेः पांसून् हरेयुस्तथोत्तरवेदेर्द्धिष्ण्येभ्यश्च तान्निविश्य यथायतनं निद

पेयुरिति पुरोदेशोयदि समः स्यात्तदा सद आदिकं यथा संस्थान-मेवोपेयुर्व्विषमदेशश्चेत् तदानीं शकटगमनयोग्येन प्रदेशेन पृष्ठतः पृष्ठतोनयेयुरित्यर्थः ततः सदः प्रभृतिषु स्थापितेषु यथायतनं पूर्व्व-मानीतान् पांशून् निवपेयुः न तत्र मन्त्रपूर्वकं वेद्यादेः करण-मस्ति तथा यूपोपि उलूखलबुध्नः उलूखलस्य मूलभागो यथास्थ-विष्ठस्तथैव कर्त्तव्यः सएव प्रकृष्य पुरोदेशं प्रति भूम्यामेवाकर्ष-णीयः नतूपरि धारणीयः सच वेदिदेशे उपोप्तएव पांशुभिः परितः प्रच्छाद्य एव नतु खातयीत तथा उपरवान् अधिषवण-फलकयोरधस्तात् न खनेयुः किन्तु रेखाएव कुर्य्युः अत्र सूत्रं उलूखलबुध्नोयूप इति पृथुबुध्नः स्यात् प्रकृष्य इति तं पूर्व्वं कर्षेयुरेवानुद्यच्छन्त उपोप्तएवेत्यनिखातस्तिष्ठेत् पांसुभिः पर्य्युप्तो नोपरवान् खनन्तोत्यधिषवणफलकयोरधस्तादुपरवानमखन्मा-स्तेषां प्रतिषेध आलिखेयुरिति ॥ ५ ॥

अथ सान्नाय्येनैव स शुक्लपक्षे समापनीय इत्याह।

ते तमापूर्य्यमाणमामावास्ये नयन्ति ॥ ६ ॥

ऐन्द्रेण माहेन्द्रेण वा प्रत्यहं यजमानाः सान्नाय्येन यजन्ती-त्यर्थः ॥ ६ ॥

अथ तदनन्तरभाविपूर्णिमायामनुष्ठेयं विदधाति।

तेषां पौर्णमास्यां गोष्टोमस्तोमो भवत्युक्थ्यो बृहत् सामा ॥ ७ ॥

तेषां सान्नाय्येन यजतां पौर्णमास्यां गोष्टोमेन स्तोममुक्थ-

संस्थो बृहत्सामा बृहत्पृष्ठः ऐकाहिकः कर्त्तव्य इति क्वचिदाचक्षते कुतोलक्षणस्वीकरणमिति तदाहुः यस्मात् संस्थिते गोष्टोमे पौर्णमासमिति हि संस्थानान्ताद्विदधाति गोष्टोमसमाप्तिदिवस एव पौर्णमासं कर्त्तव्यतां विदधाति तत्र आमावास्यं कर्म्म कृत्वा पूर्य्यमाणपक्षस्यनुष्ठितः स्यात् पौर्णमास्यं तदनुष्ठानमिति सूत्रकारस्तु पौर्णमास्यामेव गोष्टोमः कर्त्तव्यः कुतस्तेषां पौर्णमास्यां गोष्टोमस्तोमो भवतीति मुख्यपौर्णमासीश्रवणात् अतःसंस्थित गोष्टोम इति वचनेन पौर्व्वापर्य्यत्वं चोद्यते नतु तस्मिन्नेवाहनि कर्त्तव्यतां ब्रूते तत्र पौर्व्वापर्य्यं पौर्णमास्यां गोष्टोमे प्रतिपदि पौर्णमासोपक्रमोपि नविरुध्यते तथापूर्य्यमाणमिति वचनमपि भूयोभिप्रायिकमिति अयज्ञायस्तेषाममावास्यायामायुष्टोममित्यत्रापि समानः अत्र तेषां पौर्णमास्यां गोष्टोमस्तोमो भवतीति यजनीये हनि स्यादित्याचार्य्या इत्यादिकं सूत्रं द्रष्टव्यं ॥ ७ ॥

अथ गोष्टोमानन्तरं यदनुष्ठेयन्तद्विदधाति ।

सꣳस्थिते गोष्टोमे पौर्णमासन्निर्व्वपन्ते तेनमपक्षीयमाणं पौर्णमासेन यन्ति तेषाममावास्यायामायुष्टोमः स्तोमो भवत्युक्थ्योरथन्तरसामा ॥ ८ ॥

आयुष्टोमे यथैकाहिका सिद्धमन्यत् । अत्रेष्ट्ययनेषु विनान्वाधानं पत्नीसंयाजान्तं तन्त्रं ॥ ८ ॥

उक्त्याहःसाध्यस्यास्य सत्रस्य नाम प्रदर्शयति ।

मित्रावरुणयोरयनं ॥ ९ ॥

स्पष्टं ॥ ८ ॥

एतत् सत्रम्मित्रावरुणसम्बन्धप्रदर्शनद्वारा प्रदर्शयति।

एतेन वै मित्रावरुणाविमान् लोकानाजयतामहोरात्रौ वै मित्रावरुणावहर्म्मित्रोरात्रिर्व्वरुणोऽर्द्धमासौ वै मित्रावरुणौ य आपूर्य्यते समित्रो योपक्षीयते सवरुणः सएष मित्रो वरुणोरेतः सिञ्चति ॥ १० ॥

मित्रोऽहःशुक्लपक्षयोः अभिमानी देवोरात्रिः कृष्णपक्षयोरभिमानीवरुणे रेतः स्वसामर्थ्यं सिञ्चति शिष्टमुक्तप्रायं ॥ १० ॥

अथ बृहतीप्रशंसनद्वारेण सरस्वत्याः नुब्जत्वं प्रशंसति।

सरस्वत्या वै देवा आदित्यमस्तम्भ्नवन् सा नायच्छत् साभ्यवॢीयत तस्मात् सा नुब्जिमती वतं बृहत्यास्तम्भुवन् सायच्छत्तस्माद्बृहती छन्दसां वीर्य्यवत्तमादित्यꣳह्यि तयास्तम्भुवन् ॥ ११ ॥

पूर्वं भूम्यां वर्त्तमानमादित्यं द्युलोके निधाय सरस्वत्या अस्तम्भुवन् स्तम्भितुमैच्छत् सा नायच्छत् नियन्तुं नाशक्नोत् किन्तु अभ्यवॢीयत शिथिलाभूत् तस्मात्सारस्वती नुब्जिका वक्रोपिताभूत् तं बृहत्या स्तुम्भुवन्नित्यादिस्पष्टं ॥ ११ ॥

अथान्यं विशेषमाह।

प्रतीपं यन्ति नद्यन्वीपमष्ट वै पूर्व्वेण पत्तमा यन्ति ॥ १२ ॥

प्रत्यङ्मुखी खलु सरस्वती प्रवहति अतस्तद्दक्षिणे कूले प्रतीपं प्रतिलोमं प्राञ्चोयन्ति ॥ १२ ॥

तदेव व्यतिरेकासम्भवेन द्रढयति।

तद्धि प्रत्येकाप्येति ॥ १३ ॥

तद्धि पूर्वं पत्तं प्रति तस्यान्ते एका नदी सरस्वतीमप्येति एकेत्युक्तं ॥ १३ ॥

सा विशेष्यते।

दृषद्वत्येव ॥ १४ ॥

सरस्वत्या विनशनादारभ्य प्लक्षः प्रास्रवणपर्य्यन्तोनुष्ठानोदेशः तस्याद्धप्रदेशदेशेपि दृषद्वत्या अप्ययः तावत्पर्य्यन्तं पूर्व्वेण पत्तमा, यस्यानुतिष्ठन् गच्छेयुरित्यर्थः ॥ १४ ॥

तदप्यये कर्त्तव्यमाह।

दृषद्वत्या अप्ययेऽपोनप्त्रीयञ्चरुन्निरूप्याथातियन्ति ॥ १५ ॥

तत्सङ्गमप्रदेशे अपोदेवताकं चरुं जलातिक्रमदोषपरिहारार्थं निरूप्य पश्चादतिक्रम्य यन्ति अत्र सूत्रं दृषद्वत्या अप्यये-

पोनप्त्रीयामिष्टिन्निर्वपेरन्यदि सोदका स्यादप्यनुदकायामिति धानञ्जप्यः ॥ १५ ॥

अथ विनशनादारभ्य प्लक्षं प्रास्रवणपर्यन्तानुष्ठानं प्रशंसति।

चतुश्चत्वारिंशदाश्वीनानि सरस्वत्या विनशनात् प्लक्षः प्रास्रवणस्तावदितः स्वर्गो लोकः सरस्वती सम्मितेनाध्वना स्वर्गं लोकं यन्ति ॥ १६ ॥

सरस्वतीविनशनप्रदेशादारभ्य गतां चतुश्चत्वारिंशदाश्वीनः प्रमाणप्लक्षः प्रास्रवणः एकोप्यश्व एकेनाहोरात्रेण यावन्तमध्वानं गच्छति तावानेकाश्वीनः तथाविधचत्वारिंशदाश्वीनैर्य्यावानध्वा भवति प्लक्षप्रस्रवणो भवति आश्वीन इत्यस्यैकाहगताश्वीनेवाइतः स्वर्गोलोक इत्युक्तं नैष दोषः सहस्राश्विनोस्यान्तर्भावात् ॥ १६ ॥

अथास्मात् सत्रादुत्थानं चतुर्विधन्तत्रैकमुत्थानं विवक्षुराह।

एतेन वै नमी साप्योवैदेहोराजाञ्जसा स्वर्गं लोकमैदञ्जसागामेति तदञ्जस्कीयानामञ्जस्कीयत्वं ॥ १७ ॥

पूर्वमेतेन सत्रेण सप्यपुत्रोवैदेहोविदेहदेशाधिपतिर्न्नमीनाम राजा अञ्जसा शीघ्रं स्वर्गं लोकमैत् तस्मादयमपि स्वर्गमञ्जसा आगमेमेति ब्रूवन् तत् तस्मादञ्जस्कीयानां सारस्वतसत्रावयवभूतानामञ्जस्कीयत्वं ॥ १७ ॥

अथ साप्यस्य सत्रोत्थानविधिं दर्शयति।

स एतदवभृथमभ्यवैद्य एष उत्तरेण स्थूनाम्भँ ह्रद-स्तद्वास्य शतङ्गावः सहस्रँ सम्पेदुः ॥ १८ ॥

स नमी एतत् एतस्मादवभृथमभ्यवैदेवागच्छत् एतच्छब्दोक्तं विवृणोति य एष प्रसिद्धः सरस्वत्या उत्तरेण स्थूलाम्भन्देशमतुलो ह्रदोवर्त्तते तस्मिन्नित्यर्थः कुतस्तस्मिन्नेव नमी प्राप्नवानिति तदुच्यते तत्रा अस्मिन् हि शतसंख्याकागावो ब्राह्मणभोजनाद्यर्थमानीताः अपत्योत्पादनद्वारा सहस्रं सम्पेदुः सम्पन्ना अभवन् ॥ १८ ॥

तदुत्थानमाह।

शते गोषृषभमप्यृजन्ति ता यदा सहस्रँ सम्पद्यन्तेथोत्थानं ॥ १९ ॥

ये शते गोषु शतं वत्सतरीषु गवां प्रजननार्थं वृषभमप्युत्सृजन्ति अतिसृजन्ति स्पष्टमन्यत् अत्रोत्थाने सूत्रकारः किञ्चिद्विशेषमाह शते गोष्वृषभमप्युत्सृजन्तीति वत्सतरीशते गर्भिणीषु ता यत्र गव्यमभयं स्यात्तत्र रक्षेयुः पुङ्गवैस्तासां भुञ्जीरन् सर्पिषा च तासु सहस्रं सम्पन्नासु पूर्व्वपक्षे गामतिरात्रं कृत्वा दत्वा उत्तिष्ठेयुरिति पुङ्गवैर्भोगः स्वोपकरणवाहनादिद्वारकं ॥ १९ ॥

अथ द्वितीयमुत्थानं दर्शयति।

यदा सर्व्वज्यानिं जीयन्तेथोत्थानं यदा गृहपतिर्म्रियतेथोत्थानं ॥ २० ॥

सर्व्वज्यानिः सर्वहानिः ॥ २० ॥

अथ तृतीयमुत्थानं दर्शयति ।

यदा प्लक्षं प्रास्रवणमागच्छन्त्यथोत्थानं ॥ २१ ॥

यत्र प्लक्षं प्रास्रवणं तद्धि सरस्वत्या उत्पत्तिस्थानन्तदागत्य पूर्व्वोक्तनिमित्ताभावेपि सत्रादुत्तिष्ठेयुः ॥ २१ ॥

अस्मिन्नुत्थानेनुष्ठेये विशेषमाह ।

प्लक्षं प्रास्रवणमागम्याग्नये कामायेष्टिं निर्व्वपन्ते तस्यामश्वाञ्च पुरुषीञ्च धेनुके दत्वा ॥ २२ ॥

तं समागम्यातिरात्रात् पूर्व्वमग्नये कामायेष्टिः कर्त्तव्येत्येके अतिरात्रात्परमन्ये पुरुषी दासी धेनुके नवप्रसूतिके सवत्से इत्यर्थः तथा च सूत्रं यदा प्लक्षं प्रास्रवणमागच्छन्त्यथोत्थानमिति तदा प्रास्येयुरिति धानञ्जप्यः प्लक्षं प्रास्रवणं प्राप्य पुरस्तादतिरात्रस्याग्नये कामायेष्टिः स्यादिति शाण्डिल्यः उपरिष्टादिति धानञ्जप्यस्तस्या मश्वाञ्च पुरुषीञ्च धेनुके यज्ञोपकरणशेषांश्चाभिरूपायान्यस्मै दद्युः स्वामिनो हि सर्व्वे सत्रेषु तेषां प्रतिग्रहणन्न विद्यत उक्तोऽवभृथो ब्राह्मणेनापृष्टशमनीयमेतदिति ॥ २२ ॥

अथावभृथे शेषमाह ।

कारपचवं प्रति यमुनामवभृथमभ्यवयन्ति ॥ २३ ॥

कारपचवोजनपदविशेषः तन्मध्ये यमुना गच्छति तां प्राप्य

तत्रावभृथन्न कुर्य्युः कदाचिदपि सरस्वत्यामवभृथोन कर्त्तव्यः तथा च सूत्रकारः न सक्तञ्चन सरस्वत्यामवभृथमभ्यवेयुर्द्देवयजनभूता ह्येषा भवत्यविद्यमाने सरस्वत्या एवो द्धारं पार्श्वतस्त्विति अविद्यमाने सरस्वतीप्रान्ते नद्याद्यसम्भवे सरस्वत्या एव जलमुद्धृत्यावभृथार्थं उद्धृत्यापि जलं पार्श्वत एवावभृथः कर्त्तव्यः न तत्रेत्यर्थः ॥ २३ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथैन्द्राग्न्योरयनाख्यं प्रजापतिभवनसाधनं सारस्वतं द्वितीयं सत्रमाह ।

अतिरात्रस्त्रिवृत्पञ्चदशमिन्द्राग्नयोरयनं गोआयुषी इन्द्रकुक्षी अतिरात्रः ॥ १ ॥

प्रायणीयोतिरात्रः प्रथममहः अथ त्रिवृत् पञ्चदशौ व्यत्यासेन पक्षद्वयेप्यनुष्ठातव्यौ तदिन्द्राग्न्योरयनं अत्र गोआयषी पक्षयोरन्ते इत्यज्ञा क्रमइति केचित् अपरे तु पक्षयोस्त्रिवृत्पञ्चदशयोः व्यत्यासः त्रिवृत्पक्षान्ते गोष्टोमः पञ्चदशपक्षान्ते आयुष्टोम इत्याहुः चतुर्व्विधोत्थानमप्यत्रापि पूर्व्ववदेव ॥ १ ॥

अथास्य फलं सम्प्ररोचनमाह ।

एतेन वा इन्द्राग्नी अत्यन्यादेवता अभवतामत्यन्या प्रजा भवन्ति य एतदुपयन्ति ॥ २ ॥

सिद्धमिदं ॥ २ ॥

अथ कर्त्तृद्वारा प्रशंसति ।

इन्द्राग्नी वै देवानामोजिष्ठा ओजिष्ठा भवन्ति य ए[redacted]दुपयन्ति ॥ ३ ॥

गतमिदं ॥ ३ ॥

अथ विहितक्रमेणैवानुष्ठेयं प्रशंसति ।

अथ यत् त्रिवृत्पञ्चदशमिद्राग्नयोरयनं गोआयुषी इन्द्रकुक्षी भवतोसंव्याथाय ॥ ४ ॥

असंव्याथाय दार्ढ्यायेत्यर्थः केवलं त्रिवृत्पञ्चदशाभ्यामेव सत्रसमापने अदार्ढ्यः स्यात् अतस्तत्परिहाराय गोआयुषी भवतः ताभ्यां वै कथं दृढ़त्वमिति तदुच्यते गोआयुषी ऐकाहिके गौरीवितस्वरे इति कल्पकारेणोक्तत्वादैकाहिके अतस्तत्र त्रिवृदादीनाञ्चतुर्णामनुष्ठानसम्भवादसम्बाधत्वं अत्र सत्रान्तविषये सूत्रं एतेनैवोत्तरे व्याख्याते तत्राग्नये कामायेष्टिरपोनप्त्रीयश्च स्रुवहोमौ स्यातामिष्टिरेवाग्नये कामायोपरिष्टाच्चेदतिरात्रश्चेति शाण्डिल्यः अनयोः सारस्वतयोः पूर्व्ववदित्ययनाभावादन्तिमातिरात्रमध्य-

एवोक्तेष्टिविधानमिति सूत्रकारमते अग्नये कामाय स्वाहा अपान्नप्त्रे स्वाहेति स्रुवेणैवापरहोमा नलिप्सितत्वमस्ति अन्यथा सुत्याव्यवधानां स्यादतिरात्रात्परमिति शाण्डिल्यपक्षे इष्टिरेव कर्त्तव्या पुनः सुत्याभावादिति सूत्रार्थः त्रिवृत्पञ्चदशयोः पक्षयोर्व्यत्यासवतोरेवमङ्गां व्यत्यास इति पक्षावुक्तौ तत्र सूत्रकारः पर्वणोरिन्द्रकुक्षी पूर्वस्याग्निष्टोमौ त्रिवृतौ राथन्तरबार्हते पूर्वपक्ष उक्थे पञ्चदशे राथन्तरबार्हते अपरपक्ष इति गौतमस्तेन पक्षयोः सञ्चारयेत्सर्वत्र त्वेव त्रिवृत्पञ्चदशे व्यत्यासं स्यातां तयोर्य्यस्मिन्ननुपेते पर्व्वा गच्छेत्तेनोत्तरं पक्षमुपक्रमेतैतेनोक्तमुत्तरस्य विकद्रुकेष्विति गोआयुषोविश्वजिदभिजितोरिन्द्रस्य कुक्षिस्थानीयत्वादिन्द्रकुक्षी इति नामधेयं तावनयोः सारस्वतयोः क्रमेण पर्वणोर्भवतः उत्तरस्मिन् सारस्वते तु व्यत्यासे पौर्णमास्यामभिजिदमावास्यायां विश्वजिदिति क्रमः अथ गौतमस्य पक्षव्यत्यासं दर्शयति द्वयोः पूर्व्वस्य सत्रस्य पूर्व्वपक्षे सर्व्वत्र त्रिवृदग्निष्टोमएव कार्य्यः अपरपक्षे पञ्चदश उक्थ्य इति ब्राह्मणार्थः तत्र राथन्तरं प्रथममहः द्वितीयन्तमिति व्यत्यासमजामितार्थं तेन पक्षयोः सञ्चारयेदित्यस्यायमर्थः त्रिवृत्पञ्चदशेन कदाचिदपि पक्षयोः सञ्चारयेत् तत्र नियतावेव भवतामित्यर्थः अथ पूर्वस्मिन् पक्षे दर्शपौर्णमासयॊ निपतेत् तद्वदत्रापि त्रिवृतं पञ्चदशाविति गौतमः अथ स्वमतमाह सर्वत्र त्वित्यादिना तस्यायमर्थः यथा पूर्वपक्षमुभावपि साम्येन व्यत्यसेदिति यदा वृद्धिक्षयवत् स्यादेकस्मिन् पक्षे समप्रयोगेन सिध्यति तदा कथमित्याह तयोर्य्यस्मिन्ननुपेते इत्यादिनानयोरेव व्यत्यासकरणे यस्मिन्ननुष्ठिते पर्वागच्छेत् तत्रेन्द्रकुक्षिं कृत्वा तदनन्तरं

पूर्वमहः तमुपक्रमेत न पुनः प्रथमप्रवृत्तेरिति अयं न्याय्यः उत्तरत्रिकद्रुकेष्वपि समानः अथ द्वितीयस्य सारस्वतस्य षोड़शिमन्तावतिरात्रौ द्वतिवातवतोरयनेन क्लृप्ते त्रिवृतं पञ्चदशे अग्निष्टोमस्त्रिवृदुक्थ्यं पञ्चदशं राथन्तरं त्रिवृद्वार्हतं पञ्चदशं ऐकाहिके गोआयुषी इत्यादि मशककल्पोद्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथार्य्यम्नोरयनाख्यं स्वर्गसाधनं तृतीयं सारस्वतं सत्रमाह ।

अतिरात्रोज्योतिर्गौरायुस्त्र्यहोविश्वजिदभिजिताविन्द्रकुक्षी अतिरात्रः ॥ १ ॥

अमावास्यायामुपक्रम्य आपरिसमाप्तेः ज्योतिर्गौरायुरिति त्र्यहः एवानुष्ठेयः पश्चाद्विश्वजिदभिजितातिरात्र इति केचित् सूत्रकारमतन्तु पर्वणोरेवाभिजित्पश्चाद्विश्वजिदमिन्द्ररूपे ते पर्वागच्छेदित्यादिकं पूर्वमेव प्रदर्शितं अत्र तृतीयस्य सारस्वतस्य षोडशिमन्तावतिरात्रावैकाहिकास्त्रिकद्रुकाः विश्वजिदभिजितौ वा गौरोवितः स्वरा इत्यादिकः कल्पोद्रष्टव्यः ॥ १ ॥

अथ विहितसत्रस्य स्वर्गसाधनत्वं वक्तुमर्थमणोऽनेन स्वर्गप्राप्तिं दर्शयति ।

एतेन वार्य्यमैतं लोकमजयत् ॥ २ ॥

स्पष्टं ॥ २ ॥

एतेनेत्युक्तं विवृणोति ॥

यमाहुरर्य्यम्नः पन्था इत्येषवाव देवयानः पन्थाः ॥ ३ ॥

यदि अर्य्यम्न आदित्यमूर्त्तिभेदस्य पन्था अयमित्याहुः स एष एव खलु देवयानः पन्थाः ॥ ३ ॥

अस्त्वेवं किन्ततो भवतीत्याह ।

प्रदेवयानं पन्थानमाप्नुवन्ति य एतदुपयन्ति ॥ ४ ॥

पष्टं ॥ ४ ॥

अनेन देवयानप्राप्तिं प्रत्यक्षदर्शनेन साधयति ।

तस्माद्देषोरुणतम इव दिव उपदृहशेरुणतमइव हि पन्थाः ॥ ५ ॥

देवयानमार्गस्यार्च्चिरादिरूपत्वात्तेन गतोऽर्य्यमा अरुणतमोदिवि दृश्यते प्रातःकालीनआदित्योऽर्य्यमा सोऽरुणतमो भवति ॥ ५ ॥

अत्र विहितान्यहान्यनूद्य प्रशंसति ।

अथ यत् ज्योतिर्गौरायुस्त्र्यहो विश्वजिदभिजिताविन्द्रकुक्षी भवतीसंख्याथाय ॥ ६ ॥

सिद्धमिदं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
द्वादशः खण्डः।

अथ त्रयोदशः खण्डः।

उक्तानि त्रीणि सारस्वतानि अथ दार्षद्वतमिष्ययनमेकयजमानकं विवक्षुराह।

संवत्सरं ब्राह्मणस्य गारक्षेत् संवत्सरं व्यर्णैनतन्श्ववेग्निमिन्धीत संवत्सरे परीणह्यग्नीनादधीत ॥ १ ॥

अस्योत्तरस्य चेष्टयनयोः साधारणं नियममाह सूत्रकारः दार्षद्वततौरयोः व्रतानि तिष्ठेद्दिवासीत नक्तं हविरुच्छिष्टभोजी-स्यादधः सम्बिश्य मांसाश्यलवणाशी न स्त्रियमुपेयाद्यथा प्रकृत्याहिताग्निवृत्तिं वर्त्तयेदिति एवं सामान्य नियमोपेतः संवत्सरं ब्राह्मणस्य श्रुताध्ययनसम्पन्नस्य ऋत्विजः आचार्य्यस्य वा प्रायश्चित्तार्थं गारक्षेत् दार्षद्वते संवत्सरं ब्राह्मणस्य गारक्षेत् ऋत्विज आचार्य्यस्य वेति द्राह्यायणः तदनन्तरमेकसंवत्सरं स-

रस्वत्यास्तीरे नैतन्ध्वे नानापुराणि ग्रामाः सन्ति तेषु मध्ये व्यर्णे नैतन्ध्वे एकाग्नेरौपासनस्य परिचर्य्यया संवत्सरमग्निं परिचरेत् पूर्व्वमाहिताग्निश्चेत् अग्निहोत्रेण परिचरेत् ततः संवत्सरादूर्द्धं परीणं नाम स्थली कुरुक्षेत्रे तस्यामग्नीनादध्यात् आधाय च यथाकालमन्वारम्भणीयेष्ट्वा दर्शपूर्णमासावकृत्वैव दार्षद्वतं कर्त्तुं तत् स्थानं विसृजेदिति केचिद्दर्शपूर्णमासाभ्यामिवेष्ट्वेत्यपरे दार्षद्वतानङ्गत्वेपि तयोर्नित्यत्वादिति तेषामभिप्रायः पक्षद्वयेपि दार्षद्वतार्थंगमनमाहितानग्नीन् परिगृह्यैव कुर्य्यात् पूर्व्वमेवाहिताग्निश्चेत्तदुक्तपक्षत्रानुतिष्ठेत् किन्तु तदानीं तानेवाग्नीन् इष्टार्थं परिगृह्यानीयाग्निहोत्रमेव गृहीत्वा गच्छेत् ॥ १ ॥

इदानीमिष्ट्ययनोपक्रमं दर्शयति ।

स दक्षिणेन तीरेण दृषद्वत्या आग्नेयेनाष्टाकपालेन शम्यापरासीयात् ॥ २ ॥

सरस्वतीदृषद्वत्योः संभेदं दृषद्वतीदक्षिणेन तीरेणोपक्रम्याष्टाकपालद्रव्येणाग्निदेवताकेनेष्ट्वा तत्प्रभृति षट्त्रिंशत् प्रक्रमवर्ज्जं शम्यापरासे प्रासन् तत्र तत्रेष्टिं कुर्व्वन्नेव सारस्वतवद्गच्छेत् ॥ २ ॥

कुरुक्षेत्रस्य देवयजनत्वं प्रतिपादयितुमाख्यायिकामाह ।

इन्द्रश्च रुशमा चाऽऽशं प्रास्येतां यतरोनौ पूर्वो भूमिं पर्य्येति स जयतीति भूमिमिन्द्रः पर्य्यैत् कुरुक्षेत्रᳪ रुशमा साब्रवीदजैषन्त्वे त्यहमेव त्वामजैषमितीन्द्रोब्रवीत्तौ देवेषु-

पृच्छेतां ते देवा अब्रुवन्नेतावती वाव प्रजापतेर्व्वेदिर्य्या-
वत् कुरुक्षेत्रमिति तौ न व्यजयेतां ॥ ३ ॥

पूर्व्वं इन्द्रश्च रुशमा च ब्रह्मवादिनौ कृत्स्नाभूमिपरिभ्रमणस्य शीघ्रकरणार्थमग्रं पणं प्रास्येतां प्रक्षिपतां जयप्रकारमुच्यते तावा-वयोर्म्मध्ये यतरः पूर्व्वभावी सन् भूमिं परिगच्छति स जयतीत्येवं समयमाभाष्येन्द्रो भूमिं पर्य्येत् रुशमा तु कुरुक्षेत्रं तौ तथा कृत्वा पुनरागत्य परस्परम्ममैव जयोममैव जय इत्यब्रूतां तौ विवदमानौ देवेष्वपृच्छेतां तौ देवा इदमब्रवीत् कुरुक्षेत्रमेव प्रजापतेर्व्वेदिः तत्रैव सर्व्वा भूमिः वसिता एतावती वै पृथीवी यावती वेदि-रिति श्रुतेरित्यभिप्रायः अतउभाभ्यामपि भूपरिगमनस्य समत्वा-दुभयोरपि जयः समान एवेति अतस्तौ नव्यजयेतां एतावता कुरुक्षेत्रमेव भूमेः प्रशस्ततरोदेवयजनप्रदेश इत्युक्तं भवति तस्मा-दुत्थानकालः ॥ ३ ॥

अवभृथस्नानमाह ।

स य आग्नेयेनाष्टाकपालेन दक्षिणेन तीरेण दृषद्वत्याः शम्यापरास्येति त्रिप्लक्षान् प्रति यमुनामवभृथमभ्यवैति तदेव मनुष्येभ्यस्तिरोभवति ॥ ४ ॥

यदुक्तप्रकारेणेति सः त्रिः प्लक्षात् जनपदं प्राप्य तत्रैव यमु-नायामभ्यवैति तत्रैव हि देशे दृषद्वती मनुष्येभ्यस्तिरोभूता बहूद-कापि सती तत्रैवान्तर्हिता भवतीत्यर्थः अत्र सूत्रं तत्र शम्याप्रासनं यथा सारस्वतेषु नतु प्रक्रमान् प्रक्रामेत् कामिष्टिमेकैकेनाङ्गा

संस्थापयेत् दृषद्वत्या दक्षिणेन तीरेणेयात्तस्याः प्रभव्यमम्बं प्राप्यैत-येष्ट्येष्ट्वा त्रिःप्लक्षावहरणं प्रति यमुनामवभृथमभ्यवेयाद्यत्र क्वच ततोदूरे यमुना स्यात्तत्रैतयेष्ट्येष्ट्वा स्वयं सामगायन्नवभृथमभ्यवे-यादगायन्वा प्रव्रजिष्यतोयनमिदमन्य इति धानञ्जप्यस्तदेव मनुष्येभ्यस्तिरोभवतीति नग्रामं पुनरेयादितीव स्वर्गलोकमाक्र-मते व्यावर्त्तते श्रेयान् भवतीति चोदकान्तर्द्धानाद्वा यथासरजस-इतीति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
त्रयोदशः खण्डः ॥

अथ चतुर्दशः खण्डः ।

अथ तुरायणनामिष्ट्ययनं सर्व्वर्द्धिसाधनं सत्रमाह ।

आग्नेयोष्टाकपाल ऐन्द्र एकादशकपालो वैश्वदेवश्च-रुः ॥ १ ॥

आग्नेयोऽष्टाकपाल इत्यादयस्तिस्र इष्टयोऽनमयनं क्रमेण ... सरपर्य्यन्तमहरहः कर्त्तव्यः एका च हविष्केष्टिरियं दर्शपूर्णमा-सवत् तथाच सूत्रं तत्र तिस्र इष्टयः पूर्व्वाह्ण एका पृथकच मध्य-न्दिनापराह्णयोस्तासु पृथगनुपूर्व्वं हवींषि यान्युक्तानि ब्राह्मणेनैका

वैव स्यात्तस्यां तानि सर्व्वाणि स्युः संवत्सरादूर्द्धमवभृथमभ्यवेयात्तत्र सामगानमिति तएवं सतः स्वयमेव कृष्णाजिनं प्रतिमुञ्चते ॥ १ ॥

तद्विधाय स्तौति।

अदीक्षितः कृष्णाजिनं प्रतिमुञ्चते यददीक्षितः कृष्णाजिनं प्रतिमुञ्चते या मानुष्यृद्धिस्तान्तेनर्द्धीति ॥ २ ॥

दीक्षानाम हि देवविशेषभावजन्मस्वीकारः अतस्तद्राहित्येन कृष्णाजिनप्रतिमोक्षात् मानुषीं ऋद्धिमाप्नोति तिष्ठेद्दिवारात्रावासीतेत्यादीष्ययनद्वयसाधारणं यत्तत्परः सूत्रकारेणोक्तं अस्माभिः पूर्व्वायणादावुदाहृतं ॥ २ ॥

तस्मिन्नवदनूद्य प्रशंसति।

अथ यत्तपस्तप्यते या दैवी तां तेन ॥ ३ ॥

तपसा देवभावप्रतिबन्धकपापक्षयाद्दैवीसमृद्धियुक्ता ॥ ३ ॥

अथ विहिता इष्टी क्रमेणानूद्य प्रशंसति।

यदाग्नेयोऽष्टाकपालो भवत्यग्निमुखा वै देवता मुखत एव तद्देवतारुन्द्धेऽथो प्रातःसवनमेव तेनाप्नोत्यथ यदैन्द्र-एकादशकपालो भवत्यैन्द्रं वै माध्यन्दिनꣳसवनम्माध्यन्दिनमेव सवनं तेनाप्नोत्यथ यद्वैश्वदेवश्चरुर्भवति वैश्वदेवं वै तृतीयसवनं तृतीयसवनमेव तेनाप्नोति ॥ ४ ॥

निगदसिद्धमेतत् ॥ ४ ॥

अथैतस्य प्रयोक्तृसम्बन्धप्रदर्शनद्वारेण फलं दर्शयति ।

एतेन वै तुरो देवमुनिः सर्व्वामृद्धिमार्ध्नोत्सर्व्वामृद्धि-मृध्नोति य एतदुपैति ॥ ५ ॥

स्पष्टं । अतसूत्रं संवत्सरमहरहस्तौरेण यजेत षष्ठ्याञ्चैत्रीपचस्य पञ्चम्यामिति गौतमो व्रतोपायनीयमोदनमशित्वा केशश्मश्रूणि वापयित्वाहतं वसनं परिधाय परिसमुह्याग्नीन् परिस्तीर्य्येत्यादि द्रष्टव्यं ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

अथ प्रतिष्ठासाधनं सर्पाणां सत्रमाह ।

अतिरात्रावभितोग्निष्टोमामध्ये सर्व्वो दशदशो संवत्स-रीद्वादशोविषुवान्सर्पसामानि विषुवति क्रियन्ते ॥ १ ॥

प्रायणीयोदयनीयौ सषोडशिकावतिरात्रावुभयतो भवतः मध्ये सर्व्वाण्यहानि अग्निष्टोमसंस्थानि अतिरात्रद्वयसहितः सर्व्वोपि

संवत्सरोदशस्तोमको भवति मध्यमन्तु विषुवदहोद्वादशस्तोमकः तत्र सर्पसामानि क्रियन्ते व्रतानि कल्पे निर्द्दिष्टानि अत्र द्वादशो विषुवानिति विषुवत्संकीर्त्तनादभिगरापगरयोश्च गवामयनं महाव्रतएव वर्त्तमानयोरिह विधानाद्गवामयनिकान्यहान्यग्निष्टोममात्रविकृतीनि दशस्तोममात्रविकृतीनि च लिङ्गादत्र भवितव्यानि तथाहि तत्रत्यं ब्राह्मणं अभिगरापगरौ भवतो निन्दत्येनान्यः प्रान्यः शंसतीति नैवं सूत्रकारेणैवमाशङ्क्य कल्पानुसारेणैव परिहृतत्वादाह सूत्रकारः सर्पसत्रङ्गवामयनं स्तोमसंस्थाविकृतं स्यादित्येके षण्डकुषण्डावभिगरापगराविति ह्याहेति प्रत्यक्षविहितं त्वार्षेयकल्पेन तत्रानुमानन्न विद्यतेऽभिगरापगरावेवोपोत्तमेहनि स्यातामिति अतः कल्पकारेणैकेनैव विराजा छन्देन पुनः पुनः अभ्यासेन सर्पसत्रस्य कल्पितत्वादभिगरापगरावप्युत्तमेहन्येव सर्व्वाण्यहानि तु विराजछन्देन सर्व्वोदशीति कल्पवचनात्तथैवानुष्ठेयानि अत्राश्वलायनः सर्पाणामयनङ्गो आयुषोदशीस्तोममनुलोमेन षण्मासान् प्रतिलोमेन षट्ज्योतिः द्वादशस्तोमोविसुवतस्थाने प्रकाशमापेयुरिति ॥ १ ॥

अथैतस्य फलं सप्ररोचनमाह।

एतेन वै सर्पाएषु लोकेषु प्रत्यतिष्ठन्नेषु लोकेषु प्रतितिष्ठन्ति यएतदुपयन्ति ॥ २ ॥

स्पष्टं ॥ २ ॥

अथास्य सर्पायणत्वमुपपादयितुं पूर्व्ववृत्तं सर्पाणां गृहपत्यादिविभागं तन्नामनिर्द्देशपुरःसरं दर्शयति।

अर्व्वरो गृहपतिर्धृतराष्ट्र ऐरावतो ब्रह्मा पृथुश्रवा-दौरे श्रवसउद्गाताग्लावश्चाजगावश्च प्रस्तोतृप्रतिहर्त्तारौ दत्तस्तापसोहोता शितिपृष्ठो मैत्रावरुणस्तक्षको वै शालेयो ब्राह्मणाच्छंसी शिखानुशिखौ नेष्टा पोतारावरुण आटो-च्छावाकस्तिमिर्घोदौरे श्रुतोऽग्नीत् कौतस्तावध्वर्य्यु अरिमेज-यश्च जनमेजयश्चार्व्वुदो ग्रावस्तुदजिरः सुब्रह्मण्यश्च कपि शंगावुन्नेतारौ षण्डकुषण्डावभिगरापगरौ ॥ ३ ॥

कौ तु स्तौ कुतस्तस्य पुत्रौ अध्वर्य्युप्रतिप्रस्थातारौ इत्यर्थः चक्रपिशङ्गावपि मिलित्वा उन्नेतृकार्य्यकर्त्तारौ अभिगरस्तिरप-गरो निन्दितारौ महाव्रते ब्राह्मणशूद्राभ्यां कर्त्तव्यौ तद्द्वाप्य-पोत्तमेहनि अभिगरापगरयोः कर्त्तारौ षण्डकुषण्डौ भवतः सत्रा-नमन्यत् । ३ ॥

अथ सर्परोचनानि फलान्तराण्याह ।

एतेन वै सर्पा अपमृत्युमजयन्नपमृत्युञ्जयन्ति यएतदुप-यन्ति तस्मात्ते हित्वा जीर्णान्तिचमतिसर्पन्त्यपहिते मृत्युम-जयन् सर्प्यावा आदित्या आदित्यानामिवेषां प्रकाशो भवति य एतदुपयन्ति ॥ ४ ॥

स्पष्टोऽर्थः अत्र सर्पसत्रस्य षोड़शिमतावतिरात्रौ जनुपेक्षर्घ योः

सफपौष्कले श्यावाश्वस्तस्य वै लोके गौरीवितं समानमितरं विराजा छन्देन सर्व्वोदशीत्येवमादिकः कल्पोद्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
पञ्चदशः खण्डः।

अथ षोडशः खण्डः।

अथ प्रजातिसाधनन्त्रिसंवत्सरं सत्रमाह।

गवामयनं प्रथमः संवत्सरोऽथादित्यानामथाङ्गिरसां ॥ १ ॥

स्पष्टं ॥ १ ॥

अथ क्रमेण विहितसंवत्सरत्रयं प्रशंसति।

एतेन वै गावः प्रजातिं भूमानमगच्छन्प्रजायन्ते बह्वो भवन्ति यएतदुपयन्त्येतेन वा आदित्या एषु लोकेषु प्रतितिष्ठन्ति य एतदुमयन्त्येतेनवा अङ्गिरसः स्वर्गं लोकमायन् स्वर्गं लोकं यन्ति य एतदुपयन्ति ॥ २ ॥

सर्व्वत्रैतेनेत्येतच्छब्देन स्वस्वसंवत्सरसत्रं परिगृह्यते तथानुष्ठायिनां फलत्रयसंकीर्त्तनमववुद्धानुवादः ॥ २ ॥

अथ मुख्य फलं सप्ररोचनमाह ।

परश्चाह्णारस्त्रसदस्युः पौरुकुत्सो वीतहव्य आयसः कक्षीवानौशिजस्त एतत्प्रजातिकामाः सत्रायणमुपायꣳस्ते सहस्रꣳ सहस्रं पुत्रानपुष्यन्नेवं वाव ते सहस्रꣳ सहस्रं पुत्रान् पुष्यन्ति य एतदुपयन्ति ॥ ३ ॥

अङ्गारस्य ऋषेरपत्यमाह्णारः स च परनामकः अयसः पुत्र आयसः देविकाशिंशुपेत्यादिना आत्वं उशिपुत्रः कक्षीवान् शिष्टं निगदसिद्धं अत्र कल्पः त्रिसंवत्सरस्य गवामयनेन न क्लृप्तः प्रथमः संवत्सरः आदित्यानामयनेन द्वितीयोऽङ्गिरसामयनेन तृतीय इति अत्र सूत्रकारः प्रथमोत्तमसंवत्सरयोर्व्यत्यासमाह पौर्णमासौ प्रसत्रं त्रिसंवत्सरन्तस्य याथाकामी दीक्षाणां पष्टिरिति शाण्डिल्यः प्रथमोत्तमौ संवत्सरौ व्यतिहरेदिति धानञ्जप्योऽभिप्लवस्तोमपृष्ठादेशरोहार्थइति दीक्षाणां याथाकाम्यं द्वादशदीक्षाप्रभृतीत्यर्थः अभिप्लवः स्तोमः पृष्ठादेशरोहार्थं इति व्यत्यासे प्रमाणद्वयोपन्यासः अभिप्लवस्य स्तोमोभिप्लवस्तोमः पृष्ठस्य स्थानं पृष्ठादेशः तयोरुभयोरपि रोहासिद्ध्यर्थमित्यर्थः तथा हि रोहो नाम कनीयसः स्तोमस्य प्रथमकरणं ज्यायसः पश्चात्करणं तद्विपरीतश्च प्रत्यवरोहः स च निन्दितः तथा हि तैत्तिरीयकं जामि वा एते कुर्वन्ति यज्ज्यायांसं स्तोममुपेत्य कनीयांसमुपयन्तीति अत्र व्यवहारे सति प्रथमोऽङ्गिरसामयने त्रिवृतोऽभिप्लवाः मध्यमे आदित्यानामयने त्रिवृत् पञ्चदशाः उत्तमे गवामयने सप्तदशादयोऽप्यभिप्लवेषु क्रियन्त

इत्येवं स्तोमरोहसिद्धिः तथा प्रथमेऽङ्गिरसामयने पुरस्तात् पृष्ठाः सामा भवन्ति आदित्यानामयने मध्यतः पृष्ठाः गवामयने उपरिष्टात् पृष्ठाइति पृष्ठादेशरोहः सिध्यति तथा निदानमपि अत्रैके गवामयनमन्तः कुर्वन्ति प्रजापतिसत्वात्देतेन वै गावः प्रजातिं भूमानमगच्छत् प्रजायन्ते वह्वो भवन्तीति स्तोमतस्वैवमयनानां रोहो भविष्यतीति ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य षोड़शः खण्डः ॥

अथ सप्तदशः खण्डः ।

अथ सर्व्वर्द्धिसाधनं प्रजापतेः सहस्रसंवत्सरसत्रमाह ।

अतिरात्रः सहस्रं त्रिवृतः संवत्सरा अतिरात्रः प्रजापतेः सहस्रसंवत्सरं ॥ १ ॥

स्पष्टं ॥ १ ॥

अथैतत् प्रसवसाधनत्वेन प्रशंसति ।

एतेन वै प्रजापतिः सर्व्वस्य प्रसवमगच्छत्सर्व्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति ॥ २ ॥

स्पष्टं ॥ २ ॥

पुनरपि जरानिवृत्तिसाधनत्वेन प्रशंसति ।

एतद्वै प्रजापतिर्ज्जीर्य्या मूरउपत्तेन जरामपाहतापजरां घ्नते य एतदुपयन्ति ॥ ३ ॥

जीर्य्या जरया मूरोमूढः प्रजापतिरेतत् सत्रमनुष्ठाय जराम-पहतवान् जरामपघ्नत इत्येतत्सम्बन्धः ॥ ३ ॥

पुनरनूद्यैतस्य सर्वसमृद्धिसाधनं दर्शयति ।

तदेतत्प्रजापतेः सहस्रसंवत्सरमेतेन वै प्रजापतिः सर्व्वामृद्धिमार्ध्नोत् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥ ४ ॥

स्पष्टं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

अथ विश्वाधिक्यसाधनं विश्वसृजामयनाख्यं सहस्रसंवत्सरं सत्रमाह ।

पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चाशत एकविꣳशा विश्वसृजाꣳ सहस्रसंवत्सरं ॥१॥

पञ्चसंख्याकाः पञ्चाशतः सपञ्चाशद्विशतसंवत्सरास्त्रिवृत्स्तोमकाः भवेयुः एवं पञ्चदशादिष्वपि द्रष्टव्यं मिलित्वैतद्विश्वसृजान्देवानां सहस्रसंवत्सरं सत्रं ॥ १ ॥

अथास्याधिकारिसिद्धये विश्वसृज्सम्बन्धं दर्शयति ।

एतेन वै विश्वसृज इदं विश्वमसृजन्त यद्विश्वमसृजन्त तस्माद्विश्वसृजः ॥ २ ॥

पूर्वं सृष्ट्यादौ सृष्टिकामा देवा एतत् सत्रमनुष्ठाय सत्यसंकल्पाः सन्तः इदं विश्वमसृजन्त एतेषां विश्वसृजइति संज्ञाप्येतन्निमित्ता ॥ २ ॥

इदानीन्तनानामप्येतत्सत्रयाजिनां फलं दर्शयति ।

विश्वमेनाननु प्रजायते यएतदुपयन्ति ॥ ३ ॥

एतदुपेयुषः एनान्विश्वञ्जगत् अनुप्रजायते एतदनुष्ठातृभ्यो- हीनमुपचीयमं जायते विश्वमपि एते विश्वस्य स्वामिनोभवन्तीत्यर्थः हीनइत्येनोः कर्म्मप्रवचनीयत्वं अत एनानिति द्वितीया एतेन वै विश्वसृज इत्युक्तं ॥ ३ ॥

के ते विश्वसृजः कथमेतदुपायन्निति तदुभयं दर्शयति ।

तपो गृहपतिर्ब्रह्म ब्रह्मेरापत्न्यमृतमुद्गाता भूतं प्रस्तोता भविष्यत्प्रतिहर्त्तार्त्तव उपगातार आर्त्तवाः सदस्याः सत्यꣳ होतर्त्तम्मैत्रावरुण उजोब्राह्मणाच्छꣳसी त्विषिश्चापचितिश्च नेष्टापोतारौ यशोऽच्छावाकोऽग्निरेवाग्नीध्रो ग्रावस्तुदूर्गुन्नेता वाक्सुब्रह्मण्यः प्राणोऽध्वर्युरपानः प्रतिप्रस्थाता दिष्टिर्विशास्तावर्त्तं ध्रुवगोपमाशा हविष्येष्यहोरात्राविड्मवाहौ मृत्युः शमितैते दीक्षन्ते ॥ ४ ॥

तपःप्रभृतिषु याः प्रसिद्धा देवतास्तास्तथैव गृह्यन्ते अप्रसिद्धास्तु तदभिमानिन्यो देवताः परिग्राह्याः एतासां विभज्य सर्वे विनियोगोऽस्माभिस्तैत्तिरीयब्राह्मणात् ऋचां प्राचीत्यस्मिन्ननुवाके प्रपञ्चितः आर्त्तवास्तदनुसम्बन्धिनः गोतो?णवर्णाभिमानिन इत्यर्थः दिष्टिर्ब्रह्मण आज्ञा शिष्टं निगदसिद्धं ॥ ४ ॥

उक्तसर्व्वाधिक्यफलसाधनत्वसमर्थनाय पूर्वं विश्वसृष्ट्यर्थं सत्रमुपेयुषां देवानां स्वयम्भूः ब्रह्माविरभूदित्यस्मिन्नर्थे पूर्वतनं श्लोकमुदाहरति ।

तदेषश्लोको विश्वसृजः प्रथमे सत्रमासत सहस्रसमं प्रसुतेन यन्तस्ते ह जज्ञे भुवनस्य गोपा हिरण्मयः शकुनो ब्रह्मनामेति ॥ ५ ॥

विश्वसृजो विश्वसृष्टिकर्त्तारस्तदर्थं प्रथमे सृष्टेः पूर्वभूताः सत्रमासत कथमिति तदुच्यते सहस्रसमं सहस्रसंवत्सरं प्रसुतेन

सोमाभिषवेण यन्तः सन्त आसत ते ह त एव हेति विनिग्रहा-र्थीयः एवकारसमानार्थः भुवनस्य गोपा कृत्स्नस्य भूतजातस्य पालयिता एतत् सृष्टिप्रलयस्याप्युपलक्षणं अनेन स्वरूपं लक्षितं भवति हिरण्मयः हिरण्मयः शरीरः हिरण्मयः पुरुषोदृश्यते हिरण्यश्मश्रुर्हिरण्यकेश इति हि श्रुत्यन्तरं शकुनः पक्षिरूपः अस्ति पक्षित्वेन श्रुतिषु सर्व्वत्र व्यपदेशः एकः सुपर्णः ससमुद्रं सुपर्णं विप्राः कवयः पुरः सपक्षीभूत्वेत्यादिषु ब्रह्मनाम ब्रह्मेति प्रसिद्धं यस्मि प्रादुरभूदिति सम्बन्धः ॥ ५ ॥

एतत् सत्रफलभूतं ब्रह्मणः साक्षात्कारं प्रतिपाद्येदानीन्त-नानुष्ठायिनामपि ब्रह्मणः सालोक्यादिफलं दर्शयति ।

ब्रह्मणः सलोकताᳬ सार्ष्टिताᳬ सायुज्यं गच्छन्ति य एतदुपयन्ति ॥ ६ ॥

सार्ष्टिः साम्यप्राप्तिः समानैश्वर्य्ययोग इत्यर्थः शिष्टं स्पष्टं अनेन प्रसङ्गात् अध्ययनादिप्रवर्त्तकानां श्रेयोनिमित्तं परदेवतास्मरण-मपि कृतं भवति ॥ ६ ॥

अथ सर्व्वाधिकलक्षणं फलं दर्शयति ।

तदेतद्विश्वसृजाᳬ सहस्रसंवत्सरमेतेन वै विश्वसृजः सर्व्वमसृजन्त यएतदुपयन्ति ॥ ७ ॥

एतन्निगदसिद्धं दृतिवातवतोरयनेन क्रमं विश्वसृजामयनं ज्योतिष्टोमेन वा विक्रमेन ज्योतिष्टोमेन वा यथा स्तोमक्रमेनेति कल्पो द्रष्टव्य इति अत्र विश्वसृजामपरिमितायुःसद्भावादधिकारः

इदानीन्तनानामपि कथमत्राधिकार इत्ययं विचारः षष्ठस्य सप्तमपादान्ते चिन्तितः सोऽत्र विरच्यते ।

सहस्रवत्सरं सत्रं गन्धर्वादेर्नृणामुत ।
रसायनेन सिद्धानां कुलकल्पोऽथ दीक्षितः ॥
तदायुर्वाथ सार्द्धद्विशतानामुत मासगाः ।
वत्सरोक्तिरुत द्वादशरात्रिषु दिनेषु वा ॥
आद्योदीर्घायुषः सत्रान् नृणामिवाग्निसम्भवे ।
द्वितीयोऽस्तु रसस्यायुर्हेतुत्वे तृतीयकः ॥
कृत्स्नकर्त्तुः फलित्वेऽस्तु तुर्य्योऽथासम्भवे सति ।
पञ्चमोऽस्तु चतुर्विंशत्युत्तमाः सत्रिणोयदि ॥
षष्ठोऽस्तु योमासएष संवत्सरइतीरणात् ।
सहस्रमासानाधानादूर्द्ध्वं वेदस्तु सप्तमः ॥
वत्सरप्रतिमा द्वादशरात्रय इति श्रुतेः ।
न रात्रिष्वब्दशब्दोऽत्र प्रतिमायाविशेषणात् ॥
स्वारस्यात्त्रिवृदा युक्तोऽष्टमः पक्षइष्यते ।
त्रिवृदादिपदैः स्तोमविशिष्टमहरुच्यते ॥
नाहःसङ्घस्ततोऽहःसु गौणी संवत्सराभिधा ।
तस्माद्विश्वसृजां सत्रे सहस्रदिनमिष्यते ॥

इदमाम्नायते पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चाशत एकविंशाविश्वसृजां सहस्रसंवत्सरसत्रे गन्धर्वादीनामेवाधिकारः तेषां दीर्घायुषः सद्भावादित्याद्यः पक्षः वसन्ते ब्राह्मणोऽग्निमादधीतेत्यादिविधानान्मनुष्याणामेवाहवनीयाद्यग्नयः सम्भवन्ति नान्येषां गन्धर्व्वादीना-

मिति चेत्तर्हि रसायनेन सिद्धानां दीर्घायुषां मनुष्याणामधिकार इत्यस्तु द्वितीयःपक्षः रसस्यारोग्यपुष्ट्यादिजनकत्वमेव नत्वायुष्यहेतुत्वमितिचेत् तर्ह्येकस्मिन् कुले समुत्पन्नानां पितृपुत्रपौत्रादीनां बहूनां सहस्रायुःसम्भवात् कुलाधिकारइति तृतीयः पक्षोस्तु क्रतुस्वकर्तुः फलं भवति न च पितृपुत्रपौत्रादिष्वेकोपि कृत्स्नं करोति तस्मान्नास्ति फलमिति चेत् तर्हि सत्रविधायकवचनबलादेव सत्रिणां दीर्घायुर्भविष्यतीति चतुर्थः पक्षोस्तु नह्यस्य वचनस्य सोर्थः सम्भवति तद्वाचकपदाभावात् नच कल्पयितुं शक्यते सम्भाविताणुष्काणामपि सत्रान्तरेषु प्रवृत्तानां दैवान्म्रियमाणानां तत्सत्रविधिबलादायुर्वृद्धादर्शनादिति चेत् तर्हि पञ्चपञ्चाशतइत्यस्य शब्दस्यपुरुषपरत्वमङ्गीकृत्य सार्द्धद्विशतानां पुरुषाणामधिकारेभिहिते वत्सरचतुष्टयेन सत्रस्य सहस्रसंवत्सरत्वं सम्पद्यत इति पञ्चमः पक्षोस्तु चतुर्व्विंशति परमाः सत्रमासोरन्निति वचनादभ्यधिकानां न तत्राधिकार इति चेत् तर्हि योमासः ससंवत्सर इति वचनात् संवत्सरशब्दस्य मासपरत्वे सति सहस्रमासं सत्रमित्येष षष्ठः पक्षोस्तु अष्टमे वत्सरे उपनीतो द्वादशवर्षाणि वेदमधीत्य विंशतिवर्षवयस्को विवाहं कृत्वा जातपुत्रोग्निमादधीत तस्मादाधानादूर्द्धमस्यायुषि न सन्ति सहस्रमासा इति चेत्तर्हि संवत्सरस्य प्रतिमा वै द्वादशरात्रय इति वचनात् संवत्सरशब्दोद्वादशरात्रिपरः तथा सति रात्रीणां द्वादशसहस्राणि सम्पद्यन्ते तासु च रात्रिषु षष्ट्युत्तरशतत्रयदिवसरूपसंवत्सरत्वेन गण्यमानासु त्रयस्त्रिंशत् संवत्सरेभ्य ऊर्द्धं मासचतुष्टयं भवति तावत्परिमितश्चायुराधानादूर्द्ध्वमपि सम्भवन्तीति सप्तमः पक्षोस्तु संवत्सरप्रतिमा वै

द्वादशरात्रय इत्यस्मिन्वाक्ये संवत्सरशब्दो न रात्रिपरः किन्तु तेन शब्देन प्रतिमा विशिष्यते तस्मान्न सप्तमः पक्षोयुक्त इति चेत् एवन्तर्हि संवत्सरशब्दोदिनपरइत्यष्टमः पक्षोस्तु तथा सति त्रिवृतः संवत्सरा इत्यादिवाक्यानां स्वारस्यं भवति त्रिवृत् पञ्चदशसप्तदशएकविंश इत्येते शब्दाः स्तोमवाचकाः सन्तः स्तोमयुक्तएकैकस्मिन्नहनि यागरूपे लक्षणया वर्त्तते सर्वेषु तथाविधप्रयोगबाहुल्यात्न त्वहःसङ्घे क्वचिदपि त्रिवृदादिशब्दाः प्रयुक्ताः तैश्च शब्दैः सामानाधिकरण्यात् संवत्सरशब्दः स्वावयवभूतेहनि अवयवलक्षणया वर्त्तते त्रिवृतः संवत्सराइत्युक्ते त्रिवृत्स्तोमकयागयुक्तान्यहानीत्युक्तं भवति तस्माद्विश्वसृजामृषीणामिदं सहस्रदिनमिति सिद्धान्तः।

मध्ये पृष्ठं पूर्व्वमुक्तं पञ्चविंशे ततः परं।
उक्तमङ्गिरसां सत्रं दृतिवातवतोस्ततः॥
तृतीयमयनं प्रोक्तञ्चतुर्थं कुण्डपायिनां।
तापश्चितं ततः प्रोक्तं ततो द्वादशवत्सरं॥
षट्त्रिंशद्वत्सरं प्रोक्तं शाक्यानामिह सप्तमं।
अष्टमं त्विह साध्यानां शतसंवत्सरं ततः॥
अग्नेः सहस्रसाव्यन्तु परं सारस्वतन्त्रयं।
दार्षद्वतं ततः प्रोक्तन्तुरायणमतः परं॥
एकैकोयजमानोऽत्र स्यादिष्टायनयोस्तयोः।
सर्पसत्रन्ततः प्रोक्तं ततस्त्र्यब्दं प्रकीर्त्तितं॥
द्वे सहस्रसमे पूर्व्वे तयोरुक्तं प्रजापतेः।
ततोविश्वसृजामुक्तमुक्तान्यष्टादशत्विह॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ७॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-
बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते
माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे
पञ्चविंशाध्यायस्य अष्टादशः खण्डः।

पञ्चविंशोऽध्यायः सम्पूर्णः।

सम्पूर्णश्च ग्रन्थः।

ताण्ड्यमहाब्राह्मणस्य सूची।

अथ चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्ड ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

इति एकादशः खण्डः।

अथ द्वादशः खण्डः।

इति द्वादशः खण्डः।

इति त्रयोदशाध्यायः।

चतुर्दशाध्याये।

अथ प्रथमः खण्डः।

७ अक्षरपंक्तिश्छन्दः सङ्कृतिः ।
८ तस्य विवरणं ।
९ तस्य तृचान्तरं ।
१० सच्छाया जगती सङ्कृतिः ।
११ सामान्तर विधानं ।
१२ ब्राह्मणातिदेशः ।
१३ प्रश्नहेतुत्वेन स्तुतिः ।
१४।१६ तृचान्तरे सामान्तरं ।
१५ सर्व्वकाम प्राप्तिहेतुता ।
१७ द्वादशाहस्य समृद्धरूपता ।
१८ निधनानुवादः ।
१९ निधन संख्यया स्तुतिः ।
२० ब्राह्मणातिदेशः ।
२१।२२ तृच साम विधानं ।
२३।२४।२५ स्तोतुः फल कथनं ।
२६ छन्दोद्वारा स्तुतिः ।
२७ तृचान्तरे सामान्तरं ।
२८ तस्य व्याख्यानं ।
२९ छान्दोम वेदन फलं ।
३० गायत्री स्तोत्रानुवादः ।
३१ स्तोत्रोपसंहारः ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ उक्थ स्तोत्रीय प्रथम तृचः ।
२ द्वितीयोक्थ स्तोत्रीय तृचः ।
३ अपभ्रंश परिहारः ।
४ तृतीयोक्थ स्तोत्रीय तृचः ।
५ प्रथमोक्थ साम ।
६ सर्व्वकाम प्राप्ति साधनता ।
७।९ द्वितीयोक्थ साम ।
८।१० तत् प्रशंसनं ।
११ स्तोम क्लृप्ति विधानं ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ अष्टमस्याह्नः स्तोम क्लृप्तिः ।
२।३ अष्टमाहः स्तुतिः ।
४ अह्नां यातयामत्वं ।
५ नवर्च्च त्रितय विधानं ।
६।७ नवसंख्यास्तुतिः ।
८ अष्टमाहः सङ्कृतिः ।
९ तृचत्रय विधानं ।
१० स्तोमविधान स्तुतिः ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

५ स्वर्ग हेतुता ।

६ चतुर्थ पृष्ठ स्तोत्रीयतृचः ।

७ सन्तान हेतुता ।

८ गातव्यसाम प्रदर्शनं ।

९ अच्छावाक साम कार्यत्र ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ प्रतिपत्तृच सवन सङ्गतिः ।

२।३।६ तृचान्तर विधानं ।

४ अस्तमाहः सङ्गतिः ।

५ अक्षर पंक्तिच्छन्दोविधानं ।

७ गायत्र साम ब्राह्मणातिदेशः ।

८ विहिततृच सामान्तरं ।

९ सामसाध्यं फलं ।

१०।१२।१६।१८।२०।२१।२४।२५ सामान्तर विधानं ।

११।१७।१९।१।२२६ सामान्तरस्तुतिः ।

१३।२२ अहः सङ्गतिः ।

१४ संज्ञानिर्व्वचनं ।

१५ तत्फलकथनं ।

२७ आवृत्त सामान्तरं ।

२८ शुद्धाशुद्धीय निर्व्वचनं ।

२९ ब्राह्मणातिदेशः ।

३० । ३२।३४।३६ सामान्तरकथनं ।

३१।३३।३५।३७।३८ तद्विधान स्तोत्रं ।

३९ स्तोत्रोपसंहारः ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ उक्थ प्रथम स्तोत्रीय तृचः ।

२ द्वितीयोक्थ स्तोत्रीय तृचः ।

३ तृतीयोक्थ स्तोत्रीय तृचः ।

४ प्रथमोक्थ साम ।

५।९ तस्य स्तुतिः ।

६ द्वितीयोक्थ साम ।

७ पापक्षयहेतुता ।

८ तृतीयोक्थ साम ।

१० स्तोम विधानं ।

इति द्वादशः खण्डः ।

चतुर्दशाध्यायः समाप्तः ।

पञ्चदशाध्याये ।

खण्डः १—१२ अष्टाचत्वारिंश स्तोम क्रमिः ।

इति तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

इति चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

इति पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ अन्यसाद्यःक्रैकाहः ।
२ अधिकारि निर्णयः ।
३।४।५। स्तोमक्लृप्तिः
६।७।८। प्रजासाधनता ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ चतुर्थ साद्यःक्रैकाहः ।
२ वेदितुः फलं ।
३।४ स्तोम विधानं ।
५ अधिकारि निरूपणं ।
६ स्वर्गफल साधनता ।
७।८ सर्व्व इष्टता स्तुतिः ।
९ स्तोम विधानं ।
१० दोषपरिहारः ।
११ तस्य स्तुतिः ।

इति पञ्चदशः खण्डः ।

अथ षोड़शः खण्डः ।

१ षष्ठ साद्यःक्रः ।
२।३।४।५।६।७। प्रजापतेरद्भिन्त्वं ।
८ स्तोभीया विधानं ।
९।१०। तस्याः स्तुतिः ।

इति षोड़शः खण्डः ।

इति षोडशाध्यायः ।

सप्तदशाध्याये

खण्डः १—१४ व्रात्य यज्ञा-
ग्निष्टोम समाप्तिः ।

अथ प्रथमः खण्डः ।

१ साधारण स्तोम विधानं ।
२।३।४ प्रकृते तद्योजनं ।
५ ब्रह्मसाम्नः स्तोभीया विधानं ।
६ गातव्य सामविधानं ।
७ समृद्धि हेतुता ।
८ निधन कार्य्यं ।
९।१० षोडशस्तोम प्रशंसा ।
११ शाखान्तरीय मतोपन्यासः ।
१२ स्वपक्ष निगमनं ।
१३ दोष वैलक्षण्यं ।
१४।१५ दक्षिणाकथनं ।
१६ व्रात्यता निर्हरण हेतुता ।
१७ गावोपि दक्षिणार्थाः ।

इति प्रथमः खण्डः ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

इति चतुर्दशः खण्डः ।

इति सप्तदशाध्यायः ।

अष्टादशाध्याये ।

खण्डः १——११ उपहव्य, ऋतपेय, शुनाशीर्य, वैश्यस्तोम, तीव्रसुत, वाजपेय, राजसूय विधिः ।

अथ प्रथमः खण्डः ।

इति प्रथमः खण्डः ।

२०।२१ यज्ञायज्ञीयापकर्षः।
२२ सामान्तर विधानं।
२३ उद्वंशीय प्रशंसा।
२३ तीव्रसोमोक्थसंस्थता।

इति पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

१ वाजपेयैकाहः।
२ स्तोत्राणां सामदर्श्यं।
३।४ आयाम विस्तारः।
५ प्राजापत्य स्तोमः।
६ वैचित्र्य प्रशंसा।
७।८ नाना वीर्यत्वं।
९ अनिरुक्त प्रशंसा।
१०।११ होतुः पृष्ठस्य रथन्तरत्वं।
१२।१३ वाजपेययाजि व्रतं।
१४ ब्राह्मणाच्छंसिपृष्ठे विशेषः।
१५ आर्भवेपकर्षणं।
१६।१७ अग्निष्टोमे साम प्रदर्शनं।
१८।१९ षोडशिसाम।
२०।२१।२२।२३ जामित्वाशङ्का परिहारः।

२४।२५।२६।२७ दोषाशङ्का परिहारः।

इति षष्ठः खण्डः।

अथ सप्तमः खण्डः।

१ वाजपेय शब्द निर्व्वचनं।
२ शुक्रवत्यत्वानुवादः।
३।४ वाजत्वानुवादः।
५ सप्तदशस्तोमानुवादः।
६।७.८ ऋत्विजां हिरण्यमालित्वं।
९ यजमानस्य लोकजयः।
१०।११ यजमानारोहणं।
१२ ब्रह्मणो वाजिसाम गानं।
१३ बृहद् गान प्रशंसा।

इति सप्तमः खण्डः।

अथ अष्टमः खण्डः।

१ पविष्टाग्निष्टोम विधानं।
२ द्वितीय सोमयागः।
३ सोम विशेष विधानं।
४ ब्रह्मवादि दर्शित दोषः।
५ दोष समाधानं।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

इति दशमः खण्डः ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

इति पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

इति षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

इति सप्तदशः खण्डः ।

अथ चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

अथ सप्तमः खण्डः।

अथ अष्टमः खण्डः।

अथ नवमः खण्डः।

अथ दशमः खण्डः।

एकविंशाध्याये

खण्डः १—१५ गर्गत्रिरात्रशेष चतूरात्र पञ्चरात्र वर्णनं ।

इति द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

इति तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

इति चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

इति पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

इति षष्ठः खण्डः।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

इति सप्तमः खण्डः ।

४ अन्त्याहः प्रशंसा ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ त्रिकद्रुक दशरात्रः ।

२ अस्य प्रशंसा ।

३ यथापगमे निवन्धः ।

४ संख्यायोगः ।

५ अग्निष्टोम त्रय कथनं ।

६ उक्थ्यानुष्ठानं ।

७ फल कथनं ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ कुसुरुविन्द दशरात्रः ।

२ अधिकारि विषयः ।

३ बहुत्व साधनत्वं ।

४ गव्य स्तोमत्वं ।

५ अह्न एकविंशत्वं ।

६ ज्योतिष्टोमत्वं ।

७ उक्थ्यार्थस्य प्रशंसा ।

८।९ चतुष्टोमत्वं ।

१० सप्रयोजन फलं ।

११ उक्थ्यार्थ प्रशंसा ।

इति पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

१ पशुसाधन दशरात्रः ।

२ प्रथमाहः स्तुतिः ।

३ चतुरहः प्रशंसा ।

४ अन्याह्नः प्रशंसा ।

इति षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

१ देवपुर दशरात्रः ।

२।३ तस्य प्रशंसनं ।

इति सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

१ विश्वजिदेकादश रात्रः ।

२ स्वाराज्य फलं ।

३ वेदितुः फलं ।

४ स्वाराज्य पद व्याख्या ।

६ वज्रधारस्य स्नानीयता ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ प्रजापति सप्तदशरात्रः ।

२ फल कथनं ।

३ आद्यपक्षाहः प्रशंसा ।

४ द्वादशाहः प्रशंसा ।

५ ऋतुश्चरात्रि प्रशंसा ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ देवाष्टादश रात्रः ।

२ अन्नवत्व साधनता ।

३ मनुष्योचितान्नवत्वं ।

४ अन्नवत्वकामैरनुष्ठेयता ।

५ सर्व्वायुः साधनत्वं ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

१ वायोरेकोनविंशति रात्रः ।

२ पशुसाधनता ।

३।४ तत्प्रशंसा ।

५ स्वर्गसाधनत्वं ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ विंशति रात्रः ।

२ पुरुषफल साधनत्वं ।

३ अर्थवाद करणं ।

४।५।६ रात्रिसंख्या कथनं ।

७ रात्रि प्रशंसा ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ प्रथमैकविंशति रात्रः ।

२ पशुसाधनता ।

३ सप्तसंख्यासमर्थनं ।

४ पशुफलत्व करणं ।

५।६।७ लोकद्वय समृद्धिः ।

इति पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

१ द्वितियैकविंशति रात्रः ।
२ फल प्रदर्शनं ।
३ अनुष्ठातॄणां तत्फलं ।
४ पशुविशेषालम्भनं ।
५ पशुदेवता कथनं ।
६ सामिधेन्यां विशेषः ।
७ मनुसम्बन्ध प्रशंसा ।
८ शस्त्रकाल विशेषः ।
९ काल प्रशंसा ।
१० शस्त्रियामभयत्वं ।
११ विलास साधनता ।
१२ शत्रानुष्ठान प्रशंसा ।

इति षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

१ द्वाविंशति रात्रः ।
२ उक्तफल साधनता ।

इति सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

१ त्रयोविंशति रात्रः ।
२।३ प्रतिष्ठा साधनता ।
४ शस्त्रियां प्रतिष्ठितत्वं ।

इति अष्टादशः खण्डः ।

अथ ऊनविंशः खण्डः ।

१ प्रथम चतुर्विंशति रात्रः ।
२।३ स्वर्गोपपत्ति साधनता ।
४ षडहद्वय प्रशंसा ।
५।६।७ सप्तधा विभागः ।
८ सप्ताहः प्रशंसा ।
९।१० दशरात्र व्यवधानं ।
११ सन्तत्यर्थत्वं ।

इति ऊनविंशः खण्डः ।

अथ विंशः खण्डः ।

१ द्वितीय चतुर्व्विंशति रात्रः ।
२ आद्य षडहद्वयं ।
३ दशाहः प्रशंसा ।
४ सर्व्वरात्रि प्रशंसा ।

इति विंशः खण्डः ।

अथ एकविंशः खण्डः।

१ पञ्चविंशति रात्रः।
२।३ अन्नाद्य फलं।

इति एकविंशः खण्डः।

अथ द्वाविंशः खण्डः।

१ षड्विंशति रात्रः।
२।३ प्रतिष्ठा साधनता।
४ अहरैय प्रशंसा।
५ षडहः प्रशंसा।
६ दशाहः प्रशंसा।
७ सर्व्वेषां प्रशंसा।

इति द्वाविंशः खण्डः।

अथ त्रयोविंशः खण्डः।

१ सप्तविंशति रात्रः।
२ समृद्धि फलसाधनता।
३ प्रयोक्तृसंख्या प्राशस्त्यं।

इति त्रयोविंशः खण्डः।

अथ चतुर्विंशः खण्डः।

१ अष्टाविंशति रात्रः।

इति चतुर्व्विंशः खण्डः।

अथ पञ्चविंशः खण्डः।

१ एकोनत्रिंश रात्रः।
२।३ श्रीफल साधनता।
४ प्रतिष्ठां फलं।

इति पञ्चविंशः खण्डः।

अथ षड्विंशः खण्डः।

१ त्रिंशद्रात्रः क्रतुः।
२ अन्नाद्य साधनता।
३ प्रतिष्ठां फलं।

इति षड्विंशः खण्डः।

अथ सप्तविंशः खण्डः।

१ एकत्रिंशद्रात्रः।
२ अन्नाद्यस्याभिपूर्बता।

अथ नवमः खण्डः ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

इति ताण्ड्यब्राह्मणसूची समाप्ता ।